रुद्रयामलम्

[उत्तरतन्त्रम्]

(प्रथमो भागः)

सम्पादकः

आचार्यश्रीरामप्रसादत्रिपाठी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः
वाराणसी

योगतन्त्र-ग्रन्थमाला
[सप्तमं पुष्पम्]

रुद्रयामलम्

[उत्तरतन्त्रम्]
(प्रथमो भागः)

सम्पादकः
आचार्यश्रीरामप्रसादत्रिपाठी
व्याकरण-वेद-तन्त्रागमविभागाध्यक्षचरः
वेदवेदाङ्गसंकायाध्यक्षश्च
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

YOGATANTRA-GRANTHAMĀLĀ

[Vol. VII]

RUDRAYĀMALAM

(PART ONE)

Edited by

ĀCĀRYA ŚRĪ RĀMAPRASĀDA TRIPĀṬHĪ

Ex. Professor & Head of Department

of

Vyākaraṇa-Yoga-Tantra & Āgama

Sampurnanand Sanskrit University

Varanasi

VARANASI

1991

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

□

Published by—
Dr. Harish Chandra Mani Tripathi
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

□

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002.

□

Second Edition—1000 copies.

Price—Rs. 132.00

□

Printed at—
Ratna Printing Works
B 21/42 A, Kamachha,
Varanasi-221 010.

योगतन्त्र-ग्रन्थमाला

[सप्तमं पुष्पम्]

रुद्रयामलम्

[उत्तरतन्त्रम्]

(प्रथमो भागः)

सम्पादकः
आचार्यश्रीरामप्रसादत्रिपाठी
व्याकरण-योग-तन्त्रागमविभागाध्यक्षचरः,
वेदवेदाङ्गसंकायाध्यक्षचरश्च
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

वाराणस्याम्

२०४७ तमे वैक्रमाब्दे　　१९१२ तमे शकाब्दे　　१९९१ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी।

□

प्रकाशकः—
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१ ००२.

□

द्वितीयं संस्करणम्, १००० प्रतिरूपाणि

मूल्यम्—१३२-०० रूप्यकाणि

□

मुद्रकः—
रत्ना प्रिंटिंग वर्क्स
बी २१/४२ ए, कमच्छा,
वाराणसी-२२१ ०१०.

प्ररोचना

पण्डितवर्य**श्रीरामप्रसादत्रिपाठि**महोदयैः सम्पादितो भूमिकासंवलितश्च **रुद्रयामल**ग्रन्थोऽधुना प्रकाश्यतामानीयते। सम्प्रति प्रथमः खण्डः पुरस्क्रियते। तदनु कालेन द्वितीयः खण्डोऽपि प्रकाशयिष्यते। रुद्रयामले विशेषेण विवेच्यविषयस्तन्त्रसाधनासम्बद्धदेशकालानां मन्त्ररहस्यस्य, स्वररहस्यस्य, षट्चक्रादिदेवतानां रहस्यस्य चेति भूमिकायां विद्वद्वर्यैः मालिनेः स्वरूपविमर्शप्रकरणे व्याकरणागमदृष्ट्या सूक्ष्मतया वर्ण्यविषयो व्यवारि। पण्डितवर्यैः तन्त्राणां वेदाविरोधित्वविषये नूतना उपपत्तयः प्रदर्शिताः। पटलशः संक्षेपेण रुद्रयामलस्य विषयोऽपि वर्णितः। यत्र तत्र संक्षिप्ताः पादटिप्पण्योऽपि संयोजिताः। रुद्रयामलग्रन्थ एकः खलु आकरग्रन्थः, यत्र त्रिपुरसुन्दर्युपासनाविषये विविधानां रीतीनां पद्धतीनाञ्च समाकलनं विद्यते। सम्प्रदायानां परिचयोऽपि विशदतया प्रस्तुतः। एभिर्गुणै रुद्रयामलग्रन्थस्तन्त्रशास्त्राध्येतॄणां कृते महते परितोषाय भविष्यतीति आशासे। एतदर्थं पण्डितवर्यान् श्रीरामप्रसादत्रिपाठिमहोदयान् सभाजयामि।

वाराणस्याम्,
महाशिवरात्रिपर्वणि
२०४७ तमे वैक्रमाब्दे,
(१२।२।१९९१ तमे खैस्ताब्दे)

विद्यानिवासमिश्रः
कुलपतिः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

प्रास्ताविकम्

(प्रथमसंस्करणस्य)

यद्यपि विश्वस्मिन् संस्कृतवाङ्मयं निस्संशयं सर्वेभ्यो वाङ्मयेभ्यः पुरातनतमं चकास्ति, तथापि योरुपीया विद्वांसः प्रयतमाना दृश्यन्ते ग्रीकलैटिनाऽवेस्तादिभाषाणां संस्कृतसमकालिकत्वसाधनाय; किन्तु जनजीवनकल्याणदृग्भिर्भारतीयमनीषिभिः प्रतिक्षेत्रं यादृशं वाङ्मयं संदृब्धम्, अनितरसाधारणं तादृशं खलु पुरातनतमं सदपि नूतनतमं कस्यामपि भाषायां नाधिगम्यत इति व्याहृतौ नास्ति कश्चिदपि प्रौढिलेशः। एकैकस्मिन् शास्त्रेऽपारो वाङ्मयपारावारव्यापारप्रसारो भारतीयसंस्कृतिसुवासेन सार्धमेव पारेजम्बूद्वीपमपि क्षेत्राणि प्लावयामासेति साम्प्रतं तदीयं समग्रमाकलनं चिरकालिकं महान्तमध्यवसायं प्रतीक्षते।

शास्त्रेष्वन्यतमं शिवोक्तं तन्त्रशास्त्रं चतुष्षष्टिसंख्याकं वर्णितम्। तेषु चतुष्षष्टिसंख्याकेषु तन्त्रग्रन्थेषु 'राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम्' इत्युक्त्या यद्यपि रुद्रयामलस्यापि समावेशो दृश्यते, तथापि 'सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च' इत्यादिलक्षणात् तन्त्राद् अष्टलक्षणात्मकं यामलं ततो विशिष्टमिवाभिहितम्—

सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम्।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च।
युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्॥ इति।

अष्टलक्षणात्मकमपि यामलं वाराहीतन्त्रे षड्विधमुक्तम्—१. आदियामलम्, २. ब्रह्मयामलम्, ३. विष्णुयामलम्, ४. रुद्रयामलम्, ५. गणेशयामलम्, ६. आदित्ययामलं चेति। विष्णुयामलब्रह्मयामलयोरनन्तरं रुद्रयामलस्योपदेशादुत्तरतन्त्रतया तत् प्रसिद्धिमुपगतम्। यथा रुद्रयामलस्यैवारम्भे—

परा-श्रीपरमेशानीवदनाम्भोजनिःसृतम्।
श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलम्॥ १।

शक्तियामलमाख्यातं ब्रह्मणस्तुतिहेतुना।
ब्रह्मयामलवेदाङ्गं सर्वं च कथितं प्रिये॥ २।

इदानीमुत्तराकाण्डं वद श्रीरुद्रयामलम्।
यदि भाग्यवशाद् देवि तव श्रीमुखपङ्कजे॥ इति।

सर्वेषां यामलानां श्लोकसंख्या पृथक् पृथग् निर्धारिता वर्तते। यथा—

यामलाः षट् च संख्यातास्तत्रादावादियामले।
द्वाविंशच्च सहस्राणि त्रयस्त्रिंशच्छतानि च॥

द्वितीये ब्रह्मसंज्ञे ते द्वाविंशतिश्च संख्यया ।
सहस्राणि शतान्यत्र तान्येव कथितानि च ॥
तावत्संख्यासहस्राणि शतानि परिसंख्यया ।
विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले ॥
कालसंख्यासहस्राणि वेदसंख्याशतानि च ।
पञ्चषष्टिस्तथा श्लोकाः कनिष्ठे रुद्रयामले ॥ इति ।

एवं तावद् यद्यपि रुद्रयामलमुक्तेषु यामलेषु कनिष्ठमाख्यातमिति तदीया श्लोकसंख्या ३४६५ इतीह प्रसिध्यति, तथापि महासिद्धिसारस्वततन्त्रानुसारेण —

न शक्यं विस्तराद् वक्तुमपि वर्षशतैरपि ।
संक्षेपाद् वै प्रवक्ष्यामि लोककल्पोक्तवर्त्मना ॥
दिवि देवे नवलक्षं पाताले ब्रह्मशासने ।
लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च ॥

श्लोकसंख्या निर्धारयितुं न पार्यते । यथा पुराणानि भारतीयसंस्कृतेर्विश्वकोशात्मकानि प्रतिज्ञायन्ते, तथा तन्त्रशास्त्रं साधनाव्यापारदिशि ततोऽपि समृद्धतरं नाम विलसति । महाविश्वेश्वरतन्त्रानुसारेण तल्लक्षणानि पुराणलक्षणेभ्योऽप्यधिकानि—

सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च ।
देवतानां च संस्थानं तीर्थानां चैव वर्णनम् ॥
तथैवाश्रमधर्मंश्च विप्रसंस्थानमेव च ।
संस्थानं चैव भूतानां यन्त्राणां चैव निर्णयः ॥
उत्पत्तिर्विबुधानां च तरूणां कल्पसंज्ञितम् ।
संस्थानं ज्योतिषां चैव पुराणाख्यानमेव च ॥
कोषस्य कथनं चैव व्रतानां परिभाषणम् ।
शौचाशौचस्य चाख्यानं नरकाणां च वर्णनम् ॥
हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम् ।
राजधर्मो दानधर्मो युगधर्मस्तथैव च ॥
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते ॥ इति ।

वस्तुतस्तु तन्त्रशास्त्रमितोऽप्यधिकान् वर्णनकोणानधितिष्ठतीति साकल्येन तल्लक्षणनिर्धारणं नावाप्यते ।

रुद्रयामलतन्त्रस्य यद् द्वितीयं संस्करणं १८९२ खैस्ताब्दे श्रीजीवानन्दविद्यासागरभट्टाचार्येण कालिकातानगर्यां प्रकाशितम्, तस्य पटलेषु श्लोकसंख्यायां चास्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीयसंस्करणस्य पटलश्लोकसंख्यातः पर्याप्तं भेदो भवति । विदुषां जिज्ञासूनां च ज्ञानार्थमुभयोस्तुलनात्मकविवरणसूचीह प्रस्तूयते—

पटलाः	श्लोकाः	जीवा०	पटलाः	श्लोकाः	जीवा०
१	२४४	२४५	३५	४५	४५
२	१६२	१६१	३६	२१०	२०६
३	१४५	१४०	३७	३५	३५
४	१९२	१८६	३८	५८	५७
५	४५	४४	३९	३४	३०
६	१०६	१०२	४०	२३	२२
७	९४	९३	४१	४६	४५
८	६७	६७	४२	१४८	१३८
९	४४	४४	४३	३७	४०
१०	१८५	१९३	४४	८७	८६
११	७५	७६	४५	३८	३७
१२	५३	४९	४६	५८	५६
१३	९०	९०	४७	५७	५८
१४	७४	७४	४८	२८२	२७४
१५	६६	६६	४९	३२	३१
१६	४६	४४	५०	३३	३२
१७	१६३	१६३	५१	७३	७१
१८	८३	८३	५२	२१२	२०९
१९	५०	४९	५३	२५	२३
२०	४३	४२	५४	७७	७३
२१	११४	११३	५५	३४	३३
२२	१०९	१०८	५६	१६	१६
२३	११४	११३	५७	७४	७०
२४	१४४	१४३	५८	४३	३८
२५	१२९	१२९	५९	३९, २६	३८
२६	१४८	१४५	६० (जीवा० ६३)	२३	१०३
२७	१०५	१०४	६१ (जीवा० ६४)	२४२	३५
२८	१०२	९९	६२ (जीवा० ६५)	२२	१४०
२९	४३	४१	६३ (जीवा० ६६)	८२	२२
३०	४१	३७	६४		१६६
३१	४६	४२	६५	२२	२२
३२	४३	३२	६६ (जीवा० ६१)	३८	७४
३३	६५	६५	६७ (जीवा० ६२)	१२६	२२
३४	५७	६१			

६८ तः ९० पटलान्तं यावद् या सामग्रीह विश्वविद्यालयीये संस्करणे लभ्यते, सा जीवानन्दीये संस्करणे न दृश्यते। इह संस्करणे पाठभेदात् पटलसंख्या द्विरावृत्तेति सा पञ्चविंशपटलादग्रे व्यत्यस्ता।

स्वनामधन्यानां म० म० गोपीनाथकविराजमहोदयानां निर्देशने चतुर्थभागस्यास्य तन्त्रसंग्रहस्य सम्पादनं पूर्ववर्तिभागवद् योगतन्त्रविभागेन समारब्धमासीत्। इह सम्पादनविधौ तेन क० ख० ग० इति सङ्केतैस्तिस्रो मातृका उपयोजिता अभूवन्, यासां विवरणं कविराजमहोदयैस्तदीये तन्त्रसूचीग्रन्थे समुपन्यस्तम्। द्विसप्ततितमपटलं यावदेव पाठभेदविवरणं दृश्यते; किन्त्विह मुद्रितस्य जीवानन्दविद्यासागरसम्पादितस्य रुद्रयामल-संस्करणस्य पाठभेदानां समुल्लेखो नास्ति। यद्यपि तत्र सन्ति भूयांसः पाठभेदाः, तथाप्यत्रान्तिमपुष्पिकागतैः पाठभेदैः सार्धमस्य संस्करणस्य पाठभेदानां तुलना निदर्शनार्थं प्रस्तूयते—

पटलम्			प्रस्तुते संस्करणे पाठाः	जीवानन्दसंस्करणे पाठाः
२.	अन्तिमपुष्पिका		महायन्त्रोद्दीपने	महामन्त्रोद्दीपने
३.	,,	,,	मन्त्रो०	तन्त्रो०
५.	,,	,,	तन्त्रो०	मन्त्रो०
८.	,,	,,	सिद्धि०	सिद्ध०
९.	,,	,,	यन्त्रो० सिद्धि०	तन्त्रो० सिद्ध०
१२.	,,	,,	वाशव०	पाशव०
१४.	,,	,,	चक्र०	चक्रसार०
१६.	,,	,,	×	वेदभाषापरिच्छेदे
१६.	,,	,,	भैरवभैरवी०	भैरवीभैरव०
१७.	,,	,,	,,	,,
१८.	,,	,,	,,	,,
१९.	,,	,,	अर्थ०	अर्थबोध०
२१.	,,	,,	भावार्थ०	भावप्रश्नार्थ०
३५.	,,	,,	साधनं०	पञ्चस्वरयोगसाधनं०
४८.	,,	,,	मन्त्रप्रकाशो नाम	षट्चक्रप्रकाशे
५८.	,,	,,	काकिनीश्वरपर्णपार्श्वं०	काकिनीपार्श्वं०

जीवानन्दसंस्करणे या सामग्री षष्टितमपटलस्य सप्तदशश्लोकादारभ्य द्विषष्टि-तमपटलं यावद् विद्योतते, सेह विश्वविद्यालयीये संस्करणे नोपलभ्यते। अस्य विश्वविद्या-लयीयस्य संस्करणस्य षष्टितमपटलस्यान्तिमपुष्पिकायां जीवानन्दसंस्करणस्य तु ६१-६३ पटलानामन्तिमपुष्पिकायां विषयभेदा विलोक्यन्ते।

प्रस्तुतं संस्करणम्

जीवानन्दविद्यासागरीये संस्करण एकस्या एव मातृकाया आधारेण पाठालोचनमन्तरा यथोपलब्धं मुद्रितं प्रकाशितं च। प्रस्तुते संस्करणे त्वाधारत्वेन स्वीकृताया मातृकायास्तिसृभिर्मातृकाभिः पाठभेदपरामर्शोऽस्य संस्करणस्य सम्पादने प्रमुखं वैशिष्ट्यम्। जीवानन्दविद्यासागरीयं संस्करणं षट्षष्टिपटलान्तं विभ्राजते। प्रस्तुतं संस्करणं तु नवतितमपटलान्तं विद्योतते। एवं तावदिह तदपेक्षया त्रयोविंशतिसंख्याकाः पटला अधिकाश्चकासति। यद्यप्युभयत्र पटलभेदेऽपि विषयभेदानां प्राज्यता वर्तते, तथापि बहूनि वैशिष्ट्यानि दृष्टिपथं नातिक्रामन्ति। योगतन्त्रग्रन्थमालायाः सप्तमप्रसूनतया विकचितमिदं संस्करणं तन्त्रविद्याया मर्मज्ञानां विपश्चितां प्रीणनाय जिज्ञासूनां च ज्ञानसंवर्धनाय सेत्स्यतीति ध्रुवं विश्वसिति।

वाराणस्याम्,
मातृनवम्याम्, २०३७ वै०
(२-१०-८० खै० गुरौ)

भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
निदेशकः
अनुसन्धानसंस्थानस्य

॥ श्रीहरिः शरणम् ॥

प्रस्तावना

ईश्वरजीवयोः कीदृशं स्वरूपम्? कीदृशश्च तयोः परस्परं सम्बन्धः? कीदृशं खलु बन्धमोक्षयोः स्वरूपम्? कथं नु किल प्रवर्तते सृष्टिसंहारयोः प्रक्रिया? ईदृशानां प्रश्नानां समाधानमुखेन बहोःकालात् प्रचलन्ती भारतीयदार्शनिकचिन्तनपरम्परा समास्ते। दर्शनं नाम आत्मानात्मविवेचको नियमविशेषः। शास्त्रमपि आत्मानात्मज्ञापकं साक्षात्परम्परया वा भवदिष्टप्राप्त्यनिष्टपरिहारोपायं वेदयच्छासकमपि भवति। बहुधा दर्शनशास्त्रयोरभेदेन विशेषणविशेष्यभावो दृश्यते–"दर्शनं शास्त्रम्" इति वाक्यप्रयोगेण। "आत्मा वाऽऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः", "तत्त्वमसि श्वेतकेतो! तद्ब्रह्म त्वं विद्धि, तद्विजिज्ञासस्व", "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्", "तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्" इत्याद्याः श्रुतयोऽपि दर्शनस्य शास्त्रत्वं प्रतिपादयन्त्यो वैदिकत्वमपि तस्य सम्यक् समर्थयन्ते। **शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायां**[1] भगवन्तं रुद्रमुद्दिश्य तावदेकोऽध्यायो "नमस्ते रुद्र मन्यव" इत्यादिर्नमस्कारानुवाकाभिधानो वर्तते। **श्वेताश्वतरोपनिषदि** शिवरुद्रयोः स्वरूपं दार्शनिकदृशा बाढं निरूपितमस्ति। एवं सति दर्शनविशेषाः शैवागमा निगमान् विरुन्धन्ति, न समन्वियन्तीति विप्रतिपद्यमानाः पण्डितम्मन्या न प्रमितवचना इति मन्यामहे।

आस्तिकानां सर्वेषामेव दर्शनानामागमानां वा स्रोतांसि वेदा एवेत्यत्र नास्ति कश्चन संशीतिलेशः। इयान् विशेषः—वेदाः परमेशितुर्निःश्वासभूताः स्वत एवाविर्भवन्ति, आगमास्तु पारम्पर्यपरत्वं भजन्ते। तेषामाद्य उपदेष्टा पार्वतीपतिर्विश्वनाथो भगवान् शिव एव पार्वतीमुपदिदेश तद्रहस्यजातम्। उक्तञ्च स्वच्छन्दतन्त्रे—

आगतं शिववक्त्रेभ्यो गतं च गिरिजामुखे।
मतं हि वासुदेवस्य तस्मादागम उच्यते॥ इति।

अनयोक्त्या स्पष्टं प्रतीयते यद्वासुदेवाभिमतमागमशास्त्रं भगवतः शिवात् श्रीपार्वतीश्रवणविषयतामगमत्।

इदमपि ध्येयम्—आगमोपदेशो गुरुपरम्परासम्बन्धमपेक्षमाणः किञ्चिदनुशासनमपि वेदयते, गुरव आगमैः शिष्याननुशासतीति कृत्वाऽऽगमानां शास्त्रत्वमपि मन्तव्यम्। आचार्येण हरिणाऽप्यत एव व्याकरणशास्त्रस्यागमत्वं स्पष्टतयोक्तम्—

"तद् व्याकरणमागम्य परं ब्रह्माधिगम्यते।
पर्वतादागमं लब्ध्वा………………" ॥ इत्यादि।

---

१. शु० य० वे० १६।२।४९।

ननु रुद्रयामलमुद्दिश्यैषा भूमिका लिख्यते, तस्य तु तन्त्रग्रन्थेषु परिगणनं क्रियते तन्त्ररहस्यविद्भिः। तत्र च शिवस्य शक्तेश्चाभेदः सिद्धान्तितोऽस्ति, आगमग्रन्थेषु तु शिवशक्त्योः पार्थक्येन प्राधान्यं विन्नियमाणं वर्तत इति। यामलग्रन्थानामागमत्वमस्ति न वा? इति संशये जागरूके आगमविषयिण्याश्चर्चाया उत्थापनमप्रासङ्गिकं प्रतिभातीति चेत्, उच्यते—तन्त्रागमयोः सकलशास्त्रे परस्परमभेदेन व्यवहारदर्शनात्।

तन्त्रशब्दार्थविमर्शः, आगमेनाभेदकथनं च

तन्यन्ते विस्तीर्यन्ते ऐहिकामुष्मिकाभ्युदयनिःश्रेयससाधका उपाया अनेनेति व्युत्पत्तिमादधानोऽस्ति तन्त्रशब्दः। तत्र 'तनु' विस्तारे इति तानादिकाद् धातोः करणेऽर्थे "सर्वधातुभ्यः ष्ट्रन्" इत्यौणादिकसूत्रेण ष्ट्रन्प्रत्यये सति तन्त्रशब्दो निष्पन्नो भवति। अथवा 'तत्रि' कुटुम्बधारणपोषणयोरित्यस्माच्चौरादिकाद् धातोः कर्मणि करणेऽधिकरणे वा "अकर्तरि च कारके संज्ञायाम्[१]" इति पाणिनीयसूत्रेण घञ्प्रत्यये कृते सति 'तन्त्र्यते यद्, येन, यत्र वा' इति व्युत्पत्तिभिः तन्त्रशब्दस्य साधुत्वं विधीयते। ततश्च "समाजस्य धारकत्वं पोषकत्वं वा तन्त्रत्वम्" इति, "नियमविशेषनियन्त्रितलोकत्वं तन्त्रत्वम्" इति वा लभ्यते। तथा चोक्तम्—

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते॥
व्यवहारः कथ्यते यत्र तथा चाध्यात्मवर्णनम्।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते॥ इति।

आगमशब्दार्थविचारः

आङ्पूर्वकाद् गम्धातोर्गत्यर्थकाद् भौवादिकाद् "ग्रहवृदृनिश्चिगमश्च"[२] इति पाणिनीयसूत्रेण कर्मणि करणेऽधिकरणे वा अप्प्रत्यये 'आगम्यते यो येन यत्र वेति विग्रहे' आगमशब्दो निष्पद्यते। ततश्च गतिः प्राप्तिः, ज्ञानं वा इति स्वीकृत्या सम्यक्प्राप्तिविषयः, सम्यक्प्राप्तिसाधनम्, सम्यग्ज्ञानाधिकरणमिति त्रयोऽर्था लभ्यन्ते। सम्यक्प्राप्तिविषयता मोक्षरूपपुरुषार्थस्यैव भवितुमर्हतीति मोक्षतत्त्वम्, मोक्षसाधनत्वम्, आगमत्वमिति आद्यविग्रहद्वयीयोऽर्थः। तृतीयविग्रहेण तु सम्यग् ज्ञानमात्मज्ञानमेव तदधिकरणमात्मैवेति आत्मैवागमपदार्थ इति वक्तुं शक्यते। आभिर्व्युत्पत्तिभिर्मोक्षतत्त्वस्य ज्ञापकत्वं साधनत्वम्, आत्मतत्त्वविवेचकत्वं वा आगमशास्त्रत्वमित्यायाति। तच्च समाजस्य पोषणमन्तरा न सम्भवतीति समाजपोषणनियमविशेषज्ञापकत्वे सति आत्मतत्त्वस्य ज्ञापकत्वमनुशासकत्वं वाऽऽगमत्वमिति पर्यवस्यति। समाजपोषकत्वं तन्त्रत्वमित्यत्र समाजपोषणं किमर्थमिति विचारे क्रियमाणे आत्मज्ञानार्थमिति उत्तरमायाति। एवं च तन्त्रपदार्थस्य फलमागमपदार्थः, आगमपदार्थस्य साधनं तन्त्रपदार्थः, द्वयोरनयोस्साध्यसाधनभावेनैव पूर्णता। अतश्च योगरूढ्या तन्त्रागमशब्दार्थयोः साम्यं दृष्ट्वा तान्त्रिकैरन्यैर्वा विद्वद्भिरभेदेनानयोर्व्यवहारः कृतः।

१. पा० सू० ३।३।१९; २. तदेव—३।३।५८।

तथा हि—मृगेन्द्रतन्त्रं मृगेन्द्रागमः, शैवतन्त्रं शैवागमः, भैरवतन्त्रं भैरवागम इत्यादि। तथा च "मालिनीविजयवार्तिके" (पृ० ३६-३८) तदनुगामिनि "तन्त्रालोक-विवेके" (भा० १, पृ० ३६-४१) शिवस्य पञ्चवक्त्रेभ्यो दशानां शैवागमानामष्टादशानां च रौद्रागमानां चतुःषष्टिसंख्याकानां च भैरवागमानामाविर्भावप्रकारो निरूपितोऽस्ति। तेषु स्थलेषु आगमशब्देन तन्त्रस्य व्यवहारः सुस्पष्टमभिहितः।

एवञ्च दर्शनशास्त्र-तन्त्र-आगमशब्देषु समानतया सामान्यविशेषभावेन वा कृतो व्यवहारोऽनुभूयत इति निष्कर्षः।

यामलतत्त्वविमर्शः

शैव-शाक्त-यामलभेदात्तन्त्रस्य त्रैविध्यमस्ति। शैवतन्त्रे शिवभट्टारकस्य, शाक्त-तन्त्रे शिवाभट्टारिकायाः, यामलतन्त्रे तु पुनर्द्वयोरनयोरभेदस्य वर्णनं कृतमस्ति। तत्र शिवतत्त्वमर्थरूपम्, शक्तितत्त्वं शब्दरूपम्, तस्य तत्त्वद्वयस्य भेदकल्पनाऽत्र तन्त्रे नैव कर्तुं शक्यते; अपि तु योऽयं शब्दः, सोऽर्थः, योऽर्थः, सोऽयं शब्द इति रीत्या येयं शक्तिः, सोऽयं शिवः, योऽयं शिवः, सेयं शक्तिरित्येष सिद्धान्तो यामलतन्त्रेऽभिमतोऽस्ति। यत्र च सामान्यविशेषयोः सामरस्येनावस्थितिः, सूर्यसोमादिद्वन्द्वात्मकपदार्थानामविनाभावेन चावस्थितिः, तत्रैव यामलतत्त्वस्य स्वरूपं परिपश्यन्ति तत्त्वविदः। युगलतत्त्वशब्देनाप्य-भिलप्यमानमिदं तन्त्रमिति निभाल्यताम्। शिवशक्त्योरुपासकः 'उत्तमः पशुः' इत्युच्यते। उक्तञ्च—

दुर्गापूजां शिवपूजां यः करोति पशूत्तमः।
अवश्यं यः करोति स पशुरुत्तमः स्मृतः[1]॥ इति।

द्वयोः सामरस्यं यस्मिन्नुपासके समुदेति, सोऽमृतमास्वदते। उक्तञ्च—

चिच्चन्द्रः कुण्डलीशक्तिः सामरस्यमहोदयः।
व्योमपङ्कजनिःष्यन्दसुधापानरतो नरः[2]॥ इति।

यामलतन्त्रस्य भेदविमर्शः

यामलतन्त्राणि कियन्ति सन्ति? अत्र संख्यानिर्धारणं कर्तुमशक्यमस्ति, तथापि वाराहीतन्त्रेऽष्टलक्षणात्मकयामलस्य षाड्विध्यं निर्दिष्टमस्ति, आदियामल-ब्रह्मयामल-विष्णुयामल रुद्रयामल-गणेशयामलादित्ययामलभेदात्। तत्र सम्पूर्णानन्दसंस्कृतविश्व-विद्यालये सरस्वतीभवन एकस्यैव कृष्णयामलस्योपलब्धिर्भवति। रुद्रयामलं तूत्तरतन्त्रा-त्मकं द्वितीयसंस्करणात्मना पुनर्मुद्राप्यते **सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन** वाराणसी-स्थेन। अतिरिक्तमपि यामलं प्रसिद्धमस्ति। यथा—ब्रह्मयामल-विष्णुयामल-रुद्रयामल-जयद्रथयामल-स्कन्दयामल-उमायामल-लक्ष्मीयामल-गणेशयामलान्यष्टौ, इत्यर्थरत्नावली-कारेणोक्तम्। ब्रह्मयामल-विष्णुयामल-स्वच्छन्दयामल-रुरुयामल-आथर्वणयामल-रुद्रयामल-

---

१. रु० या० ५।५; २. तत्रैव—२६।१३७।

वेतालयामलानि सप्तैव वर्णितानि श्रीकण्ठ्याम्। ब्रह्मयामले रुद्रयामल-स्कन्दयामल-ब्रह्मयामल-विष्णुयामल-यमयामल-वायुयामल-कुबेरयामल-इन्द्रयामलानि कीर्तितानि सन्ति। एषु ग्रन्थरूपेणोद्धरणरूपेण वेमानि यामलानि समुपलभ्यन्ते, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयीये योगतन्त्रविभागे। विष्णुयामलं स्कन्दप्रदीपिकायामुत्पलदेवेन, स्कन्दयामलं च तन्त्रालोकेऽभिनवगुप्तेन निर्दिष्टमस्ति। प्राणतोषिणीकारेण श्रीरघुनन्दन-पण्डितेनापि स्मृत एते यामले। तत्र विष्णुयामलस्य ब्रह्मयामलस्य जयद्रथयामलस्य च मातृका अपि समुपलभ्यन्ते। गणेशयामलस्य ग्रहयामलस्य च मातृका आफ्रेख्टबृहत्सूच्यां निर्दिष्टाः। एतेभ्योऽतिरिक्तान्यपि देवीयामल-वीरयामल-संकर्षणीयामलानि क्रमशस्तन्त्रा-लोके, तद्विवेके, स्वच्छन्दोद्द्योते, विज्ञानभैरवविवरणे, तन्त्रालोकविवेके च निर्दिष्टानि सन्ति। शक्तियामल-कृष्णयामलयोर्मातृकाः सरस्वतीभवनपुस्तकालये दृश्यन्ते। आफ्रेख्ट-बृहत्सूच्यामपि वर्ततेऽनयोः सङ्केतः। भैरवयामलं लक्ष्मीधरायां सौन्दर्यलहरीटीकायाम्, कामकलाविलासटीकायां चिद्वल्ल्याम्, विज्ञानभैरवटीकायां विज्ञानेन्दुकौमुद्यां चास्ति सङ्केतितम्।

रुद्रयामलविषये कश्चन विशेषः

चतुःषष्टिसंख्याकेषु तन्त्रग्रन्थेषु "**राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम्**" इत्युक्त्या यद्यपि रुद्रयामलस्यापि समावेशो दृश्यते, तथापि "सर्गश्च प्रतिसर्गश्च मन्त्र-निर्णय एव च" इत्यादिलक्षणलक्षितात् तन्त्राद् अष्टलक्षणात्मकं यामलं तदपेक्षया वैलक्षण्येनाभिहितम्। तथा हि—

> सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम्।
> क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च।
> युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम्॥ इति।

अत्र सृष्टिश्चेत्यत्र चशब्देन प्रतिसर्गस्य ग्रहणम्, अथवा 'युगधर्मश्च' इत्यत्र 'युगैः सहितो धर्मः' अनया रीत्या मध्यमपदलोपिसमासेन युगलः, पृथग्धर्मस्य ग्रहणमिति रीत्याऽष्टलक्षणत्वं यामलस्य बोध्यम्। अथ च—"श्रुतं देव मया सर्वं रुद्रयामल-सम्भवम्" इत्यस्मिन् विज्ञानभैरवस्यादिमे पद्ये, "रुद्रयामलमन्त्रस्य सारमद्यावधारितम्' इत्यस्मिन् तदीयोपान्त्यपद्ये च रुद्रयामलस्य निर्देशः स्पष्टमुपलभ्यते। किञ्च, 'एवं मन्त्र-फलावाप्तिरित्येतद्रुद्रयामलम्' इत्यस्मिन् **परात्रिंशिका**न्तिमश्लोकेऽपि रुद्रयामलस्य प्रशंसामयी चर्चाऽऽयाति। **नित्याषोडशिकार्णवे** चतुःषष्टितन्त्रपरिगणनावसरे यामलाष्टक-मध्येऽस्य गणना विद्यते। 'अर्थरत्नावल्यादिषूद्धृतमुत्तरषट्कमस्यैव भाग इति तत्पुष्पिकावाक्येभ्यः परिज्ञायते। एवं विशिष्टेष्वागमग्रन्थेषु निर्दिष्टस्यास्य वैशिष्ट्यं प्राचीनत्वं च निर्विवादम्। ग्रन्थस्यास्य मातृकाः प्रायः सर्वेष्वेव ग्रन्थालयेषु समुप-लभ्यन्ते। सन्ति च स्तोत्रपटलादीनि बहूनि पुस्तकानि रुद्रयामलान्तर्गततया निर्दिष्टानि।

मातृकास्वरूपविमर्शः

अखिलमनाहतमूर्तिमत्युत्तीर्णस्वरूपिणी तरति ।
कायति नानानामप्रपञ्चरूपेण मातृका देवी ॥

इत्येवंरूपेण मातृकाया निरूपणं कृतं **सौभाग्यसुधोदये**[1] ।

अत्रायमाशयः—परपरामर्शात्माऽनुत्तरः प्रकाश एव परं तत्त्वम्, स एव स्वीयस्वातन्त्र्याख्यशक्त्या विश्वस्यावभासनेच्छया प्रथमं स्वात्मनि शिवशक्तिरूपतामवभासयति, अकारादिहकारान्तां मातृकामुल्लासयतीति यावत् । अनुत्तरलिपिरत्राकारः, विमर्शलिपिश्च हकारः । अयमेवार्थः—

अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ।
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ॥

अनेन सङ्केतेन निरूप्यते । तन्त्रालोकेऽपि अयमर्थः स्पष्टं प्रदिपादितः । तथा हि—

अकुलस्यास्य देवस्य कुलप्रथनशालिनी ।
कौलिकी सा परा शक्तिरवियुक्तो यया प्रभुः[2] ॥ इति ।

मातृका मालिनी कालिका शब्दराशिरित्येवं पदैः कीर्त्यमाना परावाग्रूपा सर्ववर्णोद्भवहेतुभूता वर्णसंघातजनितशरीराणां सप्तकोटिसंख्याकानां महामन्त्राणां प्रकाशिकेयं मातृका भगवती । उक्तञ्च तन्त्रसद्भावे—

सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका ॥ इति ।

"षट्त्रिंशत्तत्त्वप्रकाशिकाऽनाहतपरमशिवस्वरूपा संविदेव मातृका" इत्युक्तम् ऋजुविमर्शिन्याम्"[3] ।

वाक्चतुष्टयरूपाया मातृकायाः स्वरूपम्

"वाक्चतुष्टयोदयविरामप्रथासु स्वरः प्रथते" (सू० ७) इत्यादिभिर्वातूलनाथोक्तसूत्रैः मातृकाया वाक्चतुष्टयरूपेण वर्णनं कृतम् । तच्च अनाहतहतोत्तीर्णा परावाक्, अनाहतहता पश्यन्ती, अनाहता मध्यमा, हता च वैखरी, एवञ्च परावागात्मानाहतेत्यत्रानाहतपदेन अनाहतहतोत्तीर्णाऽवस्थैवाभिप्रेता ऋजुविमर्शिनीकारस्यापि । सा च परावाक् स्वस्वातन्त्र्योल्लासस्पन्दादेकाऽप्यनेकधा वितता भवति । ततश्च वर्णाम्बिकायाः पश्यन्तीरूपमभिव्यक्तं भवति । तच्चैकादशधा विभज्यते । तथा हि—अकारस्य शिवरूपस्य वामा-ज्येष्ठा-रौद्र्यम्बिकाख्यकलाचतुष्टयं तत्समष्टिरूपमकार इति मिलित्वा पञ्चकम्, शक्तिरूपस्य हकारस्य इच्छाज्ञानक्रियाशान्ताख्यकलाचतुष्टयं तत्समष्टिरूपेण

---

१. सौ० सु० १।६; २. तन्त्रा० ३।६७; ३. ऋ० वि० पृ० ९ ।

हकारेण सह पञ्चकम्। अनया रीत्या शिवशक्तिभ्यां द्वाभ्यां वर्णाभ्यामाद्यन्ताभ्यां दशकं जातम्। तयोः परस्परं बीजाङ्कुरन्यायेन सामरस्यादेकमित्येकादशधा पश्यन्ती। निरूपितं चैतत्–कामकलाविलासे[१], योगिनीहृदयदीपिकादौ च[२]। सौभाग्यसुधोदयेऽपि पश्यन्त्याः स्वरूपमुक्तम्—

एकाऽप्येकादशधा जाता माता परैव पश्यन्ती।
पश्यति सर्वं स्वात्मनि करणानां सरणिमपि यदुत्तीर्णा।
तेनेयं पश्यन्तीत्युत्तीर्णेत्यप्युदीर्यते माता[३]॥

इतः परं पश्यन्त्या अनाहतात्मा नादनवकमयी मध्यमा वाग् भवति।

तत्र नादनवकं च—

शून्यः स्पर्शस्तथा नादो ध्वनिर्बिन्दुस्तथैव च।
शक्तिबीजाक्षरं चैवेत्यष्टधाऽनाहतः स्मृतः॥

इति सङ्केतपद्धतिवचनाद् विकृतनादा इमे शून्यादयोऽष्टौ, तत्समष्टिरूपं नवममित्येवं नादनवकं बोध्यम्, यतश्चेयं पश्यन्तीव न केवलमुत्तीर्णा, नाऽपि बहिः स्फुटतरनिखिलावयवा; किन्तु हृदयदेशस्था मध्यगता इति मध्यमशब्देनाभिलप्या। ततश्च नवनादात्मिकया मध्यमया नववर्णात्मिका वैखरीवागभिव्यक्ता भवति। वै = निश्चयेन स्पष्टतरत्वात् खं कर्णविवरवर्तिनभोरूपश्रोत्रेन्द्रियं राति गच्छतीति वैखरी इत्येवमस्य पदस्य निरुक्तिर्दर्शिता[४]।

व्याकरणदर्शनाभिमता वाक्चतुष्टयरूपा मातृका

व्याकरणदर्शने महाभाष्ये महामुनिना पतञ्जलिना वाक्चतुष्टयी ऋग्वेदप्रमाणसनाथिता प्रत्यपादि। तथा हि—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहायां त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति[५]॥

यद्यपि भाष्यकारेण चत्वारि पदजातानि नामाख्यातोपसर्गनिपातश्चेत्येवं व्याचक्षाणेन परा-पश्यन्तीप्रभृतीनां चर्चा न कृता। तथापि गुहायां त्रीणि निहितानि नेङ्गयन्ति, न चेष्टन्ते, न निमिषन्तीत्यर्थ इत्येवं व्याख्यानेनेमाश्चतस्रो वाचो भाष्यकारस्याप्यभिमता इत्यवगन्तव्यम्।

---

१. कामकलाविलासे—श्लो० २३-२४, पृ० ४३; २. योगिनीहृदयदीपिका—पृ० १७०।
३. सौ० सु० पृ० ३०७।
४. वरिवस्यारहस्यप्रकाशे (पृ० १७) सर्वोऽयं विषयः प्रपञ्चितः।
५. म० भा० पस्पशा० पृ० ३२।

व्याख्यातं चोद्द्योतकारेण श्रीमता नागोजिभट्टेन तथैव[1] ।

अथ च वैयाकरणसिद्धान्तलघुमञ्जूषायामपि श्रीनागोजिभट्टेन एताश्चतस्रो वाचो व्याख्याताः सन्ति । तथा हि समस्तस्य जगत उपादानभूतं बिन्दुतत्त्वमेकम्, तच्च सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते । ज्ञातस्यार्थस्य विवक्षां कुर्वतः पुरुषस्येच्छया प्रयत्नो जायते, तेन प्रयत्नेन योग एव मूलाधारस्थपवनस्य संस्कारः, तेनाभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठं भवति, अतः स्पन्दरहितं परावागित्युच्यते । तदेव नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तं मनोविषयः 'पश्यन्ती' इत्युच्यते । एतद्द्वयं सूक्ष्मतमसूक्ष्मतरमीश्वराधिदैवं योगिनां समाधौ निर्विकल्पक-सविकल्पकज्ञान-विषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्तं तत्तदर्थ-विशेष-तत्तच्छब्दविशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्या परश्रोत्रग्रहणा-योग्यत्वेन सूक्ष्मा 'मध्यमावाग्' इत्युच्यते । स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेन उपांशुशब्दप्रयोगे च श्रूयमाणा सा । एतदवस्थात्रयमपि सूक्ष्मतम-सूक्ष्मतर-सूक्ष्मप्रणव-रूपम् ।

सैव चास्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदेवत्या 'वैखरीवाग्' इत्युच्यते । प्रणव एव व्यानोदानाभ्यां सह वैखरीरूपं प्रतिपद्यते । अत एव हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम् । तथा हि—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम्[2] ।। इति ।

मातृकावर्गविमर्शः

वर्णसंघातरूपामाकृतिमनुभवन्तीयं मातृका देवी बीजयोन्यात्मना[3] विभक्ता सप्तवर्गेषु अष्टवर्गेषु नववर्गेषु वाऽत्मानं प्रसारयतीति तेषु तेषु शास्त्रेषु निर्णीतमस्ति । तत्र प्रपञ्चसारे—"अकचटतपयाद्यैः सप्तभिर्वर्णवर्गैः" इति प्रथमे मङ्गलश्लोके सप्त-वर्गात्मनोक्ता । नित्याषोडशिकार्णवे शैवसिद्धान्तागमेषु चाष्टवर्गात्मना प्रतिपादिताऽ-स्ति । मालिनीविजये तु "नवसु वर्णेषु विराजमाना मातृका" इति वर्णितमस्ति[4] । सङ्केतपद्धतिं प्रमाणयद्भिः शिवानन्द-विद्यानन्दामृतानन्दादिभिराचार्यैरपि स्वस्वग्रन्थेषु "अष्टवर्गात्मना नववर्गात्मना चावस्थितेयं मातृकादेवी" इत्युक्तम् ।

---

१. वै० सि० ल० म० शक्त्याश्रयनिरू० पृ० १४७-४८ ।

२. वा० प० १।१४४ ।

३. बीजयोन्यात्मकाद् भेदाद् द्विधा बीजं स्वरा मताः । कादिभिश्च स्मृता योनिः । (मा० वि० ३।१०-११) ।

४. मालिनीविजयोत्तरे—३।११ ।

अत्रायमभिसन्धिः—तत्र तत्र तन्त्रग्रन्थेषु सप्तमातरः प्रसिद्धा एव, सिद्धान्तशिखामणौ मातृतन्त्राणि प्रसिद्धानि। अतः सप्तमातृकामाश्रित्य सप्तवर्गात्मिका मातृका तान्त्रिकाचार्यैरभ्युपेता। पुनश्च महालक्ष्म्यास्तत्र परिगणनेन नित्याषोडशिकार्णवेऽष्टवर्गात्मिकायास्तस्याः स्वीकारः प्रचलितः।

मातृकावर्णविमर्शः

मातृकाया वर्गसंख्याविषये यथा मतभेदो वर्तते, तथैव वर्णसंख्याविषयेऽपि मतभेदः। तथा हि—"सप्तचत्वारिंशद्वर्णात्मिका वैखरीवाक्" इत्युक्तं सङ्केतपद्धतौ। तत्र च "दश पञ्च च बिन्द्वन्ताः स्वरा मताः"[1] इति सौभाग्यसुधोदयवचनमाश्रित्य पञ्चदश स्वरा गणिताः, ततश्च पञ्चविंशतिः कादिस्पर्शाः, यरलवशषसाश्चेति सप्त, मिलित्वा सप्तचत्वारिंशद् वर्णा भवन्ति वैखर्यां वाचि। अस्मिन् मतेऽवतरन्ति कतिपये सन्देहाः। यथा—अकारवद् हकारस्यापि तत्र परिगणनं कथं न? किं चैकादशधाभिन्नायां पश्यन्त्यां वाचि हकारस्येवाकारस्यापि गणना क्रियते? तत्राकारस्य परिगणनं मा भून्नाम, क्षकारलकारयोस्समावेशे नववर्गात्मिका कथं भवति? स्वरेषु अनुस्वारवद् विसर्गस्यापि ग्रहणं कथं न? इत्यादिः। अर्थरत्नावलीमनुसृत्य सप्तषष्टिर्वर्णाः प्रोक्ताः। तथा हि द्वाविंशतिः स्वराः, पञ्चविंशतिः स्पर्शाः, दशधा व्यापकाः, यमाश्चत्वारः, जिह्वामूलीयोपध्मानीयौ द्वौ, अनुस्वारविसर्गौ, कलानादौ चेत्येवमेषां सङ्कलनया सप्तषष्टिर्वर्णा आयाताः। सङ्केतपद्धत्यनुरोधेन वैखरीवाग् हतनामधेया, मध्यमाऽनाहतनामा, पश्यन्ती चोत्तीर्णा इत्युच्यते।

शैवतन्त्रेषु पञ्चाशदक्षरा मातृका प्रोक्ता, सेयं पञ्चाशद्वर्णात्मिका मातृका अष्टवर्गात्मिका भवति, तथा हि अष्टवर्गा अकचटतपयशाः। अकारादयः षोडश स्वराः प्रथमवर्गः, कादयः पञ्च वर्णा द्वितीयवर्गः, चादयः पञ्च वर्णास्तृतीयवर्गः, टादयः पञ्च चतुर्थः, तादयः पञ्च पञ्चमः, पादयः पञ्च षष्ठः, यादयश्चत्वार सप्तमः, शादयः पञ्च अष्टमः, अनया रीत्या 'अष्टवर्गात्मिका भगवती मातृका त्रिपुरसुन्दरी'[2]। 'एकपञ्चाशदक्षरा मातृका' इति मते शवर्गः षडक्षरः, यवर्गषवर्गयोरपि पञ्चपञ्चवर्णात्मकतैवेति मतविशेषोऽपि निर्दिष्टः सेतुबन्धकृता[3]। शिवानन्दनिर्मितसुभगोदयोक्तमातृकायामपि एतद् दृश्यते[4]।

मालिनीस्वरूपविमर्शः

मातृका-मालिनी इत्युभौ समानार्थावित्युक्तमेव। तत्र 'नादिफान्ता वर्णमाला मालिनी' इति विशेषः। तत्र त्वयं क्रमः—न ऋ ॠ ऌ ॡ थ च ध ई ण उ ऊ ब क ख ग घ ङ इ अ व भ म ड ढ ठ झ ञ ज र ट प छ ल आ स अः ह ष क्ष म श अं त ए ऐ ओ औ द फ इति[5]।

---

१. सौ० सु० १।१६; २. षडध्वप्रविलापनविधिः, चतुर्थपटले पृ० १०८-२०९।
३. से० ब० पृ० ५१; ४. सु० मा० पृ० २८७; ५. मालिनीविजयः—३।३७-४१।

भूतलिपिस्वरूपम्

शारदातिलके द्वाचत्वाशिदक्षरा नववर्गमयी भूतलिपिः प्रोक्ताऽस्ति[१]। तत्रायं वर्णस्थितिक्रमः—

अ इ उ ऋ ऌ—	प्रथमो वर्गः।
ए ऐ ओ औ —	द्वितीयो वर्गः।
ह य व र ल —	तृतीयो वर्गः।
ङ क ख घ ग—	चतुर्थो वर्गः।
ञ च छ झ ज—	पञ्चमो वर्गः।
ण ट ठ ढ ड —	षष्ठो वर्गः।
न त थ ध द —	सप्तमो वर्गः।
म प फ भ ब —	अष्टमो वर्गः।
श ष स —	नवमो वर्गः।

लिपीनां भूतत्वं नाम—इष्टाविशेषाक्षरविन्यासाभिव्यङ्ग्यत्वम्। तच्च कल्पनामात्रमेव[२]।

वर्णसंख्याविषये शिक्षाशास्त्रनिष्कर्षः

प्रसङ्गाद् वर्णसंख्याविषये शिक्षाशास्त्रस्यापि सिद्धान्तः प्रस्तूयते। तथा हि—

पाणिनीयशिक्षायां त्रिषष्टिः चतुःषष्टिर्वा वर्णानां संख्या निर्दिष्टाऽस्ति। उक्तञ्च—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥
अनुस्वारो विसर्गश्च ≍क ≍पौ चापि पराश्रयौ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च[३]॥

अयमाशयः—अ इ उ ऋ एते वर्णा ह्रस्वदीर्घप्लुतभेदेन प्रत्येकं त्रिधा, इति द्वादश। ऌकारस्तु सर्वत्र ह्रस्व एवैकः। ए ऐ ओ औ एते वर्णा दीर्घ-प्लुतभेदेन प्रत्येकं द्विधा इत्यष्टौ, एवमेकविंशतिः स्वराः। स्पेन राजते, स्वस्मिन् रमते वा स्वरः। राजे रमेर्वा औणादिको डप्रत्ययः। अस्योच्चारणे व्यञ्जनस्य साहाय्यं नापेक्ष्यत इत्यर्थः। अतोऽग्रे व्यञ्जनसंख्याविचारः।

व्यज्यते स्वरसाहाय्येनोच्चार्यते यत्तद् व्यञ्जनम्। उक्तं च भाष्यकृता—"न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि सम्भवति"[४] इति।

---

१. शारदातिलकः—७।१-४;
२. चिद्वल्ली, पृ० ५०।
३. पा० शि० श्लो० ३-५;
४. म० भा० १।२।२९।

एते च ककारादिहकारान्ता लोके प्रसिद्धा एव त्रयस्त्रिंशत्संख्याकाः। तत्र कादयो मावसानाः पञ्चविंशतिः स्पर्शाः, ततश्चत्वारोऽन्तःस्था यरलवाः, ततश्चत्वार ऊष्माणः शषसहाः, चत्वारश्च यमा वेद एव प्रसिद्धाः। अनुस्वारो विसर्गः, जिह्वामूलीयः, उपध्मानीय एते चत्वारो वर्णाः, यमसहिता एतेऽयोगवाहपदेनाप्युच्यन्ते[१]। दुःस्पृष्टसंज्ञकश्चैको वर्णः, स च 'अग्निमीळे' इत्यादौ प्रयुज्यमानो डकारस्थानीयो ळकारः। एषां सङ्कलने त्रिषष्टिर्वर्णा भवन्ति। प्लुतऌकारस्यापि योजनया चतुःषष्टि-संख्या भवति। अयं पक्षभेदः प्लुतऌकारस्वीकारहेतुकः।

वर्णरत्नप्रदीपिकाशिक्षायामपि[२] त्रिषष्टिर्वर्णाः प्रोक्ताः। तत्र प्लुतऌकारस्य निर्देशो नास्ति, रङ्गवर्णस्यापि निर्देशो न वर्तते। षोडशश्लोकीशिक्षायामपि[३] त्रिषष्टिरेव वर्णाः परिसंख्याताः। ते च द्वाविंशतिः स्वराः, त्रयस्त्रिंशद् व्यञ्जनानि, चत्वारो यमाः, अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीयाश्च। अत्र स्वराणां द्वाविंशतिसंख्याकथनेन दीर्घऌकारस्य स्वीकार एतन्मते नास्तीति प्रतीयते। गौतमीयशिक्षायां[४] त्रयस्त्रिंशद् व्यञ्जनानि चत्वारो यमाश्च निर्दिष्टाः, स्वराणां निर्देशेऽपि संख्या न निर्दिष्टा, रङ्गा-भिधोऽपि वर्णो नात्र निर्दिष्टः। तथापि अप्रतिषिद्धं परमतमनुमतमिति नियमेन पाणिनीयादिशिक्षावदेव संख्याविषये व्यवस्था ज्ञातव्या।

स्वराष्टकशिक्षाया[५]मष्टौ स्वरा उक्ताः, व्यञ्जनानां निर्देशेऽपि संख्या न निर्दिष्टा, अन्ते च प्रत्याहारसूत्राणि लिखितानि। तेन ज्ञायते यत् पाणिनीयवर्णसंख्याविषय एव अस्या अपि अनुमतिरिति।

याज्ञवल्क्यशिक्षायां[६] स्वराः, स्पर्शाः, अन्तःस्थाः, ऊष्माणः, इत्येवंप्रकारेण वर्णानां निर्देशः कृतोऽस्ति। ततश्च अनुस्वार-जिह्वामूलीयोपध्मानीयनासिक्यानुनासिक्य-रङ्गा यमाश्चापि सन्ति प्रतिपादिताः; परन्तु सङ्कलनं कृत्वा संख्या नोक्ता। अस्यां स्थितौ "अप्रतिसिद्धं परमतमनुमतं भवति" इति न्यायेन अष्टषष्टिर्वर्णा एतन्मते वक्तुं शक्यन्ते। तथा हि—दीर्घऌकारस्य संग्रहेण त्रयोविंशतिः स्वराः, त्रयस्त्रिंशत् स्पर्शान्तःस्थोष्माणः, विसर्ग-जिह्वामूलीयोपध्मानीय-नासिक्यानुनासिक्यरङ्गा इति षट्, चत्वारो यमाः, ह्रस्वो दीर्घश्चेति द्वावनुस्वारौ, एते सङ्कलिताः सन्तोऽष्टषष्टि-र्भवन्ति।

लोमशी-पाराशरी-लघ्वमोघानन्दिनीशिक्षासु ह्रस्व-दीर्घभेदेनानुस्वारस्य द्वैविध्यं प्रतिपादितमस्ति। पाणिनीयशिक्षायां तु एकविध एवानुस्वार उक्त इति विवेकः।

---

१. म० भा० पा० सू० 'हयवरट्' (५)।
२. शिक्षासंग्रहः (व० र० प्र० शि०);
३. तत्रैव (षो० श्लो० शि०)।
४. तत्रैव (गौ० शि०);
५. तत्रैव (स्वराष्टक०)।
६. तत्रैव (या० व० शि०)।

एवमेव वाजसनेयप्रातिशाख्ये, तैत्तिरीयप्रातिशाख्ये, ऋक्प्रातिशाख्ये, अग्निपुराणादौ च वर्णानां स्वरूपस्य संख्यायाश्च विषये भूयान् विचारः कृतोऽस्ति, तत्र तत्र स द्रष्टव्यः। अत्रेदमवधातव्यम्—वर्णानां स्वरूपसंख्यादिविषये योऽयं विरोधो दृश्यते, तत्रेदं समाधानं सामान्यतो ज्ञातव्यं यत् स्थानादिभेदेन स्थानादीनामन्यान्यरूपेण साङ्कर्येण विद्यमाना अनन्ता वर्णाः, न तान् साकल्येन कश्चिदपि निश्चेतुं शक्नोति। न हि सर्वे वर्णाः सर्वत्रैव भाषासु वेदेषु वा प्रयुज्यन्ते। अतः शिक्षादयोऽपि भाषाविशेषशाखाविशेषविषयका एव, न तु भाषासामान्यविषयका वेदसामान्यविषयका वा इति स्वीकार्यम्। ये च वर्णा यत्र न निर्दिष्टाः, ते तन्मते सर्वथा न सन्तीति न मन्तव्यम्; अपि तु तच्छाखायामनुपयुक्तत्वान्न निर्दिष्टा इत्येव ज्ञातव्यम्।

इदमपि ध्येयं यदद्यत्वे भाषायां क़-ख़-ज़-फ़-ड़-ढ़ इत्येवमादयो बहवोऽपभ्रष्टा वर्णा उच्चार्यन्ते, तेषां साधुत्वमत्र संस्कृतवाङ्मये नास्ति, तदुच्चारणेन पुण्यावाप्तिर्न भवति इत्येव तात्पर्यम्, अर्थबोधने तद्घटितवाक्यानां सामर्थ्यं भवतु नाम, न ततः काऽपि हानिः।

वर्णाभिव्यक्तिप्रकारः

वर्णानामभिव्यक्तिप्रक्रिया विस्तरेण तन्त्रालोके तृतीयाह्निके, सौभाग्यसुधोदये, परापञ्चाशिकायां च संक्षेपेणोपपादिताऽस्ति। योगिनीहृदयाध्ययनेन ज्ञायते यत् तन्त्रसद्भावेऽपि वाक्चतुष्टयपद्धत्यैव वर्णाभिव्यक्तिप्रक्रिया प्रतिपादिताऽस्ति। शिवसूत्रविमर्शिनी, ऋजुविमर्शिनी, तन्त्रालोकविवेकधृतादौ च वर्णविकासक्रमो निर्दिष्टोऽस्ति। तत्र तन्त्रालोकविवेके संक्षेपेणैवं निरूपितमस्ति—परैव सूक्ष्मा कुण्डलिनी शक्तिः शिवेन सह परस्परं सामरस्यरूपं संघट्टमासाद्योत्थिता सती इच्छाज्ञानक्रियास्वरूपतामापाद्य रौद्रीत्वमुन्मेषयन्ती, शृङ्गाटकाकारतामम्बिकात्वमाश्रयमाणा, उकारात्मकशशाङ्कशकलाकारतां ज्येष्ठात्वमधितिष्ठन्ती च सांशबिन्दूदितकालाग्निरुद्ररेफात्मकबिन्दुविश्रान्तस्पष्टरेखाकारतामाभासयति, एवमाद्यवर्णशरीरमुल्लासयतीति[1]। अत्रार्थे—

अकारस्य शिरो रौद्री वक्त्रं वामा प्रकीर्तिता।
अम्बिका बाहुरित्युक्ता ज्येष्ठा चैवायुधं स्मृता॥

इति च प्रमाणपद्यं तत्रोपस्थापितम्[2]।

योगिनीहृदये परावागम्बिकारूपा, पश्यन्ती वामारूपेच्छाशक्तिः, मध्यमा ज्येष्ठारूपा ज्ञानशक्तिः, वैखरी रौद्रीरूपा क्रियाशक्तिश्च वर्णितास्ति[3]। एवं शक्तेरुदरगतेन चतुष्कलात्मना बिन्दुनाऽनुत्तरादिमुखेन नववर्गकः सन्तानः प्रजायते।

---

१. तन्त्रा० ३।६७, पृ० ७७; २. तत्रैव—पृ० ८०।
३. योगिनीहृदये—१।३६-४०।

पाणिनीयशिक्षासम्मतो वर्णोत्पत्तिप्रकारः

आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः[१] ॥

इति पाणिनीयशिक्षायामुक्तम् । अयं भावः—आत्मा = अन्तःकरणं संस्काररूपेण स्वगतानर्थान् बुद्ध्या स्ववृत्त्या समेत्य एकबुद्धिविषयान् कृत्वा तद्बोधनेच्छया मनो युक्तं करोति, तदिच्छावन्मनः कायाग्निमभिहन्ति, स कायाग्निः सोदीर्णः, स मारुत उदीर्णः, ऊर्ध्वं प्रेरित इत्यादिस्तदर्थः ।

एवं च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात् प्रेरितो वायुर्वेगान्मूर्धपर्यन्तं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य आभ्यन्तरयत्नसहायेन तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति । स्पष्टं चैतत् लघुशब्देन्दुशेखरे[२] ।

तन्त्रशास्त्रस्य वैदिकत्वावैदिकत्वविमर्शः

तान्त्रिक-वैदिकसिद्धान्तयोर्वर्तते बहुविधं वैभिन्न्यम् । तन्त्रेषु स्त्रीशूद्रादीनामधिकारोऽस्ति । वेदाध्ययनादिषु तु नास्ति तेषामधिकारः । वाक्चतुष्टयात्मकस्य विशेषतः पराख्यवाग्ब्रह्मण उपासनं षडध्वमुखेन जगत्सर्जनप्रलयौ च तन्त्रशास्त्रीयं प्रमुखं वैशिष्ट्यम् । यद्यपि वेदाङ्गभूते व्याकरणागमेऽपि । शब्दब्रह्मणो महिमा उपासना च तत्र तत्र वर्णितौ स्तः । तथा च तत्प्रतिपादिका श्रुतिरपि "चत्वारि वाक्परिमिता पदानि"[३] इत्यादिका । अथ च—"अकारः सर्ववर्णाग्र्यः", "अनयोः सामरस्यं तत्परस्मिन्नहमिस्फुटम्" इत्यादि संकेतपद्धतिव्याख्यातोऽर्थः बहुत्र श्रुतिष्वपि उपलभ्यते । तथा हि—"अकारो वै सर्वा वाक्",[४] "वाचीमा विश्वा भुवनान्यर्पिता",[५] "वागक्षरं प्रथमजा ऋतस्य,"[६] "अनाहतशीर्ष्णो वाग् जुषाणा सोमस्य तृप्यतु"[७] इत्यादीनि आरण्यकब्राह्मणसंहितावचनानि द्रष्टव्यानि । एवं सत्यपि शब्दब्रह्मणः प्रपञ्चो यथा तन्त्रेषु दृश्यते, न तथा वेदेषु तदङ्गेषु च ।

भगवतो बुद्धस्य महावीरस्य च समये तिस्रो दृष्टयः प्रचलिता आसन् । ताश्च वेदानुगामिन्यः, वेदविरोधिन्यः, स्वतन्त्राश्चेति, तत्र सौगतानां जैनानां च दृष्टयो वेदविरोधिन्यः, सांख्ययोगपाञ्चरात्रादीनां स्वतन्त्राः, साम्प्रतं तु पाञ्चरात्रिकाः शैवाश्च वेदमनुसरन्त्य एवानुभूयन्ते । स्वतन्त्रा दृष्टयो गच्छता कालेन स्वस्वातन्त्र्यं परिहृत्य वेदप्रामाण्यं भजमाना अभवन् ।

---

१. पा० शि० ६, ९; २. ल० श० शे० संज्ञाप्र० ।
३. ऋ० १।१६४।४५; ४. ऐ० आ० २।३।६; ५. तै० ब्रा० २।८।८।४ ।
६. तत्रैव—२।८।८।५; ७. तै० सं० ३।२।५।१ ।

यद्यपि भारतीये वाङ्मये निगमागमशब्दयोः समानेऽर्थे प्रयोगो बहुत्र दृश्यते। यथा श्रीहरिणा आगमशब्दस्य निगमार्थे प्रयोगः कृतः[१]। पुनश्च परवर्तिकाले शैवरौद्राद्यागमेषु वैष्णवाद्यागमेष्वपि च प्रयुक्तो निगमशब्दः। तन्त्रशब्दोऽपि आगमसमानार्थक एव, वैष्णवाद्यागमेषु लक्ष्मीतन्त्र-पाद्मतन्त्रप्रभृतिग्रन्थदर्शनात्। एवं सत्यपि शैवेषु वैष्णवेषु चागमशब्दः, बौद्धेषु शाक्तेषु च तन्त्रशब्दः प्राचुर्य्येण प्रयुक्तो दृश्यते। अस्तु, अस्यां स्थितौ आगम-तन्त्रयोरनर्थान्तरत्वेऽपि निगमपदाभिधेयापेक्षया वैलक्षण्यमस्त्येव। यद्यपि—

'स्वयं प्रमाणान्येतानि न हातव्यानि हेतुभिः'।

इत्याद्युक्त्या,

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै[२] ॥

इत्याद्युक्त्या चागमादीनामपि प्रामाण्यं वेदतुल्यतां भजते। तथापि भगवता वेदव्यासेन ब्रह्मसूत्रतर्कपादे वेदबाह्यैः बौद्धजैनमतैः सहैतेषां मतानामवैदिकत्वं निरणायि। श्रीशङ्करभगवत्पादैस्तथा व्याख्यातमपि। "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्", "हेतुदर्शनाच्च" इति जैमिनीयं सूत्रद्वयं[३] व्याचक्षाणैः कुमारिलभट्टपादैरपि सांख्य-योग-पाञ्चरात्र-पाशुपत-जैन-सौगतमतानां स्पष्टतयाऽवैदिकत्वं प्रोक्तम्।

यद्यपि परवर्तिकाले यामुनाचार्यप्रभृतिभिः पाञ्चरात्रादितन्त्राणां वैदिकत्वसाधने प्रयासः कृतः। "त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति" इति महिम्नःस्तोत्रदृष्ट्या श्रीभास्कररायप्रभृतिभिश्च[४] तन्त्राणां स्मृतितुल्यत्वं च प्रसाधितम्। तथापि तेषु तेषु तन्त्रग्रन्थेषु वेदानामवरशासनत्वं दृश्यमानं वेदविरोधं स्पष्टं प्रतिपादयति[५]।

विरुद्धसिद्धान्तकमेतन्मतद्वयं वैदिकं तान्त्रिकं चेति निर्णयन्ति इतिहासरहस्यविदोऽपि। तथा हि—सिन्धुसभ्यताचिह्नानां शिवलिङ्गवृषभयोगिप्रभृतीनां वेदेष्वदर्शनाद् वैदिकसभ्यतातो भिन्ना तत्र काचित् सभ्यताऽऽसीत्। तत एव तान्त्रिक्याः सभ्यताया उद्भवो मन्यते। वैदिकसभ्यतयाऽस्याः संक्रमे द्वयोः प्रायेण मिश्रणं समजायत। अस्मिन्नेव संक्रमेऽथर्ववेदे तान्त्रिकं कर्मकाण्डम्, यजुर्वेदे च तान्त्रिकः शिवो रुद्रात्मना प्रतिष्ठितोऽभवत्। वैदिक्यां तु विशिष्टानामेवापरत्र साधारणानामपि जनानां प्रवेशोऽधिकारश्चाभ्युपेयते स्म[६], इति।

---

१. वा० प० १।१३२; २. महाभारतम्, शा० मो० ३४९-६४; ३. जै० सू० १।३।३-४।
४. वरिवस्यारहस्यप्रकाशे—पृ० ७।
५. (क) 'उत्तमाः पञ्चरात्रस्था मध्यमास्तु त्रयीमयाः' (लक्ष्मीतन्त्रम्—२२।३६)।
(ख) 'सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम्' (कुलार्णवे—२।७)।
६. 'अस्यां च पूजायां सर्वजातीनामधिकारः' इत्यादिना सन्दर्भेण सौभाग्यभास्करे एतद् द्रष्टव्यम् (पृ० २२३)।

अत्रायं निष्कर्षः—यद्यपि बौद्धार्हतयोरिव तन्त्रशास्त्रेषु पाञ्चरात्रादिषु सर्वथैव वेदप्रामाण्यं न प्रत्याख्यातम्, तथापि लोकसंग्रहाद्यर्थं क्वचिदंशेषु प्रत्याख्यातमेव। वेदविरुद्धमप्येतन्मतं भारतीये समाजे समादृतमभूत्। उत्तरे भारते सिद्ध-नाथ-सन्तप्रभृतीनां वाक्येषु, दक्षिणे च भारते आलवारादीनां परम्परासु साम्प्रतमपि तान्त्रिकदृष्टिप्रवाहो निर्बाधं प्रवहत्येव।

यथा ब्रह्मा पूर्वकल्पस्थितान् वेदान् स्मृत्वोपदिशति, तथैव शिव-नारायण-बुद्ध-प्रभृतिभिस्तानि तानि तन्त्राण्यपि ऋषिमुनिपरम्परासु उपदिश्यन्ते। अनेन रूपेण तन्त्रशास्त्रस्यापि वेदवद् अपौरुषेयत्वमेव स्वीक्रियते तन्त्रसम्प्रदायनिष्णातैः। कालक्रमेण तन्त्रशास्त्रं नानाशाखोपशाखासु विभक्तमभवदिति तन्त्ररहस्यम्।

तन्त्राणां शाखाभेदाः

गारुडे भूततन्त्रे च वाग्विधानेषु सर्वतः।
यामले चैकवीरे च नवके त्रिकभेदतः॥
समभेदे च देव्याख्ये दुर्गाख्ये विन्ध्यवासिनि।
चण्डिकाख्ये चतुष्के च स्वयम्भूत्ये महेश्वरे॥
प्राक्प्रतिष्ठितरूपे वा ऋषिमानुषयोजिते।
आयुधे विविधे चैव विद्यापीठेषु सर्वतः॥
सर्वपातालतन्त्रेषु नागेषु द्रामिडेषु च।

इत्येवंप्रकारेण **नेत्रतन्त्रे**[1] भेदा वर्णिताः। तदीयोद्द्योतव्याख्यायाम्—यामल इति ब्रह्मयामल-रुद्रयामलादौ, एकवीर इति परात्रिंशिका-मतत्रिंशिकादौ, नवक इति नवात्मचक्रादौ, त्रिक इति षडर्धनयेषु, समभेदे चेति समविषमाख्येषु मतनयेषु, देव्याख्ये इति महाघोराजयादिभेदेषु, विन्ध्यवासिनीत्येतदाख्यदेवताप्रतिपादके, चण्डिकाद्ये चतुष्के इति दक्षिणवामस्रोतसि तत्तद्देवताचतुष्टयाराधनप्रतिपादिनि इत्येवं विशदीकृतम्[1]।

अजितागमभूमिकायामुद्धृतपूर्वकारणागमे तु शैवतन्त्रस्य चातुर्विध्यं प्रदर्शितम्, तथा हि—

शैवं चतुर्विधं ज्ञेयं शैवं पाशुपतं तथा।
सोमं लाकुलमित्येते चतुर्भेदाः प्रकीर्तिताः॥

पुनश्च तत्रैव भूमिकायामुद्धृते कामिकागमे गारुड-भैरव-कापाल-पाञ्चरात्र-लाकुल-पाशुपत-बौद्ध-जैनप्रभृतिभेदा वर्णिताः। तथा च—

गारुडं भूततन्त्रं च भैरवं वामतन्त्रकम्।
कापालं पाञ्चरात्रं च लाकुली कुलशास्त्रकम्॥ इत्यादिकम्[2]।

---

१. ने० त० १३।३८-४२।
२. कामिकागमे–१।११४-११६।

पुनश्च अजितागमे क्रियापादे भैरव-पाशुपत-भूततन्त्र-विष्णुतन्त्रादिभेदानामुल्लेखो वर्तते। तथा हि—

सिद्धान्ते भूततन्त्रे च वामे स्रोतसि दक्षिणे।
भैरवे च तथान्येषु पशुपाशुपतादिषु॥
विष्णुतन्त्रे च बौद्धे च तथा दिक्पालदर्शने[1]॥ इति।

कुलार्णवे तु तन्त्राणां विविधा भेदा निरूपिताः सन्ति। तथा च—

शैव-वैष्णव-दौर्गार्कगाणपत्येन्दुसम्भवैः।
मन्त्रैर्विशुद्धचित्तस्य कुलज्ञानं प्रकाशते[2]॥ इति।

तन्त्राणामुत्तमाधमभावविमर्शः

परात्रिंशिकाव्याख्यायामुद्धृतवचनेन तन्त्राणामुत्तराधरभावो द्रष्टव्यः। तथा च—

वेदाच्छैवं ततो वामं ततो दक्षं ततः कुलम्।
ततो मतं ततश्चापि त्रिकं सर्वोत्तमं परम्[3]॥

पुनश्च तत्रैवोद्धृतनिशाचरवचनेनापि स भावः प्रदर्शितः। तथा च—

वाममार्गाभिषिक्तोऽपि देशिकः परतत्त्ववित्।
संस्कार्यो भैरवे सोऽपि कुले कौले त्रिकेऽपि सः[4]॥

कुलार्णवतन्त्रोक्तप्रमाणेनापि पूर्वोक्तभावस्य स्फुटाभिव्यक्तिः प्रदर्शिताऽस्ति। तथा च—

सर्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं परम्।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम्॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम्।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं नहि[5]॥ इति।

तन्त्रीयविभागत्रयस्य विमर्शः

तरतमभावेन स्थितानां तन्त्राणां पुनस्त्रैविध्यं प्रदर्श्यते। तत्र प्रथमः स्रोतोविभागः, द्वितीयः पीठविभागः, तृतीयश्चाम्नायविभाग इति। तत्रापि स्रोतोभेदः पुनस्त्रिविधः। स चेत्थम्—

---

१. अजितागमे—२।२२-२३; २. कुलार्णवे—२।२९।
३. परा० उ० पृ० ९२; ४. तत्रैव।
५. कुला० त० २।७-८।

वामदक्षिणसिद्धान्तस्त्रिविधं शुद्धशैवकम् ।
मुक्तावतारतन्त्रादि शास्त्रं यद् वामशैवकम् ॥
स्वच्छन्दादीनि तन्त्राणि दक्षिणं शैवमुच्यते ।
कामिकादीनि तन्त्राणि सिद्धान्ता इति कीर्तिताः[१]॥

इति पूर्वकारणागमवचनं तत्र प्रमाणमवगन्तव्यम् । "वामदक्षिणसिद्धान्तभेदत्रय-विभेदतः" इति नेत्रतन्त्रापराभिधमृत्युञ्जयभट्टारकवचनमपि भेदत्रये मानम् । शिव एव सदाशिव-भैरव-तुम्बुरुरूपेण सिद्धान्त-वाम-दक्षिणस्रोतसामुपदेशं ददाति, इत्यपि नेत्र-तन्त्रतो[२]ऽवगम्यते । सिद्धान्तशिखामणौ तु शैवागमस्य चत्वारो भेदा व्याख्याताः । तद्यथा—

शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम् ।
सप्तमातृपरं मिश्रं सिद्धान्तं वेदसम्मतम्[३] ॥ इति ।

कारणागमसम्मत्या मिश्राभिधं चतुर्थं भेदं मन्यन्ते तन्त्राचार्याः । अजितागम-भूमिकायां कापाल-कालामुख-अघोरादयो वामभेदे, स्वच्छन्दभैरवादिशैवागमानुगतं त्रिकमिति संज्ञितं कश्मीरशैवदर्शनं च दक्षिणभेदे सम्भावितम् । नेत्रतन्त्रोद्द्योतानु-सारेण भैरवागमानां दक्षिणस्रोतस्येवान्तर्भावः । कापालादीनि त्रिक्शास्त्रं च शैवागमतो भिन्नान्येव अद्यत्वे । वामदक्षिणमार्गभेदेन तन्त्राणां द्वैविध्यं प्रचलद् दृश्यते ।

पञ्चस्रोतोविभागविमर्शः

नेत्रतन्त्रे पञ्चस्रोतांसि प्रदर्शितानि[४] । मृगेन्द्रतन्त्रे तानि संख्यातान्यपि—

स्रोतांसि कामिकाद्यूर्ध्वमसिताङ्गादि दक्षिणम् ।
सम्मोहादुत्तरं प्राच्यं त्रोतलादि सुविस्तरम् ॥
आप्यं चण्डासिधारादि चण्डनाथपरिग्रहम्[५] ॥

आप्यमित्यनेनात्र पश्चिमं ग्राह्यम् ।

शैवा रौद्राश्चागमा दशाष्टादशभेदभिन्नाः शिवस्य पञ्चवक्त्रेभ्यो विनिःसृता इत्यजितागमेऽन्यत्र[६] चोक्तम् । तत्राजितागमीयः क्रमः—

---

१. अजितागमभूमिकायाम्, पूर्वकारणागमे—२६।५९-६० ।
२. 'शिवः सदाशिवश्चैव भैरवस्तुम्बुरुस्तथा' इति (नेत्रतन्त्रे—९।११) ।
३. सि० शि० ५।११ ।
४. 'पञ्चस्रोतो विनिर्भिन्नम्' (ने० त० १९।३३) ।
५. मृगेन्द्रागमे चर्यापादे—१।३५-३६ ।
६. (क) मालिनीविजयवार्तिके—पृ० ३६-३८ ।
(ख) तन्त्रालोकविवेके—भा० १, पृ० ३६-४१ ।

(१) ऊर्ध्व(ईशान)मुखोद्भवाः—कामिकं योगजं चिन्त्यं कारणम्, अजितं दीप्तं सूक्ष्मं सहस्रमंशुमत् सुप्रभेदं च।
(२) सद्योजातमुखोद्भवाः —विजयं पारमेशं निश्वासं प्रोद्गीतं मुखबिम्बं च।
(३) वामदेवमुखोद्भवाः —सिद्धं सन्तानं शर्वोक्तं चन्द्रज्ञानं विमलं च।
(४) अघोरमुखोद्भवाः —स्वायम्भुवं वीरं रौरवं मकुटं किरणं च।
(५) तत्पुरुषमुखोद्भवाः —ललितम् आग्नेयं वातुलं च।

रौरवागमप्रथमभागभूमिकायां तु अन्य एव क्रमो दर्शितः—
(१) ईशानमुखोद्भवाः —प्रोद्गीतं ललितं सिद्धं सन्तानं शर्वोक्तं पारमेश्वरं किरणं वातुलं च।
(२) सद्योजातमुखोद्भवाः —कामिकं योगजं चिन्त्यं कारणम् अजितं च।
(३) वामदेवमुखोद्भवाः —दीप्तं सूक्ष्मं साहस्रम् अंशुमत् सुप्रभेदं च।
(४) अघोरमुखोद्भवाः —विजयं निःश्वासं स्वायम्भुवम् अनलं वीरं च।
(५) तत्पुरुषमुखोद्भवाः —रौरवं मकुटं विमलं चन्द्रज्ञानं बिम्बं च।

शतरत्नसंग्रहोल्लेखनीधृतकामिकागमेऽन्यः क्रमो दृश्यते[१]। तथा हि—

सिद्धान्तं गारुडं वामं भूततन्त्रं च भैरवम्।
ऊर्ध्वपूर्वकुबेराप्ययाम्यवक्त्राद् यथाक्रमम्॥ इति।

व्याख्यातं च तत्र—'ऊर्ध्वपूर्वकुबेरवरुणयाम्यसम्बन्धाद् मुक्तिप्रदसिद्धान्त-सर्वविषहरणगारुड-सर्ववशीकरणवाम-भूतग्रहनिवारकभूततन्त्र-शत्रुक्षयकरभैरवसंज्ञकम्'[२] इति।

तन्त्रालोकविवेकधृतश्रीकण्ठ्यामपि[३] दशाष्टादशभेदभिन्नं शिवरुद्राभिधं ज्ञानमूर्ध्वमुखोद्भूतमेवेत्यङ्गीकृतम्। चतुःषष्टिरद्वयप्रधाना भैरवभेदाश्च दक्षिणवक्त्रतो निःसृताः। तत्पुरुषवक्त्रतोऽष्टाविंशतिभेदं गारुडं तन्त्रम्, पश्चिमतो भूततन्त्राणि च निर्गतानि—इत्यादि तत्रोक्तम्।

मृगेन्द्रागमे चर्यापादेऽष्टौ अनुस्रोतांस्यपि उक्तानि[४]। तानि च—शैवम्, मान्त्रेश्वरम्, गाणम्, दिव्यम्, आर्षम्, गौह्यकम्, योगिनीकौलम्, सिद्धकौलं च। योगिनीकौलस्य लक्षणम्—

योगिन्यो लेभिरे ज्ञानं सद्यो योगावभासकम्।
येन तद्योगिनीकौलं नोत्तीर्णं ताभ्य एव तत्॥ इति।

अन्येषामपि लक्षणानि तत एव ज्ञातव्यानि।

---

१. रौरवागमे प्रथमभागे भूमिकायाम्, ११ पृष्ठे।
२. शत० कामिकागमे, पृ० ९।
३. तदीये प्रथमभागे, पृ० ४०-४४; ४. मृगेन्द्रागमे चर्यापादे—१।४०।

पीठविभागविमर्शः

विद्यापीठ-मन्त्रपीठ-मुद्रापीठ-मण्डलपीठभेदात् पीठश्चतुर्विधः। ब्रह्मयामलवचनाद् इदं ज्ञायते यद् भैरवाष्टकं यामलाष्टकं च विद्यापीठाद् विनिर्गतम्। योगिनीजाल-योगिनीहृदय-मन्त्रमालिनी-महामारी-प्रभृतीनि तन्त्राणि विद्यापीठसम्बद्धानि। वीरभैरव-चण्डभैरव-महाभैरवादयो मुद्रापीठेन संसृष्टाः। स्वच्छन्दोद्द्योते समुद्धृतसर्ववीरवचनेन चतुष्पीठा संहिता ज्ञायते। तथा हि—

मुद्रामण्डलपीठं तु चतुष्पीठं तथैव च।
विद्यापीठं तथैवेह चतुष्पीठा तु संहिता[१]॥ इति।

भैरवाष्टकं मन्त्रपीठात्मकमित्यपि तत एव ज्ञायते[२]। अर्थरत्नावलीग्रन्थे समुद्धृतेन संकेतपद्धति[३]वचनेनेदं ज्ञायते यद्—ओड्याण-पूर्णगिरि-जालन्धर-कामरूप-पीठानि क्रमश आज्ञापीठ-मन्त्रपीठ-विद्यापीठ-मुद्रापीठतया उक्तानि सन्ति तन्त्रशास्त्रे।

महार्थमञ्जरीपरिमले उद्धृतचरणसूत्रेण पीठचतुष्टयस्यैवं व्याख्यानं कृतमस्ति। तद्यथा—

विद्येति मातृकापीठं तत् पार्थिवमुदाहृतम्।
मण्डलं कुण्डलीपीठं तदाप्यं परिकीर्तितम्॥
मन्त्रसंज्ञं क्रियापीठं तैजसं तत् प्रकीर्तितम्।
ज्ञानपीठं तु मुद्राख्यं तद् वायव्यं सुरेश्वरि॥
परेच्छामुखतो व्योमपीठत्वेनेह नादृतम्।

अत्र हि पीठानां पार्थिवत्वाप्यत्वादिकं प्रतिपादितमस्ति। तन्त्रालोके एकोनत्रिंशाह्निके जयरथेन "इह विद्यामन्त्रमुद्रामण्डलात्मतया चतुष्पीठं तावच्छास्त्रम्। तत्र मन्त्रमुद्रात्मनः पीठद्वयस्य सम्प्रदाय उक्तः। इदानीमत्रैवावशिष्टस्य विद्यामण्डलात्मनोऽप्यस्य सम्प्रदायं निरूपयति" इत्यवतरणिका प्रोक्ता[४]।

अग्रे च सप्तत्रिंशाह्निके शास्त्रस्य पञ्चस्रोतोमयत्वमभिधाय पीठचतुष्टयात्मकत्वं निरूपितम्। उपसंहृतं चेत्थम्—

विद्यापीठप्रधानं च सिद्धयोगीश्वरीमतम्।
तस्यापि परमं सारं मालिनीविजयोत्तरम्[५]॥

स्रोतोविभागवत् पीठविभागोऽपि आगमशास्त्रे स्वीक्रियत इति निष्कर्षः।

---

१. 'चतुष्पीठं महातन्त्रं चतुष्टयफलोदयम्' (स्व० १-५)।

२. स्वच्छन्दोद्द्योते—भा० १, पृ० १०।

३. अत्र २२० पृष्ठतः २२२ पृष्ठं यावद् द्रष्टव्यम्; ४. तन्त्रा० २९।११४ पृष्ठम्।

५. तन्त्रा० ३७।२४-२५।

आम्नायविभागविमर्शः

पूर्वोक्तविभागद्वयापेक्षया आम्नायविभागोऽतिशयेन प्रसिद्धः। एते आम्नायाः शिवस्य तत्पुरुष-सद्योजात-अघोर-वामदेव-ईशानाख्येभ्यः पञ्चवक्त्रेभ्यो विनिर्गताः क्रमेण पूर्व-पश्चिम-दक्षिणोत्तरोर्ध्वाम्नायपदैः सम्बोध्यमानाः सन्ति[1]। तन्त्रालोकेऽपि स एव दिग्विभागक्रमो निर्दिष्टोऽस्ति[2]।

कुलार्णवे कश्चन विशेषोऽत्रोक्तः[3]। तथा च—

मन्त्रयोगं विदुः पूर्वं भक्तियोगं च दक्षिणम्।
पश्चिमं कर्मयोगं च ज्ञानयोगं तथोत्तरम्॥
पूर्वाम्नायस्य संकेताश्चतुर्विंशतिरीरिताः।
दक्षिणाम्नायसंकेताः पञ्चविंशतिरीरिताः॥
पश्चिमाम्नायसंकेताः द्वात्रिंशत् समुदाहृताः।
विदुः षट्त्रिंशदाम्नाये संकेताः श्रीमदुत्तरे॥
ऊर्ध्वाम्नायस्य चैतानि न सन्ति कुलनायिके।

नित्याषोडशिकार्णवे तु 'चतुराज्ञाकोशभूताम्' इत्यत्र चत्वार एवाम्नायाः स्वीकृताः[4]।

"ऊर्ध्वाम्नायस्यापि चतुःपदमुपलक्षकम्" इति वदता श्रीभास्कररायेण तु पञ्चाम्नाया अत्र स्वीकृताः सन्ति[5]; किन्तु वरिवस्यारहस्यप्रकाशे तेनापि "अन्वयाः प्राग्दक्षिणपश्चिमान्वयाः उत्तरान्वयश्च। एत एव समयपदेनाम्नायपदेन च कथ्यन्ते" इत्येवंरूपेण चत्वार एवाम्नायाः प्रतिपादिताः[6]। 'रसाम्नायमहसा' इत्युक्त्या षडाम्नायाः सूच्यन्ते सौन्दर्यलहर्य्याम्[7]। तत्र श्रीकैवल्याश्रमेण "रसाम्नायाः षडाम्नायाः पूर्वदक्षिणपश्चिमोत्तरोर्ध्वानुत्तराः" इत्येवं व्याख्याता[8] अपि ते। तन्त्रालोकेऽपि षट् स्रोतांसि प्रतिपादितानि। तथा हि—

ईश ऊर्ध्वं प्रकाशत्वात् पूर्वं वक्त्रं प्रसारि यत्।
पुरुषो दक्षिणा चण्डो वामा वामस्तु सौम्यकः॥
पराङ्मुखतया सद्यः पश्चिमा परिभाष्यते।
पातालवक्त्रमधरमप्रकाशतया स्थितेः॥ इति।

---

१. मम पञ्चमुखेभ्यश्च पञ्चाम्नायाः समुद्गताः।
पूर्वश्च पश्चिमश्चैव दक्षिणश्चोत्तरस्तथा॥
ऊर्ध्वाम्नायश्च पञ्चैते मोक्षमार्गाः प्रकीर्तिताः। (कुलार्णवे—३।७)

२. तन्त्रालोके—१५।२०४-२०५; ३. कुलार्णवे—३।४२-४५।

४. नित्याषोडशिका० १।१२; ५. से० पृ० २०।

६. व० प्र० पृ० २३।

७. सौ० ल० १।१०; ८. तत्रैव—पृ० २३, टीकायाम्।

विवेककारेण व्याख्यातमपि यद् यस्मादीशः प्रकाशैकरूपत्वादूर्ध्वा दिगुच्यते, तत्पुरुषः प्रकाशौन्मुख्येन प्रसरणात् पूर्वा, अघोरः प्रसृतप्रकाशोद्रेकानुकूल्याद् दक्षिणा, वामदेवस्तत्प्रातिकूल्याद् मेयेन्दुसंस्पर्शप्रधाना वामा, उत्तरा, सद्योजातः प्रकाशवैमुख्यात् पश्चिमा प्रकाशसंस्पर्शायोग्यत्वादधरा चेति[1] ।

नेत्रतन्त्रोद्द्योतेऽपि षट्स्रोतांसि उक्तानि । तथा हि—

गारुडे मातृतन्त्रे च वामे स्रोतसि दक्षिणे ।
ज्येष्ठे चण्डासिधारे च प्रत्यक्षफलदा क्रिया ॥

अयमाशयः—गारुडे पूर्वस्मिन्, मातृतन्त्रादौ पश्चिमे, जयादित्ये वामे, भैरवशास्त्रे च दक्षिणे, चण्डासिधारादावूर्ध्वे, ज्येष्ठे च मतकुलादौ रहस्ये स्रोतसि इति[2] । अनया रीत्या षडाम्नायविभागोऽपि प्राचीन एव ज्ञायते ।

आम्नायविभागे त्रिपुरोपासनायाः स्थानम्

इत्थमत्र शैवानां शाक्तानां च तन्त्राणां त्रिस्रोतोविभागः, पञ्चस्रोतोविभागः, अनुस्रोतोविभागः, पीठविभागः, चतुःपञ्चषडाम्नायविभागश्च प्रतिपादितः । तत्र स्रोतोविभागः प्राधान्येन शैवानाम्, पीठविभागो भैरवागमानां कौलागमानां च, आम्नायविभागश्च शाक्तागमानामभिमत इति प्रख्यातिः ।

त्रिपुराविद्यायाः चतुराम्नायसाधारण्येऽपि दक्षिणपक्षपातित्वमिति व्याचष्टे श्रीविद्यानन्दः[3] ।

अमृतानन्देनापि एषोऽर्थः सम्मन्यते[4] । दक्षिणपक्षपातित्वकथनेनास्या भैरवागमानुगामित्वं प्रतीयते ।

त्रिपुरसुन्दरीदण्डके श्रीदीपकनाथः त्रिपुराविद्याया वाममार्गसेव्यत्वमपि व्याचख्यौ । एवं च दक्षिणेन वामेन चोभाभ्यामपि मार्गाभ्यां प्रवृत्तिवैचित्र्येण महादेवी त्रिपुरसुन्दरी समुपास्यते भक्तजनैः । तत्र वाममार्गः कौलानाम्, दक्षिणश्चान्येषामिति विवेकः ।

श्रीत्रिपुरोपासनायां मतत्रयम्

सौन्दर्यलहरीं व्याचक्षाणेन श्रीलक्ष्मीधरेण तु त्रिपुरोपासनायां मतत्रयमुपदिष्टम्—कौलमतम्, मिश्रमतम्, समयिमतं च[5] । तत्र चतुष्षष्ट्यागमाः कौलानां नित्याषोडशिकार्णवे प्रतिपादिताः[6] । मिश्रमतेऽष्टौ आगमाश्चन्द्रकलाज्योत्स्नावतीप्रभृतयः । समयिनां तु

---

१. तन्त्रालोके—१५।२०४-२०६, पृ० १०२ । २. नेत्रतन्त्रोद्द्योते—१६।७६ ।
३. अर्थ० पृ० ४१; ४, दी० पृ० ११० ।
५. सौ० ल० पृ० १३७-१४१; ६. प्रथमपटले १४-२१ श्लो० ।

शुभागमपञ्चकम्। "चतुःषष्ट्या तन्त्रैः"[१] अस्य श्लोकस्य व्याख्याने श्रीलक्ष्मीधरेण एषां त्रिविधागमानां परिचयः प्रदत्तोऽस्ति, वसिष्ठ-सनक-शुक-सनन्दन-सनत्कुमारनामानः पञ्च मुनयः शुभागमपञ्चकनाम्ना प्रख्यातसंहितापञ्चके समयाचारमार्गमुपदिष्टवन्तः। आन्तरपूजारतिः समयाचार उच्यते। अत्र मते समयस्य सादाख्यतत्त्वस्य समर्चा सहस्रदलकमल एव विधीयते, न तु बाह्ये पीठादौ। बाह्यपूजारतिः कुलाचार[२] इत्युच्यते।

अथ च श्रीचक्रस्य वियच्चक्रमिति नामान्तरम्। वियत्पूज्यत्वाद् वियच्चक्रमिति। वियत्पूज्यत्वं द्विविधम्—दहराकाशजम्, बाह्याकाशजं च। तत्र बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ[३] भूर्जपत्रशुद्धपटहेमरजतादिपट्टतले लिखित्वा समर्चनम्। इदमेव कौलपूजा। दहराकाशत्वं नाम हृदयाकाशावकाशे चक्रस्य पूजनम्। एषैव समयपूजा[४]। किञ्च, पञ्चशक्तिचतुर्वह्निसंयोगात् श्रीचक्रस्य निष्पत्तिरिति सार्वत्रिकी प्रसिद्धिः।

स्वाभिमुखाग्रत्रिकोणपरम्परायाः शक्तिसंज्ञात्वम्। विपरीताया वह्निसंज्ञात्वमिति समयः[५]। कौलमतानुसारं त्वधोमुखानि चत्वारि त्रिकोणानि शिवात्मकानि ऊर्ध्वमुखानि पञ्च त्रिकोणानि शक्त्यात्मकानि[६]। कौलमते संहारक्रमेण श्रीचक्रस्य लेखनं भवति[७]। समयिनां मते तु सृष्टिक्रमेण भवति[८]। कौलमतं तु द्विविधम्—पूर्वकौलम्, उत्तरकौलं च। तत्र 'शरीरत्वम्'[९] इति श्लोकेन पूर्वकौलस्य प्रतिपादनम्। 'मनस्त्वम्'[१०] इत्यादिना श्लोकेनोत्तरकौलस्य प्रतिपादनम्। उत्तरकौलमते शिवतत्त्वं शक्तितत्त्वेऽन्तर्भूतम्। तदेव चोपास्यम्[११]। 'तवाज्ञाचक्र... ....'[१२] इत्यादिना पद्यषट्केन सामयिकं मतमुक्तमस्ति[१३]। 'कदा काले' इत्यनेन चरणनिर्णेजनजलमिति कथनेन समयाचार एवोक्तः।

कौलमते भुजगाकारेण देव्या अवस्थानाच्चरणनिर्णेजनजलस्याभावात् सहस्रकमल एव चरणनिर्णेजनजलस्योपलब्धिः। 'सुधाधारासारैः'[१४] इत्यर्धेन समयिमतम्, "अवाप्य स्वा"[१५] इत्यर्धेन च कौलमतं प्रतिपादितम्। शिरःस्थितं चन्द्रमण्डलं सर्वयोगशास्त्रसिद्धम्। समयिनां मते श्रीचक्रमेव चन्द्रमण्डलम्, षोडशकलात्मकत्वात्। श्रीविद्यायाः प्रतिपदादिषोडशतिथिषु कलावृद्धिक्षययोर्भवनात् चन्द्रमण्डलमिदमेव। अतश्च शिरःस्थितसहस्रदलकमलान्तर्गतश्रीचक्रात्मकचन्द्रबिम्बमध्यस्थिताया भगवत्या-

१. सौ० ल० १।३१;
२. तत्रैव—पृ० ६४, १२९।
३. तन्त्रालोके— ९।१५;
४. सौ० ल० पृ० ६४।
५. ऋजु० पृ० ५०;
६. ल० पृ० ७२।
७. तत्रैव।
८. ल० पृ० ७२, ७९, ८१-८३;
९. सौ० ल० १।३४;
१०. तत्रैव--१।३५;
११. तत्रैव--पृ० १२२;
१२. तत्रैव--१।३६;
१३. तत्रैव--२।४९;
१४. तत्रैव—१।१०;
१५. तत्रैव--१।१०।

श्चरणकमलनिर्णेजनजलैः सुधामयैः साधकस्य सर्वं शरीरं संसिच्य पुनर्भुजङ्गरूपेणाधार-कुण्डे प्रविश्य सुषुम्नामवष्टभ्य सा भगवती स्वपितीति श्लोकस्यास्याशयः[१]। एवमेव 'सरस्वत्या लक्ष्म्या' इति श्लोकस्य व्याख्याने श्रीलक्ष्मीधरेण समयिसिद्धान्त-कौलसिद्धान्तयोः रहस्यं सम्यक् प्रतिपादितम्[२]।

"मिश्रकं कौलमार्गं च परित्याज्यं हि शांकरि" इतीश्वरवचनाद् मिश्रकमतं कौलमार्गं च परित्याज्यम्। चतुःषष्टितन्त्राणि कुलमार्ग एव। चन्द्रकलाविद्याष्टकं तु कुलसमयानुसारित्वेन मिश्रकमिति कथ्यते। वैदिकानां कृते तु शुभागमपञ्चकमेव समादर्तव्यम्, केवलसमयमार्गप्रदर्शनपरत्वात्[३]।

एवं लक्ष्मीधरोक्तायां समयिमताख्यत्रिपुरोपासनायां तान्त्रिकोपासनाया वैदिकीकरणप्रक्रिया प्रदर्शिता। अथ च सौन्दर्यलहरीकृता लक्ष्मीधरप्रभृतिभिश्च योगप्रधानंमान्तरमर्चनं समयिमतनाम्ना वैदिकप्रक्रियायां स्वीकृतम्, अभिनवगुप्तप्रदर्शितं[४] रहस्यात्मकौलिकं बाह्यमर्चनं तु निषेधितम्।

अर्थरत्नावल्यां कुलपञ्चकशास्त्रस्य चर्चा प्राप्यते,[५] तच्च अकुल-कुल-कुलाकुल-कौल-शुद्धकौलेत्येवंरूपम्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयीये सरस्वतीभवने २१९२२ संख्याके मातृकाग्रन्थे २१३ पृष्ठे कौलानां सप्तभेदाः प्रतिपादिताः। तथा च कौला द्विविधाः— पूर्वकौला उत्तरकौलाश्च। तत्र मूलाधारनिष्ठाः, स्वाधिष्ठाननिष्ठाः, उभयनिष्ठाश्चेति पूर्वकौलास्त्रिविधाः। मातङ्गी, वाराही, कौलामुखी, तन्त्रनिष्ठा चेति चतुर्विधा उत्तरकौलाः। कौलाख्यनिर्णये तु पदोत्तिष्ठकौल-महाकौल-मूलकौल-योगिनीकौल-वह्निकौल-वृषणोत्थकौल-सिद्धकौलाख्याः सप्तभेदा निरूपिताः सन्ति। कुलार्णवादिषु शाक्तागमग्रन्थेषु कौलसिद्धान्तः सर्वोत्कृष्टतया प्रतिपादितोऽस्ति। अभिनवगुप्तेनाऽपि कौलिकसिद्धान्ते श्रद्धापूरितः समादरः क्रियते। एवं च लक्ष्मीधरस्यैतत्कुलसमयिगतप्रतिपादनेन तस्य वैदिकसिद्धान्तेषु श्रद्धातिशय एव संसूच्यते।

मन्त्रस्वरूपविमर्शः

मन्त्रतत्त्वस्वरूपाया मातृकाया ज्ञानमन्तरा काऽपि साधना कोऽप्युपायः सिद्धिं नैव प्राप्नोति। उक्तञ्च—

अज्ञात्वा मन्त्रतत्त्वानि महाविद्यां जपेत्तु यः।
सर्वं तस्य वृथा देवि ! किं तस्य जपपूजनैः[६]॥
येऽभ्यस्यन्ति महातन्त्रं बालाद्वा मन्त्रतोऽपि वा।
यामलं नाम वक्त्राम्भोरुहसुन्दरसम्भवम्॥
अतिगुह्यं महागुह्यं शब्दगुह्यं निराकुलम्।
नानासिद्धिसमुद्राणां गृहं योगमयं शुभम्॥

---

१. सौ० ल०—पृ० ७६।
२. सौ० ल० २।५८; ३. ल० पृ० १४०-१४१।
४. तन्त्रालोके—२९।१४-१५; ५. अर्थ० पृ० ७४; ६. कामधेनुतन्त्रे—१।४।

शास्त्रजालस्य सारं हि नानामन्त्रमयं प्रियम्।
वाराणसीपुरपतेः सदामोदं सुखास्पदम्[१] ॥

तन्त्रशास्त्रे मनुशब्दोऽपि मन्त्रपर्यायत्वेन प्रयुज्यते[२]। स्त्रीदेवत्याश्च मनवो विद्यापदेन संकीर्त्यन्ते।

मननत्राणधर्माणश्चिन्माहात्म्यावमर्शका मन्त्रा भवन्ति। 'मननात् त्रायत इति मन्त्रः' इति व्युत्पत्तिरपि निगूढमर्थं 'मत्रि गुप्तभाषणे' इति चौरादिकाद्धातोर्भावे घञ्प्रत्यये कृते सति मन्त्रणं मन्त्रो गुप्तभाषणमित्यर्थ इत्यपि व्युत्पत्तिलभ्योऽर्थः सम्मान्यते। अत एव गुप्तार्थभाजः पिण्डबीजरूपाः पुरुषावाच्याध्यासिताश्च मन्त्रा भवन्ति इत्यपि वर्तत उद्घोषः। त एव मन्त्राः संवेद्यमानस्फुटार्थरूपा मालामन्त्राः स्त्रीरूपवाच्याध्यासिताश्च सन्तो विद्यापदाभिधेया भवन्ति। मन्त्रा आणवशाक्तशाम्भवोपायसम्बन्धिन इत्यपि केचित्। मृत्युञ्जयभट्टारकेण तु संसाराद् मोचकत्वं परे शिवे संयोजकत्वं च मन्त्राणां स्वभाव उक्तः, तथा च—

मोचयन्ति च संसाराद् योजयन्ति परे शिवे।
मननत्राणधर्मित्वात् तेन मन्त्रा इति स्मृताः[३] ॥

नेत्रतन्त्रेऽप्ययं विषयः सम्यक् प्रपञ्चितोऽस्ति[४]।

भावविहीनमन्त्राणां सिद्धिप्रदत्वाभावः

भाव-ध्यान-निराहार-नित्यस्नान-जितेन्द्रियत्व-शास्त्रनिगूढार्थवेतृत्वप्रभृतिधर्महीना मन्त्रजन्यसिद्धिषु अक्षमा भवन्ति, तथा चोक्तं रुद्रयामले—

मन्दभाग्यः पशोर्योनिं प्राप्नोति मां विहाय सः।
मयि भावं यः करोति दुर्लभो जनवल्लभः॥
भावेन लभ्यते सर्वं भावेन देवदर्शनम्।
भावेन परमं ज्ञानं तस्माद् भावावलम्बनम्[५] ॥
भावञ्च सर्वशास्त्राणां गूढं सर्वेन्द्रियस्थितम्।
सर्वेषां मूलभूतं च देवीभावं यदा लभेत्॥
तदैव सर्वसिद्धिश्च तदा ध्यानदृढो भवेत्।
अकलङ्को निराहारी निवासधृतमानसः॥
नित्यस्नानाभिपूजाङ्गो भावी भावं यदा लभेत्।
क्रियादक्षो महाशिक्षानिपुणोऽपि जितेन्द्रियः॥

---

१. रु० या० १।८४-८६।
२. "सधवा स्वप्रकृत्या च ददाति यदि तन्मनुम्"(रुद्रयामले—२।११)।
३. मृत्युञ्जय० २१।७५-७६।
४. नेत्रतन्त्रे मृत्युञ्जयभट्टारके एकविंशाधिकारे (२१।१)।
५. रुद्रयामले—१।११२-११३।

सर्वशास्त्रनिगूढार्थवेत्ता न्यासविवर्जितः ।
तेषां हस्तगतं भावं वद भावं यथा तनौ[1] ॥

नेत्रतन्त्रेऽप्ययं विषयो विस्तरेण प्रकाशितोऽस्ति । तथा हि—

भावहीनास्तु ये मन्त्राः शक्तिहीनास्तु कीलिताः ।
वर्णमात्राविहीनास्तु गुर्वागमविवर्जिताः ॥
भ्रष्टाम्नायविहीना ये आगमोज्झितविघ्निताः ।
न सिध्यन्ति यदा देवि जप्ता इष्टाः सहस्रशः ॥
असिद्धा रिपवो ये च सर्वांशकविवर्जिताः ।
आद्यन्तसम्पुटेनैव साध्यवर्णेन तु रोधिताः[2] ॥

अत्र रुद्रयामले भावस्य त्रैविध्यं दर्शितमस्ति । तथा हि—

पशुभावं महाभावं भावानां सिद्धिदं पुनः ॥
आदौ भावं पशोः कृत्वा पश्चात् कुर्यादवश्यकम् ।
वीरभावं महाभावं सर्वभावोत्तमोत्तमम् ॥
तत्पश्चादतिसौन्दर्यं दिव्यभावं महाफलम् ।
फलाकाङ्क्षी मोक्षगश्च सर्वभूतहिते रतः[3] ॥

भावत्रयस्य फलविमर्शः

एतस्य भावत्रयस्य फलत्रयमपि तत्रैव क्रमेण वर्णितमस्ति । तद्यथा—

विद्याकाङ्क्षी धनाकाङ्क्षी रत्नाकाङ्क्षी च यो नरः ।
कुर्याद् भावत्रयं दिव्यं भावसाधनमुत्तमम् ॥
भावेन लभते वाद्यं धनं रत्नं महाफलम् ।
कोटिगोदानजैः पुण्यैः कोटिशालग्रामदानजैः ॥
वाराणस्यां कोटिलिङ्गपूजनेन च यत्फलम् ।
तत्फलं लभते मर्त्यः क्षणादेव न संशयः[4] ॥

भावत्रितयसाधने कालविमर्शः

प्रातःकाले दशदण्डात्मकः कालः पशुभावस्य, मध्याह्ने दशदण्डात्मकः कालो वीरभावस्य (महाभावस्य), सायाह्ने दशदण्डात्मकः कालो दिव्यभावस्येति विज्ञेयम्[5] ।

भावत्रयस्य पुनः स्वरूपवर्णनम्

भावस्तु त्रिविधो देवि ! दिव्यवीरपशुक्रमात् ।
गुरुरस्य त्रिधा चात्र तथैव मन्त्रदेवता ॥
दिव्यभावो महादेव श्रेयसां सर्वसिद्धिदम् ।
द्वितीयो मध्यमः प्रोक्तः तृतीयः सर्वनिन्दितः ॥

---

१. रु० या० १।११४-११७; २. नेत्रतन्त्रे—८।५९-६२ ।
३. रु० या० ६।५१-५३; ४. तत्रैव—६।५४-५६; ५. तत्रैव—६।५७-५८ ।

बहुजपात्तथा होमात् कामक्लेशादिविस्तरैः ।
न भावेन विना देवि ! तन्त्रमन्त्राः फलप्रदाः[1] ॥

एभिः पद्यैर्भावस्य तन्त्रमन्त्रसम्बन्धिफलदायकत्वं श्रेयः प्रेय उभयविधसिद्धिप्रदत्वम्, दिव्यभावस्य वीरभावस्य तदपेक्षया ईषन्न्यूनत्वम्, तृतीयस्य पशुभावस्य उक्तोभयापेक्षया निकृष्टत्वं मन्यते ।

मन्त्रेषु दशधा दोषोत्पादनम्

कीलनेन (अन्यादृशत्वापादनेन), भेदनेन (साध्यसाम्मुख्यत्यागेन), मौनेन (निर्वीर्यीकरणेन), जम्भनेन (कार्यंकरणासाध्यसामर्थ्याधानेन), स्तम्भनेन (निश्चेष्टत्वापादनेन), प्रत्यङ्गिरत्वेन (भूतादिदमनप्रयुक्तस्य मन्त्रस्य प्रयोक्तारं प्रति विरुद्धकारित्वेन), सन्त्रासेन, ताडनेन, रिपुत्वकरणेन, सर्वहानिविधायित्वेन, एभिर्दशसंख्याकैः प्रकारैर्मन्त्राणां सामर्थ्यं क्षीयते । अतः सुगुप्ते स्थाने जपहोमादिकं विधेयम् । उक्तञ्च—

कीलनं चैव मन्त्राणां भेदनं मोहनं तथा ।
सन्त्रासं ताडनं चैव जम्भनं स्तम्भनं तथा ॥
रिपुत्वकरणं चान्यत् प्रत्यङ्गिरत्वमेव हि ।
सर्वहानिविधायित्वं क्रियते दुर्मन्त्रिभिः ॥
एवं दशप्रकारेण प्रवर्तन्ते हि हिंसकाः[2] ॥

नवविधं मन्त्रदोषनिवारणम्

मन्त्राणामुक्तदशविधदोषाणामपनयनाय नव प्रकाराः शास्त्रे उक्ताः । ते च—

दीपनं बोधनं चैव तापनं चाभिषेचनम् ।
विमलीकरणं चैव तथेन्धननिवेशनम् ॥
सन्तर्पणं गुप्तिभाव आप्यायो नवमस्तथा[3] ।
एवं नवप्रकारेण मन्त्रवादमशेषतः ।
यो जानाति स जानाति मन्त्रसाधनमुत्तमम्[4] ॥

अयमाशयः—दीपनं मन्त्रस्य प्रणवेन । बोधनं नमःशब्देन । ताडनं फट्कारेण । अभिषेचनं वौषट्कारेण । विमलीकरणं स्वाहाशब्देन । इन्धननिवेशनं दाह्यपाशविषादिदहने विनियोजनम्, तच्च हुंकारेण सम्पुटीकरणम् । तर्पणं बलवत्ताधानम्, तच्च प्रतिवर्णं लांकारेण सम्पुटीकरणम् । गुप्तिभावो रक्षणम्, तच्च नेत्रनाथसम्पुटीकृतस्य अयुतजपाद् भवति । आप्यायनं पुनर्जातबलस्य पुष्ट्याधानम्, तच्च वांकारेण प्रतिवर्णं संपुटीकरणम् ।

शारदातिलकेऽपि एष विषयो मन्त्राणां दशविधसंस्कारप्रदर्शनमुखेन प्रतिपादितोऽस्ति[5] ।

---

१. रु० या० ६।७१-७३; २. ने० त० ६।३३-३५; ३. तत्रैव—१८।६-७ ।
४. तत्रैव—१८।८; ५. शा० ति० २।११२ ।

एकादशधा विनियुक्ता मन्त्राः सिद्धिप्रदाः

सुगुप्ते स्थाने दोषपरिहार-गुणाधानपूर्वकं जपक्रियायां विनियुक्ता मन्त्राः सिद्धिं प्रयच्छन्ति । तत्र विनियोगे एकादशप्रकारा उक्ताः । तथा हि—

सम्पुटं ग्रथितं ग्रस्तं समस्तं च विदर्भितम् ।
आक्रान्तं च तथाद्यन्तं गर्भस्थं सर्वतो वृतम् ॥
तथा युक्तिविदर्भं च विदर्भग्रथितं तथा ।
इत्येकादशधा मन्त्रा नियुक्ताः सिद्धिदाः स्मृताः[1] ॥

आद्यन्तयोर्मन्त्रन्यासः सम्पुटवत् । प्रत्यर्णं मन्त्रसम्पुटीकारो ग्रथनम् । मध्यस्थस्य नाम्नो दिक्चतुष्टये मन्त्रनिवेशो ग्रस्तम् । मन्त्रादनन्तरं नाम पुनरप्येवमिति समस्तम् । नामान्तरं सकृन्मन्त्र इति विदर्भणम् । मध्यस्थस्य नाम्नो मन्त्रो यदि वेष्टनया न्यस्त आक्रान्तम् । मन्त्रादनन्तरं नाम, ततस्त्रिर्मन्त्र इत्याद्यन्तम् । मध्यस्थस्य मन्त्रस्य चतुर्दिक्कं साध्यनामन्यासो गर्भस्थत्वम् । मन्त्रस्य आद्यन्तयोः साध्यनामनिवेशः सर्वतोवृतत्वम् । पश्चान्न्यस्तमन्त्रस्य नाम्नश्चतुर्निवेशो युक्तिविदर्भणम् । नाम्नः पश्चाच्चतुर्मन्त्रन्यासो विदर्भग्रथनम् ।

नेत्रतन्त्रव्याख्यायामेतत्सर्वं स्फुटीकृतं द्रष्टव्यम्[2] । शारदातिलकेऽपि प्रकारान्तरेणायं विषयः प्रतिपादितोऽस्ति[3] ।

मन्त्राणां सिद्धत्वादिभेदास्तज्ज्ञानोपायाश्च

सिद्धं साध्यं सुसिद्धं च तथैवारित्वमेव च ।
ज्ञात्वा सर्वमशेषेण मन्त्रन्यासं समाचरेत्[4] ॥

अनेन नेत्रतन्त्रोक्तपद्येन ज्ञायते यत् साधकेन सिद्धं साध्यं सुसिद्धं चैव मन्त्रतत्त्वं ज्ञात्वा मन्त्राराधने न्यासः करणीयः ।

स्वच्छन्दतन्त्रे सिद्धादिमन्त्राणां ज्ञानोपायः प्रतिपादितः, तथा च—

मन्त्राक्षरं तु विश्लेष्य मात्राबिन्दुसमन्वितम् ।
आत्मनामाक्षरं तद्वदधोभागेऽस्य योजयेत् ॥
आत्मवर्णात् समारभ्य यावन्मन्त्रार्णमागतम् ।
यस्मिन् समापयेद् देवि तमायं परिकल्पयेत् ॥
रेखाङ्गुलिगतं तं तु कथयामि समासतः ।
पर्वणि प्रथमे सिद्धः साध्यश्चैव द्वितीयके ॥
तृतीयेऽपि सुसिद्धः स्यादरिर्ज्ञेयश्चतुर्थके ।
अरिसाध्यौ परित्यज्य दातव्यश्चुम्बकेन तु ॥
सिद्धश्चैव सुसिद्धश्च भुक्तिमुक्तिफलप्रदः[5] ।

---

१. ने० त० १८।१०-१२; २. तत्रैव—१८।१०-१२; ३. शा० ति० २३।१३६ ।
४. ने० त० १८।१२-१३; ५. स्व० त० पृ० ८।२४ ।

मन्त्राणामुदयादिज्ञानजं सर्वज्ञत्वम्

मन्त्रमाराधयतः साधकस्य मन्त्रस्योदयास्तमयव्याप्त्यादिकं परिजानतः सर्वज्ञत्वं प्रकटति। तथा चोक्तम्—

उदयास्तमयौ व्याप्तिं ध्यानं मुद्रां स्वरूपतः।
यो वेत्त्येवं स सर्वज्ञः सर्वकृत् साधकोत्तमः[1]॥

उदयास्तमयौ उन्मिषत्ताविश्रान्ती हृद्द्वादशान्तपादयोः। व्याप्तिं वीर्यम्। मन्त्राणां ध्यानं मन्त्रविषयम्। तदुचितामेव च मुद्राम्। स्वरूपत इति दीर्घात्मना स्वरूपेण, अर्थरत्नावल्यां श्रीमूलविद्याया वाग्भवबीजस्योदयो मूलाधारे, मूलादिब्रह्मरन्ध्रान्तं व्याप्तिः, विश्रान्तिस्तु जिह्वाग्रे[2]। पुनश्च कामराजबीजस्योदयो मूलाधारे, भ्रूमध्यान्ते व्याप्तिः, विश्रान्तिर्ब्रह्मरन्ध्रे प्रदर्शिता[3]। उत्तरषट्के तु—

आधारे उदयो देवि लयो हृदय उच्यते।
विश्रामं ब्रह्मरन्ध्रे तु त्रिलक्षं परिकीर्तितम्॥

इत्येषोऽर्थः प्रतिपादितोऽस्ति।

मन्त्राणां शिवशक्त्यात्मरूपत्वम्

नेत्रतन्त्रे मन्त्राः शिवशक्त्यात्मरूपत्वेन प्रतिपादिताः। तथा च—

यत्तेषां सर्ववेदित्वं सर्वशक्तित्वमेव च।
तच्छिवत्वं समाख्यातं शक्तित्वे सर्वकर्तृता॥
सर्वानुग्रहकर्तृत्वं सर्वत्र फलदायकम्।
आत्मत्वं तत्स्वरूपं तु त्रिविधं साधनं स्मृतम्[4]॥

साधकस्य समक्षं मन्त्राः पञ्चधाऽवतिष्ठन्ते। तथा च—

स्पर्शनं चावलोकश्च सम्भाषा बिन्दुदर्शनम्।
स्वयमावेशनं चैव मन्त्राणां पञ्च लक्षणम्॥

अस्यार्थोऽस्मिन्नेव उत्तरषट्के प्रदर्शितोऽस्ति[5]। एवं चाणवशाक्तशाम्भवोपायसम्बन्धिनो मन्त्राः स्वयमेवान्ततः शिवशक्त्यात्मरूपतया साधकं स्वात्मानं प्रत्याययन्ति इति तत्त्वम्। अस्यां स्थितौ विंशाधिकारे मृत्युञ्जयभट्टारके यदुक्तम्—

यदीच्छेदुत्तमां सिद्धिं मोक्षं वा शाश्वतं ध्रुवम्।
मन्त्रवादो न कर्तव्य इत्याह परमेश्वरः॥

तत्तु काम्यप्रयोगेषु मन्त्रवादाश्रयनिषेधपरतया ज्ञातव्यम्।

---

१. ने० त० १८।१३-१४; २. अर्थ० पृ० २३१; ३. तत्रैव—पृ० २४७।
४. ने० त० २१।७८-८०; ५. उ० ष० पृ० २५१।

मन्त्रार्थमन्त्रचैतन्ययोर्विमर्शः

मन्त्रार्थ-मन्त्रचैतन्य-योनिमुद्राणां परिज्ञानमन्तरा मन्त्रसिद्धिर्नैव जायते । तदुक्तम्—

मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः ।
न सिध्यति वरारोहे कल्पकोटिशतैरपि[1] ॥

तन्त्रग्रन्थेषु मन्त्रदेवतैव मन्त्रचैतन्यतया व्याख्याता[2] । मन्त्राणामर्थश्चावश्यं ज्ञातव्यः । निरुक्तेऽपि—"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्"[3] इत्येवमर्थज्ञानमहिमा वर्णितोऽस्ति । योगिनीहृदये मन्त्रसंकेतपटले श्रीविद्यायाः षड्विधो मन्त्रार्थः प्रदर्शितः । तथा च—

मन्त्रसंकेतकस्तस्या नानाकारो व्यवस्थितः ।
नानामन्त्रक्रमेणैव पारम्पर्येण लभ्यते ॥
षड्विधं तं तु देवेशि कथयामि तवानघे ।
भावार्थः सम्प्रदायार्थो निगमार्थश्च कौलिकः ।
तथा सर्वरहस्यार्थो महातत्त्वार्थ एव च[4] ॥

अयमाशयः—आदिशक्तेस्तस्या मन्त्रसंकेतको नानाकारः । तदीयविद्यायाः सांकेतिकार्थः षट्प्रकारकः; परन्तु तस्या मन्त्रो नैकः, येनैकस्यैव मन्त्रस्य षडर्थाः स्युः; किन्तु नानाविधो मन्त्रो लोपामुद्राकामराजादिभेदात् । अतश्च केचनार्थाः कादिविद्यायाः, केचिद् हादिविद्यायाः, केचित्तूभयसाधारणाः । संहृत्य षड्विधः संकेतः । तत्र कस्या विद्यायाः कोऽर्थ इति तु पारम्पर्यक्रमेणैव लभ्यते । श्रीभास्कररायेण वरिवस्यारहस्ये पञ्चदशविधोऽर्थः प्रदर्शितः । श्रीविद्याया अक्षरार्थस्तु सौभाग्यसुधोदये द्वितीये प्रपञ्चे विस्तरेण निरूपितः । मन्त्रार्थस्य मन्त्रचैतन्यस्य स्वरूपं महत्त्वं च विस्तरेण वर्णितमत्रैव रुद्रयामले । तथा हि—

मन्त्रार्थं मन्त्रचैतन्यं निजविग्रहरक्षणम् ।
मन्त्राणां मन्त्रचैतन्यं विषयाणि शृणु प्रभो ॥
मणिपूरे स्वनायासे यत्प्रसादात् स्थिरो भवेत् ।
एतत्करणमात्रेण योगी भवति निश्चितम्[5] ॥ इत्यादि ।

मुद्रास्वरूपविमर्शः

तन्त्रशास्त्रे मुद्राया महनीयं महत्त्वं वर्णितमस्ति । "तत्स्वरूपमज्ञात्वा तदननुष्ठानेन मन्त्रसिद्धिर्न सम्भवति" इति पूर्वमुक्तमेव, अतश्च मुद्रास्वरूपनिरूपणमावश्यकम् । मुद्रायाः क्रियाशक्तिरूपत्वम्, मन्त्रस्य तु ज्ञानशक्तिरूपत्वमुक्तं तत्र तत्र । तथा च—

मन्त्रो वै ज्ञानशक्तिश्च मुद्रा चैव क्रियात्मिका[6] । इत्यादि ।

---

१. प्राणतोषिणी—पृ० ४१८-१९;
२. तत्रैव ।
३. निरुक्ते—१।५।२;
४. योगिनीहृदये—२।१४-१६ ।
५. रु० या० ५२।२,४,५;
६. स्वच्छन्दतन्त्रे—४।३७५ ।

नेत्रतन्त्रेऽपि आत्मस्वरूपाभिव्यक्तेः साधनत्रयं मन्त्रध्यानमुद्रात्मकमुपदिष्टमस्ति। मुद्रा नाम काश्चन शक्तयः। उक्तं च—

मोचयन्ति ग्रहादिभ्यः पाशौघं द्रावयन्ति च।
मोचनं द्रावणं यस्मान्मुद्रास्ताः शक्तयो मताः[1] ॥

"संविदेव क्रियाशक्तिरूपेण विश्वस्य मोदनं द्रावणं च कुर्वती मुद्राख्यां लभते" इत्युक्तं योगिनीहृदये[2]। मुद्राणां परस्वरूपप्रतिविम्बता श्रीदेवीयामलप्रामाण्येन प्रतिपादिता,[3] अथ च—

मुदं स्वरूपलाभाख्यं देहद्वारेण चात्मनाम्।
रात्यर्पयति यत्तेन मुद्रा शास्त्रेषु वर्णिता[4] ॥

इत्येवं मुदं राति (ददाति) या सा मुद्रा, "आतोऽनुपसर्गे कः" इति पाणिनिसूत्रेण[5] कर्तरि कप्रत्यये टापि च मुद्राशब्दस्य निर्वचनं द्रष्टव्यम्। पुनश्च तन्त्रालोके सशक्तिकानामेतासां मुद्राणामान्तरं स्वरूपं निरूपितम्[6]। बाह्याभ्यन्तरभेदेन द्विविधा मुद्रा भवन्ति, तत्र बाह्याः कररचनारूपाः, आन्तरा तु बन्धरूपा। स्वच्छन्दतन्त्रे सर्वासां मुद्राणां त्रैविध्यमुक्तम्[7]। तथा च—

मनोजा गुरुवक्त्रस्था वाग्भवा मन्त्रसम्भवा।
देहोद्भवाङ्गविक्षेपैर्मुद्रेयं त्रिविधा स्मृता ॥

इत्याम्नायप्रामाण्योद्धरणेन स्पष्टीकृतमस्ति।

तन्त्रालोके चतुर्विधा मुद्रा प्रतिपादिता। व्याख्यातं च तत्र श्रीजयरथेन—

अङ्गुलिन्यासभेदेन करजा बहुमार्गगा।
सर्वावस्थास्वेकरूपा वृत्तिर्मुद्रा च कायिकी ॥
मन्त्रतन्मयता मुद्रा विलापाख्या प्रकीर्तिता।
ध्येयतन्मयता मुद्रा मानसी परिकीर्तिता[8] ॥ इति।

एवं च करजा-कायिकी-विलापा-मानसी इति चतस्रो मुद्राः कथिताः। अत्राङ्गुलिसन्निवेशविशेषरूपा मुद्राः प्रायेण सर्वेष्वेव तन्त्रग्रन्थेषु प्रतिपादिताः सन्ति। बन्धरूपाः संस्थानविशेषानुसरणरूपा वा मुद्रा बन्धपदेन मुद्रापदेनापि वा हठयोगग्रन्थेषु प्रतिपादिताः सन्ति[9]।

करङ्किणी-क्रोधना-भैरवो-लेलिहानिकानामिका मुद्राः खेचर्या एव प्रपञ्च इत्युक्तं तन्त्रालोके[10]। एता मुद्रा विज्ञानभैरवे क्रमदर्शनग्रन्थेषु च चिद्गगनचन्द्रिका-

---

१. ने० त० तृतीयपटले, पृ० १७४; २. यो० हृ० १।५७; ३. तन्त्रालोके—३२।१-२।
४. तत्रैव—३२।३१; ५. पा० सू० ३।२।३; ६. तन्त्रालोके—१।५८-७१।
७. स्वच्छन्दतन्त्रे—२।१०२; ८. तन्त्रालोके—३२।९।
९. हठयोगप्रदीपिका, तृतीयोपदेशे; १०. तन्त्रालोके मुद्राह्निके—३२।५-६।

महार्थमञ्जर्य्यादिषु विस्तरेण प्रकाशिताः सन्ति। तत्र करङ्किणी मुद्रा ज्ञानसिद्धानाम्, क्रोधिनी मुद्रा मन्त्रसिद्धानाम्, भैरवी मुद्रा मेलापसिद्धानाम्, लेलिहाना शाक्तसिद्धानाम्, खेचरी शाम्भवसिद्धानाम्, इत्यादिप्रकारेण वर्णनं द्रष्टव्यम्।

पाञ्चरात्रप्रभृतिषु वैष्णवागमेषु शङ्खचक्रादिभिः शरीरतापनं मुद्रापदेनोच्यते। ताश्च शरीरे आरोप्यन्ते, तथैव पाशुपतागमेषु मुद्रापदेन कीर्त्यमानानि द्रव्याणि शरीरे धार्यन्ते। यद्यपि एताभिरङ्गुलिसन्निवेशविशेषाणां संस्थानविशेषानुसरणरूपाणां वा मुद्राणां भेदः स्पष्ट एव, तथापि सर्वासामेतासां देहोद्भवविभागेऽन्तर्भावः कर्तुं शक्यते। कुलसन्ततिपरिचयाय मुद्रादीनामुपयोगः प्रकीर्तितः। तत्र पाञ्चरात्रपाशुपतागमेषु एतदर्थं बाह्यमुद्राणामुपदेशः, रहस्यप्रधानेषु च तन्त्रेषु मुद्रास्वपि रहस्यमाहितम्। स्वसन्ततिपरिचयमात्रं मुद्राणां फलमिति न; अपि तु स्वाभिन्नसंविदभिव्यक्तिरपि प्रयोजनम्, बाह्याभ्यन्तरपूजासु तासामुपयोगेनेत्यादिकं वर्णनं द्रष्टव्यं तन्त्रालोके रहस्याह्निके[१]।

नेत्रतन्त्रे स्वात्मस्वरूपाभिव्यक्तेस्त्रिविधं साधनं मन्त्र-ध्यान-मुद्रारूपमुक्तम्। अद्वैतप्रमुखेषु तन्त्रेषु सर्वं स्वात्मरूपमेव। अतश्चात्र मुद्राया अपि परसंवित्तिरूपतैव मन्तव्या[२]। अर्थरत्नावल्यां तु नवमुद्राणां बीजानि निरूपितानि[३]। अत्र चान्तिमा योनिमुद्रापि प्रथमात्वेन प्रतिपादिता, योन्युद्भूतत्वात् सर्वासां मुद्राणाम्। तथा चाभियुक्तोक्तिः—

एका चैव महामुद्रा योनिमुद्रात्वमागता।
तथा विभक्तः स्वात्मा तु संक्षोभादिप्रभेदतः[४]॥

बाह्यपूजायां सर्वसंक्षोभिणीमुद्रायाः प्राथम्यमभिमतं परमेश्वरेण। अन्तःपूजने श्रीयोनिमुद्रायाः प्राथम्यमिति विद्यानन्देनोक्तं तत्रैव[५]। उत्तरषट्कवचने योनिमुद्राबन्धो निर्दिष्टः। तथा च—

'गुदमेढ्रान्तरे योनिस्तामाकुञ्च्य प्रबन्धयेत्'[६]। इति।

योनिमुद्राबन्धो मन्त्रगतसकलदोषनिराससामर्थ्यमादधातीति तन्त्रेषूपवर्ण्यते। उक्तं चोत्तरषट्के—

यद्यदुच्चरते मन्त्रो मन्त्रवर्णं शुभाशुभम्।
तत्तत् सिध्यति देवेशि योनिमुद्रानिबन्धनात्॥

योनिमुद्रावत् खेचरीमुद्राया अपि कश्चनातिशयो विद्यते। तत्साधनेन योगी खेचरतां प्राप्नोति। एतस्या लक्षणभेदादिविचारस्तन्त्रग्रन्थेषु विस्तरेण प्रतिपादितोऽस्ति। एवं नानाविधेष्वर्थेषु मुद्राशब्दस्य प्रयोगः साम्प्रतं प्राधान्येनाङ्गुलिविरचनात्मनि विधौ

---

१. तन्त्रालोके, आ० २९, पृ० २९-३०;
२. ने० त० २१।८०।
३. अ० र० पृ० १८८-८९;
४. तत्रैव।
५. तत्रैव।
६. ऋजु० पृ० १४७।

रूढ इव उपलभ्यते । एष एव प्रकारो नित्याषोडशिकार्णवे प्रतिपादितः । अधुना सन्ध्योपासनादिषु चतुर्विंशतिभेदेन मुद्राप्रकारः प्रदर्श्यते, स तु तान्त्रिकसंस्कृतेरेव प्रभावो दृश्यते ।

इदानीं यावद् ज्ञानशक्तिस्वरूपाणां मन्त्राणां राहित्येन क्रियाशक्तिस्वरूपा मुद्रा अपि निरूपिताः । अथ शैवागमीयं पत्यादिपदार्थत्रयं प्रस्तूयते ।

पतिपदार्थविमर्शः

"शिवज्ञानामृतं पीत्वा विचरस्व यथासुखम्" इत्यादि ज्ञानधर्मोत्तरवचनं पौनःपुन्येन संस्मरता सप्रयोजने शैवागमे पतिः पशुः पाश इति पदार्थत्रयमुद्दिश्यागमानुगुणं तावत् किञ्चिद् विचार्यते ।

मृगेन्द्रागमवचनमनुसरता श्रीभोजदेवेन यदुक्तम्, तत् पदार्थत्रयमेवानुमोदितम् । तत्र पतिः शिव उक्तः, पशवो ह्याणव उक्ताः, पाशोऽर्थपञ्चकं प्रोक्तम् । तत्र विश्वसारोत्तरसूत्रे—

अचेतनस्य मायादेः प्रवर्तकतया पतिः ।
सिद्धः सर्वार्थकृत् कर्ता व्यापकः सततोदितः ॥

इत्येवं पत्युः शिवस्य स्वरूपं स्फुटं निरूपितमस्ति । सृष्टिरूपकार्यस्य कर्तृत्वमपि पत्युरेव, न तु पशोः, नापि पाशस्य इत्यपि निरूपितं वायवीयवचने । पौष्करवचनेन समस्तस्य प्रपञ्चस्याचेतनस्य चेतनप्रेरणयैव तत्र तत्र प्रवृत्तिर्निवृत्तिश्च भवत इति ज्ञायते । किरणसूत्रानुसारेण तस्य सर्वज्ञत्वमनादित्वं मलरहितत्वं शिवत्वं च प्रत्याय्यते ।

स शिवाभिधः पतिर्ज्ञानशक्त्या सर्वं विजानाति, अथ च क्रियाशक्त्या जगद् रचयति—इति रत्नत्रये द्रष्टव्यम् ।

शिवस्य कर्तृत्वविमर्शः

शिवस्य जगत्कर्तृत्वे निर्णीते एष संशय उदेति यत् शरीरं धृत्वा प्रपञ्चं निर्माति भगवान् शिवः, अथवा शरीरमधृत्वैव ? अत्रोच्यते—यद्यपि 'शाक्तं शरीरं भगवतः साकारता च' सर्वदर्शनसंग्रहे शैवमतप्रतिपादनावसरे समर्थिता, "शुद्धयोनिमयं तस्य वपुरुक्तमकल्मषम्" इति किरणायामपि उक्तम्, तथापि पत्युः शरीरपक्षे तस्य शुद्धस्य भौतिकशरीरसम्बन्धो नोचितः प्रतिभाति; किन्तु बैन्दवमेव शरीरं मन्तव्यम् । बिन्दुस्तस्योपादानतयाऽवगन्तव्यः । तच्च नात्र संभवति । तथा हि—बिन्दौ क्षोभे सत्येवोपादानता वक्तव्या, स च क्षोभः स्वतो वा शिवतो वा ? तत्र प्रथमः पक्षो न सम्भवति, आत्माश्रयदोषप्रसङ्गात् । नापि द्वितीयः, तत्क्षोभक्रियायां शिवस्यास्ति शरीरम्, तस्य शरीरस्य साधकबिन्दुमोक्षार्थं पुनः शरीरान्तरकल्पनायामनवस्थाप्रसक्तेः । यदि तत्राचलमूर्तिमात्रकृत एव क्षोभः, तर्हि सृष्टिक्रियासु तस्य शरीरकल्पना वृथैव । तस्माच्छिवस्य कारणत्रितयराहित्येन कृतशरीराभावेऽपि स्वशरीरस्पन्दादौ आत्मनः कर्तृत्ववत् सृष्ट्यादिक्रियासु कर्तृत्वं सुतरामुपपद्यते । पौष्कर एतदेव समर्थितमस्ति—

अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा । इति ।

पत्युः कर्तृत्वं सकरणकम्

प्रपञ्चस्योत्पत्तिरूपा क्रिया किञ्चित् करणमपेक्षते, क्रियात्वात्, छिदादिक्रियावत्। अतस्तदपेक्षायाम्—

यथा कालो ह्यमूर्तोऽपि दृश्यते फलसाधकः।
एवं शिवो ह्यमूर्तोऽपि कुरुते कार्यमिच्छया॥

इति किरणवचनानुसारं तस्य कर्तृत्वे इच्छाशक्तिरेव करणमिति निश्चेतुं शक्यते। न चेन्द्रियादिकरणाभावे तस्य कर्तृत्वं न सिध्यतीति वाच्यम्, अक्षरहितस्याप्ययस्कान्तमणेर्यथा लोहाकर्षणे कर्तृत्वं दृश्यते, तद्वदत्रापि ज्ञायताम्। मृगेन्द्रागमे विद्यापादे स्पष्टमेतत्प्रतिपादितमस्ति।

भगवतः शिवस्य पञ्चमन्त्रतनुत्वं पञ्चक्रियाकारित्वं च

भगवतः शिवस्य पञ्चमन्त्रतनुत्वं प्रतिपादितमस्ति—

तद्वपुः पञ्चभिर्मन्त्रैः पञ्चकृत्योपयोगिभिः।
ईशतत्पुरुषाघोरवामाजैर्मस्तकादिकम् ॥ इत्यादिना।

पुनश्च— जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः ।
कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि॥

इत्यनेन जगदुत्पत्तिस्थितिप्रभृति पञ्चकृत्यकर्तृत्वमपि भगवति शिवे निरूपितमस्ति।

भगवतः शिवस्य प्रपञ्चकारणताविचारः

शैवागमे भगवतः शिवस्य प्रपञ्चं प्रति निमित्तकारणत्वमेव स्वीक्रियते, इति पराख्यसूत्रेण ज्ञायते। यथा घटादिकार्ये कुलालस्य निमित्तकारणता, दण्ड-चक्रादीनां सहकारिकारणता, मृदादीनामुपादानत्वम्, तद्वदत्रापि पृथग्भूतेन कारणत्रयेण भवितव्यम्। अत्रोच्यते-भगवान् शिवो निमित्तकारणम्, शक्तयः सहकारिकारणम्, बिन्दुरुपादानकारणमिति स्पष्टीकृतमस्ति पौष्करे पराख्यसूत्रे च।

एतावता लूतातन्तुन्यायेन वेदान्ताभिमतमभिन्ननिमित्तोपादानत्वं निराकृतं वेदितव्यम्; तत्रापि मुखनिःसृताया लालाया एवोपादानत्वम्, चेतनतत्त्वस्य तु निमित्तत्वमिति पृथगेव व्यवस्था। ननु मायाकर्मादीनामेव प्रपञ्चस्य निमित्तत्वमस्तु, न तु शिवस्येति चेत्, उच्यते—चेतनप्रेरणां विनाऽचेतनानां कार्यकरणानुपपत्त्या तत्प्रेरकचेतनस्यावश्यकत्वे सति अस्मदादीनां जीवानां सर्वज्ञत्वाभावेन तत्प्रेरकत्वासम्भवे सर्वज्ञस्य सर्वकर्तुः शिवस्यैव तत्सम्भवेन समस्तप्रपञ्चे तस्यैव निमित्तकारणत्वौचित्याद् मायादीनां तन्निरासो बोध्यः।

पत्युस्त्रैविध्यम्

शक्तोद्यत-प्रवृत्तभेदेन पतिः शिवस्त्रिविध उच्यते। तथा च—

शक्तोद्युक्तप्रवृत्तश्च कर्ता त्रिविध उच्यते।
शक्तेः प्रवृत्तिभेदेन भेदस्तस्योपचारतः॥

अत्र यच्छक्तत्वं कार्यं प्रति योग्यत्वम् ।
असौ निष्कलावस्था तद्वान् शान्त इति कथ्यते ॥

यच्चोद्युक्तत्वं सकलनिष्कलावस्था, तद्वान् सदाशिव इति प्रोच्यते। प्रवृत्तक्रियत्वं च स्थूलतया तावद् ईश्वर एव। यथा ह्यात्मा शरीरसम्बन्धात् सकलः, प्रलयावस्थायां निष्कलः, मुक्त्यवस्थायां चेत्पर इति ज्ञायते। एवमेव शिवोऽपि सकल-निष्कलादिशब्दैर्भिन्न इत्युद्गीर्यते[1]।

पशुः (जीवः)—

पराख्यसंहितायां पशुस्वरूपं वर्णितमस्ति। तथा हि—

देहान्योऽनश्वरो व्यापी विभिन्नः समलोऽजडः।
स्वकर्मफलभुक् कर्ता किञ्चिज्ज्ञः सेश्वरः पशुः ॥

अत्र 'देहान्यः' इत्यनेन चार्वाकमतनिरासः। 'अनश्वरः' इत्यनेन क्षणभङ्गवादनिरासः। 'व्यापी' इत्यनेन जैनपक्षनिरासः। 'विभिन्नः' इत्यनेन एकजीववादनिरासः। मलशब्दो ज्ञानावरकं कर्मभिन्नमज्ञानं बोधयति, तद्वान् जीवः समलः, अजड इति ज्ञानक्रियास्वभावः, स्वकर्मफलभुगिति स्वकर्मधर्माधर्मात्मकं तस्य फलं भुङ्क्त इति। किञ्चिदल्पं जानातीति किञ्चिज्ज्ञः, 'सेश्वरः' इत्यनेन जीवे ईश्वरस्य प्रेरकत्वं लभ्यते। एतावता सांख्यमतस्यापि निरासः।

मृगेन्द्रतन्त्रे जीवस्याणुत्वं दृक्क्रियारूपचैतन्यस्वरूपत्वं प्रोक्तमस्ति[2]। मलावृतं चैतन्यं न प्रकाशते। अतश्च 'अणवश्चिद्रूपाः' इति 'शिवात्मकाः प्रमातारः' इति च नरेश्वरविवेके द्रष्टव्यम्। जीवस्य पाश्यत्वम् (पाशान्वितत्वम्) इति निरूपितं तन्त्रसद्भावे। जीवस्त्रिपुरान्तकः शिव इति च हंसभेदे निरूपितमस्ति।

पशोस्त्रैविध्यविमर्शः

विज्ञानाकल-प्रलयाकल-सकलभेदेन पशुस्त्रिविधः कीर्त्यते[3]। तत्र भोगादिना कर्मक्षये सति कलादिभोगसम्बन्धाभावात् केवलमलमात्रयुक्तो विज्ञानाकल इत्युच्यते। प्रलयेन कलादेरुपसंहाराद् मलकर्मयुक्तः प्रलयाकलः। मलमायाकर्मात्मकबन्धत्रययुक्तः सकल इत्युच्यते।

तत्र प्रथमस्य द्वैविध्यम्—समाप्तकलुषासमाप्तकलुषभेदात्। एवमेव द्वितीयोऽपि द्विविधः। पक्वपाशद्वयस्तद्विलक्षणश्च। तृतीयोऽपि द्विप्रकारः—पक्वकलुषापक्वकलुषभेदात्। तत्र परमेश्वर एषां कर्मानुगुणां कीदृशीं गतिं विदधाति, एतत् सर्वं तत्र तत्रागमग्रन्थेषु निरूपितमस्ति।

---

१. पौष्करे, विद्यापादे मतङ्गे, तन्त्रालोके—८।३७९।

२. मृगेन्द्रे विद्यापादे—२।५-६; ३. तत्त्वप्रकाशे—८।१६।

पशोरवस्थात्रयम्—

स्वायम्भुवागमे—

अथात्माऽविमलो बद्धः पुनर्मुक्तश्च दीक्षया।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः॥

इत्येवं पशोः तिस्रोऽवस्था निरूपिताः सन्ति। अत्रात्मशब्दो जीवपरः, स चात्मा केवलः, सकलः, अमल इति चावस्थात्रितययुक्तो वर्तते। तत्र प्रथमो विमलो न भवति इत्यविमलः, अत्यन्तमलिनः, केवलावस्थ इत्यर्थः। बद्धः कर्मानुरक्तः कलादिबन्धनेन बद्धः सकलावस्थः, पुनश्च दीक्षया कलादिबन्धनाद् मुक्तः अमलावस्थः शुद्ध इत्युच्यते।

केवलावस्थः—

अमूर्तः स पशुर्नित्यो निर्गुणो निष्क्रियोऽप्रभुः।
मायोदरगतो व्यापी भोगोपायेष्वशक्तितः॥
स केवलस्त्विति प्रोक्तः स्वापवान् मलबन्धनात्।

इति सुप्रभेदागमानुसारेण केवलावस्थो जीवो व्यापकः सन्नपि मायोदरे स्थितो भोगोपायेषु अशक्तः प्रोच्यते, स च भोगैकरसिकः कर्मवशगो भुवनजदेहेषु सर्वेषु पर्यटति[१]।

जीवः कलारहित इति चेतनोऽप्यचेतन इव भाति। तदुक्तं सर्वज्ञानोत्तरे—

कलानां निलयो यस्मात्तेनासौ केवलः स्मृतः। इति।

सकलावस्थः—

संसारी विषयो भोक्ता क्षेत्री क्षेत्रज्ञ एव च।
शरीरी चेति बन्धात्मा सकलः प्रोच्यते बुधैः॥

इत्येवं सकलावस्थस्य लक्षणं वर्णितमस्ति। सकलावस्थो जीवो बद्धोऽहमिति ज्ञात्वा बन्धविमुक्तये प्रयतते, इति केवलापेक्षयाऽस्य वैशिष्ट्यम्।

अमलावस्थः—

बन्धविमोकाय प्रयतमानं जीवं परमेशः शिवोऽनुगृह्णाति[२]। सोऽयमनुग्रहलक्षणो व्यापारशक्तिपात इत्युच्यते शास्त्रेषु। शक्तिपातपूतो जीवः शिवसायुज्यं प्राप्नोति। सोऽयममलावस्थो जीवो मुक्त इत्युच्यते। जीवन्मुक्तस्य लक्षणमपि—

अशरीरं यदात्मानं पश्यति ज्ञानचक्षुषा।
तदा भवति शान्तात्मा सर्वतो विगतस्पृहः॥ इति।

पाशभेदविमर्शः

तत्त्वप्रकाशकृता क्वचित् पाशानां पञ्चविधत्वम्,[३] एकत्र चतुर्विधत्वं[४] प्रोक्तमस्ति। शतरत्नसंग्रहादिषु च पाशानां पाञ्चविध्यं वर्णितमस्ति। मृगेन्द्रागमा-

---

१. तत्त्वसंग्रहे—श्लो० २५; २. मृगेन्द्रागमे–वि० पा० ५।१।
३. तत्त्वप्रकाशे—श्लो० ५; ४. तत्त्वप्रकाशे–श्लो० १६।

नुसारेण पाशाश्चत्वार एव वर्णिताः सन्ति; परन्तु अधिकं प्रविष्टं न तु तद्धानिकरमिति न्यायेन पाशपञ्चकस्य चर्चा विधीयते। तेषां नामानि—मलः, तिरोधानशक्तिः, महामाया, माया, कर्म चेति।

मलाभिधानः पाशः

मालिनीकरोति दृक्क्रियात्मकं तेज आच्छादयति, इति मलः। अयमनादिकालात् प्रवृत्तो मल एव पुरुषाणां पशुत्वमापादयति। यथा ताम्रस्य कालिमा रसशक्त्या निवृत्तो भवति, तथाऽनादिकालात् सम्प्राप्तो मलः शिवशक्त्या निवर्तते।

मलोऽज्ञानं तमोऽज्ञत्वं तिरस्कारकरस्तथा।
पतिः पशुरविद्येति मलपर्यायवाचकाः॥

इत्येवं तस्य प्रभेदाः सुप्रभेदे निरूपिताः सन्ति। मलस्य कर्मवद् नानादिप्रवाहत्वमपि तु कारणाभावादेवानादित्वं मायावदिति बोध्यम्।

यद्यपि मल एक एव, तथापि तस्य शक्तयो विभिन्ना इति नैकमुक्तौ सर्वेषां मुक्तिप्रसङ्गः[1]। पुनश्च तत्रैव—

एको ह्यनेकशक्तिर्दृक्क्रिययोश्छादको मलः पुंसाम्।
तुषतण्डुलवज्ज्ञेयस्ताम्राश्रितकालिमवद् वा[2]॥

मलश्चिच्छादक इति किरणागमेऽपि प्रोक्तम्। ननु मलस्य सत्त्वे किं प्रमाणमिति चेत्, उच्यते—मोहादिरूपकार्येण लिङ्गेन शेषवदनुमानं मन्तव्यम्। मोहादीनि मलकार्याणि सप्तविधानि सन्ति। तद्यथा—

मोहो मलश्च रागश्च विषादः शेष एव च।
वैचित्र्यं चैव हर्षाख्यः सप्तैते सहजा मलाः[3]॥

मलस्य द्वैविध्यमुक्तम्—

बौद्धं च पौरुषेयं च द्विविधं तन्मलं स्मृतम्।
तत्र दीक्षादिना याति पौरुषेयं मलं क्षयम्[4]॥
बौद्धाज्ञाननिवृत्तौ तु विकल्पोन्मूलनाद् ध्रुवम्।
तदैव मोक्ष इत्युक्तं धात्रा श्रीमन्निशाटने[5]॥

एवं स्थितौ दीक्षादिना पौरुषेयस्य मलस्य क्षयो भवति। समस्तविकल्पोन्मूलनेन बौद्धो मलः क्षयं याति, इति सिद्धम्।

मलोऽज्ञानमविद्या इत्यादयः शब्दा यद्यपि पर्यायतया सन्ति प्रयुक्ताः, तथापि तत्तद्दार्शनिकनिकायेषु वर्तते तेषां विशिष्टं वैलक्षण्यम्। शैवागमेषु प्रयुक्तो मलशब्द आणवं मलं लक्षयति। अयं च प्रथमः पाशः।

---

१. तत्त्वत्रयनिर्णयः—श्लो० ११; २. तत्रैव—श्लो० १८।
३. मतङ्गपारमेश्वरः—वि० ६।१०३; ४. तन्त्रसारे—पृ० २-५; ५. तन्त्रालोके—१।५०।

तिरोधानशक्तिनामा द्वितीयः पाशः

मलस्य शक्तयः परमेशशक्त्यधीना एव प्रसरन्ति, न तु स्वातन्त्र्येण। मृगेन्द्रतन्त्रे विद्यापादे सूत्रद्वयेनास्याः शक्तेर्वर्णनं कृतमस्ति। माहेश्वरी शक्तिस्तासां सर्वासां मलशक्तीनां धर्मानुवर्तनाद् दृक्क्रियात्मकसंविरोधकत्वरूपस्य धर्मस्यानुगमनेनैव पाशत्वेन व्यपदिश्यते, न तु तस्या मुख्यं पाशत्वम्[1]।

यतश्च सा सर्वानुग्रहकारिका समस्तजगदनुग्रहस्वभावा शिवा। इयमेव पतिशक्तिर्यावन्मलपरिपाकमचिद्रूपाणि मल-कर्म-माया-तत्कार्याण्यनुगृह्णाति, पाशं च तिरोदधातीति कृत्वा सर्वेषामनुग्रहकारित्वात् सर्वानुग्राहिकेति सिद्धम्। तथा चोच्यते—

शिवस्य शक्तिः सर्वेषां सर्वानुग्रहकारिणो।
पाशधर्मनिरोधेन पाशानां पाशहेतुना॥
निवृत्तियोग्यतां तेषां करोतीति यतस्ततः।
पाशधर्मनिरोधाच्च विधत्ते पश्वनुग्रहम्॥

एवं तत्त्वप्रकाशेऽपि पाशानुग्राहित्वमुक्तमस्ति[2]।

महामायाख्यस्तृतीयः पाशः

उपादानमन्तरेण कदाचिदपि कस्यापि कार्यस्य सिद्धिर्न भवतीति शुद्धस्याध्वनो मूलभूतमुपादानकारणं महाविद्या 'वागीश्वरी' इति विश्वसारोत्तरसूत्रमनुसृत्य प्रोच्यते। पौष्करवचनानुसारेण वागीश्वर्याः परात्वं विद्यात्वं च, मायाया स्वपरात्वमविद्यात्वं चोक्तमस्ति।

नादकारिकाऽनुसारेण महामायाया नादादीनि बहूनि पर्यायपदानि सन्ति[3]। इत्थं च महामायायाः शुद्धाध्वन उपादानकारणत्वमुक्तम्। मायाया मोहकतया प्रवृद्धपुरुषकार्यकरणरूपशुद्धाध्वकरणत्वासम्भवेन पारिशेष्याद् महामाया सिध्यति।

महामाया शुद्धविद्या वागीश्वरी मातृका चेति नामानि तन्त्रालोके व्यवहृतानि[4]। शुद्धविद्यैव महामायापदाभिधेया इत्यपि उक्तं श्रीमताऽभिनवगुप्तेन[5]। रत्नत्रये तस्या बिन्दुनादादिशब्दैः संकेतः प्राप्यते। परा-पश्यन्ती-मध्यमा-वैखरी चेति चतस्रो वृत्तयस्तस्या निरूपिताः सन्ति[6]।

कुण्डलिनी महामाया

शतरत्नसंग्रहे महामाया शक्तिः समवायिशक्तेरधो वर्तमाना मायाकर्मानुसारिणी कुण्डलिनी शक्तिः शिवस्य भगवतः परिग्रहशक्तिरित्युच्यते[7]। सेयं कुण्डलिनी सर्पाकृत्या

---

१. मृगेन्द्रागमे—वि० पा० ७।११-१२; २. तत्त्वप्रकाशः—श्लो० २०।
३. नादकारिका—श्लो० १-१०; ४. तन्त्रालोकः—८।३३७-३८।
५. ईश्वरप्रत्यभिज्ञाविमर्शिनी—३।१।६।
६. शतरत्नसंग्रहे—पृ० ४१-४४, रत्नत्रये च—श्लो० ७०-७१।
७. शतरत्नसंग्रहे—पृ० ४१-४४।

नादरूपेण स्वकार्येण प्रतिपुरुषं भेदेनावस्थिता, न तु स्वरूपेणेति सर्वज्ञानोत्तरवृत्तौ स्पष्टम् ।

इदमत्र ज्ञेयम्—समवायिशक्त्या क्षुब्धाया महामायायाः कुण्डलिन्याः सकाशान्नादतत्त्वं प्रथममुत्पन्नं भवति। इदमेव शिवाश्रयत्वेन शिवतत्त्वमप्युच्यते। ततो बिन्दुसंज्ञकं तत्त्वमुत्पन्नं भवति। इदं च तत्त्वं शब्दाधारतया शक्तितत्त्वम्, ततः नादाख्यं तत्त्वम्, ततश्चेश्वरतत्त्वम्, ततश्च विद्याख्यं तत्त्वम्, इत्येवं क्रमेण शुद्धानि पञ्चतत्त्वानि जायन्ते।

केषाञ्चनाचार्याणां मते इदं नादतत्त्वमेव महामायेतिपदेनोद्गीयते। तेषां मते चत्वार्येव शुद्धानि तत्त्वानि सन्ति। तथा हि—बिन्द्वाख्यं शिवतत्त्वमेव प्रधानमुपादानम्। अन्यानि चत्वारि तस्य कार्याणि। पौष्करवचनानुसारेण तु नादाख्यं शिवतत्त्वमपि कार्यमेव; किन्तु तत्र चत्वार्येव कार्याणि शक्तितत्त्वान्तर्भावेण शुद्धानि संकीर्तितानि। सर्वज्ञानोत्तरे तु शक्त्यभिधानं बिन्दुतत्त्वमेव परमं कारणमित्युक्तमस्ति।

महामायाया वाग्रूपाश्चतस्रो वृत्तयः

महामायाया वैखर्यादयो वाग्रूपाश्चतस्रो वृत्तयः कार्यभूता आगमग्रन्थेषु बहुत्र निरूपिताः सन्ति। विश्वसारोत्तरसूत्रे—

तस्याश्चतस्रो वाग्रूपा वृत्तयो वैखर्यादयः।
वैखरी मध्यमा चान्या पश्यन्तो सूक्ष्मसंज्ञिता॥

इत्येवं चतस्रो वृत्तयः प्रोक्ताः सन्ति। आसु चतुर्थी वृत्तिः नादरूपा, पश्यन्तीरूपा तृतीया वृत्तिर्बिन्दुः, द्वितीया वृत्तिर्मध्यमा अक्षरम्, प्रथमा वैखरी वृत्तिर्मातृका इति प्रोच्यते। अनेन शब्दसृष्टिरपि बिन्दूपादानिकेत्युक्तं भवति।

अयमत्र सृष्टिक्रमः—प्रथमं शिवेच्छया महामायायां क्षोभो भवति, ततो नादोत्पत्तिः, नादाद् बिन्दुः, बिन्दोरक्षरम्, अक्षरान्मातृका चेति। तथा हि—

नादः सूक्ष्मो भवेद् बिन्दुः पश्यन्ती मध्यमाक्षरम्।
मातृका वैखरी ज्ञेया नादाद्यास्तु शिवादयः॥

इत्युक्तं सिद्धान्तरहस्यसारे। आसां वृत्तीनामाश्रयभूतानि वृत्त्यादयः पञ्च कला बिन्दोरेव कार्याणि। एषा च महामाया शब्दवस्तूभयात्मिकाऽस्ति, शब्दात्मकानां वर्णपदमन्त्राणां कलातत्त्वभुवनानां वस्तुरूपाणां चोत्पत्तिकारणात्। महामायाया वाग्रूपत्वस्य महिमा तत्र तत्र ग्रन्थेषु प्राचुर्येण वर्णितोऽस्ति। तथा हि—

संविन्मूलाद् वर्णरूपाज्ज्ञानस्तस्मात् सरस्वती।
प्रागघोषा सनादाऽनु पुण्यतीर्था प्रवर्तते[1]॥
घोषिणी जातिनिर्घोषा नित्यमेव प्रवर्तते।
तयोरपि च घोषिण्या निर्घोषेव गरीयसी॥
सततं स्पन्दते ह्येषा शाश्वतं ब्रह्मवादिनी[2]॥

आभ्यां संवित्प्रकाश-महाभारतवचनाभ्यां तन्महत्त्वं द्रष्टव्यम्।

---

१. संवित्प्रकाशे—पृ० ८७; २. महाभारतम्, आश्व० ५० २१-२२।

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः[1] ॥

इति वाक्यपदीयपद्यमपि वाक्तत्त्वस्य ब्रह्मात्मकतां प्रतिपादयत् तदीयमहत्त्व-प्रख्यापनेऽग्रतः पादं विदधाति। अत्र वाक्तत्त्वस्योत्पत्तिविनाशरहितत्वं व्यापकत्वं सच्चिदानन्दात्मकब्रह्मरूपत्वम्, जगतो मूलभूतस्य वेदस्य प्राथमिकविवर्त्युपादानत्वम्, तदनु आकाशादिप्रपञ्चजातस्य च विवर्त्युपादानत्वं साधु प्रतिपादितमस्ति।

पद्येऽस्मिन्नुत्तरार्द्धे 'विवर्ततेऽर्थभावेन', 'प्रक्रिया जगतो यतः' इत्यनयोरंशयोर्थतः पौनरुक्त्यमायाति, तत्परिहाराय जगत्पदस्य जगतो मूलभूते वेदे लक्षणा कर्तव्या भवति, प्रक्रियापदे प्रपदेन प्राथम्यस्य बोधः, क्रियापदेन च विवर्तस्य बोधः। अतो जगतो मूलभूतस्य वेदस्य प्रथमो विवर्तः, शब्दब्रह्मणः सकाशात् समपद्यत। उक्तञ्च—

"यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै"।

अत्र ब्रह्मण उत्पत्तिर्वर्णिता भगवतः सकाशात्। वेदानां सृष्टिकर्त्रे ब्रह्मणे प्रेषणं चोक्तम्। एतावता वेदानामपौरुषेयत्वं सूचितम्। द्रष्टव्यं विस्तरेण चैतद् व्याख्यानं वाक्यपदीयटीकायामस्मद्गुरुवरैः सम्पादितायामम्बाकर्त्र्याम्[2]।

मायाख्यचतुर्थपाशविमर्शः

मायातत्त्वं जगद्बीजमविनाश्यशिवात्मकम्।
विश्वैकमकलं सूक्ष्ममनाद्यव्ययमीश्वरम्॥

इत्येवंलक्षणं मायारूपमुक्तं शतरत्नसंग्रहे स्वायम्भुवसूत्रे। प्रलये सर्वं जगद् यतो भवति[3], सा माया इति व्युत्पत्तिद्वयेन द्विविधो मायापदार्थो लक्ष्यते।

विनाशं न गच्छतीत्यविनाशि = अव्ययमिदं मायातत्त्वम्, सर्वविकाराणामुपादानम्। ननु जगदुत्पत्तौ परमाण्वादिवदुपादानकारणबाहुल्यमभ्युपगम्यताम्, बहुभ्यस्तन्तुभ्य एकस्य पटस्योत्पत्तिदर्शनात्। किं मायाख्यस्यैकस्य परमकारणस्य कल्पनया? इति चेत्, सत्यम्, अनेकतन्त्वात्मकं यत् कारणं पटस्योक्तम्, तदपि एकस्मादेव कार्पासद्रव्यादवगम्यताम्। एवं परमकारणादेकस्मादेव मायातत्त्वात् सर्ग-स्थिति-प्रलयहेतुभूतात् सर्गादौ जगदुत्पत्तिरितीश्वरवत् पुरुषार्थसाधकत्वादीश्वरत्वमपि मायातत्त्वस्य सुसम्पन्नम्।

जगत उत्पत्तिक्रमोऽत्रेदृशः—मायातत्त्वात् प्रथमतः कलानियतिनाम्नोस्तत्त्वयोरुत्पत्तिः। कलातत्त्वात्तु विद्यारागतत्त्वयोः प्रधानतत्त्वस्य चेति त्रयाणामुत्पत्तिः, श्रीकण्ठ-

---

१. वा० प० १।१; २. तत्रैव, टीकायाम्; ३. पौष्करवचनमेतत्।

क्षोभितात् प्रधानतत्त्वात् सत्त्वरजस्तमसामभिव्यक्तिः, तेभ्यश्च बुद्धितत्त्वस्य, बुद्धितत्त्वाच्च त्रिविधस्याहङ्कारस्य, तैजसादहङ्काराद् मनसो ज्ञानेन्द्रियाणां च, वैकारिकादहङ्कारात् कर्मेन्द्रियाणाम्, तामसादहङ्कारात् पञ्चतन्मात्राणाम्, ततश्चाकाशादिपञ्चभूताना-मुत्पत्तिः। एवं संक्षेपेण वर्णितो मायाख्यश्चतुर्थः पाशः।

कर्माभिधपञ्चमपाशविमर्शः

धर्माधर्मात्मकं कर्म तच्च त्रिविधमर्थतः।
जात्यायुर्भोगदं येन नामिश्रं पच्यते क्वचित्[1]॥

इति विश्वसारोत्तरसूत्रोक्तं कर्मलक्षणं विमृश्यते। धर्माधर्मात्मकं कर्म जातिप्रद-मायुःप्रदं भोगप्रदं चेति त्रिविधं भवति। योगसूत्रेऽपि—'सति मूले तद्विपाको जात्यायु-र्भोगाः' इत्येवमुक्तमस्ति। अत्र जातिर्देवत्वादिः, आयुः शतवर्षेष्वपि जीवनादिः, भोगः सुखदुःखादेरनुभवः। सेवा कृष्यादिषु युगपत्प्रवृत्तयोः पुरुषयोरेकस्य फलसिद्धिरपरस्य नेत्यत्र धर्माधर्मात्मकं कर्मैव कारणं मन्तव्यम्[2]।

दृष्टमदृष्टं च द्विविधं कर्मेति मृगेन्द्रसूत्रेण ज्ञायते[3]। तत्रादृष्टं कर्म देहेन्द्रिय-भुवनादीनामुत्पादकं धारकमध्यात्मादि त्रितयसाधकं च भवति। तत्रेष्टदेवतानुध्यान-नमस्कार-स्तोत्रपाठ-यजन-हवन-प्रभृतिकर्मधर्मात्मकम्। परधनहरणेच्छा-तत्प्रवाद-तद्धिसादिकं कर्म अधर्मात्मकम्। सिद्धान्तसारावल्यध्ययनेनैतज्ज्ञायते यत् सत्त्यानृतयोनि-त्वात् कर्म धर्माधर्मात्मकं भवति। एतच्च स्वापे परिपाकमाप्नोति, सृष्टिकाले उपयोग-मेति, संहारकाले च मायामाश्रित्य तिष्ठति।

स्वायम्भुवागमे तु 'कर्मतश्च शरीराणि विविधानि शरीरिणाम्' इत्युक्तमस्ति। पौष्करवचनमनुसृत्य निश्चीयते—"नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति। किरणागमाध्यनेन ज्ञायते यद् दीक्षाप्रायश्चित्तादिना तस्य क्षयो भवतीति। नित्य-नैमित्तिककाम्यकर्मणां वर्णनं प्रायः सर्वत्र शास्त्रेषूपलभ्यते। शान्तिक-पौष्टिकादीनि मारण-मोहनादीनि नानाविधानि षट्संख्याकानि कर्माणि, तेषां साधकाः प्रयोगाश्च प्रायो बाहुल्येन तन्त्रसार-नेत्रतन्त्र-तन्त्रालोकादिग्रन्थेषु प्राप्यन्ते। तथा च—

पूजा होमो बलिर्भिन्ना चरुश्चातिथिपूजनम्।
षट् कर्माणि तु कार्याणि शिवाचार्येण नो परैः॥

इत्येवं षट्कर्माणि निरूपितानि सन्ति।

महान्ति पुस्तकान्याहुर्यदाज्ञावशतः सुराः।
पावनानि नमस्तस्मै स्वच्छन्दाय हराय ते[4]॥

इति वचनेन ज्ञायते यत् परमेश्वराज्ञावशीभूतेन जीवेन तत्समर्पणबुद्ध्या यत्कर्म क्रियते, तदपि पावनमेव मन्तव्यम्। भोगादिना कर्मणां क्षये तन्निर्मुक्तो जोवः परमां

---

१. विश्वसारोत्तरसूत्रम्; २. "उभयोः कृषिसाम्येऽपि कश्चिद् धान्यानि गच्छति" (पौष्करे)।
३. मृगेन्द्रसूत्रम्—८।३।४; ४. भट्टनायकस्तोत्रं द्रष्टव्यम्।

शान्तिं लभते। भर्जितं बीजं यथा न प्ररोहति, तथैव विकल्पमुक्तचित्तस्य कर्मापि न जननादिकारणं भवति। मोहमूलान्येव कर्माणि संसृतिकारणानि भवन्ति। एवं मलादयः पञ्च पाशा निरूपिताः।

एतावता प्रबन्धेन पति-पशु-पाशरूपत्रिविधपदार्थस्येषज्ज्ञानप्रकारः प्रदर्शितः। तत्र शिवस्य पत्युर्ज्ञानेनैव मुक्तिः सम्भवति। पशु-पाशज्ञानं तु परम्परया तत्रोपकारकम्। बहिरन्तश्च सर्वत्र ज्ञानमेव विषयात्मकज्ञेयात्मना प्रकाशते, ज्ञानं विना विषयस्य काऽपि सत्ता नास्ति।

यत्र सर्वं लयं यान्ति दृश्यन्ते तत्त्वसञ्चयाः।
तां चितिं पश्य कायस्थां कालानलसमत्विषम्॥

इति वीरावलीशास्त्रादिषु चर्चिता चितिरन्यत्रागमग्रन्थेषु संवित्पदेन वर्णिता। सैव संविद्रूपा पराशक्तिः परमेश्वरादभिन्नेति संविदभिन्ने परतत्त्वे भगवति शिवे भारमारोप्य तान्त्रिकाः परं सुखमासते।

चतुष्षष्टितन्त्राणि

श्रीजयरथकृत-तन्त्रालोकविवेकधृतायां श्रीकण्ठ्यां संहितायाम्, नित्याषोडशिकार्णवे, कुलचूडामणौ, सर्वोल्लासतन्त्रे, महासिद्धसारतन्त्रपरिगणितेषु विष्णुक्रान्ता-रथक्रान्ता-अश्वक्रान्ताविभागेषु च चतुष्षष्टितन्त्रनामानि दृश्यन्ते। तत्र श्रीकण्ठ्यां संहितायामभेदप्रधानानां चतुष्षष्टिभैरवागमानां निर्देशः। नित्याषोडशिकार्णवोक्तः एतद्विषयकः प्रकारो भिन्नः। कुलचूडामणावपि अयमेव प्रकारो गृहीतः। सर्वोल्लासादितन्त्रेषु तृतीयः प्रकारो दर्शितोऽस्ति।

नित्याषोडशिकार्णवे भैरवाष्टकं बहुरूपाष्टकं यामलाष्टकं च निर्दिष्टम्। चतुष्षष्टितन्त्रपरिगणनेऽत्र वर्तते मतभेदः टीकाकाराणम्। चतुःषष्टिभैरवागमा अष्टाष्टकविभागेनाष्टभिर्भैरवैरुपदिष्टा इति तन्त्रालोकविवेकधृतश्रीकण्ठीयसंहितावचनेभ्यः सुस्पष्टं प्रतीयते।

तत्र स्वच्छन्दादीनि भैरवतन्त्राणि बहुरूपेण, मततन्त्राणि चण्डेन, मङ्गलातन्त्राणि क्रोधेशेन, चक्राष्टकम् असिताङ्गेन, अन्धकाद्यं बहुरूपाष्टकं रुरुणा, वागीशाष्टकं कपालीशेन, शिखाष्टकमुन्मत्तेन भैरवेण भाषितानि केषाञ्चिन्मते—

असिताङ्गो रुरुश्चण्डः क्रोध उन्मत्त एव च।
कपाली भीषणश्चेति संहारश्चाष्टभैरवाः॥

इत्युक्तानामष्टभैरवाणामष्टौ तन्त्राणि कथितानि। अन्येषां मते तु सिद्धिभैरव-वटुकभैरव-कङ्कालभैरव-योगिनीभैरव-महाभैरव-शक्तिभैरव-मायिकभैरव-कङ्कालाग्निभैरवाष्टकप्रतिपादकं तन्त्राष्टकमिति। इदमुभयमपि संख्यासम्पत्तिविरोधाद् यामलादिशब्दवद् भैरवशब्दस्य तन्त्रेषु क्वापि प्रयोगादर्शनाच्च चिन्त्यम्। अतश्च षोडशनित्यानामेकतन्त्रवदष्टभैरवाणामेकमेव तन्त्रमिति मन्तव्यम्[१]।

१. सेतुबन्धे, पृ० २२।

तत्र तत्र तन्त्रग्रन्थेषु चतुष्षष्टितन्त्राणां नामान्यपि निर्दिष्टानि सन्ति, तत एव तेषां ज्ञानं कार्यम् ।

पीठस्वरूपविमर्शः

महासंविदुपलब्धिस्थानानि पीठानि डॉ० दिनेशचन्द्रसरकारनिबद्धे 'दी शाक्त पीठाज्' इत्यभिधाने निबन्धग्रन्थे विस्तरेण वर्णितानि सन्ति । नित्याषोडशिकार्णवे द्वादशश्लोक्या द्वादशे पद्ये चत्वारि पीठानि वर्णितानि । तन्त्रालोके[1] तद्विवेके च नैशसंचारशास्त्रप्रामाण्येन पीठोपपीठसन्दोहोपसन्दोहक्षेत्रोपक्षेत्राणि वर्णितानि । शास्त्रेषु सदा यथायोग्यं स्थानं पीठनाम्नाऽभिधीयते । तच्च बाह्याभ्यन्तरभेदेन बहिर्देहे च विराजते । तद्यथा—भगवतः शिवस्येच्छाशक्तिरेव पीठभावमयते । समस्तस्य जगत आधारभूतं तत् । अत एव तस्याः शक्तेर्नैमित्तिकमिदमभिधानं पीठमिति । शक्तिपीठाद् बिन्दुनादमयं पीठद्वयं जायते । बिन्दुपीठो वामभागे, दक्षिणे च नादपीठः । एवं पीठत्रयं निष्पद्यते । शक्तिपीठं कामरूपं प्रथमम्, दक्षिणे नादपीठं पूर्णगिरिः, उत्तरे च बिन्दुपीठमुड्डीयानाख्यम् । एतत्पीठत्रयं मुख्यम् ।

तन्त्रालोके एकोनत्रिंशाह्निके पीठन्यासादिप्रसङ्गेऽपि पीठनामानि दृश्यन्ते । तद्यथा—

अट्टहासं शिखास्थाने चरित्रं च करन्ध्रके ।
श्रुत्योः कौलगिरिं नासारन्ध्रयोश्च जयन्तिकाम् ॥
भ्रुवोरुज्जयिनीवक्त्रे प्रयागं हृदये पुनः ।
वाराणसीं स्कन्धयुगे श्रीपीठं विरजं गले ॥
एडामीमुदरे हालां नाभौ कन्दे तु गोश्रुतिम् ।
उपस्थे मरुकोशं च नगरं पौण्ड्रवर्धनम् ॥
एलापुरं पुरस्तीरं सक्थ्यूर्वोर्दक्षिणादितः ।
कुल्लाकेशीं च सोपारं मायाकुक्षीरके तथा ॥
जानुजङ्घे गुल्फयुग्मे त्वाम्नातनृपसद्मनि ।
पादाधारे तु वैरिञ्ची कालाग्न्यवधिधारिकाम्[2] ॥

शिखास्थाने द्वादशान्ते, हालामिति अलिपुरम्, गोश्रुतिमिति गोकर्णम्, नृपसद्म राजगृहम्, वैरिञ्चीमिति ब्रह्माणीम्, श्रीशैलाख्यं तु तत्पीठमित्यर्थ इति जयरथेन व्याख्यातम् । शारदातिलकटीकायां राघवभट्टेन "अष्टपीठं महादेव्या अष्टाष्टकसमन्वितम्[3]" इत्यस्य व्याख्यायां चतुष्षष्टिपीठानां संकेतः श्लोकत्रयेण कृतः । तथा हि—

---

१. तन्त्रालोके—१५।८२-९६; २. तत्रैव—२९।५९-६३ ।
३. शा० ति० १।८५, टीकायाम् ।

मायामङ्गलभागवामनमहालक्ष्मीचरित्रा भृगु-
च्छायाछत्रहिरण्यहस्तिनमहेन्द्रोड्डीशचम्पापुरम् ।
षष्ठक्षीरकमञ्जनेश्वरपुरैलाश्चन्द्रपूः श्रीगिरिः
कोलाकुल्लकपूर्णपर्वतकुरुक्षेत्रैकलिङ्गार्बुदाः ॥
काश्मीरैकाम्रकाञ्चीमलयगिरिवरैकारकन्धूतदेवी
कोट्टाम्रातेशजालन्धरसुरभिमनीषाद्रिकाशीप्रयागाः ।
त्रिस्रोतः कामकोट्टोज्जयिनीमथुरं कोशलाकान्यकुब्जो-
ड्यानौङ्कारादृहासा विरज इह ततः कुण्डिनं राजगेहम् ॥
नेपालपुण्ड्रवर्धनसालवपरसीरकामरूपकेदाराः ।
विन्ध्यमहापथगोश्रुतिकाम्पिल्यश्रीपीठमरुदीशाः[1] ॥

अर्थरत्नावल्यां पीठोपपीठक्षेत्रोपक्षेत्रसन्दोहोपसन्दोहशब्दा व्यवहृताः सन्ति; परन्तु परवर्तिनि काल एष विभागो नाङ्गीकृतः, सर्वाणि च तानि स्थानानि पीठशब्दोदर एवान्तर्भूतान्यभवन् ।

सिद्धान्तागमेषु चतुर्विंशत्युत्तरशतद्वयसंख्याकानि (२२४) भुवनानि निर्दिष्टानि । अत्रत्येषु पीठनामसु कानिचिदट्टहास-गोकर्ण-कुरुक्षेत्र-आम्रातकेश्वर-श्रीशैलप्रभृतीनि नामानि तत्राप्यवलोक्यन्ते । एतावतेदं ज्ञायते यत्पूर्वं तेषु तेषु सम्प्रदायेषु तानि तानि तन्त्रप्रधानानि पूजास्थानानि तत्तदाचार्याविर्भावस्थानानि वा तारतम्येन पीठोपपीठादिनाम्ना प्रसिद्धान्यभवन् । कालक्रमेण तेषां महत्त्वं विलुप्तप्रायमभूत् । शैवानि वैष्णवानि च तीर्थानि तत्र समावेशितानि । अद्यत्वे नानाग्रन्थेषु पठितानि पीठनामानि पञ्चशतानि ततोऽप्यधिकानि वा सन्ति । तानि 'दी शाक्त पीठाज्' इत्याख्ये ग्रन्थे द्रष्टुं शक्यन्ते । खेदस्यायं विषयो यत्साम्प्रतं प्राचीनानि बहूनि स्थानानि विस्मृतानि, विलुप्तानि वाऽभवन् । द्वादशज्योतिर्लिङ्गेषु द्वित्राणां ज्योतिर्लिङ्गानां काश्यादिक्षेत्रेषु वा कतिपयलिङ्गाधिष्ठितस्थानानां निर्णयः कर्तुं यदा न शक्यते, तदा का कथा पीठानां नामस्थानयोः परिचयस्य ?

एवञ्च—आगमशब्दार्थविचारः, यामलतत्त्वविमर्शः, रुद्रयामले विशेषविचारः, मातृकास्वरूपविमर्शः, मातृकावर्गविमर्शः, वर्णसंख्याविमर्शः, वर्णाभिव्यक्तिविचारः, तन्त्रशास्त्रस्य वैदिकत्वावैदिकत्वविचारः, तन्त्राणामुत्तमाधमभावविमर्शः, तन्त्रीयविभागत्रयविमर्शः, स्रोतोविभाग-पीठविभाग-आम्नायविभागानां विमर्शः, आम्नायविभागे त्रिपुरोपास्तिविमर्शः, मन्त्रस्वरूपविमर्शः, भावत्रयविमर्शः, मन्त्रजपे दोषनिरूपणम्, मन्त्रार्थमन्त्रचैतन्ययोर्विमर्शः, मुद्रास्वरूपविचारः, शैवागमीयपदार्थत्रयविमर्श इत्येवमादयो बहवो विषयविमर्शाः प्रसङ्गेन कृताः ।

एषु विमर्शेषु आगमशास्त्रे कृतभूरिपरिश्रमाणां सुहृद्वरपण्डित**श्रीव्रजवल्लभद्विवेदि**महोदयानां निबन्धग्रन्थतो मया भूरि साहाय्यं लब्धम्, तदर्थं तदीयां कृतज्ञतां वहामि ।

---

१. शा० ति० पृ० ५२-५३ ।

रुद्रयामलस्योत्तरतन्त्रत्वविचारः

अस्योत्तरतन्त्रत्वविषयेऽत्रैव विचारः कृतोऽस्ति । तथा हि—

परा श्रीपरमेशानीवदनाम्भोजनिःसृतम् ।
श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलम् ॥
शक्तियामलमाख्यातं ब्रह्मणः स्तुतिहेतुना ।
ब्रह्मयामलवेदाङ्गं सर्वं च कथितं प्रिये ॥
इदानीमुत्तरकाण्डं वद श्रीरुद्रयामलम् ।
यदि भाग्यवशाद्देवि ! तव श्रीमुखपङ्कजे[1] ॥
एतदुक्तं महादेवोत्तरतन्त्रनिरूपणम् ।
मन्त्रसिद्धिलक्षणं तदुत्तमाधममध्यमम्[2] ॥

एतैः पद्यैः स्पष्टं प्रतीयते श्रीरुद्रयामलमुत्तरतन्त्रमिति ।

अथ चोत्तरषट्कनामा ग्रन्थः तन्त्रग्रन्थेषु परिसंख्यातः, केरलविश्वविद्यालय-पुस्तकालये, मद्रपुरीराजकीयपुस्तकालये च प्राप्तुं शक्यते। अयं ग्रन्थो योगिनीहृदयदीपिकायामपि संकेतितोऽस्ति । एतद्दर्शनेन ज्ञायते यदेष ग्रन्थो रुद्रयामलस्यैवांशभूत इति । त्रिपुरासिद्धान्तोऽप्यत्र प्रतिपादित इति । एतेन ज्ञायते यत् पूर्वकाण्डमपि यामलमस्ति । तत्र च शक्तियामल-विष्णुयामल-ब्रह्मयामलानां वर्णनमभवत् । एषां वेदाङ्गत्वं चापि उक्तम् ।

यामलतन्त्रस्योपासनायाः समयः फलं च

'यामाः (प्रहराणि) सन्ति यस्यां सा यामिनी' अनया व्युत्पत्त्या यामिनीशब्दो निष्पन्नो भवति । यामशब्दाद् मत्वर्थीय इनिप्रत्ययः, स्त्रीत्वविवक्षायां ङीप् । योगरूढिशक्त्या यामिनीशब्दो रात्रिपरतया विख्यातः । यामशब्दः प्रहरात्मकसमयविशेषवाचकः । यामचतुष्टयवती यामिनी (रात्रिः) भवति । अस्य यामचतुष्टयस्य महनीयं महत्त्वं शास्त्रेषु ख्यापितोऽस्ति । उक्तञ्च—

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी'[3] इति ।

अनया गीतोक्त्या ज्ञायते यत् संयमिनः निशायां जाग्रति । जागरितावस्थायां संयमं कुर्वन्तीत्यर्थः । एवं च यामिनीविहितानि कर्माणि यत्राश्रीयन्ते, तत्तन्त्रं यामलं नाम । अनया रीत्या रात्रौ एकान्तताया लाभाद् यामलतन्त्रस्य साधनाया गोप्यत्वं सुरक्षितं भवति ।

शिवस्य गुप्तरहस्यं शक्तिरेव, शक्तेश्च गुप्तरहस्यं शिव एव विजानाति, अनयोश्च गोपनं यो जानाति, स साधको यामलीय इति कथ्यते । अथ च यमनं = नियमनं यामः, यमुधातोर्वञ्प्रत्ययो भावे कृते सति यामशब्दो निष्पद्यते । ततश्च यामं नियमनं = नियमं लाति = आदत्ते इति यामलं तन्त्रम् । "आतोऽनुपसर्गे कः"[4]

---

१. रु० या० १।१-३; २. तत्रैव—२८।१० ।
३. श्रीमद्भगवद्गीता—२।६९; ४. पा० सू० ३।२।३ ।

इति पाणिनिसूत्रेण कर्तरि कप्रत्यये सति यामलशब्दो निष्पन्नो भवति। तदर्थश्च नियमनाधायकं तन्त्रम्। नियमनमर्थाद् नियन्त्रणं सम्पादयति एतत् तन्त्रम्। एतावता सर्वतोभावेन सुरक्षिततत्वमदसीयसाधनाया इत्यागतम्। भगवान् रुद्रः स्वयं नानातन्त्रार्थ-पारगः सर्वज्ञः, तत्सम्बन्धिनी एषा साधना कुलतन्त्राभिसाधिका प्रोच्यते। एनां साधनामन्तरा साधकस्य सिद्धिः कथं स्यात् ?

उक्तं चात्रैव रुद्रयामले तन्माहात्म्यवर्णनमुखेन—

ये जानन्ति महाकालं यामलं कलिपावनम् ॥
आब्रह्मस्तम्बपर्यन्तं करे तस्य न संशयः।
तत्प्रकारमहं वक्ष्ये निगमागममङ्गलम् ॥
यस्माद्रुद्रो भवेज्ज्ञानी नानातन्त्रार्थपारगः।
यामिनीविहितं कर्म कुलतन्त्राभिसाधनम् ॥
महावीरहितं यस्मात् पञ्चतत्त्वस्वरूपकम्।
लङ्घनं नास्ति मे नाथ अस्मिन् तन्त्रे सुगोपनम् ॥
ततो यामलमाख्यातं चन्द्रशेखर शङ्कर।
यदि न पठ्यते तन्त्रं यामलं सर्वशङ्करम्।
तदा केन प्रकारेण साधकः सिद्धिभाग् भवेत्[1] ॥

एवञ्च शिवशक्त्योरभेदभावनयाऽनुग्रहप्राप्तिर्भवति, ततश्च महतः सुखस्या-वाप्तिर्भवति। उक्तञ्च—

भावादनुग्रहप्राप्तिरनुग्रहान्महासुखी[2]। इति।
भावेन ज्ञानमुत्पन्नं ज्ञानान्मोक्षमवाप्नुयात्[3] ॥ इति च।

एवञ्च निरतिशयसुखमेव मोक्षपदवीमधिरोहति। तच्च तन्त्रशास्त्रप्रतिपाद्य-ज्ञानहेतुकमपि समस्तस्य संसारस्याधिष्ठातुः परमशिवस्य प्राणशक्तिरूपायास्त्रिपुरसुन्दर्याः सायुज्यमन्तरा नैवास्वादयितुं शक्यते। तथा चोक्तं सौन्दर्यलहर्य्याम्—'परानन्दाभिख्यं रसयति रसं त्वद्भजनवान्' इत्यादिना।

यामलतन्त्रीयचक्राणां साध्यफलानि

अस्मिन् रुद्रयामलाख्ये तन्त्रेऽनेकानि चक्राणि तत्साध्यफलानि च वर्णितानि सन्ति। तथा हि—

ताराचक्रं राशिचक्रं कूर्मचक्रं तथापरम्।
शिवचक्रं विष्णुचक्रं ब्रह्मचक्रं विलक्षणम् ॥
देवचक्रं ऋणिधनि उल्काचक्रं ततः परम्।
वामाचक्रं चतुश्चक्रं सूक्ष्मचक्रं ततो वदेत् ॥

---

१. रु० या० १।९१-९५, १०५; २. तत्रैव—१।११८; ३. तत्रैव—१।२२१।

तथाकथहचक्रं च कथितं षोडशं प्रभो।
एतदुत्तीर्णमन्त्रं च ये गृह्णन्ति नरोत्तमाः॥
तेषामसाध्यं जगति न किमपि वर्तते ध्रुवम्[1]॥

अधिकारिभेदेन चक्रस्योपयोगिता वर्तते। यथा वैष्णवानां कृते ताराशुद्धिः, शैवानां कोष्ठशुद्धिः, शाक्तानां राशिशुद्धिः, कृष्णसाधकानां कृतेऽकडमशुद्धिरपेक्ष्यते। उक्तञ्च—

ताराशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च।
राशिशुद्धिः त्रैपुरस्य गोपालेऽकडमः स्मृतः[2]॥ इति।

एवमेव बाला-भैरवी-कुमारी-ललिता-कुरुकुल्लादिसाधने राशिचक्रम्, प्रत्यङ्गिरा-साधने उल्काविद्यादिसाधने च शिवचक्रम्, कालिका-चर्चिका-विमला-सम्पत्तिप्रदादि-साधने विष्णुचक्रम्, छिन्नायाः, श्रीविद्यायाः, कृत्यायाः, नक्षत्रविद्यायाः, कामाख्यायाः, ब्रह्माण्याश्च साधने ब्रह्मचक्रम्, वज्रज्वाला-महाविद्या-गुह्यकाली-कुब्जिकादिसाधने देवचक्रम्, अट्टहासा-कामेश्वरी-राकिणी-मन्दिरादिसाधने ऋणिधनिनाम महाचक्रम्, श्रीविद्या-भुवनेशानी-भैरवी-पृथ्वी-वीणा-वामनीप्रभृतीनां च साधनेषु उल्काचक्रादि प्रयोक्तव्यं भवति।

अकथहचक्रस्य वर्णनम्

प्रसङ्गादत्राकथहचक्रस्येषद्वर्णनं विधीयते। अस्य चक्रस्य निर्माता ज्ञाता साधकश्च कामरूपी भवति, इह लोके निखिलकामनासिद्धिः, अन्ते च मोक्षावाप्तिस्तस्य भवति। अस्य चक्रस्य निर्माणाय भूर्जपत्रमयम्, ताम्रमयम्, राजतम्, सौवर्णम्, मणिमयं वा चतुरस्रं सर्वतः समकोणमाधारपत्रं ग्राह्यम्। तत्र चत्वारि कोष्ठानि निर्मातव्यानि। पुनः प्रतिकोष्ठं चतुर्णां कोष्ठानां निर्माणेन षोडशकोष्ठानि निर्मितानि भवन्ति। तत्रापि प्रतिकोष्ठं कोष्ठचतुष्टयस्य निर्मित्या चतुःषष्टिः कोष्ठानां जायते। तेषु दक्षिणतः क्रमेणाकारादाराभ्य क्षकारान्ता वर्णा लेखनीयाः। तथा चोक्तम्—

चतुरस्रे लिखेद् वर्णांश्चतुःकोष्ठसमन्विते॥
चतुःकोष्ठे चतुष्कोष्ठे चतुश्चतुर्गृहान्वितम्।
मन्दिरं षोडशं प्रोक्तं सर्वकार्यार्थसिद्धिदम्॥
चतुरस्रं लिखेत् कोष्ठं चतुःकोष्ठसमन्वितम्।
पुनश्चतुष्कं तत्रापि लिखेद् धीमान् क्रमेण तु॥
सर्वेषु गृहमध्येषु प्रादक्षिण्यक्रमेण तु।
अकारादिक्षकारान्तं लिखित्वा गणयेत्ततः[3]॥

एवं चाकारादेः क्षकारान्तस्य च 'अक्षमिति', 'अहमिति' वा संज्ञा शास्त्रेषु प्रसिद्धा। सृष्टेरादिरकारोऽन्त्यो हकारः कथ्यत एव। अकारहकारयोः सामरस्यमेव पराहन्तास्वरूपेण समुल्लसति। तथा चोक्तम्—

---

१. रु० या० २।१२९-१३२; २. तत्रैव—२।१३४-१३५; ३. तत्रैव—५।२-५।

अहमित्येकमद्वैतं यत्प्रकारात्मविभ्रमः ।
अकारः सर्ववर्णाग्र्यः प्रकाशः परमः शिवः ॥
हकारोऽन्त्यः कलारूपो विमर्शाख्यः प्रकीर्तितः ।
अनयोः सामरस्यं यत् परस्मिन्नहमि स्फुटम्[१] ॥

इदमेव तत्त्वमहन्तेदन्तेति पदाभ्यां सर्वत्र शास्त्रे व्यपदिश्यते । एषा वर्णमातृका-चक्रोक्तिः अक्षमालाक्रमेण रहस्यसम्पादयित्री सती नानाचक्रसम्पादिका भवतीति जानन्त्येव सर्वे आगमविदः । उक्तञ्च—

अकारः प्रथमं देवि क्षकारोऽन्त्यस्ततः परम् ।
अक्षमातेति विख्याता मातृका वर्णरूपिणी[२] ॥

इदमेव तत्त्वमक्षरपदेनापि व्यवह्रियते, भगवद्गीतायां ब्रह्मापरपर्यायतयेदमेव उक्तमस्ति । तथा हि—

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।
भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः[३] ॥ इति ।

एषा वर्णमातृका स्वान्तर्गतानन्ताक्षरराशिमहामन्त्रवीर्यपूर्णाहन्तारूपिणी, प्रकाशानन्दसारा बिन्दुमयसमष्टिरूपलिप्यक्षररूपिणी कामकला नाम महात्रिपुरसुन्दरी परमयोगिभिरनिशमनुस्त्रियते । यतश्च परमा शक्तिरेकविधैव सती बीजोच्छूनदशायां ज्ञानक्रियेच्छारूपत्रयबिन्दुरूपेणोह्यमाना त्रैविध्यं गता त्रिपुरा । एवं त्रिचक्र-त्रिशक्ति-त्रिधाम-त्रिबीज-त्रितत्त्व-त्रिगुण-त्रिकोणादिभेदत्रयाविर्भावेण त्रिवृत्करण-रचना-वैचित्री-चतुरा-त्रैविध्येन सर्वाध्वव्यापिनो त्रिपुरा महती सुन्दरीति महात्रिपुरसुन्दरीति विख्याता[४] ।

सा चेयं सर्वचक्र-सर्वतन्त्र-सर्वशक्तीनां जनयित्री, वर्णसंघट्टशरीरा सती शब्द-राशिभूता त्रिपुरा, मोहिनी, कला, कालिकेत्यादिभिः परःसहस्रैः शब्दैर्व्यपदिश्यमाना परावागात्मिका ज्येष्ठा-रौद्रयम्बिकाख्यशक्तिप्रसरसंभेदवैचित्र्येण सर्ववर्णोदयकारणभूता सप्तकोटिमहामन्त्राणामुत्पादयित्री, भट्टारकपरमशिवस्वरूपा, षट्त्रिंशत्तत्त्वप्रसरणहेतुभूता, संविदेव मातृकापदेन सर्वत्र प्रख्यातिं प्राप्ताऽस्ति । उक्तञ्च—

सर्वे वर्णात्मका मन्त्रास्ते च शक्त्यात्मकाः प्रिये ।
शक्तिस्तु मातृका ज्ञेया सा च ज्ञेया शिवात्मिका[५] ॥ इति ।

काऽपि साधना, कोऽप्युपायो मन्त्रतत्त्वरूपाया मातृकाया ज्ञानमन्तरा भवितुं नार्हति । अतो वर्णमातृकायाः स्वरूपज्ञानाय प्रयुक्तानि चक्राणि रुद्रयामलतन्त्रेऽत्र पूर्वमेव निरूपितानि सन्ति । उक्तञ्च—

---

१. वरिवस्यारहस्ये, पृ० ५२; २. परात्रिंशिका—पृ० १९४; ३. श्रीमद्भगवद्गीता—८।३ ।
४. नित्याषोडशिका० २।६-७; ५. तन्त्रसद्भावे द्रष्टव्यम् ।

अज्ञात्वा मन्त्रतत्त्वानि महाविद्यां जपेत्तु यः।
सर्वं तस्य वृथा देवि किं तस्य जपपूजनैः॥
ध्यानावधारणेनैव तथा योगसमाधिना।
वर्णज्ञानं यदा नास्ति किं तस्य जपपूजनैः[1] ॥ इति।

शिवस्य महाकाल्याश्च कण्ठे निबद्धा मुण्डमाला ज्ञानराशेः संकेतभूता, यतो हि सर्वाणि ज्ञानेन्द्रियाणि मुण्ड एव व्यवतिष्ठन्त इत्यपि तन्त्रशास्त्ररहस्यं न विस्मरणीयम्। उक्तञ्च—

मम कण्ठे स्थितं बीजं पञ्चाशद्वर्णमद्भुतम्।
नानावर्णयुतं शुद्धं तन्त्राणां सारमुत्तमम्[2] ॥ इति।

सा चेयं मातृका पञ्चाशत्संख्याकान्, एकपञ्चाशत्संख्याकान्, द्विपञ्चाशत्संख्याकान्, चतुःषष्टिसंख्याकान् वा वर्णान् स्वस्मिन् समावेशयन्ती अनन्तकोटिब्रह्माण्डाधीशानामनन्तब्रह्म-विष्णु-रुद्रादीनां जननी, अकारादिक्षकारान्तबीजरूपा रुद्रयामलग्रन्थस्यास्योपजीव्यभूता संकीर्त्यते।

एवमेवात्र ग्रन्थे गुरुशिष्ययोग्यता, दीक्षाविधिः, पश्वादिभावविचारः, कुण्डलिनीजागरणम्, अकाराद्यक्षरक्रमेण कृते प्रश्ने फलविचारः, षट्चक्रसाधनम्, अष्टाङ्गयोगस्य भेदोपभेदाः नेती-दन्ती-धौती-नेवलीसाधनानि राकिणी-लाकिनी-कामिनीप्रभृतिसाधनानि, नानाविधसिद्धीनां साधनानि चेत्येवंविधा बहवो विषया निरूपिताः सन्ति।

रुद्राणीस्तोत्रमत्रातीवललितं पाठमात्रेणाकर्षकरम्, महाकालस्य स्वरूपज्ञापकं मोक्षावाप्तिकरं चास्ति।

गुरोर्माहात्म्यम्

गुरोर्माहात्म्यमुद्दिश्य एतत्तन्त्रे प्रथमपटले यदुक्तम्, तत्संक्षिप्तं निर्दिश्यते—

ध्यानं संयोजनं प्रोक्तं मोक्षमात्ममनोलयम्।
गुरोः प्रसादमात्रेण शक्तितोषो महान् भवेत्॥
शक्तिसन्तोषमात्रेण मोक्षमाप्नोति साधकः।
गुरुमूलं जगत्सर्वं गुरुमूलं परन्तपः॥
गुरोः प्रसादमात्रेण मोक्षमाप्नोति सद्वशी।
न लङ्घयेद् गुरोराज्ञामुत्तरं न वदेत् तथा॥
दिवारात्रौ गुरोराज्ञां दासवत् परिपालयेत्।
उक्तानुक्तेषु कार्येषु नोपेक्षां कारयेद् बुधः॥
गुरुं दुष्कृत्य रिपुवन्निर्हरेत् परिवादतः।
अरण्ये निर्जने देशे स भवेद् ब्रह्मराक्षसः[3] ॥

---

१. कामधेनुतन्त्रे—१।४-५; २. तत्रैव—१।६।
३. रु० या० १।२२२-२२५, २३०-२३१।

गुरुभक्त्या च शक्रत्वमभक्त्या शूकरो भवेत् ।
गुरुभक्तेः परं नास्ति भक्तिशास्त्रेषु सर्वतः[१]॥

पशुभावमान्नस्य जीवस्य व्रतभङ्गादौ प्रायश्चित्तरूपेण गुरुप्रदत्तमन्त्रस्य सहस्राधिकसंख्यया जपः कार्यः। साधकस्य कृते सन्ध्योपासनं पितृतर्पणं नित्यश्राद्धं देवतानां पीठस्य तीर्थस्य च दर्शनमावश्यकम्, गुरोराज्ञापालनं तु सर्वथा कर्तव्यमेव। एतदुक्त्वा भगवत्याः पूजाविधिरुक्तः, गुरोर्लक्षणम्, शिष्यलक्षणं च, स्त्रियो दीक्षादाने युक्ताः, एतत्सर्वं **द्वितीये पटले** द्रष्टव्यम्। ताराचक्रादिविवरणमपि द्वितीयपटलावसाने द्रष्टव्यम्।

तृतीये पटले कालाकालविचारकस्य चक्रस्य वर्णनं भगवत्या कृतम्। कूर्मचक्रस्य, शिवचक्रस्य, विष्णुचक्रस्य, रामचक्रस्य च स्वरूपं सर्वसिद्धिप्रदायकत्वं च विस्तरेण प्रोक्तम्।

चतुर्थे पटले ब्रह्मचक्रस्य वर्णनं कृतम्। अस्य चक्रस्य स्वरूपनिरूपणे 'चतुष्कोणे चतुष्कोणं तन्मध्ये च चतुश्चतुः' इत्येवं संकेतं कृत्वा—

मध्यगेहं वेष्टयित्वा इष्टं मन्दिरमुत्तमम्।
अष्टकोणे महादेव षोडशस्वरमालिखेत्॥

इत्यादिक्रमेण चक्राकृतिर्निर्दिष्टा। अग्रे च 'सुखे सुखमवाप्नोति, राज्ये राज्यमवाप्नुयात्' इत्यादिना फलस्यापि संकेतः समीचीनतया कृतः। मेषादिराशिपतयो रोहिण्यादिनक्षत्रपतयः ककारादि वर्णपतयश्च वर्णिताः। अन्ते च सूक्ष्मचक्रस्य विस्तरेण निरूपणं कृतम्।

पञ्चमे पटले महाकथहचक्रस्य स्वरूपम्, तत्तत्स्थानस्थितानां वर्णानां फलानि, प्राणायामादिसिद्धिः, वाक्सिद्धिः, शिवसायुज्यावाप्तिरित्यादीनि विस्तरेण प्रोक्तानि।

षष्ठे पटले पशुभाव-वीरभाव-दिव्यभावेति भावत्रयसम्पादनेन फलानि क्रमशः प्रोक्तानि सन्ति। तथा हि—

आदौ भावं पशोः कृत्वा पश्चात् कुर्यादवश्यकम्।
वीरभावं महाभावं सर्वभावोत्तमोत्तमम्॥
तत्पश्चादतिसौन्दर्यं दिव्यभावं महाफलम्[२]। इत्यादि।

कुमारीपूजनस्यापि महत्त्वमत्र वर्णितमस्ति[३]।

सप्तमे पटलेऽपि कुमारीपूजनेऽतिशयितं महत्त्वमुक्तम्। आत्मध्यानपरायणेन पशुभावापन्नेन पुरुषेण कुमार्याः पूजा ससम्मानं करणीया। पूजाविधौ कुमार्या जातिपरीक्षा न कार्या। उक्तञ्च—

रजकस्यापि कन्यां ते तथा नापितकन्यकाम्।
गोपालकन्यकां चैव तथा ब्राह्मणकन्यकाम्॥

---

१. रु० या० १।२४३; २. तत्रैव—६।५२-५४; ३. तत्रैव—६।८८-१०२।

चण्डालकन्यकां वाऽपि यत्र कुत्राश्रमे स्थिताम् ।
पूजयेत् परमानन्दैरात्मध्यानपरायणः ॥
तस्यावश्यं कुमारीणां पूजनं भोजनं रवेः ।
तेजोरूपं विधोश्चाग्नेः सर्वभावे प्रशस्यते ॥
तत्पूजनात्तदालापाद् भोजनादपि तत् शुभम् ।
मम प्रीतिर्भवेत् साक्षाद्देवतागुप्तिसंस्थिता[1] ॥

देवीबुद्ध्या कुमारी पूजनीया । पूजाविधिश्च सम्यक् प्रोक्ता, मायाबीजेन पाद्यम्, लक्ष्मीबीजेन अर्घ्यम्, सदाशिवेन मन्त्रेण धूपदीपयोर्दानम्[2] । अग्रे च महामन्त्रस्य श्लोकद्वयेन संकेत उक्तः[3] ।

अष्टमे पटले कुमारीपूजनाङ्गभूतस्य जपहोमयोश्चर्चा विशेषतः कृता । घृताक्तबिल्वपत्रं श्वेतपुष्पं कुन्दपुष्पं करवीरपुष्पं घृताक्तचन्दनागुरुमिश्रितं सर्वं द्रव्यं हवने नियोजयेत्[4] ।

ततश्च हवनान्ते पञ्चदशश्लोकतः प्रारभ्य चतुस्त्रिंशश्लोकं यावद् भगवत्याः स्तोत्रमन्त्राः, अग्रे च फलश्रुतिः, ततोऽग्रे तर्पयामिपदघटितानि श्रुतिपद्यानि । एभिर्मन्त्रैर्भगवत्यास्तर्पणं क्षीराम्बुना मधुमिश्रितेन कार्यम् ।

नवमे पटले कुमारीकवचस्य स्वरूपमुक्तम् । तस्य भूर्जपत्रे लेखनं कृत्वा चतुर्दश्यां पौर्णमास्यां वा हृदयस्थाने धारयेत् ।

'महापातकयुक्तोऽपि मुक्तः स्यात् सर्वपातकैः' ।

अन्ते च मोक्षावाप्तिफलमुक्तम् ।

दशमे पटले कुमार्या अष्टोत्तरसहस्रं नामानि महापुण्यप्रदानि उक्तानि । तेषां पठनेन, भूर्जपत्रे लिखित्वा धारणेन सर्वसंकटेभ्यो मुक्तिर्भवति । मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रास्वरूपं च ज्ञात्वा सकलयज्ञफलप्राप्तिः । पुनश्च सहस्रनामकवचस्योल्लेखः । वत्सरार्द्धं प्रपाठेन त्रिजगन्मोहनं भवति । वत्सरं यावत् पाठेन खेचरत्वप्राप्तिर्योगसिद्धिश्च । नित्यपाठेन जलस्तम्भनमग्निस्तम्भनं वायुवेगावाप्तिः । सहस्रनामभिर्हवनम्, हवनीयद्रव्यगणना, हवनकर्मणः फलकथनम् ।

एकादशे पटले दिव्य-वीर-पशुभावानां स्वरूपकीर्तनम् ।

एकादशे च पटले शुद्धभावार्थनिर्णयम् ।
भावेन लभ्यते सर्वं भावाधीनं जगत्त्रयम् ॥
भावं विना महादेव न सिद्धिर्जायते क्वचित्[5] ।

वामदक्षिणनासिकाछिद्राभ्यां वायोरागमनगमनयोः फलम् । मेषादिद्वादशराशिषु क्रमशः आज्ञाचक्रम्, कामचक्रम्, फलचक्रम्, प्रश्नचक्रम्, भूमिचक्रम्, स्वर्गचक्रम्, तुलाचक्रम्,

१. रु० या० ७।५-११; २. तत्रैव—७।६०-६१; ३. तत्रैव—७।६३-६४ ।
४. तत्रैव—८।१-५; ५. तत्रैव—११।४३-४४ ।

वारिचक्रम्, षट्चक्रम्, सारचक्रम्, उल्काचक्रम्, मृत्युचक्रं च निर्मातव्यम्। एषु चक्रेषु अनुलोमविलोमतः षट्कोणानि कार्याणि। सर्वचक्रेषु स्वरज्ञानं वायुगतिं च ज्ञात्वा प्रश्नविचारो विधेयः। विस्तरेण विधिर्ग्रन्थतः सम्प्रदायतश्च ज्ञातव्यः।

द्वादशे पटले कामचक्रस्य स्वरूपं कया रीत्या सम्पाद्यम्? तत्र प्रश्नस्य प्रकारस्तत्फलं च। पुनः फलचक्रस्य, तत आज्ञाचक्रस्य स्वरूपं फलं चैतत् सर्वं निरूपितमस्ति।

त्रयोदशे पटले आज्ञाचक्र एव राशि-नक्षत्र-वार-गणनाविधानम्, वर्णस्यापि स्वरूपं ज्ञात्वा प्रश्ने कृते नानाविधानां फलानां वर्णनम्। अश्विन्याद्यष्टनक्षत्रेषु, पुनः आश्लेषादिचित्रान्तेषु, पुनः स्वात्यादिवसुनक्षत्रेषु, पुनश्चोत्तराषाढादिरेवत्यन्तेषु नक्षत्रेषु प्रश्नानां विविधानि फलानि वर्णितानि।

चतुर्दशे पटले आज्ञाचक्रविषय एव भरण्यादिसप्तविंशतिनक्षत्राणां स्वरूपाणि फलानि च विस्तरेण वर्णितानि।

पञ्चदशे पटले आज्ञाचक्रस्यात्रापि विशदं माहात्म्यादिवर्णनम्, ब्रह्मस्तोत्र-ब्रह्मविद्या-ब्रह्मज्ञानिलक्षणवर्णनम्, ब्रह्ममार्गस्थानां षट्चक्रमण्डले स्वरूपनिरूपणम्, वैष्णवलक्षणम्।

षोडशे पटले आज्ञाचक्रस्य भुवनकरणसामर्थ्यं निरूप्य तत्र अधोमण्डलमण्डिते द्विबिन्दुनिलये द्विदले स्थाने श्रीगुरोः पदस्य ध्यानं विहितमस्ति। तन्मध्ये महावह्निशिखाकृतेरपि चिन्तनं प्रतिपादितमस्ति। एतद्योगप्रसादेन चिरजीवित्वं वागीश्वरत्वं च फलं निरूपितम्। पुनश्च त्रिखण्डे आज्ञाचक्रे श्मशानाधिपवेष्टितं कलानिधिं महाकालं तीक्ष्ण-दंष्ट्रं बहुरूपिणं सुरेश्वरं ध्यायेत्, नासिकाया ऊर्ध्वभागे भ्रुवोर्मध्ये परेश्वरस्य कालरुद्रस्य ध्यानेन झटिति तन्मयता भवति। पुनश्च तत्र नानालङ्कारशोभाङ्ग्या नवयौवन-शालिन्या रौरवादिविनाशिन्या डाकिनी-भगवत्या ध्यानं विधेयम्। एषैव भगवती त्रिपुरसुन्दरीपदेनापि विख्याताऽस्ति। पूरक-कुम्भक-रेचकप्राणायामद्वारा मनोयोगेन ध्यानं कार्यम्। षण्मासपर्यन्तं प्रातः सायं निरन्तरं ध्यानेन महती सिद्धिः, संवत्सरं ध्यानेन खेचरो योगिराड् भवति, अन्ते च कौलमार्गं पालयन्नमरत्वं प्राप्नोति।

सप्तदशे पटलेऽथर्ववेदस्य लक्षणमुक्तम्। तच्च सर्ववर्णानां सारतया शक्त्या-चारसमन्वयरूपत्वं प्रोक्तम्। अथ च ऋगादिवेदा जलचरभूचर-खेचराः, कुलविद्या, महाविद्या, बिन्दुत्रयलयस्थितिः, ब्रह्मविष्णुशिवाः, चतुर्विंशतितत्त्वानि चेमे सर्वेऽथर्ववेदे निवसन्ति। पुरदेवतारूपायाः कुण्डलिन्याश्चैतन्यकरणे षण्मासाभ्यासस्योपायता प्रदर्शिता। तस्याश्चैतन्यसम्पत्तौ भूयांसि फलानि प्रदर्शितानि।

कामरूपे मूलाधारे सा भगवती प्रज्वलन्ती विराजते। यदा सा सहस्रदलपङ्कजे शिरोमण्डले सम्बन्धं प्रज्वलन्तं सम्पादयति, तदा साधको योगिराड् भूत्वा परमज्ञाना-नन्दे निमग्नो भवति। यदा शिरसि समागम्य अमृतपानं सा करोति, तदा परमां सिद्धिं प्राप्नोति साधकः। वायव्याः सिद्धेरुपायः प्रदर्शितः। तत्र मिताहारः, मनसः संयमः,

दया, शान्तिः, सर्वत्र समबुद्धिः, परमार्थविचारः, भूमितले शरशय्याशयनम्, गुरुचरणयोः श्रद्धा, अतिथिसत्कारः, ब्रह्मचर्यव्रतपालनम्, हर्षशोकयोः समभावः, मौनधारणम्, एकान्तस्थानसेवनम्, बहुजल्पनशून्यता, हास्यहिंसादिराहित्यम्, एतानि साधनानि भवन्ति भगवत्याः कुण्डलिन्याश्चैतन्यसम्पादने। अथ च ललाटे, भ्रूमध्ये, अष्टपुरे कण्ठे, नाभिप्रदेशे, कट्यां चैतेषु पीठेषु वायुनिरोधात्मकः कुम्भकप्राणायामोऽपि परमोपायस्तस्या जागरणे। तत्रोक्तम्—

चालयित्वा महावायुं कुम्भयित्वा पुनः पुनः।
पूरयित्वा रेचयित्वा रोमकूपाद् विनिर्गतम्॥
तिस्रः कोटयर्धकोटी च यानि लोमानि मानुषे।
नाडीमुखानि सर्वाणि घर्मबिन्दुं च्यवन्ति हि॥
यावत्तद्बिन्दुपातश्च तावत्कालं लयं स्मृतम्।
तावत्कालं प्राणयोगात् प्रस्वेदाधमसिद्धिदम्॥
सूक्ष्मवायुसेवया च किं न सिध्यति भूतले।
लोमकूपे मनो दद्यात् लयस्थाने मनोरमे॥
स्थिरचेता भवेत् शीघ्रं नात्र कार्या विचारणा।
वायुसेवां विना नाथ! कथं सिद्धिर्भवेद् भवे[1]॥

अनया रीत्या संवत्सरेण कृताभ्यासस्य महाखेचरता प्राप्यते। अस्या वायव्याः सिद्धेः प्रसङ्गे महर्षिवसिष्ठस्य साधकतया चर्चा कृताऽस्ति। तत्र च—

वसिष्ठो ब्रह्मपुत्रोऽपि चिरकालं सुसाधनम्॥
चकार निर्जने देशे कृच्छ्रेण तपसा वशी।
शतसहस्रं वत्सरं च व्याप्य योगादिसाधनम्॥
तथापि साक्षाद् विज्ञानं न बभूव महीतले[2]॥

इतः परं क्रुद्धो महर्षिः पितुः सकाशं जगाम, शापं प्रदातुमुद्यतो बभूव। पित्रा श्रीब्रह्मदेवेन निवारितः, तपोमार्गे वायव्याः भगवत्याः साधने समुत्साहितश्च। तदनु महर्षिवसिष्ठो जलधेस्तीरे सहस्रवत्सरं सम्यग् जपं कृतवान्। पुनश्च सिद्धिमप्राप्नुवन् महाविद्यां शप्तुमुद्यतोऽभवत्। शापे प्रदत्ते सति सा भगवती महाविद्याऽऽविरभवत्। उवाच च—अहो महायोगिन्!

ममैव साधनं पुण्यं वेदानामप्यगोचरम्।
बौद्धदेशेऽथर्ववेदे महाचीने तदा व्रज॥
तत्र गत्वा महाभावं विलोक्य मत्पदाम्बुजम्।
मत्कुलज्ञो महर्षे त्वं महासिद्धो भविष्यसि॥
एतद् वाक्यं कथित्वा सा वायव्याकाशवाहिनी।
निराकाराऽभवत् शीघ्रं ततः साकाशवाहिनी[3]॥

---

१. रु० या० १७।५६-६०; २. तत्रैव—१७।१०६-१०८; ३. तत्रैव—१७।१२२-१२४।

एतदनन्तरं महामुनिः चीनभूमौ जगाम। तत्र च भगवान् बुद्धो महामुनिं वसिष्ठमुपदिष्टवान्—

वसिष्ठ श्रृणु वक्ष्यामि कुलमार्गमनुत्तमम्।
येन विज्ञातमार्गेण रुद्ररूपी भवेत् क्षणात्॥
एकाकी निर्जने स्थित्वा कामक्रोधादिवर्जितः॥
दमयोगाभ्यासरतो योगशिक्षादृढव्रतः।
वेदमार्गाश्रयो नित्यं वेदार्थनिपुणो महान्[1]॥

ततश्च शक्तिचक्रं सत्त्वचक्रं नवविग्रहं वैष्णवं च समाश्रित्य परां भगवतीं कात्यायनीं जपेत्। भगवत्याः स्वरूपमपि वर्णितमस्ति। कुलमार्गः परममार्गतया प्रोक्तः तदाश्रयणेन ब्रह्मा स्रष्टा, विष्णुः पालकः, हरश्च संहारको भवति। जीवात्मपरमात्मनोर्महान् सम्बन्धः प्रकाशितोऽनेन वर्णनेन।

अष्टादशे पटले भगवत्या कामचक्रस्य वर्णानां प्रश्ननिर्णयात्मकं वर्णनं कृतम्। आज्ञाचक्रस्य मध्यभागे कोटिरसालिन्या नाड्या मध्ये मनोरमस्य कामचक्रस्य स्थितिरस्ति। एतदीयकोष्ठेषु वर्णानां स्थापनेन फलं निर्दिश्यते। सर्वेषु चक्रेषु परममुत्तममिदं कामचक्रमस्ति। काम्यफलस्यानुत्तमा सिद्धिर्भवति। प्रश्नविषयवर्णेषु वर्गभेदेन फलभेदः कथितः।

कवर्गे कामसम्पत्ति श्रिया व्याप्तं सुमन्दिरम्।
प्राप्नोति कामचक्रार्थं राशिनक्षत्रसम्मतम्॥
चवर्गे दीर्घजीवी स्याद् दृढसम्पदमेव च।
वृत्तिं प्राप्नोति गमनादनुद्दिश्य शरीरिणः॥
समाचारं समाप्नोति गमने सर्वमुत्तमम्।
टवर्गे सम्भवे नाथ महदुच्चाटनादिकम्॥
पुत्राणामपि वृद्धिः स्यात् तवर्गे धनलाभकम्।
पवर्गे मरण नाथ यादिक्षान्ते महागुणी॥
कामचक्रफलं नाथ राशिदण्डेन योजयेत्।
निजगेहस्थितं राशिं ज्ञात्वा हि दिनदण्डतः॥
गणयित्वा शुभं ज्ञानी अनुलोमविलोमतः।
घटस्थं सकलं सन्धिकोणस्थं पार्श्वके शुभम्॥
शुभमन्त्रं गृहीत्वा तु सिद्धिमाप्नोति साधकः[2]॥

अनेन प्रकारेण संकेतः प्रश्नविषयकः सम्प्रदायसंवेद्यः।

एकोनविंशे पटले प्रश्नचक्रे षडाधारस्य भेदनमुक्तम्। तत्र च पुनः निर्विकल्पादिसाधनभूतं कालचक्रफलं निर्दिष्टम्, पुनश्च आज्ञाचक्रोपरि स्थितस्य प्रश्नचक्रस्य विषये फलनिरूपणं बहु कृतम्। काल एव मृत्युप्रदाताऽस्ति, तस्य कालस्य सूक्ष्मगतिज्ञान-

---

१. रु० या० १७।१३५-१३८; २. तत्रैव—१८।७७-८३।

मस्मादेव चक्राद् भवति। ग्रहनक्षत्रराशिसम्पृक्ता प्रश्नव्यवस्था प्रोक्ता, सा तु सम्प्रदायसंवेद्या, टवर्गे प्रश्नविषये वासनासिद्धिः खेचरीमेलनं च भवति, तवर्गे दीर्घजीवी इन्द्रतुल्यो भवति। पवर्गे परमस्थानस्य प्राप्तिः।

विंशतितमे पटले फलचक्रस्य सर्वमन्त्रसारतया निरूपणं कृतम्। तदीयषट्कोणेषु षण्मनुध्यानमुक्तम्। अष्टकोणेषु अङ्कभेदेन स्थितान् वर्णान् भावयित्वा खेचरताप्राप्तिः। एतच्च फलचक्रं प्रश्नचक्रस्योर्ध्वभागे स्थितं मन्तव्यम्। फलचक्रप्रसादेन तत्त्वचिन्ता-परायणता भवति। अष्टकोणानामूर्ध्वभागे वर्णमालाविधिरित्थं प्रोक्तः—

ओ औ पवर्गमेवं हि यो नित्यं भजतेऽनिशम्॥
तस्य सिद्धिः क्षणादेव वायवीरूपसाधनात्।
चन्द्रबीजस्योर्ध्वदेशे विभाति पूर्णतेजसा॥
ऌ ए ऐ तवर्गञ्च तद्दक्षिणविधानतः।
तेजोमयी वायुशक्तिर्ददाति सर्वमङ्गलम्॥
टवर्गं भावयेन्मन्त्री ऋ ॠ ऌ स्वरसंयुतम्।
अष्टैश्वर्यप्रदं नित्यं कमलासनसिद्धिदम्॥
इ ई युग्मं तवर्गं च भावयित्वाऽमरो भवेत्।
अ आ इ संयुतो नाथ कवर्गः कुरुते जयम्॥
इत्येतत्कथितं नाथ फलचक्रं च सादरम्।
एतच्चक्रभावनाभिर्महाविद्यापतिर्भवेत्[1] ॥

अयं सर्वोऽपि प्रकारः सम्प्रदायतो वेदनीयः।

एकविंशे पटले योगमार्गानुसारेण वीरभावस्य साधनं सर्वसिद्धिप्रदं प्रोक्तम्। महायोगस्तु वेदाधीनः, योगाधीना कुण्डली शक्तिः कुण्डल्यधीनं चित्तम्, तदधीनं चराचरमुक्तम्। पुनश्च भूमिचक्रस्य वर्णनम्। अत्र षड् गृहाणि वर्णितानि। मध्यगेहं र-बीजकं ध्यायेत्। दक्षिणे गृहे वकारात्मकं बीजम्, वारुणाध्यक्षं वं बीजम्, देवेन्द्रपूजितं लं बीजम्, दक्षिणपार्श्वे श्रीबीजम्, वामपार्श्वे ब्रह्मसम्मितं प्रणवबीजं ध्यायेत्। इत्थं चानेकधा भूमिचक्रीयं ध्यानं प्रोक्तमस्ति। द्वितीये दक्षिणे पत्रे वान्तबीजं महाप्रभं ध्यातव्यम्। तत्र स्वर्गशोभासमाकुलं स्वर्गचक्रमनेकधा ध्यानगर्भं प्रोक्तम्। वायवीशक्तिसम्पृक्तस्यास्य चक्रस्य समाश्रयेण ध्यानकर्ता वाक्पतिर्भवति।

तृतीयदलमध्ये तुलाचक्रस्य विशिष्टं ध्यान-फलादिवर्णनं कृतमस्ति। अस्मिन् तुलाचक्रे षकारं व्याप्य मौनभावेन जपः क्रियते, तर्हि योगिराड् भूत्वा कुण्डलीजागरणे सामर्थ्यं प्राप्नोति। पुनरग्रे वारिचक्रस्य विस्तृतं वर्णनं कृतम्। तत्र च गङ्गादयो महानद्यो लवणादिसप्तसागराः, समस्तानि तीर्थानि च वर्णितानि सन्ति। समस्ताङ्गोपाङ्गसहित-स्यैतस्य चक्रस्य प्रसादेन चिरजीवित्वं योगिराजत्वादिकं च भवति।

---

१. रु० या० २०।३२-३९।

द्वाविंशे पटले षट्चक्रस्य फलोदय उक्तः। प्रथमं चतुर्दलसमन्वितं मूलाधारं महापद्ममस्ति। एतच्च वकारादिसकारान्तं स्वर्णवर्णं शक्तितत्त्वस्य ब्रह्मतत्त्वस्य च समर्पकमस्ति, एवमस्य ध्यानं विधेयम्। मूलविद्यायाः सिद्धिरप्येतत् फलम्। मूलपद्म-स्योर्ध्वदेशे षड्दलशोभितं महाप्रभं स्वाधिष्ठानं वकारादिलकारान्तं विष्णुं कर्णिकास्थाने ध्यातव्यम्। तस्योर्ध्वे नाभिदेशे मणिकोटिसमप्रभं दशदलयुतं डादिफान्तं योगवर्णं ध्यायेत्। पुनश्च तदूर्ध्वदेशे बन्धूकपुष्पसंकाशं द्वादशदलशोभितं महामोक्षप्रदं लाकिनी-युक्तं भगवन्तं रुद्रं ध्यायेत्। तदूर्ध्वे कण्ठदेशे षोडशोल्लासशोभितं साक्षात्सदाशिवं साकिनीसहितं महादेवीसमन्वितं ध्यायेत्। पुनस्तदूर्ध्वे भ्रूकटे प्रदेशे बिन्दुपदं हंस-स्थानं हिमकुन्देन्दुसमप्रभं द्विदलमाज्ञानामोत्पलं ध्यायेत्। पुनः षोडशपत्रे कण्ठे षोडश-स्वरवेष्टितमकारादिविसर्गान्तं तत्त्वं विभाव्य कुण्डलिनीं देवीं ध्यायेत्, जीवन्मुक्तो भवेत्। अथ च कीदृशस्य साधकस्यैषा सिद्धिर्भवतीत्युच्यते—

आचारो विनयो विद्या प्रतिष्ठा योगसाधनम्।
तस्यैव जायते सिद्धिरिष्टपादाम्बुजे मतिः॥
देवे गुरौ महाभक्तिर्यस्य नित्यं विवर्धते।
संवत्सरात्तस्य सिद्धिर्भवत्येव न संशयः॥
वेदागमपुराणानां सारमालोक्य यत्नतः।
मनः संस्थापयेदिष्टपादाम्भोरुहमण्डले॥
चेतसि क्षेत्रकमले षट्चक्रे योगनिर्मले।
मनो निधाय मौनी यः स भवेद् योगवल्लभः॥
मनः करोति कर्माणि मनो लिप्यति पातके।
मनःसंयमनी भूत्वा पापपुण्यैर्न लिप्यते[1]॥

अग्रे च प्रणवस्य ध्यानमुक्तम्। तत्र अकारादिक्रम उक्तः, अकारो ब्रह्मणो रूपतयोक्तः। उकारो वैष्णवरूपत्वेन प्रोक्तः, मकारः शम्भुरूपतया निर्दिष्टः। एवं वर्णत्रयविभागेन प्रणवस्य कल्पना कृता। प्रणवाज्जायते हंसः, हंसः सोऽहं परः, तच्च सोऽहं ज्ञानं महाज्ञानं बोध्यम्, योगिनामपि दुर्लभमस्ति। पुनश्च—

हं पुमान् श्वासरूपेण चन्द्रेण प्रकृतिस्तु सः।
एतद्धंसं विजानीयात् सूर्यमण्डलभेदकम्॥
विपरीतक्रमेणैव सोऽहं ज्ञानं यदा भवेत्।
तदैव सूर्यगः सिद्धः स्वधास्वरप्रपूजितः॥
हंसं सूर्यं विजानीयात् सोऽहं चन्द्रो न संशयः।
विपरीतो यदा भूयात् तदैव मोक्षभाग् भवेत्[2]॥

अग्रे च प्रणवान्तमहामन्त्रस्य जपेन वायुसिद्धिः। बृहद्धंसस्य जपेन वाक्सिद्धि-र्भवति। बृहद्धंसमन्त्रस्य स्वरूपमपि गोप्यतया सङ्केतितमस्ति।

---

१. रु० या० २२।३२-३६; २. तत्रैव—२२।९३-९४,९७।

त्रयोविंशतितमे पटले पूरक-कुम्भक-रेचकविधिना वायुभक्षणस्य विशिष्टो विधिर्वर्णितोऽस्ति। तस्मिन्नेव प्रसङ्गे पद्मासनाद्यासनविधिरपि प्रतिपादितः। वायुलोलापघाताय लोलासनस्य विधानं दर्शितमस्ति। सव्यापसव्ययोगेन उत्तमाङ्गासनस्य निर्देशः कृतः। पर्वतासनस्य स्थिरतासिद्धिरूपं फलमुक्तम्। पुनश्च योन्यासनस्य चर्चा कृता। तत्र लिङ्गगुह्यादिबन्धनं भवति। खगासन-भेकासन-महाभेकासन-अपानासन-समानासन-वीरासन-सिद्धवीरासन-ग्रन्थिभेदासन-कार्मुकासन-ज्ञानासन-मुण्डासन-गरुडासन-खञ्जनासन-पवनासन-सर्पासनादिविविधासनानां वर्णनं कृतम्। एतेषामासनानां लक्षणानि फलानि च विस्तरेण वर्णितानि सन्ति। अन्ते च काकरूपस्कन्धासनमुक्तम्, तत्समाश्रयणेन फलमित्थं निर्दिष्टम्—

> कलिपापात् प्रमुच्येत वायवीं वशमानयेत्।
> निजपादद्वयं बद्ध्वा स्कन्धदेशे च साधकः॥
> नित्यमेतत् पदद्वन्द्वं भूमौ पुष्टिकरद्वयम्[1]॥

ज्ञानासन-गरुडासन-सर्पासनानां विषये विशेषो द्रष्टव्यः। सम्प्रदायतो ज्ञात्वा एषामासनानां सदाभ्यासो विधेयः।

चतुर्विंशे पटले आसनानां प्राचुर्येण निरूपणं वर्तते। 'शतलक्षसहस्राणि आसनानि महीतले' इत्युक्तम्। तत्र प्रथमं कूर्मासनस्य लक्षणं फलं चोक्त्वा समानासन-कुम्भीरासनयोः स्वरूपं फलं चोक्तम्। ततः मकरासन-सिंहासन-व्याघ्रासनानां स्वरूपं फलं चोक्तम्। कुञ्जरासन-भल्लूकासन-गरुडासन-वर्तुलासन-मोक्षासन-मालासन-दिव्यासन-अर्द्धोदयासन-चन्द्रासन-हंसासन-योगासन-गदासन-लक्ष्म्यासन-कुल्यासन-ब्राह्मणासन-क्षत्रियासन-वैश्यासन-शूद्रासन-जात्यासन-पाशवासन-नरासन-भेकासन-शैलासन-स्वेच्छासन-पद्मासन-कोमलासन-मृतासन-वीरासनप्रभृतीनि आसनानि स्वरूपोपन्यासमुखेन कथितानि। अन्ते च जितेन्द्रियेण साधकेन शवेन्द्रस्य साधनं कर्तव्यमित्युक्तम्। तद्यथा—

> यावत्कालं स्थिरं चित्तं न प्राप्नोति जितेन्द्रियः।
> तावत्कालं नापि कुर्यात् शवेन्द्रस्यापि साधनम्॥
> शवमानीय तद्द्वारे तेनैव परिखन्य च।
> तद्दिनात्तद्दिनं यावत् यद् बद्ध्वा व्याघ्र साधयेत्॥
> एवं कृत्वा हविष्याशी महाविद्यादिसाधनम्।
> जितेन्द्रियो मुदा कुर्याद् अष्टाङ्गसाधनेन च॥
> अष्टाङ्गधारणेनैव सिद्धो भवति नान्यथा।
> अष्टाङ्गलक्षणं वक्ष्ये साक्षात् सिद्धिकरं परम्॥
> जन्मकोटिसहस्राणां फलेन कुरुते नरः।
> यमेन लभ्यते ज्ञानं ज्ञानात् कुलपतिर्भवेत्[2]॥

---

१. रु० या० २३।११३-११४; २. तत्रैव—२४।११६-११८, १३२-१३३।

आसनस्य दीर्घंजीवित्वं फलम् । प्राणायामस्य वशीभावः, प्रत्याहारस्य कामनालयः, धारणाया वायुसिद्धिः, ध्यानस्य मोक्षसुखम्, समाधेः महाज्ञानं सूर्यचन्द्रलोकयोर्गमनम्, स्थिरमतिप्रयुक्ता शान्तिश्च फलत्वेन उक्ताः सन्ति । विस्तरस्तु तत्रैव द्रष्टव्यः ।

पञ्चविंशे पटले सृष्टिप्रक्रियायामुत्पत्ति-पालन-संहारवर्णनं कृतम् । तत्राव्यक्तरूपात् प्रणवात् सृष्टिः, सूक्ष्माकारात् खे (आकाशे) प्रतिभानम्, स्थूलकलान्निरक्षरात् प्रणाशः । मायादिकस्य वशीकरणेन योगप्रतिष्ठा भवति । काम-क्रोध-मोह-मद-मात्सर्य-लोभादीनां जयेन योगस्य पराकाष्ठा । अहिंसा, सत्यम्, अस्तेयम्, मिताहारः, प्रपञ्चार्थवर्जनम्, शौचम्, ब्रह्मचर्यम्, आर्जवम्, क्षमा, धैर्यं च साधकस्यावश्यकम् ।

साधकस्य कृते चरमावस्थायां ब्रह्मज्ञानं परमावश्यकम् । तदुक्तम्—

कोटिकन्याप्रदानेन कोटिजापेन किं फलम् ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ॥
ब्रह्मज्ञानं तु द्विविधं प्राणायामजमव्ययम् ।
भक्तिवाक्यं शब्दरसं स्वरूपं ब्रह्मणः पदम्[1] ॥

एतत्प्रसङ्गेनैवोक्तम्—

इडा च भारती गङ्गा पिङ्गला यमुना मता ।
इडापिङ्गलयोर्मध्ये सुषुम्ना च सरस्वती ॥
त्रिवेणीसंगमो यत्र तीर्थराजः स उच्यते ।
त्रिवेणीसंगमे वीरश्चालयेत्तान् पुनः पुनः ॥
सर्वपापाद् विनिर्मुक्तः सिद्धो भवति नान्यथा ।
पुनः पुनः भ्रामयित्वा महातीर्थे निरञ्जने[2] ॥

पुनश्च प्राणायामस्य त्रिसन्ध्यं विधानम् । पुनश्च—

महामृता खेचरी च सर्वतत्त्वस्वरूपिणी ।
कीदृशी शांकरीविद्या श्रोतुमिच्छामि तत्क्रियाम् ॥
पथापथज्ञानविवर्जिता ये धर्मार्थकामाद्धि विहीनमानसाः ।
विनावलम्बं जगतामधीश्वर एषैव मुद्रा विचरन्ति शांकरी[3] ॥

पुनश्च महादेव्याः कुण्डलिन्याः प्राणायामस्य च स्वरूपप्रकारो विस्तरेण निरूपितः ।

षड्विंशे पटले प्राणायामस्य जपध्यानान्यतरगर्भता प्रोक्ता । तत्र जपस्यापि व्यक्ताव्यक्तातिसूक्ष्मभेदेन त्रैविध्यमुक्तमस्ति । व्यक्तो वाचिकः, अव्यक्त उपांशुः, सूक्ष्मो मानसः । ध्यानस्य तु एकविंशतिः प्रकाराः सन्ति । ध्यानस्तु मनोमात्रसाध्यः । तद्यथा—

१. रु० या० २५।३६,३९; २. तत्रैव—२५।४५-४७; ३. तत्रैव—२५।९९,१०४ ।

मनः करोति सर्वाणि धर्मकर्माणि सर्वदा ।
यत्र गच्छति स श्रीमान् तत्र वायुश्च गच्छति ॥
ध्यायेद्देवीं कुण्डलिनीं परापरगुरुप्रियाम् ।
आनन्दां भुवि मध्यस्थां योगिनीं योगमातरम् ॥
कुण्डलीभावनादेव खेचराद्यष्टसिद्धिभाक् ।
ईश्वरत्वमवाप्नोति साधको भूपतिर्भवेत् ॥
त्रिविधं कुण्डलीध्यानं दिव्यवीरपशुक्रमम् ।
पशुभावादियोगेन सिद्धो भवति योगिराट् ॥
अस्या ध्यानप्रसादेन त्वं तुष्टो भैरवः स्वयम् ।
अहं च तुष्टा संसारे सर्वे तुष्टा न संशयः[1] ॥

अन्ते च पञ्चमकारसेवनविधिः प्रोक्तः । स चेत्थम्—व्योमपङ्कजनिष्यन्द-सुधापानमेव मद्यपानम् । पुण्यापुण्यपशुहननं ज्ञानखड्गेन कृत्वा परशिवस्य स्वमनसाऽऽस्वाद एव मांसभक्षणास्वादः । शरीरस्थजले स्थितानां मत्स्यानां भक्षणमेव मत्स्यभक्षणम् । महीगतस्निग्धसौम्योद्भवमुद्रा ब्रह्माधिकरणे समारोप्य सुधीः तर्पयेत्, एतदेव मुद्राभोजनम् । परशक्त्या सहात्मसंयोग एव मैथुनम्, अनया रीत्या पटलान्ते पञ्चमकारचर्चा विस्तरेण द्रष्टव्या ।

सप्तविंशे पटल आनन्दभैरवेण अष्टाङ्गयोगस्य फलं पुनरपि पृष्टम्, प्राणवायोर्हरणं प्राणधारणम्, प्रत्याहारः, धारणा, ध्यानम्, समाधिश्च विस्तरेण पृष्टाः । तदुपरि आनन्दभैरव्या उत्तरितम्—

पूरकाह्लादसिद्धेश्च प्राणायामशतं शतम्[2] ॥

प्रतिपद्द्वितीयादितिथ्यनुसारेण प्राणायामविधिः प्रोक्तः । यदि तिथिव्यत्यासः क्रियते, तदा मरणं रोगो बन्धुनाशश्च भवति । प्राणायामस्य फलं भूतदर्शित्वं दूरश्रवणं च । इन्द्रियाणां प्रत्याहार ईश्वरे भक्तिः, खेचरत्वम्, विषयेषु निवर्तनम् । धारणाया धैर्यधारणं प्राणवायोः प्रशमनम् । ध्यानयोगस्य फलं मोक्षावाप्तिः । समाधिफलं जीवात्मपरमात्मनोः समत्वभावना ।

अनाहत-विशुद्ध-महापूरक-मणिपूरक-बिन्दुचक्रादिस्वरूपफलयोश्च वर्णनम् । षट्चक्रभेदन-प्रक्रिया, पञ्चकृत्यविधिश्च विस्तरेणात्र पटले द्रष्टव्यः । अन्ते च भगवतः शिवस्य कीर्तनं ध्यानं मननं दास्यं सख्यमातमनिवेदनं चोक्तम् । एतद्भक्तिप्रसादेन जीवन्मुक्तिलाभः ।

अष्टाविंशे पटले मन्त्रसिद्धेर्लक्षणमुक्तम्, तच्च तर्पणं होमभोजनं प्रत्यहं प्राणवायुपानं सूक्ष्मचन्द्रनियोजनादि कर्म कुर्यात्, एतत्कर्मकरणेनोत्तमा मन्त्रसिद्धिर्भवति । कुण्डलिनी महाभगवती योगेन चैतन्यमुखी भवति, अतो योगं सदा कुर्यात् । वीरभावेन पुरश्चरणकर्मणा सिद्धिरुक्ता—

---

१. रु० या० २६।१२,२१,३१,५०,६७; २. तत्रैव—२७।५ ।

H

तत्र वीरो यजेत् कान्तां परकीयामथापि वा।
स्वीयामलङ्कारयुक्तां सुन्दरीं चारुहासिनीम्॥
दीक्षितां लोलवदनां वदनाम्भोजमोहिनीम्।
नानादेशस्थितां कन्यां युवतीं परिपूजयेत्[१]॥

ईदृश्या युवत्याः परिपूजनं वीरभावस्थितेन कार्यम्। ततः षोडशकन्यापूजनं नानावस्त्रालङ्कार-गन्धफल-मृगनाभिचन्दन-श्रीखण्ड- नानासुगन्धिपुष्प-रक्तचन्दनकुङ्कुम-कमलपुष्प-नवपल्लवादिभिः निर्जने विपिने करणीयम्। परा मोक्षदा कामचारिणी भाविनी भवानी विद्या सदा पूजनीया, तस्या अङ्के समस्ता देवतास्तिष्ठन्ति। योगिना शुद्धभावेन तस्याः समर्चा विधेया, तत एव अचिरेण योगसिद्धिर्भवति।

अथ च षट्चक्रभेदनक्रिया वर्णिता, सर्वव्याधिविनाशश्च तत्फलत्वेन प्रोक्तः। पुनश्च कन्दवासिनीदेव्याः स्तोत्रं तन्मन्त्रविन्यासश्च विस्तरेण प्रोक्तः।

सा बालाबलवाहना सुगहना सम्मानना धारणा
खं खं खं खचराचरा कुलचरा वाचाचरा वंखरा।
चं चं चं चमरीहरीभगवती गाथागताः संगतिः
बाहौ मे परिपातु पङ्कजमुखी या चण्डमुण्डापहा[२]॥

अनया रीत्या भगवत्याः स्तुतिपद्यानि विन्यस्तानि।

एकोनत्रिंशे पटले पुनरपि षट्चक्रभेदनमुक्तम्। षट्चक्रज्ञाता सर्वशास्त्रार्थविद् भवति। तत्र चतुर्दलं मूलपद्मं वादिलान्तार्णसम्भवमस्ति। आद्याक्षरं वं वरभावसाधनं नारायणं भावनपत्रमच्युतं तेजोमयं ध्यायेत्। एवं कनकाचलप्रभं गौरीपतेः श्रीकरणं पुराणं सर्वसुवर्णवेष्टितं सदा मुदा शकारं ध्यायेत्। षकारमीश्वरीषष्ठगुणावतंसं षट्पद्मसम्भेदनकारकं हेमाचलं ध्यायेत्, ततश्च आनन्दरसं सकारम्, मायामहामोहविनाशनं हकारं च ध्यायेत्। ततश्च पुनर्ध्यानप्रकार उक्तः—

चतुर्भुजं भुजयुगमष्टादशभुजन्तथा।
अष्टहस्तं सदा ध्यायेन्मन्त्री भावविशुद्धये॥
ततो ध्यायेत् कर्णिकायां मध्यदेशे मनोरमम्।
स्वयम्भूलिङ्गपरमं योगिनां योगसिद्धिदम्॥
प्रातः सूर्यसमप्रख्यं तडित्कोटिसमप्रभम्।
तं संवेष्ट्य महादेवी कुण्डली योगदायिनी॥
सार्धत्रिवेष्टनग्रन्थियुता सा मुक्तिदायिनी।
निद्रिता सा सदा भद्रा महापातकघातिनी॥
मनो निधाय यो योगी श्वासमार्गपरो भवेत्।
तदा सा द्रवति क्षिप्रं चैतन्या कुण्डली परा॥

---

१. रु० या० २८।३२, ३४; २. तत्रैव—२८।८६।

मानी विचारार्थविवेकचित्तश्चातुर्यचित्तोल्बणताविवर्जितः ।
योगी भवेत् साधकचक्रवर्ती व्योमाम्बुजे चित्तविसर्जनं सदा[1] ॥

अनेन प्रकारेण ध्यानसाधनविधिर्वर्णितोऽस्ति ।

त्रिंशत्तमे पटले भेदिनीनामिकाया देव्या वर्णनमस्ति। तस्याः साधको मन्त्रः—

हर युग्मं स्वं महापापं नमो नमोऽग्निजायया ।
एतन्मन्त्रं जपेत्तत्र डाकिनीरक्षसि प्रभो[2] ॥

इतः पूर्वं वाक्यद्वयस्य योजना कार्या—

चित्तचञ्चोशब्दान्ते मां रक्ष युग्ममेव च ।
भेदिनी मम शब्दान्ते अकालमरणं हर[3] ॥

तदुत्तरम्—हर युग्ममित्यादि योजना करणीया ।

आदौ प्रणवमुद्धृत्य ब्रह्ममन्त्रं ततः परम् ।
शाम्भवोति ततश्चोक्त्वा ब्राह्मणीति पदं ततः ।
मनोनिवेशं कुरुते तारयेति द्विधापदम् ॥
छेदिनीपदमुद्धृत्य मम मानसशब्दतः ।
महान्धकारमुद्धृत्य छेदयेति द्विधापदम् ॥
स्वाहान्तं मनुमुद्धृत्य जपेन्मूलाम्बुजे सुधीः ।
एतन्मन्त्रप्रसादेन जीवन्मुक्तो भवेन्नरः ॥
स्वाहान्तं मनुमुद्धृत्य जपाद्र योगी भवेन्नरः ।
खेचरत्वं समाप्नोति योगाभ्यासेन योगिराट्[4] ॥

अत्र पटले प्रधानतया डाकिनीदेव्याः स्तुतिपद्यानि पठितानि सन्ति, यथा—

या देवी नवडाकिनी स्वरमणी विज्ञानिनी मोहिनी
मां पातु प्रियकामिनी भवविधेरानन्दसिन्धूद्भवा ।
मे मूलं गुणभासिनी प्रचयतु श्रीः कीर्तिचक्रं हि मां
नित्या सिद्धिगुणोदया सुरदया श्रीसंज्ञया मोहिता ॥
धात्री धैर्यवती सती मधुमती विद्यावती भारती
कल्याणी कुलकन्यकाधरनरारूपा हि सूक्ष्मास्पदा ।
मोक्षस्था स्थितिपूजिता स्थितिगता माता शुभा योगिनां
नौमि श्रीभविकाशयां शमनगां गोतोद्गतां गोपनाम्[5] ॥

अनया रीत्या भगवती डाकिनी स्तुताऽस्ति । 'एवं ध्यात्वा पठेत् स्तोत्रं पठित्वा योगिराड् भवेत्'[6] इत्थं चान्ते फलसंकेतः कृतोऽस्ति ।

---

१. रु० या० २९।१२-१५, १९-२०, ४३; २. तत्रैव—३०।६-७; ३. तत्रैव—३०।५-६ ।
४. तत्रैव—३०।७-१०,१३; ५. तत्रैव—३०।३०,३२; ६. तत्रैव—३०।४१ ।

एकत्रिंशे पटले भेदिन्यादिदेवीनां साधनविधय उक्ताः सन्ति। तत्र भेदिनी-देव्याः साधनेन ग्रन्थीनां भेदनमाञ्जस्येन सम्पद्यते, उक्तञ्च—

या भेदिनी सकलग्रन्थिविनाशनानां
धर्मान्तरे सकलशत्रुविनाशनस्था।
सा मे सदा प्रतिदिनं परिपातु देहं
कालात्मिका भगवती शुभकार्यकर्त्री[1]॥

एतत्स्तोत्रपाठेन रिपुवर्गविनाशः, क्रोधपुञ्जविनाशः, भक्तितत्त्वस्योदयः, इह लोके राज्यावाप्तिरन्ते परमसुखावाप्तिश्च भवति।

द्वात्रिंशे पटले पुनरपि कुण्डलिनीदेव्याः स्तोत्रं ध्यानं न्यासो मन्त्रश्च वर्णितोऽस्ति। यावत्कालं कुण्डलिन्याः सिद्धिर्न जायते, तावत्कालं जपः कर्तव्य एव। मानसं होमतर्पणम्, मानसं ध्यानम्, मानसो जपः, मानसोऽभिषेकः—एतत्सर्वं यद्याचर्यते, तदा भावशुद्धौ सत्यां भगवत्याः सिद्धिर्भवत्येव। अन्ते च--

प्रणवेन पुटितं कृत्वा यः स्तौति नियतः शुचिः।
स भवेत् कुण्डलीपुत्रो भूतले नात्र संशयः[2]॥

अनया रीत्या भगवत्या ध्यानं स्तोत्रादिकं च विस्तरेण वर्णितमस्ति।

त्रयस्त्रिंशे पटले कुण्डली-कवचस्य प्रधानतया वर्णनं कृतमस्ति।

प्रातःकाले त्रिवारं च मध्याह्ने वारयुग्मकम्।
सायाह्ने वारमेकं तु पठेत् कवचमेव च।
पठेदेवं महायोगी कुण्डलीदर्शनं भवेत्[3]॥

पुनश्च—

शिरो मे ललिता देवी पातूग्राख्या कपोलकम्।
ब्रह्ममन्त्रेण पुटिता भ्रूमध्यं पातु मे सदा॥
नेत्रत्रयं महाकाली कामाग्निभक्षिका शिखाम्।
दन्तावलीं विशालाक्षी ओष्ठमिष्टानुवासिनी[4]॥

अनेन प्रकारेण सर्वेषामङ्गोपाङ्गानां रक्षणं देव्या कृतमस्ति।

तत्फलं च रोगविमुक्तिः, राज्यप्राप्तिः, लक्ष्मीप्राप्तिः, सर्वसिद्धिप्राप्तिश्च, विस्तरेण ग्रन्थे सर्वं द्रष्टव्यम्।

चतुस्त्रिंशे पटले जननमरणदुःखप्रशमनाय पञ्चस्वरनामकं योगं कुर्यात्। योगोऽयमत्यन्तं गोपनीयोऽस्ति। भगवत्याः श्रीकुण्डलिनीदेव्या अष्टोत्तरसहस्रसंख्याकानि नामानि यः पठति, स महायोगी भवति। पञ्चस्वरयोगविधिरुक्तः। आदौ नेती-योगः, ततो दन्तियोगः, ततो धौतीयोगः, ततो नेउलीयोगः, ततश्च नाडीनां चालनमि-

---

१. रु० या० ३१।८; २. तत्रैव--३२।४३।
३. तत्रैव--३३।४-५; ४. तत्रैव--३३।७-८।

त्येवं पञ्चस्वरविधानेन महाकफविनाशः, हृदयशुद्धिः, सर्वगलापहारः, सर्वान्त्रशोधनम्, सर्वनाडीशोधनं च क्रमशो भवति ।

तत्र च दूर्वा-विजया-बिल्वपत्रम्, निर्गुण्डी, कालितुलसी, एतानि सर्वाणि पत्राणि समानीय चूर्णयेत्, अत्र विजयापत्रं द्विगुणं ग्राह्यम् । एतत्पत्रभक्षणे मन्त्रा अपि संकेतिता वर्तन्ते । भक्षणावसरे धेनुमुद्रा-योनिमुद्रा-मत्स्यमुद्राणां दर्शनं करणीयम् । तत्त्वमुद्रा-क्रमेणैव तर्पणमपि कर्तव्यम् । ततश्च कुण्डलीनामपूर्वकं हवनं कुर्यात् । नेतीक्रियायाः प्रकारः, दन्तीक्रियाप्रकारश्च विस्तरेण वर्णितोऽस्ति । पुनश्च दुग्धेन कुण्डल्यास्तर्पणं विहितम् ।

पञ्चत्रिंशे पटले धौतीयोगस्य विधिर्वर्णितो वर्तते । सूक्ष्मात्सूक्ष्मतरं द्वात्रिंश-द्धस्तपरिमितं वस्त्रमानयेत् । एकहस्तमितवस्त्रत आरभ्य द्वात्रिंशद्धस्तमितवस्त्रं यावत् क्रिया कर्तव्या । एतत्क्रियाकरणेन दृढासने योगः सिध्यति । अष्टाङ्गुलं वस्त्रमायामे, दैर्घ्ये तु द्वात्रिंशद्धस्तमितमिति विवेकः । श्वासगणनापूर्वकं प्राणायामविधानम् । ततो नेउलीयोगविधिः, तत्र मुद्गद्विदलमिश्रितं कृसरान्नं सघृतं पक्वं भुञ्जीत । उदर-मध्यस्थ-कुलालचक्रवत् परिभ्रमणं कारयितव्यम् । एतदनु नाडीक्षालनं कार्यम् । सर्व-सिद्धिप्रदमेतद् नेउलीसाधनं मतम् ।

षट्त्रिंशे पटले भगवत्याः कुण्डलीदेव्या अष्टाधिकसहस्रनामोल्लेखपूर्वकं स्तोत्रमुक्तम् । ऋषिश्छन्दोदेवतानां च निर्देशः कृतोऽस्ति ।

कुलक्षेत्रस्थिता कौली कुलीनार्थप्रकाशिनी ।
कुलाख्या कुलमार्गस्था कुलशास्त्रार्थपातिनी ॥
कुलज्ञा कुलयोग्या च कुलपुण्यप्रकाशिनी ।
कुलीना च कुलाध्यक्षा कुलचन्दनसेविता[1] ॥

इत्येवमष्टोत्तरसहस्रनामस्तोत्रं जपित्वा कवचेनात्मरक्षा करणीया । तत्र—

इं किं श्रीं कामकमला पातु कैलासरक्षिणी ।
मम श्री इं बीजरूपा पातु काली शिरःस्थलम् ॥
पातु मे कर्णयुग्मं तु क्रौं क्रौं जीवकरालिनी ।
गण्डयुग्मं सदा पातु कुण्डली अङ्कवासिनी[2] ॥

इत्यादिमन्त्रैरङ्गोपाङ्गरक्षणं विधेयम् । एतत्स्तवनपाठस्य कवचस्य च फलं कोटि-जन्माघनाशः ।

सप्तत्रिंशे पटले पीताम्बरधरस्य वंशीनादध्वनिगुणपरस्य महाकालियदमन-परस्य भगवतः श्रीकृष्णस्य योगिराजराजेश्वरस्य विमलं ध्यानं निरूपितमस्ति । अन्ते च—

१. रु० या० ३६।८-९; २. तत्रैव—३६।१७१,१७५ ।

विना कृष्णपदाम्भोजं स्वाधिष्ठानं कुतो जयम् ।
कृष्णध्यानान्महापद्मभेदं प्राप्नोति शङ्कर[1] ॥

इत्येवं महापद्मभेदनं स्वाधिष्ठानभेदनं फलत्वेन प्रोक्तम् ।

अष्टात्रिंशे पटलेऽपि भगवतः श्रीकृष्णस्य ध्यानविधिर्विस्तरेण प्रोक्तः। एतत्पटलीयपञ्चमषष्ठश्लोकयोर्मध्ये ध्यानमन्त्रः सुगोपितो वर्तते। पुनश्च भगवतो नरसिंहस्यापि ध्यानमन्त्रः संकेतितोऽस्ति ।

प्रणवं पूर्वमुच्चार्य नान्तबीजं तथोद्गिरेत् ।
वह्निबीजसमालग्नमधोदन्तस्वरान्वितम् ॥
नादबिन्दुसमायुक्तं पुनर्वारद्वयं वदेत् ।
नरसिंहाय शब्दान्ते पुनर्वारत्रयं वदेत् ॥
देवीबीजं शक्तिबीजं स्वाहान्तं मनुमुद्गिरेत् ।
एतन्मन्त्रप्रयोगेण कुण्डलीवशमानयेत्[2] ॥

अनया रीत्या स्वाधिष्ठाने सिद्धिप्राप्त्या स्वात्मनि चिन्मये कृष्णे मनोलयं कुर्यात् ।

एकोनचत्वारिंशे पटले भगवतः श्रीकृष्णस्य स्तोत्रं कवचपद्धतिश्च विस्तरेण प्रोक्ताऽस्ति। यथा—

श्रीकृष्णं जगतामघोशमनघं ध्यानात् सिद्धिप्रदं
गोविन्दं भवसिन्धुपारकरणं सन्तारणं कारणम् ।
श्रीविष्णुं वनमालिनं नरहरिं नारायणं गोकुलं
योगेन्द्रं नरनाथमादिपुरुषं वृन्दावने भावयेत् ॥

मोक्षश्रीसहितं कृतान्तविकृतं धर्मार्णवं सुन्दरं
श्रीरामं बलरामभावविमलं नित्याकुलं सत्कुलम् ।
श्रीश्यामं कनकादिहारविलसल्लम्बोदरं श्रीधरं
तं वन्दे हरिमीश्वरं गुणवतीमायाश्रयं स्वाश्रयम्[3] ॥

इत्येवं स्तोत्रं विधाय तदीयकवचमन्त्रेणात्मरक्षा कार्या। एतेन विधिना मासेनैव षड्दले सर्वसिद्धिप्राप्तिर्भवति ।

चत्वारिंशे पटले षड्गतं वर्णं भावयित्वा पृथक् पृथग् ध्यानं कुर्यात्, षट्पद्मस्थो नूनं भवेत्। ततश्च—

यावन्मूलाधारयोगं तावद् यमादिकं प्रभो ।
यमनियमासने काले योगं पञ्चामरान्वितम् ॥
तावत् कुर्यान्महादेव यावत्तत्सिद्धिमाप्नुयात् ।
यदि पञ्चामरासिद्धिस्तदा मायादिसिद्धिभाक् ॥

---

१. रु० या० ३७।३५; २. तत्रैव—३८।१५-१७; ३. तत्रैव—३९।८-९ ।

पञ्चासवा सिद्धिकाले प्राणादिवायुपञ्चमम् ।
धृत्वा धृत्वा पुनर्धृत्वा कुम्भयेदनिशं शनैः[1] ॥

अनया रीत्या शरीरस्य निर्मलतायां प्राणवायोर्नैर्मल्यं निश्चितं भवति ।

एकचत्वारिंशे पटले राकिणीदेव्या सहितस्य योगिराजश्रीकृष्णस्य स्तवनमुद्गीतमस्ति ।

या राकिणी त्रिजगतामुदयाय चेष्टा
संज्ञामयी कुलवती कुलवल्लभस्था ।
विश्वेश्वरी स्मरहरप्रियकर्मनिष्ठा
कृष्णप्रिया मम सुखं परिपातु देवी ॥
षड्वर्गनाथकरपद्मनिषेविता या
राधेश्वरी प्रियकरी सुरसुन्दरी सा ।
माता कुलेशजननी जगतां मनुस्था
विद्या परा रिपुहराऽवतु मे शरीरम्[2] ॥

अनया पद्धत्या स्तोत्रस्य कवचस्य च विस्तरेण निर्देशः कृतोऽस्ति ।

त्रिसन्ध्यं चेदमाकुर्यात् पठित्वा च पुनः पुनः ।
ध्यात्वा भावपरो भूत्वा मुच्यते भवबन्धनात् ॥
अचलां भक्तिमाप्नोति विश्वामित्रो यथा वशी ।
पठनात् पामरो याति ब्रह्मलोकं कुलाधिप[3] ! ॥

इत्येवं फलस्य निर्देशो द्रष्टव्यः ।

द्विचत्वारिंशे पटले राकिणीसमलङ्कृतस्य श्रीकृष्णस्य प्रीत्यै हवनतर्पणयोर्विधानम्, गुप्तमन्त्रस्य स्फुटं संकेतः, तर्पणान्तेऽभिषेकः, तदन्तेऽष्टाङ्गनतिभिः समर्चनम्, अष्टोत्तरसहस्रनामभिः स्तवनम् । तत्र स्तवन एकं नाम भगवतः श्रीकृष्णस्य, अपरं भगवत्या राधायाः (राकिण्याः) । यथा—

मुकुन्दो मालती माला विमला विमलाकृतिः ।
रमानाथो महादेवो महायोगी प्रभावती ॥
वैकुण्ठो देवजननी दहनो दहनप्रिया ।
दैत्यारिर्दैत्यमथिनी मुनीशो मौनभाविता ॥
नारायणो जयकला करुणो करुणामयी ।
हृषीकेशः कौशिकी च केशवः केशिघातिनी[4] ॥

एतत्स्तोत्रपाठेन किं फलम् ? तदुच्यते—

यः पठेत् प्रातरुत्थाय शुचिर्वाऽशुचिमानसः ।
भक्त्या शान्तिमवाप्नोति अनायासेन योगिराट् ॥

---

१. रु० या० ४०।१९-२१; २. तत्रैव—४१।२०-२१ ।
३. तत्रैव—४१।३८-३९; ४. तत्रैव—४२।१८-२० ।

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
अपमृत्व्वादिहरणं वारमेकं पठेद् यदि[1] ॥

इत्यादिफलसङ्कीर्तनं विस्तरेण द्रष्टव्यम्। पुनश्च कैलासदर्शनादिफलकोऽष्टाङ्गसाधनविधिः प्रोक्तः ।

त्रिचत्वारिंशे पटले मणिपूरचक्रभेदनविधिः प्राचुर्य्येण निरूपितः । उक्तञ्च—

असाध्यसाधनं कर्म मणिपूरस्थनिर्मलम् ।
मणिपूरे महापीठे ध्यानगम्ये सति प्रभो ॥
मनो निवेशनं कृत्वा नरो मुच्येत सङ्कटात् ।
मनोयोगी मनोभोगी मनोभक्तो मनोयुवा ॥
महायन्त्रे मनो दत्त्वा निर्माणं कारयेद् बुधः ।
मणिभिर्ग्रथनं कृत्वा नानामणिविभूषितम् ॥
श्रीविद्यापीठमालिख्य विभाव्य च पुनः पुनः[2] ॥

तत्र भगवतो महारुद्रस्य ध्यानविधिर्निरूपितः । गन्ध-पुष्प-धूप-दीपादिभिः समर्चनविधिः । प्राणायामो भक्त्या ध्यानं मन्त्रजपश्च कार्यः ।

चतुश्चत्वारिंशे पटले प्राणायामपूर्वकं महापीठस्य मणिपूरस्य ध्यानेन पञ्चामराशवासिद्धिपूर्वकेण च किं न सिध्यति ? सर्वं सिध्यति इति भावः । हृदयपद्मस्याधोभागे ध्यानविधानेन योगिराड् रुद्रं महान्तं देवं प्रपश्यति, जीवन्मुक्तिसुखं च लभते ।

पञ्चचत्वारिंशे पटले वर्णध्यानस्य वैशिष्ट्यं प्रतिपादितमस्ति ।

पूर्वादिदलमारभ्य ध्यानं कुर्यात् पृथक् पृथक् ॥
डां डां डां डाकिनीं तां डमरुवररतां तारिणीं ताररूपां
डिं डिं डिं डामरस्थां डमरुडमगृहे डंकडिंकिं मनुस्थाम् ।
डं डं डं डामरेशीं डिमिडिमिडिमिगध्याननिर्माणडोरां
डों डों डों डाकडं डः प्रडुमडमुडां दाडिमामाश्रयामि[3]॥

इत्येवमादिवर्णध्यानमन्त्रनिर्देशः कृतोऽस्ति । अन्ते च पुनरपि ध्यानविधिं प्रतिपाद्य स्तोत्रफलं निर्दिष्टम् । तथा च—

वरहस्तां विशालाक्षीं चन्द्रावयवलक्षणाम्[4] ॥

इत्याद्यारभ्य—

अष्टादशभुजां श्यामां हस्तविद्युतिधारिणीम् ।
एवं ध्यात्वा पूजयित्वा रुद्राणीस्तोत्रमापठेत्[5] ॥

अनया रीत्या रुद्राणीस्तोत्रपाठाङ्गभूतो वर्णध्यानविधिः विस्तरेण निर्दिष्टोऽस्ति ।

---

१. रु० या० ४२।१३१, १३३; २. तत्रैव—४३।५३-५४, ५९-६० । ३. तत्रैव—४५।४१-४२; ४. तत्रैव—४५।५३; ५. तत्रैव—४५।५८ ।

मान्या विद्वांसो निवेद्यन्ते यद्योगतन्त्रग्रन्थमालायां **सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन** रुद्रयामलस्योत्तरतन्त्रस्य नवतितमपटलान्तस्य प्रथमं संस्करणं प्रातःस्मरणीयानां तदानीन्तनकुलपतिपदमधितिष्ठतां विद्वद्वरेण्यानां **श्रीमद्बदरीनाथशुक्लमहोदयानां** सत्प्रेरणया सुसम्पन्नमभवत्। अधुनाऽस्य ग्रन्थस्य दौर्लभ्यमालक्ष्य पुनर्मुद्रणाय सन्नद्धेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन पञ्चचत्त्वारिंशपटलान्तः पूर्वभागः प्रकाश्यमानोऽस्तीति परमं प्रमोदस्थानम्।

"श्रेयांसि बहु विघ्नानि" इति वादसत्त्वेऽपि दुर्लभस्यास्य ग्रन्थस्याचिरप्रकाशने साम्प्रतिककुलपतिपदं सभाजयतां प्राच्यप्रतीच्योभयविधविद्यापारदृश्वनां महामनीषिणां **डॉ० श्रीविद्यानिवासमिश्र**महानुभावानां साधुप्रेरणैव महत्कारणम्। मान्या मिश्रमहोदयाः सर्वथा धन्यवादैः सत्क्रियन्ते।

पुनश्चास्य ग्रन्थस्य प्रकाशने प्रकाशनाधिकारिणः **श्रीहरिश्चन्द्रमणित्रिपाठिनः**, प्राग्रूपसंशोधकस्य **श्रीहरिवंशकुमारपाण्डेयस्य**, तत्सहयोगिकर्मचारिणाम्, रत्नाप्रेससञ्चालकमहोदयानां **श्रीविनयशङ्करपण्ड्यानां** तत्रत्येतरकर्मचारिणाम्, अत्रत्याचार्योपाचार्यादीनाम्, छात्राणां च सहयोगेन कठिनतरमपि एतत्कार्यं सम्पन्नतामलभत, तदर्थं ते सर्वे शुभाशीराशिभिः समेध्यन्ते।

शिष्याणामध्यापनेन स्वयमपि शास्त्रचिन्तया च समयस्याल्पतया भ्रमाद् मुद्रणदोषाद्वा त्रुटयो नूनं सम्भाव्यन्ते, ताश्च यदि सुधीभिः सोसूच्यन्ते, तर्ह्यहं तदीयां कृतज्ञतामावक्ष्यामि। अन्ते च भगवन्तौ भवानीविश्वनाथौ प्रार्थये यत्तदीयानुग्रहेणैष विश्वविद्यालय ईदृशे महनीयकार्ये सर्वथा सर्वदा च तत्परतां भजेतेति स्वीयं हार्दं प्रकाशयति—

वाराणस्याम्,
वसन्तपञ्चम्याम्,
२०४७ वैक्रमेऽब्दे

रामप्रसादत्रिपाठी
सम्मानिताध्यापकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम्।

विषयानुक्रमणिका

विषयाः	पृष्ठाङ्काः
प्रस्तावना	१-६५
विविधसाधनानि	१-१८
गुरुमहिमा स्वमहिमा च	१९-२४
पशुभावेन वीरभावसाधनम्	२५-२६
गुरुमहिमा गुरुकृत्यञ्च	२६-३७
चक्रस्वरूपं साधनञ्च	३७-४१
दीक्षाविधानं चक्रविन्यासश्च	४२-४५
वर्णक्रमेण राशयो नक्षत्राणि च	४६-४९
अङ्केन साधनायाः फलानि	५०-५५
ब्रह्मचक्रसाधनम्	५६-६६
उल्काचक्रसाधनम्	६६-६९
चतुश्चक्रस्वरूपम्	६९-७१
सूक्ष्मचक्रस्वरूपम्	७१-७३
महाकथहचक्रस्वरूपम्	७४-७७
पशुभावः	७८-८०
कुलकुण्डलिनीदेव्याः स्तवनम्	८०-८३
वीरभावो दिव्यभावश्च	८३-८४
भावमाहात्म्यम्	८५-८६
कुमारीपूजनविधिर्माहात्म्यञ्च	८६-९६
कुमार्या जपहोमौ	९७-१०४
कुमारीकवचमाहात्म्यम्	१०५-१०८
कुमारीसहस्रनामानि	१०९-१२६
दिव्यभावः	१२७-१२९
दिव्यभावे वीरभावः	१२९-१३३
भावप्रश्नार्थबोधः	१३४-१३९
आज्ञाप्रश्नार्थभावः	१४०-१४६
अकाराद्यक्षरक्रमेण प्रश्नफलम्	१४७
कलिकालोद्भवः	१४७-१४८
भरण्यादिपुष्यनक्षत्राणां राश्यधिपानां च फलानि	१४९-१५०
रव्यादिवारप्रश्नफलम्	१५०-१५२
श्लेषादिनक्षत्रप्रश्नफलम्	१५२-१५४

तत्तन्नक्षत्रदेवतानां प्रश्ने फलम्	१५५-१५६
योगिब्रह्मज्ञानिवैष्णवादिसिद्धानां प्रश्नोत्तराणि	१५७-१६३
सामवेदमधश्चक्रस्वरूपम्	१६४-१६८
शक्त्याचारसमन्वितमथर्ववेदलक्षणम्	१६९-१७१
वायवीसिद्धिः	१७२-१७८
वसिष्ठतपः प्रभावः	१७८-१८३
कामचक्रस्वरूपम्	१८४-१९३
प्रश्नचक्रस्वरूपम्	१९४-१९८
सिद्धमन्त्रस्वरूपम्	१९९-२०३
वीरभावस्वरूपम्	२०४-२१३
षट्चक्रफलोदयः	२१४-२२३
ब्रह्ममार्गः	२२४-२२६
आसनस्वरूपम्, तस्य भेदाश्च	२२६-२३५
पुनरासनस्वरूपम्	२३६-२४४
शवासनसाधनम्	२४४-२५०
तत्त्वब्रह्मस्वरूपम्	२५१-२५५
ब्रह्मज्ञानमुखेन प्राणायामस्वरूपम्	२५५-२६५
प्राणायामे जपध्यानकरणम्	२६६-२७०
दिव्यवीरपशुक्रमेण कुण्डलीसाधनम्	२७०-२७३
कुलस्नानम्	२७३-२७५
कुलसन्ध्यादिकम्	२७५-२७७
कुलदर्शने दश पुष्पाणि होमसाधनानि च	२७७-२८१
प्राणायामप्रत्याहारधारणाध्यानसमाधिस्वरूपम्	२८२-२९१
मन्त्रसिद्धेर्लक्षणम्	२९२-२९९
षट्चक्रभेदक्रियास्वरूपम्	२९९-३०५
षट्चक्रयोगाः	३०६-३१०
मूलपद्मस्वरूपम्	३११-३१५
भेदिन्याः साधनम्	३१६-३१८
छेदिन्याः स्तवः	३१९-३२०
योगिनीस्तोत्रसारम्	३२०-३२२
कुण्डलिनीशक्तिस्वरूपम्	३२३-३२७
कुण्डलीकवचम्	३२८-३३४
पञ्चस्वरमहायोगः	३३५-३४१
अष्टाङ्गादिधारणे पञ्चस्वरसिद्धौ पञ्चामरक्रियाविधानम्	३४२-३४६
कुण्डलिनीसहस्रनामस्तोत्रम्	३४७-३६९
स्वाधिष्ठानप्रकाशनप्रकारः	३७०-३७५

श्रीकृष्णसाधनम्	३७६
नरसिंहमन्त्रसाधनम्	३७७-३७८
श्रीकृष्णमन्त्रसाधनम्	३७८-३८१
संसारसाधनम्	३८२-३८८
षड्गतवर्णभावनम्	३८९-३९२
राकिणीस्तोत्रम्	३९३-३९९
राकिणी (राधा) साधनम्	४००-४२२
षट्चक्रभेदाः	४२२-४२६
कामिनीवशीकरणम्	४२७-४२९
योगधर्मस्वाश्रमस्वरूपम्	४३०-४३५
लाकिनीसाधनम्	४३५-४३६
मणिपूरभेदनम्	४३७-४४२
कालक्रमस्वरूपम्	४४३-४४७
वर्णध्यानम्	४४७-४५०

-: ❀ :-

॥ ॐ कालिकायै नमः ॥

अथ रुद्रयामलम्

[उत्तरतन्त्रम्]

प्रथमः पटलः

भैरव उवाच—

परा श्रीपरमेशानीवदनाम्भोजनिःसृतम् ।
श्रीयामलं महातन्त्रं स्वतन्त्रं विष्णुयामलम् ॥ १ ।

शक्तियामलमाख्यातं ब्रह्मणः स्तुतिहेतुना ।
ब्रह्मयामलवेदाङ्गं सर्वञ्च कथितं प्रिये ॥ २ ।

इदानीमुत्तराकाण्डं वद श्रीरुद्रयामलम् ।
यदि भाग्यवशाद्देवि तव श्रीमुखपङ्कजे ॥ ३ ।

यानि यानि स्वतन्त्राणि संदत्तानि महीतले ।
प्रकाशय महातन्त्रं नान्यतन्त्रेषु तृप्तिमान् ॥ ४ ।

सर्ववेदान्तवेदेषु कथितव्यं ततः परम् ।
तदा ते भक्तवर्गाणां सिद्धिः सञ्चरते ध्रुवम् ॥ ५ ।

यदि भक्ते दया भद्रे वद त्रिपुरसुन्दरि[1] ।
महाभैरववाक्यञ्च पङ्कजायतलोचना[2] ॥ ६ ।

श्रुत्वोवाच महाकाली कथयामास भैरवम् ।

१. संबोधनविभक्त्यन्तमिति ह्रस्वान्तम् ।
२. पङ्कजानि इवायतलोचनानि यस्या इति बहुव्रीहिः । श्रुत्वा पङ्कजलोचना—क० ।

भैरवो उवाच—

शम्भो महात्मदर्पघ्न कामहीन कुलाकुल ॥ ७ ।

चन्द्रमण्डलशीर्षाक्ष हालाहलनिषेवक ।
अद्वितीयाघोरमूर्त्ते[1] रक्तवर्णशिखोज्ज्वल ॥ ८ ।

[2]महाऋषिपते देव सर्वेषाञ्च नमो नमः ।
सर्वेषां प्राणमथन शृणु आनन्दभैरव ॥ ९ ।

आदौ बालाभैरवीणां साधनं षट्कलात्मकम् ।
पश्चात् कुमारीललितासाधनं परमाद्भुतम् ॥ १० ।

कुरुकुल्लाविप्रचित्तासाधनं शक्तिसाधनम् ।
योगिनीखेचरीयज्ञकन्यकासाधनं ततः ॥ ११ ।

उन्मत्तभैरवीविद्या-कालीविद्यादिसाधनम् ।
पञ्चमुद्रासाधनञ्च पञ्चबाणादिसाधनम् ॥ १२ ।

प्रत्यङ्गिरासाधनञ्च कलौ साक्षात्करं परम् ।
हरितालिकास्वर्णविद्याधूम्रविद्यादिसाधनम् ॥ १३ ।

आकाशगङ्गा विविधा[3] कान्यकासाधनं ततः ।
भ्रूलतासाधनं[4] सिद्धसाधनं तदनन्तरम् ॥ १४ ।

उल्काविद्यासाधनं च पञ्चतारादिसाधनम् ।
अपराजितापुरुहूताचामुण्डासाधनं ततः ॥ १५ ।

कालिकासाधनं कौलसाधनं घनसाधनम् ।
चर्चिकासाधनं पश्चात् घर्घरासाधनं ततः ॥ १६ ।

---

१. अद्वितीया अघोरा मूर्तिर्यस्येति बहुव्रीहिः, स्त्रियाः पुंवदित्यादिना पुंवद्भावः ।

२. पतिः शिवः—ग० ।

३. विवुधा वालुकासाधनं ततः—क०, विवधा—ख० ।

४. भूतबलिसाधनं ततः—क० ।

विमलासाधनं रौद्री[1] त्रिपुरासाधनं ततः ।
सम्पत्प्रदासप्तकूटासाधनं [2]चेटीसाधनम् ।
शक्तिकूटादिषट्कूटानवकूटादिसाधनम् ॥ १७ ।

कनकाभाकाञ्चनाभावह्न्याभासाधनं ततः ।
वज्रकूटापञ्चकूटासकलासाधनं ततः ॥ १८ ।

तारिणीसाधनं पश्चात् षोडशीसाधनं स्मृतम् ।
छिन्नादि-उग्रप्रचण्ड्यादिसाधनं सुमनोहरम् ॥ १९ ।

उल्कामुखीरक्तमुखीसाधनं वीरसाधनम् ।
नानाविधाननिर्माणशवसाधनमेव च ॥ २० ।

कृत्वा देवीसाधनञ्च कृत्वाहिसाधनं ततः ।
नक्षत्रविद्यापटलं कालीपटलमेव च ॥ २१ ।

श्मशानकालिकादेवीसाधनं भूतसाधनम् ।
रतिक्रीडासाधनञ्च सुन्दरीसाधनं तथा ॥ २२ ।

महामालासाधनञ्च महामायादिसाधनम् ।
भद्रकालीसाधनञ्च नीलासाधनमेव च ॥ २३ ।

[3]भुवनेशीसाधनञ्च दुर्गासाधनमेव च ।
वाराहीगारुडीचान्द्रीसाधनं परमाद्भुतम् ॥ २४ ।

---

१. संज्ञायामिति निषेधान्न पुंवद्भावः ।

२. त्रिकुटासाधनं ततः—क० ।

३. कामाख्यासाधनं भद्रे भानुमत्याश्च साधनम् ।
महारात्रिसाधनञ्च सप्तमीसाधनं तथा ॥
पञ्चमीरोहिणिकुल्यासाधनं साभिचारकम् ।
अष्टमीविषमाषष्ठीकौशल्यासाधनं ततः ॥
विजयासाधनं मुद्रा देवीसाधनमेव च । इत्यधिकः पाठः—क० ।

ब्रह्माणीसाधनं पश्चाद् हंसीसाधनमुत्तमम् ।
माहेश्वरीसाधनञ्च कौमारीसाधनं तथा ॥ २५ ।

वैष्णवीसाधनं धात्रीधनदारतिसाधनम् ।
[1]पञ्चाभ्राबलिपूर्णास्या नारसिंहीसुसाधनम् ॥ २६ ।

[2]कालिन्दीरुक्मिणीविद्याराधाविद्यादिसाधनम् ।
गोपीश्वरीपद्मनेत्रापद्ममालादिसाधनम् ॥ २७ ।

मुण्डमालासाधनञ्च भृङ्गारीसाधनं ततः ।
सकलाकर्षणीविद्याकपालिन्यादिसाधनम् ॥ २८ ।

गुह्यकालीसाधनञ्च बँगलामुखीसाधनम् ।
[3]महाबालासाधनञ्च कलावत्यादिसाधनम् ॥ २९ ।

कुलजाकलिकाकक्षाकुक्कुटीसाधनं महत् ।
चिञ्चादेवीसाधनञ्च शाङ्करीगूढसाधनम् ॥ ३० ।

प्रफुल्लाब्जमुखीविद्याकाकिनीसाधनं ततः ।
कुब्जिकासाधनं नित्यासरस्वत्यादिसाधनम् ॥ ३१ ।

भूर्लेखाशशिमुकुटा-उग्रकाल्यादिसाधनम् ।
[4]मणिद्वीपेश्वरीधात्रीसाधनं यज्ञसाधनम् ॥ ३२ ।

---

१. पञ्चास्यबलिपूर्णास्या—क० ।

२. ऐन्द्रीघोरतराविद्यासाधनं रतिसाधनम् ।
वज्रज्वालासाधनञ्च चन्द्रदुर्गादिसाधनम् ॥
महाविद्यासाधनञ्च लक्ष्मीसाधनमेव च ।
शाकम्भरीसाधनञ्च भ्रामरीसाधनं तथा ॥
रक्तदण्डामहाविद्यापूर्वविद्यादिसाधनम् । इत्यधिकः पाठः—ख० ।

३. महाबला—क० ।

४. धात्री—ख० ।

केतकीकमलाकान्तिप्रदाभेद्यादिसाधनम्[1] ।
[2]वागीश्वरीमहाविद्या-[3]अन्नपूर्णादिसाधनम् ॥ ३३ ॥

वज्रदण्डारक्तमयीमन्वारीसाधनं[4] तथा ।
हस्तिनीहस्तिकर्णाद्यामातङ्गीसाधनं ततः ॥ ३४ ॥

परानन्दानन्दमयीसाधनं गतिसाधनम् ।
कामेश्वरीमहालज्जाज्वालिनीसाधनं वसोः ॥ ३५ ॥

गौरीवेतालकङ्कालीवासवीसाधनं तथा ।
चन्द्रास्यासूर्यकिरणारटन्तीसाधनं ततः ॥ ३६ ॥

किङ्किनी पावनीविद्या अवधूतेश्वरीति च ।
एतासां सिद्धविद्यानां साधनाद्रुद्र एव सः ॥ ३७ ॥

अलकाकलियुगस्थाशक्तिटङ्कारसाधनम्[5] ।
हरिणीमोहिनीक्षिप्रातृष्यादिसाधनं तथा ॥ ३८ ॥

अट्टहासाघोरनादामहामेधादिसाधनम् ।
वलरीकौरविण्यादिसाधनं परमाद्भुतम् ॥ ३९ ॥

रङ्किणीसाधनं पश्चाद् नन्दकन्यादिसाधनम् ।
मन्दिरासाधनं कात्यायनीसाधनमेव च ॥ ४० ॥

रजनीराजतीघोरासाधनं तालसाधनम् ।
पादुकासाधनं चित्तासाधनम् रविसाधनम् ॥ ४१ ॥

मुनिनाथेश्वरीशान्तिवल्लभासाधनं तथा ।
मदिरासाधनं [6]वीरभद्रासाधनमेव हि ॥ ४२ ॥

---

१. भैम्यादिसाधनम्—क० ।
२. शशीश्वरी—क० ।
३. पृषोदरादित्वात् प्रकृतिभावः ।
४. मन्दारीसाधनं तथा—क० ।
५. कङ्कादिसाधनम्—क० ।
६. वीरमुद्रा—क० ।

मुण्डालीकालिनीदैत्यदंशिनीसाधनं ततः ।
प्रविष्टवर्णालघिमामीनादिसाधनं महत् ।। ४३ ।

फेत्कारीसाधनं[1] भल्लातकीसाधनमद्भुतम् ।
उड्डीयानेश्वरीपूर्णागिरिजासाधनं तथा ।। ४४ ।

सौकरी[2] राजवशिनीदीर्घजङ्घादिसाधनम् ।
अयोध्यापूजितादेवीद्राविणीसाधनाद्भुतम् ।। ४५ ।

ज्वालामुखीसाधनञ्च कृष्णजिह्वादिसाधनम् ।
पञ्चवक्त्रप्रियाविद्यानन्तविद्यादिसाधनम् ।। ४६ ।

श्रीविद्याभुवनेशानीसाधनं कायसाधनम् ।
रक्तमालामहाचण्डीमहाज्वालादिसाधनम् ।। ४७ ।

[3]प्रक्षिप्तामन्त्रिकाकामपूजिताभक्तिसाधनम् ।
श्वासस्थावायवीप्राप्तालेलिहानादिसाधनम् ।। ४८ ।

भैरवीलसितापृथ्वीवाटुकीसाधनं तथा ।
अगम्या-[4]आकुलीमौलीन्द्राञ्जनमन्त्रसाधनम् ।। ४९ ।

कुलावतीकुलक्षिप्तारतिचीनादिसाधनम् ।
शिवाक्रोडादितरुणीनायिकामन्त्रसाधनम् ।। ५० ।

साधनं शैलवासिन्या अकस्मात् सिद्धिवर्धनम् ।
मन्त्रयन्त्रस्वतन्त्रादिपूज्यमानाः परात्पराः ।। ५१ ।

एताः सर्वाः कलियुगे कालिका हरकोमलाः ।
मन्त्राद्या येन सिद्ध्यन्ति सत्यं सत्यं न संशयः ।। ५२ ।

---

१. माकरीभल्लातकी—क० ।
२. कौमारीसाधनम्—क० ।
३. संपूजिता—क० ।
४. पृषोदरादिकल्पनया सन्ध्यभावः ।

महाकालशिवानन्दपरमानन्दपारगः ।
भक्तानामनुरागेण विद्यारत्नं पुनः शृणु ॥ ५३ ।
आदौ वैष्णवदेवस्य मन्त्राणां नित्यसाधनम् ।
ततस्ते मङ्गलं मन्त्रसाधनं परमाद्भुतम् ॥ ५४ ।
अकस्माद्विहिता सिद्धिर्येन सिद्धचति भूतले ।
बालभैरवयोगेन्द्रसाधनं शिवसाधनम् ॥ ५५ ।
महाकालसाधनञ्च तथा रामेश्वरस्य च ।
अघोरमूर्त्ते रमणासाधनं शृणु यत्नतः ॥ ५६ ।
क्रोधराजभूतराज-एकचक्रादिसाधनम् ।
गिरीन्द्रसाधनं पश्चात् कुलनाथस्य साधनम् ॥ ५७ ।
वटुकेशादिश्रीकण्ठेशादिसाधनमेव च ।
मृत्युञ्जयस्य रौद्रस्य कालान्तकहरस्य[1] च ॥ ५८ ।
उन्मत्तभैरवस्यापि तथा [2]पञ्चास्यकस्य च ।
कैलासेशस्य शम्भोश्च तथा शूलिन एव च ॥ ५९ ।
भार्गवेशस्य सर्वस्य महाकालस्य साधनम् ।
सुरान्तकस्य पूर्णस्य तथा देवस्य शङ्कर ॥ ६० ।
हरिद्रागणनाथस्य वरदेश्वरमालिनः ।
ऊर्ध्वकेशस्य धूम्रस्य जटिलस्यापि साधनम् ॥ ६१ ।
आनन्दभैरवस्यापि बाणनाथस्य साधनम् ।
करीन्द्रस्य शुभाङ्गस्य हिल्लोलमर्द्दकस्य च ॥ ६२ ।
पुष्पनाथेश्वरस्यापि वृषनाथस्य साधनम् ।
[3]अष्टमूर्त्तेः कालमूर्त्तेश्चन्द्रशेखरसाधनम् ॥ ६३ ।

---

१. हरतीति हरः, कालान्तकस्य हर इति षष्ठीतत्पुरुषः ।

२. पञ्चकालस्य च—क० ।

३. कपिलेशस्य रुद्रस्य तथा पिङ्गाक्षकस्य च ।
दिगम्बरस्य सूक्ष्मस्य उपेन्द्रपूजितस्य च ॥
अवधूतेश्वरस्यापि अष्टवसोश्च साधनम् । इत्यधिकः पाठः—ख० ।

क्रमुकस्यापि घोरस्य कुबेराराधितस्य च ।
त्रिपुरान्तकमन्त्रस्य कमलाक्षस्य साधनम् ।। ६४ ।

ईत्यादिसिद्धमन्त्राणां मन्त्रार्थं विविधं मुदा ।
उदितं तद्विशेषेण सुविस्तार्यं श्रृणुष्व तत् ।। ६५ ।

इन्द्रादिदेवता सर्वा येन सिद्धचन्ति भूतले ।
तत्प्रकारं महादेव सावधानोऽवधारय ।। ६६ ।

[1]उपविद्यासाधनञ्च मन्त्राणि विविधानि च ।
नानाकर्माणि धर्माणि षट्कर्मसाधनानि च ।। ६७ ।

श्रीरामसाधनं यज्ञसाधनं योगसाधनम् ।
सर्वविद्यासाधनञ्च राजज्वालादिसाधनम् ।। ६८ ।

मन्त्रसिद्धिप्रकारञ्च हनुमत्साधनादिकम् ।
विषज्वालासाधनञ्च पाताललोकसाधनम् ।। ६९ ।

भूतलिपिप्रकारञ्च तत्तत्साधनमेव च ।
नवकन्यासाधनञ्च अष्टसिद्धिप्रकारकम् ।। ७० ।

आसनानि च अङ्गानि साधनानि बहूनि च ।
कात्यायनीसाधनानि चेटीसाधनमेव च ।। ७१ ।

कृष्णमार्जारसिद्धिश्च खड्गसिद्धिस्ततः परम् ।
पादुकाजङ्घसिद्धिश्च निजजिह्वादिसाधनम् ।। ७२ ।

संस्कारगुटिकासिद्धिः खेचरीसिद्धिरेव च ।
भूप्रवेशप्रकारत्वं नित्यतुङ्गादिसाधनम् ।। ७३ ।

स्तम्भनं दारुणं पश्चादाकर्षणं मुनेरपि ।
नानाविधानि देवेश औषधादीनि यानि च ।। ७४ ।

हरितालादिसिद्धिश्च रसपारदसाधनम् ।
नानारससमुद्भूतं रसभस्मादिसाधनम् ।। ७५ ।

---

१. विद्यामुपगता उपविद्या, अपराविद्या ।

वृद्धस्य तरुणाकारं साधनं परमाद्भुतम् ।
वैजयन्तीसाधनञ्च चरित्रं वासकस्य च ॥ ७६ ।

शिवाचरित्रमश्वस्य चरित्रं वायसस्य च ।
कुमारीणां प्रकारन्तु वस्त्राणां वारणं तथा ॥ ७७ ।

सम्पत्तिसाधनं देशसाधनं कामसाधनम् ।
गुरुपूजाविधानञ्च गुरुसन्तोषसाधनम् ॥ ७८ ।

निजदेवाराधनञ्च निजसाधनमेव च ।
वारुणीपैष्टिकीगौडीकैतकीमाध्विसाधनम् ॥ ७९ ।

स्वदेहगमनं स्वर्गे मर्त्ये मर्त्यैश्च दुर्लभम् ।
शरीरवर्धनञ्चैव कृष्णभावस्य साधनम् ॥ ८० ।

नयनाकर्षणञ्चैव कालसर्पस्य दर्शनम् ।
रणक्षोभप्रकारञ्च पञ्चेन्द्रियनिवारणम् ॥ ८१ ।

योगविद्यासाधनञ्च भक्षप्रस्थनिरूपणम् ।
चान्द्रायणव्रतञ्चैव[1] शृणु तद्योगसिद्धये ॥ ८२ ।

यामलाग्रेण शंसन्ति यानि सर्वाणि कानि च ।
ब्रह्माण्डे यानि वस्तूनि सर्वत्र दुर्लभं शिवम् ॥ ८३ ।

येऽभ्यस्यन्ति महातन्त्रं बालाद्वा मन्त्रतोऽपि वा ।
यामलं मम वक्त्राम्भोरुहसुन्दरसंभवम् ॥ ८४ ।

अतिगुह्यं महागुह्यं शब्दगुह्यं निराकुलम् ।
नानासिद्धिसमुद्राणां गृहं योगमयं[2] शुभम् ॥ ८५ ।

शास्त्रजालस्य सारं हि नानामन्त्रमयं प्रियम्[3] ।
वाराणसीपुरपतेः सदामोदं सुखास्पदम् ॥ ८६ ।

---

१. चान्द्रायणव्रतं द्विविधम्, यवचान्द्रायण-पिपीलिकाचान्द्रायणभेदात् ।
आद्यं पूर्णिमोत्तरप्रतिपत्तिथित आरभ्यते, द्वितीयममावास्योत्तरप्रतिपत्तिथितः ।

२. योगालयम्—क० । ३. प्रिये—क० ।

सरस्वतीदैवतं यत्[1] कालीषु शिखरे वृतम् ।
महामोक्षं द्वारमोक्षं सर्वसंकेतशोभितम् ।। ८७ ।

वाञ्छाकल्पद्रुमं तन्त्रं शिवसंस्कारसंस्कृतम् ।
अप्रकाश्यं क्रियासारं सहस्रस्तुतिराजितम् ।। ८८ ।

अष्टोत्तरशतं नाम सहस्रनाममङ्गलम् ।
नानाद्रव्यसाधनादिविधृताञ्जनरञ्जितम् ।। ८९ ।

कालीप्रत्यक्षकथनं कालीषोढादिसंपुटम् ।
महाचमत्कारकरं स्थितिसंहारपालकम् ।। ९० ।

अष्टादशप्रकारश्च षोढायाः सौख्यमुक्तये ।
ये जानन्ति महाकालं[2] यामलं कलिपावनम् ।। ९१ ।

आब्रह्मस्तम्बपर्यन्तं करे तस्य न संशयः ।
तत्प्रकारमहं वक्ष्ये निगमागममङ्गलम्[3] ।। ९२ ।

यस्माद्रुद्रो भवेज्ज्ञानी नानातन्त्रार्थपारगः ।
यामिनीविहितं कर्म कुलतन्त्राभिसाधनम् ।। ९३ ।

[4]महावीरहितं यस्मात् पञ्चतत्त्वस्वरूपकम् ।
लङ्घनं नास्ति मे नाथ[5] अस्मिन् तन्त्रे सुगोपनम् ।। ९४ ।

ततो यामलमाख्यातं चन्द्रशेखर शङ्कर ।
रुद्राक्षं साधनोत्कृष्टं शतयागफलप्रदम् ।। ९५ ।।

मनःसन्तोषविपुलं यामलं परिकीर्त्तितम् ।
रुरुकादिभैरवाणां ब्राह्मीदेव्याश्च[6] साधनम् ।। ९६ ।

---

१. तत् कालीस्व शिखावृतम्—क० ।
२. समस्यमानमिदं पदम्, षष्ठीतत्पुरुषोऽत्र ।
३. सङ्कुलम्—क० ।
४. मकारविहितं—क० ।
५. यस्मिन् तन्त्रे सुगोपेन—क० ।
६. संज्ञायामिति पुंवद्भावनिषेधः ।

[1]जाम्बूनदलताकोटिहेमदासाधनं यतः ।
मनसासाधनं यत्र लङ्कालक्ष्मीप्रसाधनम् ॥ ९७ ।

देवतानाञ्च कवचं नानाध्यानव्रतं महत् ।
अन्तर्यागविधानानि कलिकालफलानि च ॥ ९८ ।

भाति यत्नप्रभाकारं प्रायश्चित्तविमर्षणम् ।
पटलं त्रिंशता व्याप्तं ये पठन्ति निरन्तरम् ॥ ९९ ॥

अवश्यं सिद्धिमाप्नोति यद्यदिच्छति भूतले ।
कर्मणा मनसा वाचा महातन्त्रस्य साधनम् ॥ १०० ।

करोति कमलानाथकरपद्मनिषेवितम् ।
ज्ञात्वा [2]सर्वधरं तन्त्रं [3]सम्पूर्णं लोकमण्डले ॥ १०१ ॥

प्राप्नोति साधकः सिद्धिं मासादेव न संशयः ।
नानाचक्रस्य माहात्म्यं नानाङ्कमण्डलावृतम् ॥ १०२ ।

सर्वज्ञसिद्धिशतकं खण्डकालीकुलालयम् ।
तरुणादित्यसंकाशं वनमालाविभूषितम् ॥ १०३ ।

दैवतं परमं हंसं कालकूटाशिनं प्रभुम् ।
आदौ ध्यात्वा पूजयित्वा नमस्कुर्याद् [4]महेश्वरम् ॥

प्रथमारुणसंकाशं रत्नालङ्कारभूषितम् ।
वरदं वारुणीमत्तं परमहंसं नमाम्यहम् ॥ १०४ ।

भैरव उवाच—

यदि न पठ्यते तन्त्रं यामलं सर्वशङ्करम् ।
तदा केन प्रकारेण साधकः सिद्धिभाग्भवेत् ॥ १०५ ।

---

१. जाम्बूनदतुलाकोटि—क० ।
२. सर्वेश्वरम्—क० ।
३. संपूर्णे—क० ।
४. कलेश्वरम्—क० ख० ।

केचिच्च बुद्धिहीनाश्च मेधाहीनाश्च ये जनाः ।
मन्दभाग्याश्च धूर्ताश्च मूढाः सर्वापदावृताः ॥ १०६ ।

प्राप्नुवन्ति कथं सिद्धिं दया जाता कथं वद ।
तेषु मूर्खेषु हीनेषु शास्त्रार्थवर्जितेषु च ॥ १०७ ।

ज्ञानं भवति केनैव निर्मलं द्वैतवर्जितम् ।
तत्प्रकारं वद स्नेहाद् लोकानां [1]पुण्यवृद्धये ॥ १०८ ॥

भैरवी उवाच—

कर्मसूत्रं यश्छिनत्ति प्रत्यहं तनुसंस्थितः ।
स पश्यति जगन्नाथ मम श्रीचरणाम्बुजम् ॥ १०९ ॥

विश्वमावेशसंस्कारभिन्नबुद्धिक्रियान्विताः ।
अतो मां नहि जानन्ति नानाकार्योत्कटावृताः ॥ ११० ।

तेषां शरीरं गृह्णाति कालदूतो भयानकः ।
यः करोति महायोगं त्यागसन्न्यासधर्मवान् ॥ १११ ।

मन्दभाग्यः पशोर्योनिं प्राप्नोति मां विहाय सः ।
मयि भावं यः करोति दुर्लभो जनवल्लभः ॥ ११२ ।

भावेन लभ्यते सर्वं भावेन देवदर्शनम् ।
भावेन परमं ज्ञानं तस्माद् भावावलम्बनम् ॥ ११३ ।

भावश्च सर्वशास्त्राणां गूढं सर्वेन्द्रियस्थितम् ।
सर्वेषां मूलभूतश्च देवीभावं यदा [2]लभेत् ॥ ११४ ।

तदैव सर्वसिद्धिश्च तदा ध्यानदृढो भवेत् ।
अकलङ्को निराहारी निवासधृतमानसः[3] ॥ ११५ ।

नित्यस्नानाभिपूजाङ्गो भावी भावं यदा लभेत् ।
क्रियादक्षो महाशिक्षानिपुणोऽपि जितेन्द्रियः ॥ ११६ ।

---

१. अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमिति कृत्वा परस्मैपदम् ।

२. सुखवृद्धये—क० ।

३. निराज्ञावृतमानसः—क० ।

सर्वशास्त्रनिगूढार्थवेत्ता न्यासविवर्जितः ।
तेषां हस्तगतं भावं वद भावं यथा तनौ ॥ ११७ ।

भावात् परतरं नास्ति येनानुग्रहवान् भवेत् ।
भावादनुग्रहप्राप्तिरनुग्रहान्महासुखी ॥ ११८ ।

सुखात् पुण्यप्रभावः स्यात् पुण्यादच्युतदर्शनम् ।
यदा [1]कृतस्य दर्शनाम्भोजदर्शनमङ्गलम् ॥ ११९ ।

योगी भूत्वा सूक्ष्मपदं योगिनामप्यदर्शनम् ।
पश्यत्येव महाविद्यापादाम्भोरुहपावनम् ॥ १२० ।

गुरूणां परमहंसानां वाक्यं त्रैलोक्यपावनम् ।
श्रुत्वा साधकसिद्ध्यर्थं योगी योगमवाप्नुयात् ॥ १२१ ।

पञ्जरे शुकसारी च पतगाः पक्षियोनयः ।
गृह्णाति साधकः स्वर्गान् मन्नामविमलं महत् ॥ १२२ ।

यावत् ज्ञानस्य सञ्चारं तावत् कालं कुलेश्वर ।
साधकानाञ्च साधूनां निकटस्थो भवेन्नरः ॥ १२३ ।

विद्याभ्यासी न पतति यदि बुद्धिपरो भवेत् ।
नहि चेज्जन्म[2] व्याख्यार्थं नानाशास्त्रार्थभाषणम् ॥ १२४ ।

सुरज्ञानं विना किञ्चिन्नहि सिद्ध्यति भूतले ।
मन्त्रं श्रीकायसिद्धिश्च कथं भवति भैरव ॥ १२५ ।

सांख्यज्ञानं वेदभाषाविधिज्ञानं तथा समम् ।
शक्तिं विना यथा शाक्तं सुरज्ञानं विना हि सः ॥ १२६ ।

अहिताचारसम्पत्तिर्दरिद्रस्य गृहे यथा ।
साधकस्य गृहे शक्तिर्ज्ञानाचारविवेचना ॥ १२७ ।

---

१. कृतस्य चरणदर्शनाह्लादमानसः—क० ।

२. जन्म केवलं व्याख्यानफलकं नानाशास्त्रार्थभाषणफलकं च भवति ।

जायते यदि सायुज्यपदनाशाय केवलम् ।
यद्यज्ञानविशिष्टा सा स्वशक्तिः शिवकामिनी ॥ १२८ ।

तदा न कुर्याद्ग्रहणाशक्तिसाधनमेव च ।
यदि कुर्यादसंस्कारात् संसर्गं साधकोत्तमः ॥ १२९ ।

असंस्कृत्यादिदोषेण सिद्धिहानिः प्रजायते ।
शक्तिप्रधानं भावानां त्रयाणां साधकस्य च ॥ १३० ।

दिव्यवीरपशूनाञ्च भावत्रयमुदाहृतम् ।
पशुभावे क्रियासिद्धिः पश्वाचारनिरूपणम् ॥ १३१ ।

वीरभावे क्रियासिद्धिः साक्षाद्रुद्रो न संशयः ।
दिव्यभावे वीरभावे विभिन्नमेकभावतः ॥ १३२ ।

अण्डः[1] पूर्वः सर्वगतं दिव्यभावस्य लक्षणम् ।
दिव्यभावे देवताया दर्शनं परिकीर्त्तितम् ॥ १३३ ।

वीरभावे मन्त्रसिद्धिरद्वैताचारलक्षणम् ।
आदौ भावं पशोः प्राप्य रात्रिकर्म विवर्जयेत् ॥ १३४ ।

दिवसे दिवसे स्नानं पूजानित्यक्रियान्वितः ।
पुरश्चरणवत् कार्यं शुचिभावेन सिद्ध्यति ॥ १३५ ।

पशुभावं विना वीरः को वशी भवति ध्रुवम् ।
इन्द्रियाणाञ्च दमनं दमनं शमनस्य च ॥ १३६ ।

योगशिक्षानिविष्टाङ्गो यतिर्योगपरायणः ।
सर्वक्षणादभ्यसतः[2] प्रभातावधि रात्रिषु ॥ १३७ ।

सर्वकालं च कर्तव्यो योगः सर्वसुखप्रदः ।
वाञ्छाकल्पतरुं नित्यं तरुणं पातकापहम् ॥ १३८ ।

---

१. अन्तःपूर्णं सर्वंगतम्—क० ।

२. गणकार्यस्य बाहुलकं मत्वा असुधातुः तुदादौ मन्तव्यः, ततः शतृप्रत्यये इदं षष्ठ्यन्तं रूपम् ।

साधयेदवहितं मन्त्री पशुभावस्थितो यदि ।
योगभाषाविधिज्ञानं सर्वभावेषु दुर्लभम् ।। १३९ ।

तथापि पशुभावेन शीघ्रं सिद्धयति निश्चितम् ।
गुरूणां श्रीपदाम्भोजे यस्य भक्तिर्दृढा भवेत् ।। १४० ।

स भवेत् कामनात्यागो भावमात्रोपलक्षणम् ।
वीरभावो महाभावो न भावं[1] दुष्टचेतसाम् ।। १४१ ।

भावं मन्दगतं सूक्ष्मं रुद्रमूर्त्याः प्रसिद्धयति ।
भ्रष्टाचारं महागूढं त्रैलोक्यमङ्गलं शुभम् ।। १४२ ।

पञ्चतत्त्वादिसिद्धयर्थं महामोहमदोद्भवम् ।
सर्वपीठकुलाचारं हठादानन्दसागरम् ।। १४३ ।

कारुण्यवारिधिं वीरसाधने भक्तिकेवलम् ।
ज्ञानी भूत्वा पशोर्भावे वीरचारं ततः परम् ।। १४४ ।

वीराचाराद्भवेद्रुद्रोऽन्यथा नैव च नैव च ।
भावद्वयस्थितो मन्त्री दिव्यभावं विचारयेत् ।। १४५ ।

सदा शुचिर्दिव्यभावमाचरेत् सुसमाहितः ।
देवतायाः प्रियार्थञ्च सर्वकर्मकुलेश्वर ।। १४६ ।

यद्यत्तत् सकलं [2]सिद्धयत्यस्माद् धर्मोदयं शुभम् ।
देवतातुल्यभावश्च देवतायाः क्रियापरः ।। १४७ ।

तद्विद्धि देवताभावं सुदिव्यभाक्प्रकीर्तितम् ।
सर्वेषां भाववर्गाणां शक्तिमूलं न संशयः ।। १४८ ।

भक्तिं केन प्रकारेण प्राप्नोति साधकोत्तमः ।
ज्ञात्वा देवशरीरस्य निजकार्यानुशासनात् ।। १४९ ।

---

१. क्वचिद् घञजबन्ता अपि नपुंसके भवन्ति, सम्बन्धमनुवर्तिष्यते इति 'इको गुणवृद्धी' इति सूत्रे भाष्यप्रयोगात् ।   २. विद्धि—क० ।

ज्ञानञ्च त्रिविधं प्रोक्तमागमाचारसम्भवम् ।
शब्दब्रह्ममयं तद्धि ज्ञानमार्गेण पश्यति ॥ १५० ।

पठित्वा सर्वशास्त्राणि स्वकर्मगायनानि च ।
कृशे विवेकमालम्ब्य नित्यं ज्ञानो च साधकः ॥ १५१ ।

विवेकसंभवं ज्ञानं शिवज्ञानप्रकाशकम् ।
लोचनद्वयहीनञ्च [1]बाह्यभावविवर्जितम् ॥ १५२ ।

लोकानां परिनिर्मुक्तं कालाकालविलोडनम् ।
नित्यज्ञानं परं ज्ञानं तं विद्धि प्राणगोचरम् ॥ १५३ ।

मानुषं सफलं जन्म सर्वशास्त्रेषु गोचरम् ।
चतुरशीतिलक्षेषु शरीरेषु शरीरिणाम् ॥ १५४ ।

न मानुष्यं विनान्यत्र तत्त्वज्ञानन्तु विद्यते ।
कदाचिल्लभ्यते जन्म मानुष्यं पुण्यसञ्चयात् ॥ १५५ ।

सोपानीभूतमोक्षस्य[2] मानुष्यं जन्म[3] दुर्लभम् ।
मानुषेषु च शंसन्ति सिद्धयः स्युः प्रधानिकाः ॥ १५६ ।

अणिमादिगुणोपेतास्तस्माद् देवो नरोत्तमः ।
विना देहेन कस्यापि पुरुषार्थो न लभ्यते ॥ १५७ ।

तस्माच्छरीरं संरक्ष्य नित्यं ज्ञानं प्रसाधय ।
मानुषं ज्ञाननिकरं ज्ञानात्मानं परं विदुः ॥ १५८ ।

मुनयो मौनशीलाश्च मुनितन्त्रादिगोचरम् ।
मानुषः सर्वंगामी च नित्यस्थाननिराकुलः ॥ १५९ ।

मित्रजापं योगजापं कृत्वा पापनिवारणम् ।
परं मोक्षमवाप्नोति मानुषो नात्र संशयः ॥ १६० ।

---

१. बाह्यवागदृष्टिवर्जितम्--क० । २. सोपानभूतं मानुष्यं मोक्षस्य जन्मदुर्लभम्--क० ।
३. पृथक् पदमेतत्, न तु समस्तम् ।

मयोक्तानि च तन्त्राणि मद्भक्ता ये पठन्ति च ।
पठित्वा कुरुते कर्म कृत्वा मत्सन्निधिं व्रजेत् ।। १६१ ।

मदुक्तानि च शास्त्राणि न ज्ञात्वा साधको यदि ।
अन्यशास्त्राणि सम्बोध्य कोटिवर्षेण सिद्ध्यति ।। १६२ ।

शुक्तौ रजतविभ्रान्तिर्यथा भवति भैरव ।
तथान्यदर्शनेभ्यश्च भुक्तिं मुक्तिञ्च काङ्क्षति ।। १६३ ।

यत्र भोगस्तत्र मोक्षो द्वयं कुत्र न सिद्ध्यति ।
मम श्रीपादुकाम्भोजे सेवको मोक्षभोगगः ।। १६४ ।

बाह्यद्रष्टा प्रगृह्णाति आकाशस्थिततेजसम् ।
ब्रह्माण्डज्ञानद्रष्टा च देशाण्डस्थं प्रपश्यति ।। १६५ ।

घटप्रत्यक्षसमये आलोको व्यञ्जको यथा ।
विना घटत्त्वयोगेन न प्रत्यक्षो यथा घटः ।। १६६ ।

इतराद्भिद्यमानोऽपि न भेदमुपगच्छति ।
पुरुषे नैव भेदोऽस्ति विना शक्तिं कथञ्चन ।। १६७ ।

शक्तिहीनो यथा देही निर्बलो योगविर्वजितः ।
ज्ञानहीनस्तथात्मानं न पश्यति पदद्वयम् ।। १६८ ।

स्वभावं नाधिगच्छन्ति संसारज्ञानमोहिताः ।
अभिपश्यति सश्लोको यद्भावं परिभाव्यते ।। १६९ ।

ईश्वरस्यापि दूतस्य यमराजस्य बन्धनम् ।
निधनं चानुगच्छन्ति दृष्ट्वा च तनुजं घनम्[1] ।। १७० ।

लोको मोहसुरां पीत्त्वा न वेत्ति हितमात्मनः ।
सम्पदः स्वप्नमेव स्याद् यौवनं कुसुमोपमम् ।। १७१ ।

---

१. घनम्--क० ।

तडिच्चपलमायुष्यं[1] कस्याप्यज्ञानतो धृतिः ।
शतं जीवति मर्त्यश्च निद्रा स्यादर्धहारिणी ।। १७२ ।

अर्धं हरति कामिन्याः शक्तिर्बुद्धिप्रतापिनी ।
असद्वृत्तिश्च मूढानां हन्त्यायुषमहर्निशम् ।। १७३ ।

बाल्यरोगजरादुःखैः सर्वं[2] तदपि निष्फलम् ।
स्त्रीपुत्रपितृमात्रादिसम्बन्धः केन हेतुना ।। १७४ ।

दुःखमूलो हि संसारः स यस्यास्ति स दुःखितः ।
अस्य त्यागः कृतो येन स सुखी नात्र संशयः ।। १७५ ।

सुखदुःखपरित्यागो[3] कर्मणा किं न लभ्यते ।
लोकाचारभयार्थं हि यः करोति क्रियाविधिम् ।। १७६ ।

ब्रह्मज्ञाताहमखिले[4] ये जपन्ति निरादराः ।
सांसारिकसुखासक्तं ब्रह्मज्ञोऽस्मीति वादिनम् ।। १७७ ।

त्यजेत् तं सततं धीरश्चाण्डालमिव दूरतः ।
गृहारण्यसमालोके गतव्रीडा दिगम्बराः ।। १७८ ।

चरन्ति गर्दभाद्याश्च व्रतिनस्ते भवन्ति किम् ।
तृणपर्णोदकाहाराः सततं वनवासिनः ।। १७९ ।

हरिणादिमृगाश्चैव तापसास्ते भवन्ति किम् ।
शीतवातातपसहा भक्ष्याभक्ष्यसमा अपि ।। १८० ।

चरन्ति शूकराद्याश्च व्रतिनस्ते भवन्ति किम् ।
आकाशे पक्षिणः सर्वे भूतप्रेतादयोऽपि च ।। १८१ ।

---

१. यथा विद्युत् चपला, तथैव आयुरपि क्षणिकं भवति ।

२. वर्जम्——क० ।

३. सुखदुःखपरित्यागः कर्मणा केन लभ्यते——क० ।

४. ब्रह्मज्ञाताहमात्मानं ये वदन्ति निरादाराः——क० ।

चरन्ति रात्रिगाः सर्वे खेचराः किं महेश्वराः ।
आजन्ममरणान्तञ्च गङ्गादितटनोस्थिताः ॥ १८२ ।

मण्डूकमत्स्यप्रमुखा व्रतिनस्ते भवन्ति किम् ।
एतज्ज्ञाननिविष्टाङ्गाः यदि गच्छन्ति पण्डिताः ॥ १८३ ।

तथापि कर्मदोषेण नरकस्था भवन्ति हि ।
कौटिल्यालससंसर्गवर्जिता[1] ये भवन्ति हि ॥ १८४ ।

प्राप्नुवन्ति मम स्थानं मम भक्तिपरायणाः ।
ऊर्द्ध्वं व्रजन्ति भूतानि शरीरमातिवाहिकम् ॥ १८५ ।

निजदेहाभिशापेन नानारूपो भवेन्नरः ।
शरीरजैः कर्मदोषैर्याति स्थावरतां[2] नरः ॥ १८६ ।

इह दुश्चरितैः केचित् केचित् पूर्वकृतैस्तथा ।
प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम् ॥ १८७ ।

गुरुपादविहीना ये ते नश्यन्ति ममाज्ञया ।
[3]गुरुर्मूलं हि मन्त्राणां गुरुर्मूलं परन्तपः ॥ १८८ ।

गुरोः प्रसादमात्रेण सिद्धिरेव न संशयः ।
अहं गुरुरहं देवो मन्त्रार्थोऽस्मि न संशयः ॥ १८९ ।

भेदका नरकं यान्ति नानाशास्त्रार्थवर्जिताः ।
सर्वासामेव विद्यानां दीक्षा मूलं यथा प्रभो ॥ १९० ।

गुरुमूलस्वतन्त्रस्य गुरुरात्मा न संशयः ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ १९१ ।

आत्मना क्रियते कर्म भावसिद्धिस्तदा भवेत् ।
हीनाङ्गी कपटी रोगी बह्वाशी[4] शीलवर्जितः ॥ १९२ ।

---

१. कौटिल्यं च अलससंसर्गश्चेति द्वन्द्वः, ताभ्यां वर्जिता इत्यर्थः ।

२. याति दुष्टाङ्गतिं नरः—ख० ।

३. गुरुस्थलीहतत्राणां गुरुर्मूलं परन्तपः—क० ।

४. बहु अश्नाति तच्छीलः ।

[१]मय्युपासनमास्थाय उपविद्यां सदाभ्यसेत् ।
धनं धान्यं सुतं वित्तं राज्यं ब्राह्मणभोजनम् ॥ १९३ ।

शुभार्थं सम्प्रयोक्तव्यं नान्यचिन्ता वृथाफलम् ।
नित्यश्राद्धरतो मर्त्यो धर्मशीलो नरोत्तमः ॥ १९४ ।

महीपालः प्रियाचारः पीठभ्रमणतत्परः ।
पीठे पीठे महाविद्यादर्शनं यदि लभ्यते ॥ १९५ ।

तदा तस्य करे सर्वाः सिद्धयोऽव्यक्तमण्डलाः ।
अकस्माज्जायते सिद्धिर्महामायाप्रसादतः ॥ १९६ ।

महावीरो महाधीरो दिव्यभावस्थितोऽपि वा ।
अथवा पशुभावस्थो मन्त्रपीठं विवासयेत् ॥ १९७ ।

क्रियायाः फलदं प्रोक्तं भावत्रयमनोरमम् ।
तथा च युगभावेन दिव्यवीरेण भैरव ॥ १९८ ।

प्रपश्यन्ति महावीराः पशवो हीनजातयः ।
न पश्यन्ति कलियुगे शास्त्राभिभूतचेतसः ॥ १९९ ।

अपि वर्षसहस्रेण शास्त्रान्तं नैव गच्छति ।
तर्काद्यनेकशास्त्राणि अल्पायुर्विघ्नकोटयः ॥ २०० ।

तस्मात् सारं विजानीयात् क्षीरं हंस इवाम्भसि ।
कलौ च दिव्यवीराभ्यां नित्यं तद्गतचेतसः ॥ २०१ ।

महाभक्ताः प्रपश्यन्ति महाविद्यापरं पदम् ।
साधवो मौनशीलाश्च[२] सदा साधनतत्पराः ॥ २०२ ।

दिव्यवीरस्वभावेन पश्यन्ति मत्पदाम्बुजम् ।
भावद्वयं ब्राह्मणानां [३]महासत्फलकाङ्क्षिणाम् ॥ २०३ ।

---

१. ममोपासनम्——क० ।
२. मुनेर्भावो मौनम्, मौनं शीलं येषां ते ।
३. मोक्षसत्फलकांक्षिणाम्——क० ।

अथवा चावधूतानां भावद्वयमुदाहृतम् ।
भावद्वयप्रभावेण महायोगी भवेन्नरः ॥ २०४ ।

मूर्खोऽपि वाक्पतिः श्रेष्ठो भावद्वयप्रसादतः ।
ये जानन्ति महादेव मम तन्त्रार्थसाधनम् ॥ २०५ ।

भावद्वयं हि वर्णानां ते रुद्रा नात्र संशयः ।
भावुको भक्तियोगेन्द्रः सर्वभावज्ञसाधनः ॥ २०६ ।

उन्मत्तजडवन्नित्यं निजतन्त्रार्थपारगः ।
वृक्षो वहति पुष्पाणि गन्धं जानाति नासिका ॥ २०७ ।

पठन्ति सर्वशास्त्राणि दुर्लभा भावबोधकाः ।
प्रज्ञाहीनस्य पठनमन्धस्यादर्शदर्शनम् ॥ २०८ ।

प्रज्ञावतो धर्मशास्त्रं बन्धनायोपकल्पते ।
तत्त्वमीदृगिति भवेदिति शास्त्रार्थनिश्चयः ॥ २०९ ।

अहं कर्ताऽहमात्मा च सर्वव्यापी निराकुलः ।
मनसेति स्वभावश्च चिन्तयत्यपि वाक्पतिः ॥ २१० ।

सौदामिनीतेजसो वा सहस्रवर्षकं[1] यदा ।
प्रपश्यति महाज्ञानी एकचन्द्रं सहस्रकम् ॥ २११ ।

कोटिवर्षशतेनापि यत्फलं लभते नरः ।
एकक्षणमङ्घ्रिरजो[2] ध्यात्वा तत्फलमश्नुते ॥ २१२ ।

विचरेद्यदि सर्वत्र केवलानन्दवर्धनम् ।
कामरूपं महापीठं त्रिकोणाधारतैजसम् ॥ २१३ ।

जलबुद्बुद्शब्दान्तमनन्तमङ्गलात्मकम् ।
स भवेन्मम दासेन्द्रो गणेशगुहवत्प्रियः[3] ॥ २१४ ।

---

१. सौदामिनी तेजसा वा सहस्तचषकं यथा--क० ।

२. एकक्षणमदङ्घ्रिरजो--क० ।

३. गणेशश्च गुहश्च ताभ्यां तुल्यः । गुहः = कार्तिकेयः । सूतवत्प्रियः--क० ।

कङ्कालाख्या-साट्टहासा-विकटाक्षोपपीठकम् ।
विचरेत् साधकश्रेष्ठो मत्पादाब्जं यदीच्छति ॥ २१५ ।

ज्वालामुखीमहापीठं मम प्रियमतर्कवित् ।
यो भ्रमेन्मम तुष्टचर्थं स योगी भवति ध्रुवम् ॥ २१६ ।

भावद्वयादिनिकरं ज्वालामुख्यादिपीठकम् ।
भ्रमन्ति ये साधकेन्द्रास्ते सिद्धा नात्र संशयः ॥ २१७ ।

भावात् परतरं नास्ति त्रैलोक्यसिद्धिमिच्छताम् ।
भावो हि परमं ज्ञानं ब्रह्मज्ञानमनुत्तमम् ॥ २१८ ।

कोटिकन्याप्रदानेन वाराणस्यां शताटनैः ।
किं कुरुक्षेत्रगमने यदि भावो न लभ्यते ॥ २१९ ।

गयायां श्राद्धदानेन नानापोठाटनेन किम् ।
नानाहोमैः क्रियाभिः किं यदि भावो न लभ्यते ॥ २२० ।

भावेन ज्ञानमुत्पन्नं ज्ञानान्मोक्षमवाप्नुयात् ।
आत्मनो[1] मनसा देव्या गुरोरीश्वरमुच्यते[2] ॥ २२१ ।

ध्यानं संयोजनं प्रोक्तं मोक्षमात्ममनोलयम् ।
गुरोः प्रसादमात्रेण शक्तितोषो महान् भवेत् ॥ २२२ ।

शक्तिसन्तोषमात्रेण मोक्षमाप्नोति साधकः ।
गुरुमूलं जगत्सर्वं गुरुमूलं परन्तपः ॥ २२३ ।

गुरोः प्रसादमात्रेण मोक्षमाप्नोति सद्वशी ।
न लङ्घयेद् गुरोराज्ञामुत्तरं न वदेत् तथा ॥ २२४ ।

दिवारात्रौ गुरोराज्ञां दासवत् परिपालयेत् ।
उक्तानुक्तेषु[3] कार्येषु नोपेक्षां कारयेद् बुधः ॥ २२५ ।

---

१. आत्मना मनसा वाचा गुरावीश्वर उच्यते--ख० ।
२. सन्मते--क० ।
३. उक्तानि च अनुक्तानि च, उक्तानुक्तानि तेषु ।

गच्छतः प्रयतो गच्छेद् गुरोराज्ञां न लङ्घयेत् ।
न श्रृणोति गुरोर्वाक्यं श्रृणुयाद् वा पराङ्मुखः ॥ २२६ ।

अहितं वा हितं वापि रौरवं नरकं व्रजेत् ।
आज्ञाभङ्गं गुरोर्दैवाद् यः करोति विबुद्धिमान् ॥ २२७ ।

प्रयाति नरकं घोरं शूकरत्वमवाप्नुयात् ।
आज्ञाभङ्गं तथा निन्दां गुरोरप्रियवर्तनम् ॥ २२८ ।

गुरुद्रोहञ्च यः कुर्यात् तत्संसर्गं न कारयेत् ।
गुरुद्रव्याभिलाषी[1] च गुरुस्त्रीगमनानि च ॥ २२९ ।

पातकञ्च भवेत् तस्य प्रायश्चित्तं न कारयेत् ।
गुरुं दुष्कृत्य[2] रिपुवन्निर्हरेत् परिवादतः ॥ २३० ।

अरण्ये निर्जने देशे स भवेद् ब्रह्मराक्षसः ।
पादुकाम् आसनं वस्त्रं शयनं भूषणानि च ॥ २३१ ।

दृष्ट्वा गुरुं नमस्कृत्य आत्मभोगं न कारयेत् ।
सदा च पादुकामन्त्रं जिह्वाग्रे यस्य वर्तते ॥ २३२ ।

अनायासेन धर्मार्थकाममोक्षं लभेन्नरः ।
श्रीगुरोश्चरणाम्भोजं[3] ध्यायेच्चैव सदैव तम् ॥ २३३ ।

भक्तये मुक्तये वीरं नान्यभक्तं ततोऽधिकम् ।
एकग्रामे स्थितः शिष्यो गत्वा तत्सन्निधिं[4] सदा ॥ २३४ ।

एकदेशे स्थितः शिष्यो गत्वा तत्सन्निधिं[5] सदा ।
सप्तयोजनविस्तीर्णं मासैकं प्रणमेद् गुरुम् ॥ २३५ ।

---

१. गुरोर्द्रव्यं गुरुद्रव्यम्, तद् अभिलषति तच्छीलः ।

२. गुरुं हुँकृत्य रिपुवन्निर्गत्य परिवादतः—क० ।

३. चरणौ अम्भोजमिव, उपमितं व्याघ्रादिभिरिति समासः ।

४. त्रिसन्धिं प्रणमेत् गुरुम्—क० । ५. सन्निधिं मुदा—क० ।

श्रीगुरोश्चरणाम्भोजं यस्यां दिशि विराजते ।
तस्यां दिशि नमस्कुर्यात् कायेन मनसा धिया ॥ २३६ ।

विद्याङ्गमासनं[1] मन्त्रं मुद्रां तन्त्रादिकं प्रभो ।
सर्वं गुरुमुखाल्लब्ध्वा सफलं नान्यथा भवेत् ॥ २३७ ।

कम्बले कोमले वापि प्रसादे संस्थिते तथा ।
दीर्घकाष्ठेऽथवा पृष्ठे गुरुञ्चैकासनं त्यजेत् ॥ २३८ ।

श्रीगुरोः पादुकामन्त्रं मूलमन्त्रं स्वपादुकाम् ।
शिष्याय नैव देवेश प्रवदेद् यस्य कस्यचित् ॥ २३९ ।

यद् यदात्महितं वस्तु तद्द्रव्यं नैव वञ्चयेत् ।
गुरोर्लब्ध्वा एकवर्णं तस्य तस्यापि सुव्रत ॥ २४० ।

भक्ष्यं वित्तानुसारेण गुरुमुद्दिश्य यत्कृतम् ।
स्वल्पैरपि महत्तुल्यं भुवनाद्यं दरिद्रताम् ॥ २४१ ।

सर्वस्वमपि यो दद्याद् गुरुभक्तिविवर्जितः ।
नरकान्तमवाप्नोति भक्तिरेव हि कारणम् ॥ २४२ ।

गुरुभक्त्या च शक्रत्वमभक्त्या शूकरो भवेत् ।
गुरुभक्तः[1] परं नास्ति भक्तिशास्त्रेषु सर्वतः ॥ २४३ ।

गुरुपूजां विना नाथ कोटिपुण्यं वृथा[2] भवेत् ॥ २४४ ।

॥ इति [3]श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्वविद्यानुष्ठाने सिद्धिमन्त्रप्रकरणे भैरवीभैरवसंवादे प्रथमः पटलः ॥

---

१. विद्याङ्गं शासनम्--क० । २. कोटिपुण्यं वृथाचयम्--क० ।

३. अतः सर्वजने ख्यातं गुरुणा सिद्धिमाप्नुयात् ।
गुरुस्त्रीपुत्रबन्धूनां दोषं नैव प्रकाशयेत् ॥
भक्षयेन्नैव तद्द्रव्यं दत्तं नैव परित्यजेत् ।--क० अधिकः पाठः ।

अथ द्वितीयः पटलः

देवी उवाच—

अथातः सम्प्रवक्ष्यामि सर्वदर्शनविद्यया ।
सर्वज्ञ परमानन्दो दयाबीज भयङ्कर ॥ १ ॥

शृणुष्वैकमनाः[1] शम्भो कुलाचारविधिं शृणु ।
पशूनां व्रतभङ्गादौ विधिं प्रथमतः प्रभो ॥ २ ॥

व्रतभङ्गे नित्यभङ्गे नित्यपूजादिकर्मणि ।
सहस्रं प्रजपेन्मन्त्रो व्रतदोषोपशान्तये ॥ ३ ॥

नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ।
देवतादर्शनं पीठदर्शनं तीर्थदर्शनम् ॥ ४ ॥

गुरोराज्ञापालनञ्च देवतानित्यपूजनम् ।
पशुभावस्थितो मर्त्यो महासिद्धिं लभेद् ध्रुवम् ॥ ५ ॥

पशूनां प्रथमो भावो वीरस्य वीरभावनम् ।
दिव्यानां दिव्यभावस्तु तेषां भावास्त्रयः स्मृताः ॥ ६ ॥

स्वकुलाचारहीनो यः साधकः स्थिरमानसः ।
निष्फलार्थी[2] भवेत् क्षिप्रं कुलाचारप्रभावतः ॥ ७ ॥

भैरव उवाच—

केनोपायेन भगवतीचरणाम्भोजदर्शनम् ।
प्राप्नोति पद्मवदने पशुभावस्थितो नरः ॥ ८ ॥

तत्प्रकारं सुविस्तार्य कथ्यतां कुलकामिनि ।
यदि भक्तिर्दृढा मेऽस्ति यदि स्नेहोऽस्ति मां प्रति ॥ ९ ॥

महाभैरवी उवाच—

प्रभाते च समुत्थाय अरुणोदयकालतः ।
निशाष्टदण्डपर्यन्तं पशूनां भाव ईरितः ॥ १० ॥

---

१. एकमेकविषयकं मनो यस्य सः । २. निष्फलमर्थयते तच्छीलः ।

प्रातः [1]शय्यादिकं कृत्वा पुनः शय्यास्थितः पशुः ।
गुरुं सञ्चिन्तयेच्छीर्षाम्भोजे साहस्रके दले ॥ ११ ।

तरुणादित्यसंकाशं तेजोबिम्बं महागुरुम् ।
अनन्तानन्तमहिमासागरं शशिशेखरम् ॥ १२ ।

महाशुभ्रं भासुराङ्गं द्विनेत्रं द्विभुजं विभुम् ।
आत्मोपलब्धिर्विषमं तेजसा शुक्लवाससम् ॥ १३ ।

आज्ञाचक्रोद्‌र्ध्वनिकरं कारणं जगतां मुखम् ।
धर्मार्थकाममोक्षाङ्गं वराभयकरं विभुम् ॥ १४ ।

प्रफुल्लकमलारूढं सर्वज्ञं जगदीश्वरम् ।
अन्तःप्रकाशचपलं वनमालाविभूषितम् ॥ १५ ।

रत्नालङ्कारभूषाढ्यं देवदेवं सदा भजेत् ।
अन्तर्यागक्रमेणैव पद्मपुष्पैः समर्चयेत् ॥ १६ ।

एकान्तभक्त्या प्रणमेदायुरारोग्यवृद्धये ।
अथ मध्ये जपेन्मन्त्रमाद्यन्तप्रणवेन च ॥ १७ ।

मध्ये वाग्भवमायोज्य गुरुनाम ततः परम् ।
आनन्दनाथशब्दान्ते गुरुं ङेऽन्तं समुद्धरेत् ॥ १८ ।

नमःशब्दं ततो ब्रूयात् प्रणवं सर्वसिद्धिदम् ।
महागुरोर्मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥ १९ ।

वाक्सिद्धिर्वदनाम्भोजे[2] गुरुमन्त्रप्रभावतः ।
शतमष्टोत्तरं नित्यं सहस्रं वा तथाष्टकम् ॥ २० ।

प्रजप्यार्पणमाकृत्य प्राणायामत्रयञ्चरेत् ।
वाग्भवेन ततः कुर्यात् प्राणायामविधिं मुदा ॥ २१ ।

---

१. प्रातः क्रियादिकं कृत्वा--क० ।

२. वदत्यनेनेति वदनं मुखम्, तद् अम्भोजं कमलमिव इति वदनाम्भोजम्, तत्र ।

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ २२ ।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २३ ।

देवतायाः दर्शनस्य कारणं करुणानिधिम् ।
सर्वसिद्धिप्रदातारं श्रीगुरुं प्रणमाम्यहम् ॥ २४ ।

वराभयकरं नित्यं श्वेतपद्मनिवासिनम् ।
महाभयनिहन्तारं गुरुदेवं नमाम्यहम् ॥ २५ ।

महाज्ञानाच्छापिताङ्गं नराकारं वरप्रदम् ।
चतुर्वर्गप्रदातारं[1] स्थूलसूक्ष्मद्वयान्वितम् ॥ २६ ।

सदानन्दमयं देवं नित्यानन्दं निरञ्जनम् ।
शुद्धसत्त्वमयं सर्वं नित्यकालं कुलेश्वरम् ॥ २७ ।

ब्रह्मरन्ध्रे महापद्मे तेजोविम्बे निराकुले ।
योगिभिर्ध्यानगम्ये च चक्रे शुक्ले विराजिते ॥ २८ ।

सहस्रदलसङ्काशे कर्णिकामध्यमध्यके ।
महाशुक्लभासुरार्ककोटिकोटिमहौजसम् ॥ २९ ।

सर्वपीठस्थममलं परं हंसं परात्परम् ।
वेदोद्धारकरं नित्यं काम्यकर्मफलप्रदम् ॥ ३० ।

सदा मनःशक्तिमायालयस्थानं पदद्वयम् ।
शरज्ज्योत्स्नाजालमालाभिरिन्दुकोटिवन्मुखम्[2] ॥ ३१ ।

वाञ्छातिरिक्तदातारं सर्वसिद्धीश्वरं गुरुम् ।
भजामि तन्मयो भूत्वा तं हंसमण्डलोपरि ॥ ३२ ।

---

१. चत्वारो वर्गा धर्मार्थकाममोक्षाख्याः, तेषां प्रदातारम् ।

२. शोभेन्दुकोटिवन्मुखम्—क० ।

आत्मानं च निराकारं साकारं ब्रह्मरूपिणम् ।
महाविद्यामहामन्त्रदातारं परमेश्वरम् ॥ ३३ ।

सर्वसिद्धिप्रदातारं गुरुदेवं नमाम्यहम् ।
कायेन मनसा वाचा ये नमन्ति निरन्तरम् ॥ ३४ ।

अवश्यं श्रीगुरोः पादाम्भोरुहे ते वसन्ति हि ।
प्रभाते कोटिपुण्यञ्च प्राप्नोति साधकोत्तमः ॥ ३५ ।

मध्याह्ने दशलक्षञ्च सायाह्ने कोटिपुण्यदम् ।
प्रातःकाले पठेत् स्तोत्रं ध्यानं[1] वा सुसमाहितः ॥ ३६ ।

तदा सिद्धिमवाप्नोति नात्र कार्या विचारणा ॥ ३७ ।

शिरसि[2] सितपङ्कजे तरुणकोटिचन्द्रप्रभं
वराभयकराम्बुजं सकलदेवतारूपिणम् ।
भजामि वरदं गुरुं किरणचारुशोभाकुलं
प्रकाशितपदद्वयाम्बुजमलक्तककोटिप्रभम् ॥ ३८ ।

जगद्भयनिवारणं भुवनभोगमोक्षप्रदम्
गुरोः पादयुगाम्बुजं जयति यत्र योगे जयम् ।
भजामि परमं गुरुं नयनपद्ममध्यस्थितं
भवाब्धिभयनाशनं [3]शमनरोगकायक्षयम् ॥ ३९ ।

प्रकाशितसुपङ्कजे मृदुलषोडशाख्ये प्रभुं
परापरगुरुं भजे सकलबाह्यभोगप्रदम् ।
विशालनयनाम्बुजद्वयतडित्प्रभामण्डलं
कडारमणिपाटलेन्दुबिन्दुबिन्दुकम् ॥ ४० ।

---

१. ध्यानन्याससमन्वितः–क० ।

२. ओं शिवः स्थितसुपङ्कजे–क० ।

३. शमनयोगकामक्षयम्–क० । रोगश्च कायक्षयश्च रोगकायक्षयौ, शमनं रोगकायक्षययोर्येन तम् ।

चलाचलकलेवरं प्रचपलदले द्वादशे
महौजसमुमापतेर्विगतदक्षभागे हृदि ।
प्रभाकरशतोज्ज्वलं सुविमलेन्दुकोट्याननं
भजामि परमेष्ठिनं गुरुमतीव वारोज्ज्वलम्[1] ॥ ४१ ।

गुर्वाद्यञ्च शुभं मदननिदहनं हेममञ्जरोसारं
[2]नानाशब्दाद्भुताह्लादितपरिजनाच्चारुचक्रत्रिभङ्गम्[3] ।
नित्यं ध्यायेत् प्रभाते अरुणशतघटाशोभनं योगगम्यं
नाभौ पद्मेऽतिक्रान्ते दशदलमणिभे भाव्यते योगिभिर्यत् ॥४२।

या माता मयदानवादिस्वभुजा निर्वाणसीमापुरे
स्वाधिष्ठाननिकेतने रसदले वैकुण्ठमूले मया ।
जन्मोद्धारविकारसुप्रहरिणी[4] वेदप्रभा भाव्यते
कन्दर्पार्पितशान्तियोनिजननी विष्णुप्रिया शाङ्करी ॥ ४३ ।

या [5]भाषाननकुण्डली कुलपथाच्छामाभशोभाकरी
मूले पद्मचतुर्दले कुलवती निश्वासदेशाश्रिता ।
साक्षात्काङ्क्षितकल्पवृक्ष लतिका [6]सूद्भाषयन्ती प्रिया
नित्या योगिभयापहा विषहरा गुर्वम्बिका भाव्यते ॥ ४४ ।

ऊद्ध्वाम्भोरुहनिःसृतामृतघटी मोदोद्वलाप्लाविता
गुर्वास्या परिपातु सूक्ष्मपथगा तेजोमयी भास्वती ।
सूक्ष्मा साधनगोचरामृतमयी मूलादिशीर्षाम्बुजे
पूर्णा चेतसि भाव्यते भुवि कदा माता सदोद्ध्वामगा[8] ॥४५॥

---

१. गुरुगतिवरालोम्बनम्—मु० । २. नानाशब्दैः अद्भुतमाह्लादितो यः परिजनस्तस्मात् ।
३. चक्रादिभङ्गम्—क० । ४. घोरहरिणी—क० ।
५. ताम्राननन—क० । ६. साक्षात् काङ्क्षितो यः कल्पवृक्षः (शिवः) तत्र लतिका इवेत्यर्थः ।
७. सुप्ता स्वयम्भू प्रिया—क० । ८. सदोर्ध्वाङ्गमा—क०, सदावामगा—ख० ।

स्थितिपालनयोगेन ध्यानेन पूजनेन वा ।
यः पठेत् प्रत्यहं व्याप्य[1] स देवो न तु मानुषः ।। ४६ ।

कल्याणं धनधान्यं च कीर्तिमायुर्यशःश्रियम् ।
सायाह्ने च प्रभाते च पठेद्यदि सुबुद्धिमान् ।। ४७ ।

स भवेत् साधकश्रेष्ठः कल्पद्रुमकलेवरः ।
स्तवस्यास्य [2]प्रसादेन वागीशत्वमवाप्नुयात् ।। ४८ ।

पशुभावस्थिता ये तु तेऽपि सिद्धा न संशयः ।
आदौ साधकदेवश्च सदाचारमतिः सदा ।। ४९ ।

पशुभावस्ततो वीरः सायाह्ने दिव्यभाववान् ।
एतेषां भाववर्गाणां गुरुर्वेदान्तपारगः ।। ५० ।

शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेषवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ।। ५१ ।

आश्रमी [3]ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ।
निग्रहानुग्रहे[4] शक्तो वशी मन्त्रार्थजापकः ।। ५२ ।

निरोगी निरहङ्कारो विकाररहितो महान् ।
पण्डितो वाक्पतिः श्रीमान् सदा यज्ञविधानकृत् ।। ५३ ।

पुरश्चरणकृत् सिद्धो हिताहितविवर्जितः ।
सर्वलक्षणसंयुक्तो [5]महाजनगणादृतः ।। ५४ ।

प्राणायामादिसिद्धान्तो ज्ञानी मौनी विरागवान् ।
तपस्वी सत्यवादी च सदा ध्यानपरायणः ।। ५५ ।

---

१. प्राप्य—क० । २. प्रभावेन—क० । ३. ज्ञाननिष्ठश्च—क० ।

४. निग्रहश्चानुग्रहश्चानयोः समाहारः । अथवा निग्रहेण सहितो निग्रहसहितः, स चासावनुग्रहश्च निग्रहानुग्रहः, मध्यमपदलोपिसमासः ।

५. महाज्ञान—क० ।

आगमार्थविशिष्टज्ञो निजधर्मपरायणः ।
अव्यक्तलिङ्गचिह्नस्थो भावको[1] भद्रवान् ॥ ५६ ।
लक्ष्मीवान् धृतिमान्नाथो गुरुरित्यभिधीयते ।
शिष्यस्तु तादृशो भूत्वा सद्गुरुं पर्युपाश्रयेत् ॥ ५७ ।
वर्जयेच्च परानन्दरहितं रूपवर्जितम् ।
कुष्ठिनं क्रूरकर्माणं निन्दितं रोगिणं गुरुम् ॥ ५८ ।
अष्टप्रकारकुष्ठेन गलत्कुष्ठिनमेव च ।
श्वित्रिणं जनहिंसार्थं सदार्थग्राहिणं तथा ॥ ५९ ।
स्वर्णविक्रयिणं चौरं बुद्धिहीनं सुखर्वकम् ।
श्यावदन्तं कुलाचाररहितं शान्तिवर्जितम् ॥ ६० ।
सकलङ्कं नेत्ररोगैः पीडितं परदारगम् ।
असंस्कारं प्रवक्तारं स्त्रीजितं चाधिकाङ्गकम् ॥ ६१ ।
कपटात्मानकं हिंसाविशिष्टं बहुजल्पकम् ।
बह्वाशिनं हि कृपणं मिथ्यावादिनमेव च ॥ ६२ ।
अशान्तं[2] भावहीनं च पञ्चाचारविवर्जितम् ।
दोषजालैः पूरिताङ्गं पूजयेन्न गुरुं विना ॥ ६३ ।
गुरौ मानुषबुद्धिन्तु मन्त्रेषु लिपिभावनम् ।
प्रतिमासु शिलारूपं विभाव्य नरकं व्रजेत् ॥ ६४ ।
जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः ।
गुरुर्विशेषतः पूज्यो धर्माधर्मप्रदर्शकः ॥ ६५ ।
गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥ ६६ ।
गुरोर्हितं प्रकर्तव्यं वाङ्मनःकायकर्मभिः[3] ।
अहिताचरणाद् देव विष्ठायां जायते कृमिः ॥ ६७ ।

---

१. यश्चेति पूर्तिः कर्तव्या । २. असाधुम्—क० ।
३. वाङ्मनःकायानां कर्मभिरिति द्वन्द्वगर्भषष्ठीतत्पुरुषः ।

मन्त्रत्यागाद् भवेन्मृत्युर्गुरुत्यागाद् दरिद्रता ।
गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत् ।। ६८ ।

गुरौ सन्निहिते यस्तु पूजयेदन्यदेवताम् ।
प्रयाति नरकं घोरं सा पूजा विफला भवेत् ।। ६९ ।

गुरुवद् गुरुपुत्रेषु गुरुवत् तत्सुतादिषु ।
अविद्यो वा सविद्यो वा गुरुरेव तु दैवतम् ।। ७० ।

अमार्गस्थोऽपि मार्गस्थो गुरुरेव तु दैवतम् ।
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदो गुरुः ।। ७१ ।

तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम् ।
[1]गुरुदेवाधीनश्चास्मि शास्त्रे मन्त्रे कुलाकुले ।। ७२ ।

नाधिकारी भवेन्नाथ श्रीगुरोः पदभावकः ।
गुरुर्माता पिता स्वामी बान्धवः सुहृत् शिवः ।। ७३ ।

इत्याधाय मनो नित्यं भजेत् सर्वात्मना गुरुम् ।
एकमेव परं ब्रह्म स्थूलशुक्लमणिप्रभम् ।। ७४ ।

सर्वकर्मनियन्तारं गुरुमात्मानमाश्रयेत् ।
गुरुश्च सर्वभावानां भावमेकं न संशयः ।। ७५ ।

निःसन्दिग्धं गुरोर्वाक्यं संशयात्मा[2] विनश्यति ।
निःसंशयी गुरुपदे सर्वंत्यागी पदं व्रजेत् ।। ७६ ।

खेचरत्वमवाप्नोति मासादेव न संशयः ।
सद्गुरुमाश्रितं शिष्टं वर्षमेकं प्रतीक्षयेत् ।। ७७ ।

---

१. गुरुदेवं विना चास्मिन् शास्त्रे मन्त्रे कुलाकुले ।
सोऽधिकारी भवेन्नाथ श्रीगुरोः पादसेवकः ।।—क० ।

२. संशयापन्नश्चासौ आत्मा चेति मध्यमपदलोपिसमासः ।

सगुणं निर्गुणं वापि ज्ञात्वा मन्त्रं प्रदापयेत् ।
शिष्यस्य लक्षणं सर्वं शुभाशुभविवेचनम् ।। ७८ ।

अन्यथा विप्रदोषेण सिद्धिपूजाफलं दहेत् ।
कामुकं कुटिलं लोकनिन्दितं सत्यवर्जितम् ।। ७९ ।

अविनीतमसमर्थं प्रज्ञाहीनं रिपुप्रियम्[1] ।
सदापापक्रियायुक्तं विद्याशून्यं जडात्मकम् ।। ८० ।

कलिदोषसमूहाङ्गं वेदक्रियाविवर्जितम् ।
आश्रमाचारहीनञ्चाशुद्धान्तःकरणोद्यतम् ।। ८१ ।

सदा श्रद्धाविरहितमधैर्यं क्रोधिनं भ्रमम् ।
असच्चरित्रं विगुणं परदारातुरं सदा ।। ८२ ।

असद्बुद्धिसमूहोत्थमभक्तं द्वैतचेतसम् ।
[2]नानानिन्दावृताङ्गं च तं शिष्यं वर्जयेद् गुरुः ।। ८३ ।

यदि न त्यज्यते वीर धनादिदानहेतुना ।
नारकी शिष्यवत् पापी तद्विशिष्टमवाप्नुयात् ।। ८४ ।

क्षणादसिद्धः स भवेत् शिष्यासादितपातकैः[3] ।
अकस्मान्नरकं प्राप्य कार्यनाशाय केवलम् ।। ८५ ।

विचार्य यत्नाद् विधिवत् शिष्यसंग्रहमाचरेत् ।
अन्यथा शिष्यदोषेण नरकस्थो भवेद् गुरुः ।। ८६ ।

न पत्नीं दीक्षयेद् भर्ता न पिता दीक्षयेत् सुताम् ।
न पुत्रञ्च तथा भ्राता भ्रातरं नैव दीक्षयेत् ।। ८७ ।

सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् ।
शक्तित्त्वेन भैरवस्तु न च सा पुत्रिका भवेत् ।
मन्त्राणां देवता ज्ञेया देवता गुरुरूपिणी ।। ८८ ।

---

१. यत् तच्छिष्यम्—क० ।   २. नानानिन्दाभिरावृतमङ्गं यस्य सः, तम् ।
३. शिष्येण आसादितानि पातकानि तैः । शिष्यदोषादिपातकैः—क० ।

तेषां भेदो न कर्तव्यो यदीच्छेच्छुभमात्मनः ।
एकग्रामे स्थितः शिष्यस्त्रिसन्ध्यं प्रणमेद् गुरुम् ॥ ८९ ॥

क्रोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत् ।
अर्धयोजनतः शिष्यः प्रणमेत् पञ्चपर्वसु ॥ ९० ॥

एकयोजनमारभ्य योजनद्वादशावधिः ।
दूरदेशस्थितः शिष्यो भक्त्या तत्सन्निधिं गतः ॥ ९१ ॥

तन्त्रयोजनसंख्योक्तमासेन प्रणमेद् गुरुम् ।
वर्षैकेण भवेद् योग्यो विप्रो हि गुरुभावतः[1] ॥ ९२ ॥

वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः ।
चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता ॥ ९३ ॥

यदि भाग्यवशेनैव सिद्धमन्त्रं लभेत् प्रभो ।
महाविद्या त्रिशक्त्याश्च गृह्णीयात् तत्कुलाद्ध्रुवम् ॥ ९४ ॥

गुरोर्विचारं सर्वत्र तातमातामहं विना ।
प्रमादाच्च तथाज्ञानाद् एभ्यो मन्त्रं समाचरन् ॥ ९५ ॥

प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ।
सावित्रीमन्त्रजापञ्च लक्ष्यं जाप्यं जगत्पतेः ॥ ९६ ॥

विष्णोर्वा प्रणवं लक्ष्यं प्रायश्चित्तमिति स्मृतम् ।
अशक्तश्चेन्महादेव चायुतं प्रजपेन्मनुम् ॥ ९७ ॥

दशसाहस्रजाप्येन सर्वकल्मषनाशिनी ।
गायत्रीच्छन्दसां माता पापराशितुलानला ॥ ९८ ॥

मम मूर्त्तिप्रकाशा च पशुभावविवर्जिता ।
फलोद्भवप्रकरणे ब्रह्मणापद्यते निशि ॥ ९९ ॥

यदि भाग्यवशाद् देव सिद्धमन्त्रं गुरुं तथा ।
तदैव तान्तु दीक्षेत अष्टैश्वर्याय[2] केवलम् ॥ १०० ॥

---

१. गुणसमन्वितः—क० ।   २. अष्टानामैश्वर्याणां समाहारः, अष्टैश्वर्यं तस्मै ।

निर्बीजञ्च पितुर्मन्त्रं शैवे शाक्ते न दुष्यति ।
ज्येष्ठपुत्राय दातव्यं कुलीनैः कुलपण्डितैः ।। १०१ ।

कुलयुक्ताय[1] दान्ताय महामन्त्रं कुलेश्वरम् ।
तदैव मुक्तिमाप्नोति सत्यं सत्यं न संशयः ।। १०२ ।

कनिष्ठञ्च रिपुं चापि सोदरं वैरिपक्षगम् ।
मातामहञ्च पितरं यतिञ्च वनवासिनम् ।। १०३ ।

अनाश्रमं[2] कुसंसर्गं स्वकुलत्यागिनन्तथा ।
वर्जयित्वा च शिष्यांस्तान् दीक्षाविधिमुपाचरेत् ।। १०४ ।

अन्यथा[3] तद्विरोधेन कामनाभोगनाशनम् ।
सिद्धमन्त्रञ्च गृह्णीयाद् दुष्कुलादपि भैरव ।। १०५ ।

सद्गुरो[4]र्भावनेच्छन्नरूपे रूपे धरे शुभे ।
तत्र दीक्षां समाकुर्वन् अष्टैश्वर्यजयं लभेत्[5] ।। १०६ ।

स्वप्ने तु नियमो नास्ति दीक्षासु गुरुशिष्ययोः ।
स्वप्नलब्धे स्त्रिया दत्ते संस्कारेणैव शुद्धयति ।। १०७ ।

साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ।
सर्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता ।। १०८ ।

सर्वलक्षणसम्पन्ना जापिका पद्मलोचना ।
रत्नालङ्कारसंयुक्ता वर्णाभूवनभूषिता ।। १०९ ।

शान्ता कुलीना कुलजा चन्द्रास्या सर्ववृद्धिगा ।
अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया ।। ११० ।

---

१. गुणयुक्ताय–क० । २. नानाश्रमम्–क० ।

३. अन्यथा तद्विरोधेन कार्यनाशो भवेद्ध्रुवम्–क० । ४. यद्भवौ–ग० ।

५. अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यमिति लभ्धातोः परस्मैपदेऽस्य रूपस्य साधुता ।

गुरुरूपा मुक्तिदात्री शिवज्ञाननिरूपिणी ।
गुरुयोग्या भवेत् सा हि विधवा परिवर्जिता ।। १११ ।

स्त्रिया दीक्षा शुभा प्रोक्ता मन्त्रश्चाष्टगुणाः स्मृताः ।
पुत्रिणी विधवा ग्राह्या केवला ऋणकारिणी[1] ।। ११२ ।

सिद्धमन्त्रो यदि भवेद् गृह्णीयाद्विधवामुखात् ।
केवलं सुफलं[2] तत्र मातुरष्टगुणं ध्रुवम् ।। ११३ ।

सधवा[3] स्वप्रकृत्या च ददाति यदि तन्मनुम् ।
ततोऽष्टगुणमाप्नोति यदि सा पुत्रिणी सती ।। ११४ ।

यदि माता स्वकं मन्त्रं ददाति स्त्रसुताय च ।
तदाष्टसिद्धिमाप्नोति भक्तिमार्गे न संशयः ।। ११५ ।

तदैव दुर्लभं देव यदि मात्रा प्रदीयते ।
आदौ भक्ति ततो मुक्ति सम्प्राप्य कालरूपधृक्[4] ।। ११६ ।

सहस्रकोटिविद्यार्थं जानाति नात्र संशयः ।
स्वप्ने तु माता यदि वा ददाति शुद्धमन्त्रकम् ।। ११७ ।

पुनर्दीक्षां सोऽपि कृत्वा दानवत्वमवाप्नुयात् ।
यदि भाग्यवशेनैव जननी दानवर्तिनी[5] ।। ११८ ।

तदा सिद्धिमवाप्नोति तत्र मन्त्रं विचारयेत् ।
स्वीयमन्त्रोपदेशेन[6] न कुर्याद् गुरुचिन्तनम् ।। ११९ ।

---

१. आनन्दकारिणी—क० । २. सफलं तन्त्रे—क० ।

३. सधवा स्वप्नविषये ददाति यदि सन्मनुम् ।
तत्राष्ट .... ।।—क० ।

४. कालरूपेण धृष्णोति इति कालरूपधृक्, धृषेः क्विप्, क्विन्प्रत्ययस्य कुरिति कुत्वम् ।

५. चानुवर्तिनी—क० । ६. तु—क० ।

तथा श्रीललिता काली महाविद्या महामनोः[1] ।
सर्वसिद्धियुतो भूत्वा वत्सरात् तां प्रपश्यति ॥ १२० ॥

काली कल्पलता देवो महाविद्यादिसाधने ।
गुरुचिन्ता न कर्तव्या ये जानन्ति गुरोर्वचः ॥ १२१ ॥

यदि मन्त्रं विचार्याशु गृह्णाति साधकोत्तमः ।
अनन्तकोटिपुण्यस्य द्विगुणं भवति ध्रुवम् ॥ १२२ ॥

विचार्यं चक्रसारञ्च मन्त्रं गृह्णाति यो नरः ।
वैकुण्ठनगरे वासस्तेषां जन्मशतैरपि ॥ १२३ ॥

इति श्रुत्वा महादेवो महादेव्याः सरस्वतीम् ।
उवाच पुनरानन्दपुलकोल्लासविग्रहः ॥ १२४ ॥

ज्ञातुं चक्रं षोडशञ्च चक्रहस्तवरप्रदम्[2] ।
अत्यद्भुतफलोपेतं धर्मार्थंकाममोक्षदम् ॥ १२५ ॥

श्रीभैरव उवाच—

कथयस्व महादेवि कुलसद्भावप्राप्तये[3] ।
यदि मे सुकृपादृष्टिः[4] वर्तते स्नेहसागरे ॥ १२६ ॥

त्वत्प्रसादाद्भैरवोऽहं कालोऽहं जगदीश्वरः ।
भुक्तिमुक्तिप्रदाता च योगयोग्यो दिगम्बरः[5] ॥ १२७ ॥

इदानीं सर्वविद्यानां दीक्षाद्यं चक्रमण्डलम् ।
[6]अकालकुलहीनञ्चाकडमञ्च[7] कुलाकुलम् ॥ १२८ ॥

---

१. महामनोः—क० ।
२. पुरप्रदम्—ख० ग० ।
३. पण्डिते—ख० ग० ।
४. स्वकृपादृष्टि इति ग० ख० ।
५. यागयोगो—ख० ग० ।
६. अकालः कालरहितः कुलहीनश्च, कर्मधारयसमासः ।
७. कालीकुलकुलान्तरे—क० ।

[1]श्रीभैरवी उवाच—

ताराचक्रं राशिचक्रं कूर्मचक्रं तथापरम् ।
शिवचक्रं विष्णुचक्रं ब्रह्मचक्रं विलक्षणम् ।। १२९ ।

देवचक्रं ऋणिधनि उल्काचक्रं ततः परम् ।
वामाचक्रं चतुश्चक्रं सूक्ष्मचक्रं ततो वदेत् ।। १३० ।

तथा क-थ-ह-चक्रञ्च कथितं षोडशं प्रभो[2] ।
एतदुत्तीर्णमन्त्रञ्च ये गृह्णन्ति नरोत्तमाः ।। १३१ ।

तेषामसाध्यं जगति न किमपि वर्तते ध्रुवम् ।
किमन्यत् कथयामीह देवतादर्शनं लभेत्[3] ।। १३२ ।

सर्वत्रगामी स भवेत् चक्रराजप्रसादतः ।
सर्वचक्रविचारञ्च न जानाति द्विजोत्तमः ।। १३३ ।

यज्जानाति तद्विचार्यं देवताप्रीतिकारकम् ।
ताराशुद्धिं वैष्णवानां कोष्ठशुद्धिं शिवस्य च ।। १३४ ।

राशिशुद्धिं त्रैपुरस्य गोपालेऽकडमः स्मृतः ।
अकडमो वामने च गणेशे हरचक्रतः ।। १३५ ।

कोष्ठचक्रं वराहस्य महालक्ष्म्याः कुलाकुलम् ।
नामादिचक्रे सर्वेषां भूतचक्रे तथैव च ।। १३६ ।

त्रैपुरं तारचक्रे च शुद्धं मन्त्रं भजेद् बुधः ।
वैष्णवं राशिसंशुद्धं शैवञ्चाकडमं स्मृतम् ।। १३७ ।

---

१. शृणु नाथ प्रवक्ष्यामि त्वं योग्योऽसि सुरद्रुमः ।
नानाविशेषणे सक्तः सावधानोऽवधारय ।।
आदावकडमं प्रोक्तं श्रीचक्रञ्च कुलाकुलम् ।। अधिकः—क० ।

२. कथय त्वं मयि प्रभो—ख० ग० ।

३. पूर्ववत् परस्मैपदम् ।

कालिकायाश्च ताराया: हरचक्रं शुभं भवेत् ।
चण्डिकाया भवेत् कोष्ठे गोपाले ऋक्षचक्रकम्[1] ॥ १३८ ।

हरचक्रे सर्वमन्त्रान् ऋणाधिक्येन चाश्रयेत् ।
ऋणाधिक्ये शुभं विद्याद् धनाधिक्ये च नो विधिः ॥ १३९ ।

दोषान् संशोध्य गृह्णीयान्मध्यदेशे तु साधकः ।
पितृमातृकृतं नाम त्यक्त्वा शर्मादिदेवकान् ॥ १४० ।

श्रीवर्णञ्च ततो विद्याचक्रेषु योजयेत् क्रमात् ।
क्रमेण शृणु तत्सर्वं शुभाशुभफलप्रदम् ॥ १४१ ।

जापकानां भावुकानां शुद्धं सिद्ध्यति तत्क्षणात् ।
मन्त्रमात्रं प्रसिद्ध्येत भक्तानामिति निश्चयः ॥ १४२ ।

कुलीनकुलजातानां ध्यानमार्गार्थगामिनाम् ।
महाविद्या महाज्ञानं[2] संशुद्धमपि सिध्यति ॥ १४३ ।

सिद्धमन्त्रप्रकरणे यदुक्तञ्च महेश्वर ।
अष्टसिद्धिकरे तस्य सायुज्यपदमाप्नुयात् ॥ १४४ ।

चक्रं षोडशसारञ्च सर्वेषां मन्त्रसिद्धये ॥ १४५ ।

विचार्य सर्वमन्त्रञ्च यन्मया गदितं हितम् ।
आदौ बालाभैरवीणामकडमान्मतं मया ॥ १४६ ।

कुमारीललितादेव्याः कुरुकुल्लादिसाधने ।
श्रीचक्रं फलदं प्रोक्तं सर्वचक्रफलप्रदम् ॥ १४७ ।

योगिन्यादिसाधने च ताराचक्रं महत्फलम् ।
उन्मत्तभैरवीविद्याद्यादिसाधननिर्मले[3] ॥ १४८ ।

---

१. गोपाले सूक्ष्मचक्रकम्–क० । २. महामन्त्रम्–क० ।
३. उन्मत्तभैरवी विद्या आद्यादि साधने निर्मले इत्यर्थः ।

राशिचक्रं कोटिफलं नानारत्नप्रदं शुभम् ।
प्रत्यङ्गिरासाधने च उल्काविद्यादिसाधने ।। १४९ ।

शिवचक्रं महापुण्यं सर्वचक्रफलप्रदम् ।
कालिकार्चचिकामन्त्रे विमलाद्यादिसाधने ।। १५० ।

सम्पत्प्रदाभैरवीणां मन्त्रग्रहणकर्मणि ।
विष्णुचक्रे कोटिशतं पुण्यं प्राप्नोति मानवः ।। १५१ ।

छिन्नादिश्रीविद्यायाः[1] कृत्यादेव्याश्च साधने ।
नक्षत्रविद्याकामाख्या ब्रह्माण्यादि सुसाधने ।। १५२ ।

ब्रह्मचक्रं महापुण्यं सर्वविद्याफलं लभेत् ।
कोटिजाप्येन यत्पुण्यं ग्रहणात् तत्फलं लभेत्[2] ।। १५३ ।

वज्रज्वालामहाविद्यासाधने मन्त्रजापने ।
गुह्यकालीसाधने च कुब्जिकामन्त्रसाधने ।। १५४ ।

देवचक्रं शुभं प्रोक्तं वाक्यसिद्धिप्रदायकम् ।
कामेश्वरी[3] अट्टहासा मन्त्रसाधनकर्मणि ।। १५५ ।

राकिणोमन्दिरादेवी[4] मन्दिरामन्त्रसाधने ।
ऋणिधनिमहाचक्रं विचार्यं सर्वसिद्धिदम् ।। १५६ ।

श्रीविद्याभुवनेशानी-भैरवीसाधने तथा ।
पृथ्वीकुलावतोवीणासाधने[5] वामनीमनोः ।। १५७ ।

उल्काचक्रं महापुण्यं राजत्वफलदं शुभम् ।
शिवादिनायिकामन्त्रे बालाचक्रं[6] सुखप्रदम् ।। १५८ ।

---

१. उग्रविद्यायाः–क० ।
२. पूर्ववत् परस्मैपदम् ।
३. पृषोदरादित्वाद् आर्षत्वाद्वा प्रकृतिभावः ।
४. दक्षिणी–क० ।
५. चीनासाधने वासनीमनो–क० ।
६. वामाचक्रं–क० ।

फेत्कारी मन्त्रजाप्ये च उड्डीयानेश्वरी मनोः ।
चतुश्चक्रं शतफलं महामन्त्रफलप्रदम् ।। १५९ ।

द्राविणीदीर्घजङ्घादि ज्वालामुख्यादिसाधने[1] ।
नारसिंहीसाधने च सूक्ष्मचक्रं फलोद्भवम् ।। १६० ।

हरिणी मोहिनी कात्यायनी-साधनकर्मणि ।
वैष्णवे च तथा शैवे देवीमन्त्रे च भैरव ।। १६१ ।

अकथहं महाचक्रं विचार्यं यत्नपूर्वकम् ।
यो गृह्णाति महामन्त्रं स शिवो नात्र संशयः ।। १६२ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महायन्त्रोद्दीपने सर्वचक्रानुष्ठाने महागुरुप्रकरणे भावनिर्णये भैरवीभैरवसंवादे द्वितीयः पटलः ।।

१. ज्वाला मुखे यस्याः सा ज्वालामुखी, सा आदिर्यासां ताः ज्वालामुख्यादयः, तासां साधनं यत्कर्म, तस्मिन् । बहुव्रीहिगर्भषष्ठीतत्पुरुषगर्भः कर्मधारयः ।

अथ तृतीयः पटलः

भैरवी उवाच—

अथ चक्रं प्रवक्ष्यामि कालाकालविचारकम् ।
यदाश्रितो महावीरो[1] दीव्यो वा पशुभाववान् ॥ १ ।

चक्रराजं प्रविचार्य सिद्धमन्त्रं न चालयेत् ।
प्रबलस्य प्रचण्डस्य प्रासादस्य महामनोः ॥ २ ।

शक्तिकूटादिमन्त्राणां[2] सिद्धादोन्नैव शोधयेत् ।
वराहार्कनृसिंहस्य तथा[3] पञ्चाक्षरस्य च ॥ ३ ।

महामन्त्रस्य[4] कालस्य चन्द्रचूडस्य सन्मनोः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥ ४ ।

विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्तिताः ।
सूर्यमन्त्रस्य योगस्य कृत्यामन्त्रस्य शङ्कर ॥ ५ ।

शंभुबीजस्य देवस्य सिद्धादीन्नैव शोधयेत् ।
चक्रेश्वरस्य चन्द्रस्य वरुणस्य महामनोः ॥ ६ ।

कालीतारादिमन्त्रस्य सिद्धादीन्नैव शोधयेत् ।
तथापि शोधयेन्मन्त्रं प्रशंसापरमेव तत् ॥ ७ ।

---

१. यदाश्रित्य महादेवी इति क० ।
२. शक्तिहृदादि इति क० ।
३. सिद्धादोन्नैव शोधयेत् का० ।
४. श्रीदत्तस्य तथा सुतलब्धस्य च महामनोः ।
एकाक्षरस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
एकद्वित्र्यादिबीजस्य सिद्धमन्त्रस्य वैदिके ।
इत्यष्टाक्षरमन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥ इत्यधिकः पाठः क० ।

यत्र प्रशंसापरमं तत्कार्यं दैवतं स्मृतम् ।
प्रशंसा यत्र नास्त्येव तत्कार्यं नापि कारयेत् ॥ ८ ।

अत्यन्तफलदं मन्त्रं गृह्णीयात् [1]कुलरक्षणात् ।
धनिमन्त्रं न गृह्णीयाद् अकूलञ्च तथैव च ॥ ९ ।

[2]गृहीत्वा निधनं याति कोटिजाप्येन सिद्धयति ।
मननं विश्वविज्ञानं त्राणं संसारबन्धनात्[3] ॥ १० ।

यतः करोति संसिद्धौ मन्त्र इत्यभिधीयते ।
प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्वथा ॥ ११ ।

आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चानपसंज्ञकम् ।
पितुर्मन्त्रं तथा मातुर्मन्त्रसिद्धिप्रदं शुभम् ॥ १२ ।

शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम् ।
अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः ॥ १३ ।

न भवन्ति श्रिये तेषां शिलायामुप्तबीजवत् ।
देवीदीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ॥ १४ ।

तस्मात्सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ।
[4]विचारं चक्रसारस्य करणीयमवश्यकम् ॥ १५ ।

अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ।
तस्माद्दीक्षा प्रयत्नेन सदा कार्या च तान्त्रिकात् ॥ १६ ।

दीक्षापूर्वदिने कुर्यात् सुविचारं प्रयत्नतः ।
तत्प्रकारं प्रयत्नेन कार्यं पर्वतपूजित ॥ १७ ।

आदावकडमे सिद्धिर्मन्त्रं सञ्चारयेद् बुधः ।
रेखाद्वयं पूर्वपरे मध्ये रेखाद्वयं लिखेत् ॥ १८ ।

---

१. कुलवर्त्मना इति क० । २. विघ्नविज्ञानम् इति का० ।
३. भीत्रार्थानां भयहेतुरिति पञ्चमी । ४. विचार्यक्रमारम्यं करणीयमवश्यकम् इति क० ।

चतुष्कोणे चतूरेखा कडमं चक्रमण्डलम् ।
भ्रामयित्त्वा महावृत्तं[1] निर्माय वर्णमालिखेत् ॥ १९ ।

अकारादिक्षकारान्तान् क्लीबहीनान् लिखेत्ततः ।
एकैकमतो लेख्यान् मेषादिषु वृषान्तकान् ॥ २० ।

वामावर्त्तेन गणयेत् क्रमशो वीरवल्लभ ।
तन्त्रमार्गेण गणयेन्नामादिवर्णकादिमान् ॥ २१ ।

मेषादितोऽपि मीनान्तं क्रमशः शास्त्रपण्डितः ।
सिद्धसाध्यसुसिद्धादीन्[2] पुनः सिद्धादयः पुनः ॥ २२ ।

नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके ।
सुसिद्धस्त्रिसप्तके रुद्रे वेदाष्टद्वादशे रिपुः ॥ २३ ।

एतत्ते कथितं नाथ अकडमादिकमुत्तमम् ।
पद्माकारं महाचक्रं दलाष्टकसमन्वितम् ॥ २४ ।

अ आ वर्णद्वयं पूर्वे द्वितीये च द्वितीयकम् ।
तृतीये कर्णयुग्मञ्च चतुर्थे नासिकाद्वयम् ॥ २५ ।

पञ्चमे नयनं प्रोक्तं षष्ठे ओष्ठाधरं तथा ।
सप्तमे दन्तयुग्मञ्च अष्टमे षोडशस्वरम् ॥ २६ ।

कवर्गञ्च पूर्वदले द्वितीये च चवर्गकम् ।
तृतीये च टवर्गञ्च चतुर्थे च तवर्गकम् ॥ २७ ।

पवर्गं पञ्चमे प्रोक्तं यवान्तं षष्ठपत्रके ।
सप्तमे शषसान् लिख्य लक्षमष्टमके पदे ॥ २८ ।

सुखं राज्यं धनं विद्यां यौवनायुषमेव च ।
विचार्य चक्रमाप्नोति पुत्रत्त्वञ्च स्वजीवनम् ॥ २९ ।

स्वीयनामाक्षरं तत्र देवनामाक्षरं तथा ।
एकस्थानं युगस्थानं विरोधं द्विविधं स्मृतम् ॥ ३० ।

---

१. महाचित्तम् इति क० ।

२. सिद्धसाध्यसुसिद्धा आदयो येषां तान्, अस्य गणयेदित्यनेनान्वयः ।

जीवनं मरणं तत्र आकारादिसुपत्रके ।
लिखित्वा गणयेन्मन्त्री मरणं वर्जयेत् सदा ॥ ३१ ।

यत्रास्ति मरणं तत्र जीवनं नास्ति निश्चितम् ।
परस्परविरोधेन सिद्धमन्त्रञ्च मूलदम्[1] ॥ ३२ ।

जीवने जीवनं ग्राह्यं सर्वत्र मरणं त्यजेत् ।
कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह ॥ ३३ ।

वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ।
पञ्चह्रस्वाः पञ्चदीर्घाः विन्द्वन्ताः[2] सन्धिसम्भवाः[3] ॥ ३४ ।

कादयः पञ्चशः षक्षलसहान्ताः प्रकीर्त्तिताः ।
साधकस्याक्षरं पूर्वं मन्त्रस्यापि तदक्षरम् ॥ ३५ ।

यद्येकभूतदैवत्यं [4]जानीयात्सकुलं हितम् ।
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम् ॥ ३६ ।

पार्थिवाणाञ्च सर्वेषां शत्रुराग्नेयमम्भसाम् ।
ऐन्द्रवारुणयोः शत्रुर्मारुतः परिकीर्त्तितः ॥ ३७ ।

पार्थिवे वारुणं मित्रं तैजसं शत्रुरीरितः ।
नाभसं सर्वमित्रं स्याद्विरुद्धं नैव शीलयेत् ॥ ३८ ।

रेखाष्टकं हि पूर्वाग्रं रेखैकादशमध्यतः ।
दक्षिणोत्तरभागेन दक्षिणावधिमालिखेत् ॥ ३९ ।

कुलाकुलञ्च कथितं ताराचक्रं पुनः शृणु ।
दक्षिणोत्तरदेशे तु रेखाचतुष्टयं लिखेत् ॥ ४० ।

दशरेखाः पश्चिमाग्राः कर्त्तव्याः वीरवन्दित ।
अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः ॥ ४१ ।

---

१. मृत्युदम् इति–क० ।
२. बिन्दुः अन्तो येषां ते ।
३. सन्धिषु संभवो येषां ते ।
४. मङ्गलं हि तत् इति–क० ।

वक्ष्यमाणक्रमेणैव तन्मध्ये वर्णकान् लिखेत् ।
युग्ममेकं तृतीयञ्च[1] वेदमेकैकयुग्मकम् ॥ ४२ ।
एकयुग्मं तथैकञ्च युगलं युगलं युगम् ।
एकं युग्मं तृतीयञ्च चन्द्रनेत्रं[2] विविधं विधुम् ॥ ४३ ।
चन्द्रयुग्मं चन्द्रयुग्मं रामवेदं गृहे शुभे ।
वर्णाः क्रमाः स्वराण्येव रेवत्यश्विगतावुभौ ॥ ४४ ।
अकारद्वयमश्विन्यां[3] देवतागणसम्भवाः ।
इकारं भरणी सत्यां कृत्स्नमुस्वरकृत्तिका ॥ ४५ ।
राक्षसी कृत्तिका भूमौ सर्वविघ्नविनाशिनी ।
नासिकागण्डमन्त्रञ्च रोहिणी शिवरूपिणी ॥ ४६ ।
ओष्ठमध्ये मृगशिरा देवता परिकीर्त्तिता ।
अधरान्तमार्द्रया च मानुषं सर्वलक्षणम् ॥ ४७ ।
दन्तयुग्मं पुनर्वस्वाछादितं मानुषं प्रियम् ।
कः पुष्या देवता ज्ञेया खगाश्लेषा च राक्षसी ॥ ४८ ।
मघावक्षे घडान्ता च तथा च पूर्वफाल्गुनी ।
छजोत्तरा-फाल्गुनी च मनुष्याः परिकीर्त्तिताः ॥ ४९ ।
झञहस्ता देवगणा टठचित्रा च राक्षसी ।
डम्वाती देवरमणी विशाखा ढणराक्षसी ॥ ५० ।
तण्यदानुराधया च शोभिता देवनायिका ।
ध ज्येष्ठा राक्षसी ज्ञेया मूलानपफराक्षसी ॥ ५१ ।
पूर्वाषाढा मानुसानी बकाराक्षयमालिनी ।
भोत्तराषाढया मर्त्यो मकारः श्रवणः मतः ॥ ५२ ।
धनिष्ठा यरवक्षः स्त्रीलस्था शतभिषा तथा ।
वशपूर्वभाद्रपदा मनुजाः परिकीर्तिताः ॥ ५३ ।

---

१. तुरीयञ्च इति–क० ।
२. चन्द्रानलविधुम्, विधुम् इति–क० ।
३. अकारादिवर्णानां तत्तन्नक्षत्रे स्थापना कृता ।

तथोत्तराभाद्रपदा मानुषी-मङ्गलोद्भवा ।
अं अः लक्षरेवती च देवकन्याः प्रकीर्तिताः ॥ ५४ ।

स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु ।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः ॥ ५५ ।

जन्मसम्पत् विपत् क्षेमप्रत्यरिः साधको वधः ।
मित्रं परममित्रञ्च गणयेच्च पुनः पुनः ॥ ५६ ।

वर्जयेज्जन्मनक्षत्रं तृतीयं पञ्चसप्तकम् ।
षडष्टनवभद्राणि युगञ्च युग्मकं तथा ॥ ५७ ।

यदीह निजनक्षत्रं न जानाति द्विजोत्तमः ।
नामाद्यक्षरसम्भूतं स्वतारमविरोधकम् ॥ ५८ ।

विनीय गणयेन्मन्त्री शुभाशुभविचारवान् ।
प्रादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः ॥ ५९ ।

इत्येतत् कथितं नाथ ममात्मा पुरुषेश्वर ।
कुलाकुलमनन्ताख्यं ताराचक्रं मनोर्गुणम् ॥ ६० ।

तारामन्त्रं प्रदीपाभं रत्नभाण्डस्थितामृतम् ।
एतद्विचारे महतीं सिद्धिमाप्नोति मानवः ॥ ६१ ।

राशिचक्रं प्रवक्ष्यामि सिद्धिलक्षणमुत्तमम् ।
क्रमेण देया युगला रेखा पूर्वापरोद्गमा ॥ ६२ ।

तन्मध्यतो द्वयं दद्याद्रेखाग्निदक्षिणे ततः ।
अग्निनैर्ऋतिवायवीशक्रमेण रेखयेत् तथा ॥ ६३ ।

विलिखेन्मेषराश्यादि मीनान्तं सर्ववर्णकान् ।
कन्यागृहगतान्[1] शादिवर्णानालिख्य यत्नतः ॥ ६४ ।

गणयेत्साधकश्रेष्ठो लग्नाद्यामव्ययान्तकान् ।
स्वराशिदेवकोष्ठानामनुकूलान्भजेन्मनून् ॥ ६५ ।

---

१. क्रमेण विलिखेद् वीर राशिचक्रे च साधक ।
वेदरामं रामहस्तं भज लोचनमेव च ॥
पञ्चभूतं पञ्चभूतं पञ्चवेदादिवर्णकान् ।

राशीनां शुद्धता ज्ञेया त्यजेत् शत्रुमृतिं व्ययम् ।
स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षणैः ।। ६६ ।

साध्याद्यक्षरराश्यन्तं गणयेत् साधकाक्षरात् ।
एकं वा पञ्च नवमं बान्धवं परिकीर्तितम् ।। ६७ ।

द्विषड्दशमसंस्थाश्च सेवकाः परिकीर्तिताः ।
रामरुद्राश्च मुनयः पोषकाः परिकीर्तिताः ।। ६८ ।

सूर्याष्टवेदयुक्तास्तु घातकाः सर्वदोषदाः ।
शक्त्यादौ तु महादेव कुलचूडामणिर्यतिः ।। ६९ ।

वर्जयेत् षष्ठगेहञ्च अष्टमं द्वादशं तथा ।
लग्नं धनं भ्रातृबन्धुपुत्रशत्रुकलत्रकाः ।। ७० ।

मरणं धर्मकर्मायव्यया द्वादशराशयः ।
नामानुरूपमेतेषां शुभाशुभफलं दिशेत् ।। ७१ ।

वैष्णवे तु महाशत्रोः स्थाने बन्धुः प्रकीर्तितः ।
कूर्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम् ।। ७२ ।

यज्ज्ञात्वा सर्वशास्त्राणि जानाति पण्डितोत्तमः ।
अभेद्यभेदकं चक्रं शृणुष्वादरपूर्वकम् ।। ७३ ।

कूर्माकारं[1] महाचक्रं चतुष्पादसमावृतम् ।
मुण्डे स्वरा दक्षपादे कवर्गं वामपादके ।। ७४ ।

चवर्गं कीर्तितं पश्चाद् अधःपादे टवर्गकम् ।
तदधस्तु तवर्गं स्यादुदरे च पवर्गकम् ।। ७५ ।

यवान्तं हृदये प्रोक्तं सहान्तं पृष्ठमध्यके ।
लाङ्गूले शत्रुबीजञ्च क्षकारं लिङ्गमध्यके ।। ७६ ।

लिखित्वा गणयेन्मन्त्री चक्रं कलिमलापहम् ।
स्वरे लाभं कवर्गे श्रीश्चवर्गे च विवेकदम् ।। ७७ ।

---

१. सकले कूर्मशरीरे तत्तदङ्गेषु वर्गस्थापनव्यवस्था ।

टवर्गे राजपदवीं तवर्गे धनवान् भवेत् ।
उदरे सर्वनाशः स्याद् हृदये बहुदुःखदम् ।। ७८ ।
पृष्ठे च सर्वसन्तोषं लाङ्गूले मरणं ध्रुवम् ।
वैभवं पृष्ठदेशे तु दुःखञ्च वामपादके ।। ७९ ।
विरुद्धद्वयलाभे तु न कुर्याच्चक्रचिन्तनम् ।
विरुद्धैके धर्मनाशो युग्मदोषे च मारणम् ।। ८० ।
यत्र देवाक्षरञ्चास्ति तत्र चेन्निजवर्णकम् ।
विरुद्धञ्चेत्त्यजेत् शत्रुमन्यमन्त्रं विचारयेत् ।। ८१ ।
पृथक्स्थाने यदि भवेद्वर्णमाला महेश्वर ।
यदि तत् सौख्यभावः स्यात् सौख्यं नापि विवर्जयेत् ।। ८२ ।
विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च सन्त्यजेत् ।
इति ते कथितं देवि दृष्टादृष्टफलप्रदम् ।। ८३ ।
यः शोधयेच्चरेद् वर्णं मन्त्रमालामहेश्वरः ।
यदि शुध्यति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम् ।। ८४ ।
शिवचक्रं प्रवक्ष्यामि महाकालकुलेश्वर ।
अवश्यं सिद्धिमाप्नोति शिवचक्रप्रभावतः ।। ८५ ।
षट्कोणमध्यदेशे तु चतुरस्रं लिखेद् बुधः ।
तन्मध्ये विलिखेच्चारु चतुरस्रं सवर्णकम् ।। ८६ ।
मस्तकस्थत्रिकोणे तु शिवसंस्थानमन्त्रकम् ।
दक्षिणावर्तमानेन गणयेत् सर्वमन्त्रकम् ।। ८७ ।
विष्णुस्थाने स्वमन्त्रञ्च द्वितीये च त्रिकोणके ।
त्रिकोणे च तृतीये च ब्रह्मसंस्थानमन्त्रकम् ।। ८८ ।
शक्तिमन्त्रादिसंस्थानं त्रिकोणाधो मुखे तथा ।
नायिकामन्त्रसंस्थानं त्रिकोणाधो मुखे तथा ।। ८९ ।
नायिकामन्त्रसंस्थानं तद्वामे दुर्लभं शुभम् ।
तदूद्र्ध्वे च त्रिकोणे च भूतसंस्थानमन्त्रकम् ।। ९० ।

शिवाधो यक्षमन्त्रस्य संस्थानमतिदुर्लभम् ।
विष्णुब्रह्मसन्धिदेशे [1]महाविद्यापदं ध्रुवम् ॥ ९१ ॥

[2]स्वरस्थानं तथा वर्णस्थानं शृणु महाप्रभो ।
अ-आवर्णद्वयं शैवे कवर्गञ्च सबिन्दुकम् ॥ ९२ ॥

विष्णौ नेत्रं चवर्गञ्च टवर्गं ब्रह्मणि श्रुतम् ।
तवर्गं नासिकाशक्तौ सर्वमन्त्रार्थचेतनम् ॥ ९३ ॥

नायिकायां पवर्गञ्च न युगं परिकीर्तितम् ।
भूते यत्रान्तं विलिखेदोष्ठाधरसमन्वितम् ॥ ९४ ॥

प्रणवं यक्षमन्त्रे च शकारं परिकीर्तितम् ।
अधोदन्तं पिशाचे च षयुक्तं बिन्दुभूषितम् ॥ ९५ ॥

शिवो बीजं देवमन्त्रे सकारञ्च सबिन्दुकम् ।
महाविद्यादिसंस्थाने लक्षवर्णं प्रकीर्तितम् ॥ ९६ ॥

इति ते कथितं शम्भो शृणु वर्णाङ्कवर्णनम् ।
शिवे एकविंशतिश्च द्वात्रिंशद्विष्णुकोणके ॥ ९७ ॥

ब्रह्मणे षोडशाद्यञ्च शक्तिकूटे युगाष्टकम् ।
नायिकायां वह्निवाणं भूते सप्ताङ्कमेव च ॥ ९८ ॥

यक्षे च चन्द्रवेदञ्च पिशाचेऽष्टवसुः स्मृतः ।
सर्वदेवे बाणवेदं कृत्यायां षष्ठषष्ठकम् ॥ ९९ ॥

मध्ये षष्ठे हुताशञ्च[3] महाविद्यागृहे शुभे ।
साधकस्य च साध्यस्यैकाङ्कं साध्यमन्दिरे ॥ १०० ॥

---

१. पिशाचपदमन्त्रकम् इति—क० ।

२. त्रिकोणं परिसर्वेषां मन्त्रसंस्थानमेव च ।
नायिकाभूतशक्तौ च कृत्यसंस्थानमन्त्रकम् ॥
चतुष्कोणमध्यदेशे महाविद्यापदं ध्रुवम् ।—इति अ० क० प्र० पो० ।

३. अश्नातीति अशः, पचादित्वादच्प्रत्ययः, हुतस्याशः इति षष्ठीतत्पुरुषः । अथवा कर्मण्यण्प्रत्ययः ।

साधकाङ्कमूर्ध्वदेशे साध्याङ्कं गणयेदधः ।
भुजयुग्मं शिवे प्रोक्तं विष्णौ वामाष्टकं तथा ।। १०१ ।

ऋषिचन्द्रं विधौ प्रोक्तं शक्तौ रामाष्टकं तथा ।
नायिकायां वेदबाणं भूतेऽष्टनवमन्तथा ।। १०२ ।

यक्षे युग्मं चतुर्थं च पिशाचे वज्रकाष्टकम् ।
शक्तौ वशकृतौ ज्ञेयौ कृत्वा यां [1]मुनिषष्ठकम् ।। १०३ ।

यस्मिन् यस्मिन् गृहस्था ये देवतास्तु महाफलाः । क०

अनामाक्षरदेहस्थमक्षरं द्विगुणं स्मृतम् ।
साध्याङ्केन योजयित्वा पूरयेत्षष्ठपञ्चमैः ।। १०४ ।

तद्गेहं ग्राहयेद् यत्नात् देवताद्यक्षरं यथा ।
एकशेषस्थितं[2] वर्णं कुर्यान्नापि[3] विवेचनम् ।। १०५ ।

शुद्धं तद्धि विजानीयाद्विचारमन्यतोऽपि च ।
षष्ठाङ्केन च वेदाङ्कं तथा च देववर्णकम् ।। १०६ ।

शशाङ्कं मिश्रितं चाङ्कं द्विगुणं देवतार्णकम् । क०

पश्चात् कृत्वा तदङ्कञ्च हरेद्रामेण वल्लभ ।
यदि साध्याङ्कं विस्तीर्णं तदा नैव शुभं भवेत् ।। १०७ ।

साधकाङ्कञ्च विस्तीर्णं यदि स्याज्जायते गृहे ।
तदा सर्वकुलेशः स्याद्रुद्रश्रवणसंशयः ।। १०८ ।

द्विगुणं देवतावर्णं साधकाङ्केन योजयेत् ।
वर्णसंख्याङ्कमालिख्य गणयेत् साधकोत्तमः ।। १०९ ।

रसबाणेन सम्पूर्य संहरेत् रससंख्यया ।
आत्माङ्कमिश्रितं पश्चाद् यदि किंचिन्न तिष्ठति[4] ।। ११० ।

---

१. मणि इति—क० ।
२. गेहे स्थितं वर्णम्—क० ।
३. वापि इति—क० ।
४. यदि किञ्चिन्न तिष्ठति—क० ।

स्वीयाभिधानकाङ्कस्य द्विगुणञ्चापि योजयेत् ।
पश्चादनलसंख्याभिर्हरेत् सौख्यार्थिमुक्तये ।। १११ ।

अङ्कं बहुतरं ग्राह्यं साधकस्य सुखावहम् ।
न ग्राह्यं साध्यविस्तीर्णमतिशास्त्रार्थनिश्चयम् ।। ११२ ।

विचारादस्य चक्रस्य राजत्वं लभते ध्रुवम् ।
समानाङ्केन गृह्णीयाद् [1]गुण्याङ्कं वर्जयेदिह ।। ११३ ।

अवश्यं[2] चक्रमेवं हि गोपनीयं सुरासुरैः ।
विष्णुचक्रं प्रवक्ष्यामि चक्राकारं सुगोपनम् ।। ११४ ।

सर्वसिद्धिप्रदं शुद्धं चक्रं कृत्वा फलप्रदम् ।
शृणु नाथ महाविष्णोः स्थानं मङ्गलदायकम् ।। ११५ ।

लक्ष्मीप्रियमङ्कमयं नवकोणं महाप्रभम् ।
तदूर्ध्वे च तमालिख्य तदूर्ध्वेऽष्टग्रहं शुभम् ।। ११६ ।

चतुष्कोणाकारगेहं सन्धौ शून्याष्टकं[3] लिखेत् ।
तदूर्ध्वे च तमालिख्य चक्रमेतद्धनेश्वर[4] ।। ११७ ।

पूर्वे महेन्द्राभरण[5] मूर्द्ध्वदेशोल्लसत्करम् ।
मुनिरामखचन्द्राद्यमङ्कं सर्वसमृद्धिदम् ।। ११८ ।

दक्षिणे वह्निभरणं रसवेदे खयुग्मकम्[6] ।
तदधो रामचक्रञ्च[7] सप्तषट्सु च रामकम् ।। ११९ ।

तदधो निरृते स्वर्गे युगाङ्कशून्यवेदकम् ।
केवलाधो जलेशस्य मन्दिरं सुमनोहरम् ।। १२० ।

---

१. शून्याङ्कम् इति क० ।
२. अवश्यं भावयेत् चक्रम् इति क० ।
३. शूलाष्टकं लिखेत् इति क० ।
४. कुलेश्वर इति क० ।
५. महेन्द्रभवनम् इति क० ।
६. त्रियुग्मकम् इति क० ।
७. यमचक्रञ्च इति क० ।

रामेषु शून्यबाणाढ्यं तस्यामेवायुमन्दिरम् ।
भुजहस्तखरसाढ्यं चक्रं दमीश्वरात्मकम्[1] ॥ १२१ ।

नवकोणं मध्यदेशे पञ्चाङ्गभागमालिखेत्[2] ।
तन्मध्ये रचयेद्वर्णं पञ्चकोणे[3] त्रिकोणके ॥ १२२ ।

इन्द्राधो विलिखेद्धीरो वर्णमाद्यञ्च सप्तकम् ।
भागे दक्षिणकोणेषु ऋकारादङ्ककं[4] लिखेत् ॥ १२३ ।

ककारादिटकारान्तं तदधो विलिखेद् बुधः ।
तद्वामे ठादिमान्तञ्च वर्णलक्षणकारणम् ॥ १२४ ।

तदूर्ध्वे मादिवर्णञ्च चक्रञ्च गणयेत्ततः ।
पूर्वकोणपतिः शक्रो द्वितीयेशौ यमानलौ ॥ १२५ ।

निरृतिर्वरुणश्चैव तृतीयमन्दिरेश्वरः ।
चतुर्थाधिपतिर्वायुः कुबेरो नाथ इत्यपि ॥ १२६ ।

पञ्चगेहस्याधिपतिरीशो विश्वविदाम्बरः[5] ।
पञ्चकोणे प्रतिष्ठन्ति[6] पञ्चभूताशयस्थिताः ॥ १२७ ।

---

१. प्राणवायुगतं हि तम् इति क० ।

तदूर्ध्वे प्रीतिदं नाम गुह्यकेश्वरमन्दिरम् ।
पञ्चपञ्चखसप्ताढ्यं देवतादर्शनप्रदम् ॥
तदूर्ध्वे शेषगेहे च महेशस्यापि मन्दिरम् ।
नवमाष्टमथाष्टाढ्यं चक्रगोपीश्वरात्मकम् ॥ इति क० पु० अधिकः पाठः ।

२. पञ्चाङ्कं भागतो लिखेत् क० ।

३. पञ्चगेहेषु कोणके इति क० ।

४. ऋकारादित्रयं लिखेत् इति क० ।

एकगेहे स्थितं रत्नं देवतानिजवर्णयोः ।
तदा सिद्धिमवाप्नोति विष्णौ भक्तिः दृढा भवेत् ॥
तदा तु गणयेन्मन्त्री विष्णुचक्रमनोरमम् ।
प्राणोऽपानः समानश्चोदानो व्यानश्च वायवः ॥ क० अ० पाठः ।

५. विश्वविदामिति षष्ठ्यन्तम्, अथवा वेत्तीति विदः, इगुपधत्वात् कप्रत्ययः, विश्वस्य विदः, तस्य अम्बरमिवाम्बरं यस्य सः ।

६. पृषोदरादित्वात् परस्मैपदम् । अथवा आर्षत्वात् ।

प्राणे सिद्धिमवाप्नोति चापाने व्याधिपीडनम् ।
समाने सर्वसम्पत्तिरुदाने निर्धनं भवेत् ॥ १२८ ।

व्याने च ईश्वरप्राप्तिरेतस्मिन् लक्षणं शुभम् ।
पूर्वगेहे महामन्त्रं मन्त्रत्यागं करोति यः ॥ १२९ ।

स तावत् साधकश्रेष्ठो विष्णुमार्गेण शङ्कर ।
विशेषं श्रृणु यत्नेन सावधानावधारय ॥ १३० ।

सप्ताक्षरं त्र्यक्षरं च दशमाक्षरमेव च ।
पूर्वगेहे यदि भवेदाद्याक्षरसमन्वितम् ॥ १३१ ।

तदा भवति सिद्धिश्च सर्वमेवंप्रकारकम् ।
षष्ठाक्षरं वेदवर्णं विंशत्यर्णं महामनुम् ॥ १३२ ।

आम्नायाद्यक्षरं व्याप्तं सफलं गणयेद् बुधः ।
तथास्मिन् मम गेहे च मन्त्रं सप्ताक्षरं शुभम् ॥ १३३ ।

षष्ठाक्षरञ्च गणयेत्त्रिंशदक्षरमेव च ।
आद्याक्षरसमायुक्तं साध्यसाधकयोरपि ॥ १३४ ।

एकस्यापि च लाभे च मन्त्रसिद्धिरखण्डिता ।
मन्त्राक्षरादिलाभञ्च अवश्यं गणयेदिह ॥ १३५ ।

नैर्ऋते च जलेशस्य द्व्यक्षरञ्च नवाक्षरम् ।
शून्यदेवाक्षरं[1] नाथ गणनीयं विचक्षणैः ॥ १३६ ।

तथात्र अक्षरं मन्त्रं पञ्चाक्षरमनुं तथा ।
पञ्चाशदक्षरं[2] मन्त्रं मन्दिरे गणयेत् शुभम् ॥ १३७ ।

वायुकोणे कुबेरस्य मन्दिरे गणयेत्तथा ।
द्वाविंशत्यक्षरं मन्त्रं शून्यषष्ठमनुन्तथा ॥ १३८ ।

पञ्चाक्षरं तारिकायाः शिवे पञ्चाक्षरं तथा ।
सुसप्तमन्त्रग्रहणे सफलं परिकीर्तितम् ॥ १३९ ।

---

१. वेदाक्षरं इति क० ।

२. पञ्चाशदक्षराणि यस्मिन्निति विग्रहः ।

ईशानपञ्चकोणे च सफलञ्च नवाक्षरम् ।
अष्टाक्षरं हि विद्याया गणयेत् सहितं सुधीः ॥ १४० ।

एतदुक्तञ्च गणयेद्विरुद्धं नैव शीलयेत् ।
प्राणमित्रं समानञ्च समानो व्यानबान्धवः ॥ १४१ ।

एतत्स्थितञ्च गृह्णीयाद्दोषभाक् स[1] भवेत् क्वचित् ।
एकदैव[2] प्रिये प्रीतिरेकगेहे तथा प्रियम् ॥ १४२ ।

गृहीत्वा विष्णुपदवीं प्राप्नोति मानवः क्षणात् ।
यदि चक्रं न विचार्य रिपुमन्त्रं सदा न्यसेत् ॥ १४३ ।

निजायुषं[3] छिनत्त्येव मूको भवति निश्चितम् ।
विचार्य यदि यत्नेन सर्वचक्रे प्रियं हितम् ॥ १४४ ।

महामन्त्रं महादेव लघु सिद्ध्यति भूतले ॥ १४५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्वचक्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावनिर्णये भैरवभैरवीसंवादे तृतीयः पटलः ॥

---

१. न इति क० । २. एकदैव पतौ इति क० ।
३. निजं च तदायुश्चेति निजायुषम्, समासान्तोऽच्प्रत्ययः अजिति विभक्तेन योगेन ।

अथ चतुर्थः पटलः

श्रीभैरवी उवाच—

अथ वक्ष्यामि चक्रान्यत्[1] शृणु भैरव सादरम् ।
येन हीना[2] न सिद्‌ध्यन्ति महाविद्या वरप्रदाः ।। १ ।

तव चक्रं[3] ब्रह्मणा व्यक्तं ब्रह्मचक्रमुदाहृतम् ।
यस्य ज्ञानात् स्वयं ब्रह्मा स्वबलेन भवं सृजेत् ।। २ ।

अकालमृत्युहरणं[4] परं ब्रह्मपदं व्रजेत्[5] ।
चतुष्कोणे चतुष्कोणं तन्मध्ये च चतुश्चतुः ।। ३ ।

मध्यगेहं वेष्टयित्वा इष्टं[6] मन्दिरमुत्तमम् ।
अष्टकोणे महादेव षोडशस्वरमालिखेत् ।। ४ ।

अष्टकोणं वेष्टयित्वा वृत्तयुग्मं लिखेत् सुधीः ।
मध्यगेहे चतुष्कोणे कादिक्षान्तञ्च वर्णकम् ।। ५ ।

दक्षिणावर्त्तयोगेन विलिखेत् साधकोत्तमः ।
तदूर्द्ध्वे स्वगृहे चाङ्कं विलिख्य गणयेत् सुधीः ।। ६ ।

चतुर्गेहस्योद्‌र्ध्वदेशे युग्मगेहे क्रमाल्लिखेत् ।
साध्यस्य साधकस्यापि मेषादिकन्यकान्तकम् ।। ७ ।

अधो लिखेत्तुलाद्यन्तमिति राश्यादिकं शुभम् ।
ततो लिखेद् गेहदक्षे युग्मगेहे महेश्वर ।। ८ ।

---

१. चक्रेन्द्रं इति क० ।
२. विना इति क० ।
३. तच्चक्रं ब्रह्मणा प्रोक्तम् इति क० । तव चक्रं ब्रह्मणा च इति ख० ।
४. न कालोऽकालः, अकाले मृत्युरकालमृत्युस्तस्य हरणम् ।
५. ब्रह्मपदप्रदम् इति क० ।
६. अष्ट इति क० ।

तारकानाशिनो ताराद्यन्तान् दक्षिणतो लिखेत् ।
वर्णक्रमेण विलिखेद् वेदमन्दिरमण्डले ॥ ९ ।

ऊद्ध्वाधः क्रमशो लेख्यमङ्गतारं[1] सुरेश्वर ।
ततो हि गणयेन्मन्त्री योजयित्वा क्रमेण तु ॥ १० ।

सुखं राज्यं धनं वृद्धिं कलहं कालदर्शनम् ।
सिद्धिमृद्धिमष्टकोणे विदित्वा च शुभाशुभम् ॥ ११ ।

गणयेद्राशिनक्षत्रं मनुचाहं[2] विवर्जयेत् ।
सुखे सुखमवाप्नोति राज्ये राज्यमवाप्नुयात् ॥ १२ ।

धने[3] धनमवाप्नोति वृद्धौ वृद्धिमवाप्नुयात् ।
मेषो वृषमिथुनश्च कर्कटः सिंह एव च ।
कन्यका देवता ज्ञेया नक्षत्राणि पुनः शृणु ॥ १३ ।

ऊद्ध्वं युग्मगृहस्यापि दक्षवामे च भागके ।
नक्षत्राणि सन्ति यानि तानि शृणु महाप्रभो ॥ १४ ।

अश्विनी मृगशिराश्लेषा हस्तानुराधिका तथा ।
उत्तराषाढिकार्द्रा वा पूर्वभाद्रपदा तथा ॥ १५ ।

दक्षाग्रहस्तितास्तारा:[4] स्पष्टीभूताश्च देवताः ।
एतासामधिपा एते राशयो ग्रहरूपिणः ॥ १६ ।

कर्कटकेशरी कन्यादेवताः परिकीर्तिताः ।
एतेषाञ्चापि वर्णानामधिपाश्चेति राशयः ॥ १७ ।

---

१. अङ्गं तारयति इति अङ्गतारस्तम् । २. मृत्युगेहं इति क० ।

३. कलहे सर्वनाशः स्यात् मरणं कालदर्शनम् ।
सिद्धौ सिद्धिमवाप्नोति ऋद्धौ ऋद्धिं न संशयः ॥
आद्यस्वरयुगस्यापि देवता इति राशयः । इति क० ।

४. दक्षाग्रेण हस्तिता इति तत्पुरुषः । दक्षगेहस्थितास्तारा इति क० ।

ककारस्य[1] खकारस्य ञकारस्य ढकारपः ।
दकारस्य फकारस्य यकारस्य सकारपः ॥ १८ ।

नकारस्यापि पतयो ज्ञेयाश्च क्रमशः प्रभो ।
संशृणु रोहिणीपुष्या तथा चोत्तरफाल्गुनी ॥ १९ ।

विशाखा च तथा ज्ञेया पूर्वाषाढा च तारका ।
तथा शतभिषातारा वाममन्दिरपर्वगाः ॥ २० ।

एतासामधिपा एते राशयो ग्रहरूपिणः ।
मेषो वृषो मिथुनश्च ईश्वराः परिकीर्तिताः ॥ २१ ।

एतद्गेहस्थितं वर्णमेते रक्षन्त्यनित्यशः ।
ककारस्य नकारस्य ऋकारस्य उकारपः ॥ २२ ।

अकारस्य पकारस्य मकारस्य वकारपः ।
हकारस्याधिपा एते ऋद्धिमोक्षफलप्रदाः ॥ २३ ।

दक्षिणाधोगृहस्यापि देवता इति राशयः ।
तुला च वृश्चिकश्चैव धनुश्चैव ग्रहेश्वरः ॥ २४ ।

एतासां तारकाणाञ्च पतयो गदिता मया ।
भरण्यार्द्रमघाचित्राज्येष्ठाश्रवणवल्लभाः ॥ २५ ।

तथोत्तरभाद्रपदा वल्लभाः राशयो मताः ।
अथ गेहस्थितं[2] वर्णं शृणु नाथ भयापह ॥ २६ ।

यकारस्य[3] दकारस्य टकारस्य नकारपः ।
धकारस्य वकारस्य चकारस्य यकारपः ॥ २७ ।

---

१. ककारस्य ङकारस्य सकारस्य डकारपः ।
अकारस्य पकारस्य मकारस्य ठकारपः ॥ इति क० ।

२. अधो गेहस्थितं इति क० ।

३. गकारस्य अकारस्य टकारस्य शकारपः ।
धकारस्य यकारस्य रकारस्य षकारपः ॥ इति क० ।

क्षकारपणका[1] एते राशयः परिकीर्तिताः ।
धनवृत्तिप्रदा नित्या नित्यस्थाननिवासिनः ॥ २८ ।
वामाधोमन्दिरस्यापि वल्लभा इति राशयः ।
मकराधस्तु[2] कोष्ठेषु मीनो राशिफलस्थिताः ॥ २९ ।
एतानि भानि रक्षन्ति शूलपाशासिधारकाः[3] ।
पुनर्वसुः कृत्तिका च तथाभंपूर्वंफल्गुनी ॥ ३० ।
स्वाती मूला धनिष्ठा च रेवती वामगेहगाः ।
एतासामधिपा एते जलस्था ग्रहदेवताः ॥ ३१ ।
एतान् वर्णान्[4] प्ररक्षन्ति गृहस्था नव राशयः ।
धकारस्य जकारस्य टकारस्य तकारपः ॥ ३२ ।
नकारस्य भकारस्य लकारस्य तकारपः ।
कलहादिमहादोषकालदर्शनकारकाः[5] ॥ ३३ ।
राशयो लोकहा नाथ तन्मन्त्रं परिवर्जयेत् ।
यद्येकदेवतागेहं विभिन्नञ्च सुशोभनम् ॥ ३४ ।
चतुःस्थानं युगस्थानं सर्वत्रापि निषेधकम् ।
एकगेहस्थितं मन्त्रं बहुसौख्यप्रदायकम् ॥ ३५ ।
नाम्न आद्यक्षरं नीत्त्वा राशिनक्षत्रविस्मृतौ ।
[6]सभावं साधकश्रेष्ठः कलहे कलहं भवेत् ॥ ३६ ।
[7]रिपुश्चेन्मूलनाशः स्यात् कलहोऽपि सुरेश्वर ।
नेत्रयुग्मं स्वरं पाति सिंहो हि कन्यकां तथा ॥ ३७ ।

---

१. क्षकारपालका इति क० । २. मकरः कुम्भश्चैक मीनो राशिकुलस्थिताः इति क० ।
३. शूलं च पाशश्च असिश्च, तेषां धारकाः । ४. एतान् वर्णान् प्रक्षरन्ति गृहस्थान् राशयस्त्रयः ॥ इति क० । ५. कालदर्शनं कुर्वन्ति कारयन्ति वा इति कालदर्शनकारकाः ।
६. गणयेत् साधकश्रेष्ठः इति क० ।
७. रिपुश्चेन्मृत्युलाभः स्यात् कलहेऽपि सुरेश्वर ।
कलहं कालगेहश्च वर्जयेत् प्रयतः सुधीः ॥
चक्रोद्धारञ्च कथितं फलं श्रृणु मुदा हितम् ।
दीक्षादिवसे नाथ चक्रराजं यजन्ति ये ॥
ऐहिके धननाथः स्यात् परे याति परं पदम् ॥ इति क० ।

कर्णयुग्मं तुला पाति संयुगं वृश्चिको धनुः ।
चयुगं मकरः पाति कुम्भो मीनश्च पाति हि ॥ ३८ ।

ओष्ठञ्च पाति च तथा अधरं मेष एव च ।
दन्तयुग्मं[1] वृषः पाति मिथुनः शेषगोऽक्षरः ॥ ३९ ।

यस्य ये ये राशयः स्युस्तस्य तत्तच्छुभं स्मृतम् ।
एकराशिः शुभं नित्यं ददाति च मनोरथम् ॥ ४० ।

अस्यालं सुखदं साधकः सिद्धिभाग् भवेत् ।
भिन्नराशौ वर्जनीयं कलहं कालदर्शनम् ॥ ४१ ।

श्रूयतां शैलजानाथ चक्रं श्रीत्रिदशात्मकम् ।
पूर्वपश्चिमभेदेन षट् च रेखाः समालिखेत् ॥ ४२ ।

वामादि दक्षिणान्तञ्च रेखा दश समालिखेत् ।
पञ्चगेहे पूरकाङ्कं सर्वाधोहारकङ्ककम् ॥ ४३ ।

तन्मध्ये रचयेदक्षं देवताग्रहसंयुतम् ।
पूरकाङ्कं [2]मध्यगेहे सप्तर्षियुक्तमालिखेत् ॥ ४४ ।

तद्दक्षिणे द्वादशञ्च तद्दक्षेण रसं तथा ।
तद्दक्षे अष्टदशके तद्दक्षे षोडशस्मृतम् ॥ ४५ ।

पूरकाङ्कं ततो लेख्यं इन्द्राद्यङ्काश्च दक्षतः ।
इन्द्रगेहे च शतकं विधिविद्याफलप्रदम् ॥ ४६ ।

धर्मगेहे शून्यसप्त युगलं विलिखेद् बुधः ।
अनन्तमन्दिरे नाथ शून्याष्टवसुरेव च ॥ ४७ ।

कालीगृहे शून्यवेदवामाद्याङ्कं विलिखेत्ततः ।
धूमावतीमन्दिरे च शून्यखेषु निशापतिम् ॥ ४८ ।

इन्द्राद्या दक्षतो लेख्या अङ्काश्चन्द्राधिदेवताः ।
[3]शून्याष्टचन्द्रयुक्तञ्च सर्वत्र देवता लिखेत् ॥ ४९ ।

---

१. दन्तयुग्मं वृषश्चैव मिथुनमेषगौ स्वरौ । इति क० ।
२. आद्यगेहे इति क० ।
३. शून्यषष्ठचन्द्रयुक्तं सर्वत्र दक्षतो लिखेत् । इति क० ।

तथाश्विनीकुमारौ[1] च शून्यानलयुगायुगौ[2] ।
तत्पश्चात् पूर्वगेहञ्च सहस्रार्कसमन्वितम् ।। ५० ।

तारिणीमन्दिरस्थाङ्कं शून्यवेदं तथैव[3] च ।
बगलामुखीगेहस्थं शून्याष्टचन्द्रसंयुतम् ।। ५१ ।

ततश्चन्द्रगृहस्याधो वायुर्गेहं मनोरमम् ।
रन्ध्रवेदात्मकं गेहं सर्वसिद्धिप्रदायकम् ।। ५२ ।

राहुगेहं महापापं शून्यशून्यमुनिप्रियम् ।
पश्चादेकत्र[4] हस्तञ्च खशून्ययुगलात्मकम् ।। ५३ ।

षोडशीमन्दिरे शून्यमष्टचन्द्रसमन्वितम्[5] ।
मातङ्गीमन्दिरे शून्यरुद्रचन्द्रसमन्वितम् ।। ५४ ।

वायोरधोवरुणस्य गृहं सप्तशशिप्रियम् ।
तरुणी गेहमध्ये च शून्याष्टकसमन्वितम् ।। ५५ ।

बुधगेहस्थिताङ्कञ्च शून्यचन्द्रयुगात्मकम् ।
भुवनेशीमन्दिरस्थं शून्याष्टकशशिप्रियम् ।। ५६ ।

वरुणाधः कुबेरस्य गृहस्थं षट् च युग्मकम् ।
आनन्तभैरवी गेहे दशकं परिकीर्तितम् ।। ५७ ।

धरणी गृहमध्ये च शून्ययुग्मेन्दुसंयुतम् ।
भैरवी गृहमध्यस्थं शून्ययुगलचन्द्रकम् ।। ५८ ।

[6]राशिगृहस्थितं शून्यर्षिचन्द्रमण्डलसंयुतम् ।
कुवेराधः [7]स्वकं चक्रस्थिताङ्कं सर्वसिद्धिदम् ।। ५९ ।

---

१. अश्विनीकुमारयो द्वित्वं भवति—इति कृत्वा द्विवचनान्तता नियता ।

२. शून्यानलयुगात्मकौ इति क० ।

३. शून्यवेदषडात्मकम् इति क०

४. पश्चादर्कगृहस्थञ्च खशून्ययुगलात्मकम् इति क० ।

५. षष्ठ इति क० ।

६. वाणिगृहस्थितम् इति क० ।

७. सुखम् इति क० ।

ईश्वरस्य गृहस्थञ्च सप्तशून्ययुगात्मकम् ।
तिरस्करिण्या गेहस्थं सहस्राङ्कसमन्वितम् ।। ६० ।

किङ्किणीमन्दिरं पश्चादष्टचन्द्रसमन्वितम् ।
छिन्नमस्तागृहं पश्चाच्छून्याष्टचन्द्रमण्डलम् ।। ६१ ।

वागीश्वरीगृहं पश्चात् सप्तमं चन्द्रमण्डलम् ।
[1]महाफलप्रदातारं [2]धर्मो रक्षति तं पुनः ।। ६२ ।

ईश्वरस्य अधोगेहे वटुकस्य गृहं ततः ।
शून्याष्टमाद्यं स्वगृहं धर्मार्थकाममोक्षदम् ।। ६३ ।

तत्पश्चात् डाकिनीगेहं खशून्यमुनिसंयुतम् ।
हन्ति साधकसौख्यं[3] हि क्षणादेव न संशयः ।। ६४ ।

स्वगृहे स्वीयमन्त्रस्य फलदं परिकीर्तितम् ।
भीमादेवीगृहं पश्चात् खसप्तचन्द्रमण्डलम् ।। ६५ ।

भयदं सर्वदेशे तु वर्जयेत् गृहान्तरम् ।
लक्षवर्णं लिखेत् शेषगृहे द्वे पण्डितोत्तमः ।। ६६ ।

इन्द्रगेहावधिं धीरो [4]वकारादिकवर्णकम् ।
क्षकारान्तं लिखेत्तत्र गणयेत् साधकस्ततः ।। ६७ ।

पूरकाङ्कमूद्र्ध्वदेशे हारकाङ्कमधो लिखेत् ।
निजनामाक्षरं यत्र तत्कोष्ठाङ्कं महेश्वर ।। ६८ ।

नोत्त्वा च पूजयेद्विद्वान् स्वस्वगेहोर्ध्वदेशगैः ।
[5]अङ्कैस्ततो हरेर्नाथ अधोऽङ्के हार्यशेषकम् ।। ६९ ।

विस्तारञ्चेद्देवताङ्कस्तदङ्कः शुभदः स्मृतः ।
अल्पाङ्कः शुभदः प्रोक्तः साधकस्य सुखावहः ।। ७० ।

---

१. महच्च तत्फलं चेति महाफलम्, तस्य प्रदातारम् । २. धर्मः क्षरति तस्य च इति क० ।
३. मुख्यम् इति क० । ४. ककारादि इति क० ।
५. आज्ञास्ततो हरेर्नाथ अधोर्द्धेऽङ्के द्वाष्टशोधकम् इति क० ।

एकाक्षरे महासौख्यं तत्रापि गणयेद् वचः[1] ।
धीराङ्कः शून्यगामी च देवताङ्कस्तथा विभो ॥ ७१ ॥

तदा नैव शुभं विद्यादशुभाय प्रकल्प्यते ।
एके धनमवाप्नोति द्वितीये राजवल्लभः ॥ ७२ ॥

तृतीये जाप्यसिद्धिः स्याच्चतुर्थे मरणं ध्रुवम् ।
पञ्चमे पञ्चमानः[2] स्यात् षष्ठे दुःखोत्कटानि च ॥ ७३ ॥

शैवानां [3]शाक्तवर्णानामित्यङ्कः परिगृह्यते ।
वैष्णवानां निषेधे[4] च पञ्चमाङ्को निषेधकः ॥ ७४ ॥

यासां यासां देवतानां हिंसा तिष्ठति चेतसि ।
तन्मन्त्रग्रहणादेवाष्टैश्वर्ययुतो[5] भवेत् ॥ ७५ ॥

यद्देवस्याश्रिता ये तु तद्गृहाङ्कं हरन्ति ते ।
ऊर्द्ध्वाङ्केन पूरयित्वा अधोऽङ्केन हरेत्सदा ॥ ७६ ॥

ऋणिधनिमहाचक्रं वक्ष्यामि शृणु तत्त्वतः ।
दर्शनादेव कोष्ठस्य जानाति पूर्वजन्मगम् ॥ ७७ ॥

देवं बहुतराङ्केषु ज्ञात्वा सिद्धीश्वरो भवेत् ।
निजसेव्यां महाविद्यां गृहीत्त्वा मुक्तिमाप्नुयात् ॥ ७८ ॥

कोष्ठशुद्धञ्च मन्त्रञ्च ये गृह्णन्ति द्विजोत्तमाः ।
तेषां दुःखानि नश्यन्ति ममाज्ञा बलवत्तरा ॥ ७९ ॥

कोष्ठशुद्धं महामन्त्रं फलदं रुद्रभैरव ।
न हातव्यं महामन्त्रं सद्गुरुप्रियदर्शनात् ॥ ८० ॥

तत्र कोष्ठं न विचार्यं चेज्जानाति विचार्यकम् ।
महाविद्या महामन्त्रे विचार्यकोटिपुण्यभाक् ॥ ८१ ॥

---

१. न च इति क० ।
२. पचि व्यक्तीकरणे इति धातोः कर्तरि शानच्प्रत्ययः, ततः पञ्चमान इत्यस्य साधुत्वम् ।
३. शाक्तवर्गाणाम् इति क० ।
४. निषेध्याङ्कः इति क० ।
५. तुच्छतो भवेत् इति ग० ।

अविचारे चोक्तफलं ददाति कामसुन्दरी ।
कोष्ठान्येकादशान्येव देवेन[1] पूरितानि च ॥ ८२ ।

अकारादिहकारान्तं लिखेत् कोष्ठेषु तत्त्ववित् ।
प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु ॥ ८३ ।

द्वयं द्वयं लिखेत्तत्र विचारे खलु साधकः ।
शेषेष्वेकैकशो[2] वर्णान् क्रमशस्तु लिखेत्सुधीः ॥ ८४ ।

[3]अमावर्णद्वयस्याद्धविधिस्तु क्रमशोऽङ्ककम् ।
आद्यमन्दिरमध्ये तु षष्ठाङ्कं विलिखेद् बुधः ॥ ८५ ।

द्वितीये षष्ठचिह्नञ्च तृतीये च गृहे तथा ।
चतुर्थे गगनाङ्कञ्च पञ्चमे चक्रत्रयं तथा ॥ ८६ ।

षष्ठचापे[4] चतुर्थञ्च सप्तमे च चतुर्थकम् ।
अष्टमे गगनाङ्कञ्च नवमे दशमं तथा ॥ ८७ ।

शेषमन्दिरमध्ये तु त्रयाङ्कं विलिखेत्ततः ।
एते नाथ साध्यवर्णाः कथिताः क्रमशो ध्रुवम् ॥ ८८ ।

कथयामि साधकार्णं सकलार्थनिरूपणम् ।
आद्यगेहे द्वितीयञ्च द्वितीये च तृतीयकम् ॥ ८९ ।

तृतीये पञ्चमं प्रोक्तं गगनं वेदपञ्चके ।
षष्ठे युगलमेवं हि सप्तमे [5]चन्द्रमण्डलम् ॥ ९० ।

अष्टमे गगनं प्रोक्तं नवमे च चतुर्थकम् ।
वेदञ्च दशमे प्रोक्तं चन्द्रमेकादशे तथा ॥ ९१ ।

साधकार्णाः स्मृताः त्वेते वर्णमण्डलमध्यगाः ।
साध्यवर्णान् महादेव स्वरव्यञ्जनभेदकान् ॥ ९२ ।

---

१ वेदेन इति ग० ।
२. एकमेकमिति एकैकम्, तत एव स्वार्थे शस् ।
३. अ-आवर्णद्वयस्य इति क० ।
४. षष्ठगेहे इति क० ।
५. चक्रमण्डलम् इति क० ।

एवं हि सर्वमन्त्रार्णानमष्टाद्यङ्कैः[1] प्रपूरयेत् ।
एकीकृत्य हरेदष्टसंख्याभिः [2]क्षणवल्लभे ।। ९३ ।

यस्यापहस्थितं वर्णं तन्नेभव्यं मनौ शुभे[3] ।
[4]साधकाभिधानवर्णान् स्वरव्यञ्जनभेदकान् ।। ९४ ।

पृथक् पृथक् संस्थितांश्च व्यक्तं शृणु पुनः पुनः ।
द्वितीयाद्यङ्कचन्द्रान्ते संपूर्वाष्टभिराहरेत्[5] ।। ९५ ।

मन्त्रो यस्त्वधिकाङ्कः स्यात्तदा मन्त्रं जपेत् सुधीः ।
समेऽपि च जपेन्मन्त्रं न जपेत्तु ऋणाधिके ।। ९६ ।

शून्ये मृत्युं विजानीयात्तस्माच्छून्यं विवर्जयेत् ।
द्वितीयाद्यङ्कजालञ्च वैष्णवे सुखदं स्मृतम् ।। ९७ ।

द्वितीयाद्यङ्कजालञ्च वैष्णवे सुखदं स्मृतम् ।
द्वितीयाद्यङ्कजालञ्च तथा वै परिकीर्तितम् ।। ९८ ।

इन्द्राद्यङ्कं तथा नाथ सौरे[6] शाक्ते शुभप्रदम् ।
तथा दिक्संख्यकाङ्कश्च साधकस्य शुभप्रदम् ।। ९९ ।

तदङ्कं शृणु यत्नेन पूर्ववत् सकलं स्मृतम् ।
[7]स्थलञ्चैव विभिन्नाङ्कमूर्ध्वाधश्च क्रमेण तु ।। १०० ।

साध्याङ्कान् साधकाङ्कांश्च पूरयेद् गृहसंख्यया ।
गुणिते तु हृते चापि यच्छेषं जायते स्फुटम् ।। १०१ ।

तदङ्कं कथयाम्यत्र एकादशगृहे स्थितम् ।
इन्द्रतारास्वर्गरवितिथिषड्वेददाहनाः[8] ।। १०२ ।

अष्टवसु नवाङ्कस्थाः साध्यार्णगुणिता इति ।
दिग्भूगिरिश्रुतिगजवह्निपर्वतपञ्चमाः ।। १०३ ।

---

१. अष्टाद्यङ्कैः इति ख. ग. । २. कुलवल्लभ इति क ।
३. यद्यत् गेहस्थितं वर्णं तन्त्रे तस्य मनौ शुभे इति क. । ४ साधकस्याभिधान—इति क. ।
५. सम्पूर्वास्वभिवाहरेत् इति ख. ग. । ६. शैवे इति क ।
७. स्थानञ्चैकं इति क. ।
८. इन्द्रश्च तारा च स्वर्गश्च रविश्च तिथिश्च षड्वेदाश्च, ते दह्यन्ते एभिस्ते ।

वेदषष्ठानलाङ्कञ्च गणयेत् साधकाक्षरान् ।
नामाद्यक्षरमारभ्य यावन्मन्त्राक्षरं भवेत् ॥ १०४ ।

तत्संख्याञ्च त्रिधा कृत्वा सप्तभिः संहरेद् बुधः ।
अधिकं च ऋणं प्रोक्तं तच्छेषं धनमुच्यते ॥ १०५ ।

अथवान्यप्रकारञ्च कृत्वा मन्त्रं समाश्रयेत् ।
नामाद्यक्षरमारभ्य यावत् साधकवर्णकम् ॥ १०६ ।

तावत्संख्यां सप्तगुणं कृत्वा वामैर्हरेद् बुधः ।
[1]श्रीविद्येतरविद्यायां गणना परिकीर्तिता ॥ १०७ ।

अथवान्यप्रकारञ्च सकलान् साधकाक्षरान् ।
स्वरव्यञ्जनभेदेन द्विगुणीकृत्य साधकः ॥ १०८ ।

साध्ययुक्तं ततः कृत्वा स्वरव्यञ्जनभेदकम् ।
अष्टाभिः संहरेदङ्कं श्रृणु संहारविग्रहम् ॥ १०९ ।

पूर्वंचारक्रमं सम्यक् सर्वत्रापि शुभाशुभम् ।
अस्य विचारमात्रेण सिद्धिः सर्वार्थसाधिका ॥ ११० ।

पूर्वजन्माराधितायां तां प्राप्नोति हि देवताम् ।
अथान्यत् सम्प्रवक्ष्यामि सावधानावधारय ॥ १११ ।

उल्काचक्रं सर्वसारं मन्त्रदोषादिनिर्णयम् ।
मत्स्याकारमूर्ध्वमुखं सर्वमन्त्रादिविग्रहम् ॥ ११२ ।

स्कन्धदेशावधिर्नाथ पुच्छपर्यन्तमेव च ।
एकाक्षरादिमन्त्रादिद्वादशान्ताक्षरात्मकम् ॥ ११३ ।

विलिखेत् पृष्ठदेशे तु शुभाशुभविशुद्धये ।
त्रयोदशाक्षरान् वाथ एकविंशाक्षरान्तकम् ॥ ११४ ।

नेतव्यं साधकैर्मन्त्रं पृष्ठस्थमुदरस्थकम् ।
तथा श्रोशुभदं प्रोक्तं [2]कण्ठादिपुच्छकान्तकम् ॥ ११५ ।

---

१. श्रीविद्यात इतरा विद्या श्रीविद्येतरविद्या, तस्याम् ।
२. कण्ठ आदिर्यस्य तत्, पुच्छोऽन्तो यस्य तत्, पुच्छ एव पुच्छकः, ततः कर्मधारयः ।

द्वाविंशादि चतुस्त्रिंशदक्षरान्तमनुं शुभम् ।
पुच्छस्थं नापि गृह्णीयात् मुखस्थञ्च तथा ध्रुवम् ॥ ११६ ।

शीर्षस्थञ्चापि गृह्णीयात् तदक्षरं शृणु प्रभो ।
पञ्चत्रिंशादि[1] द्विचतुर्द्वाविंशदन्तमेव च ॥ ११७ ।

मस्तकस्थं शुभं प्रोक्तं मुखवर्णान् शृणु प्रभो ।
त्रिचत्वारिंशदर्णादि एकपञ्चाशदन्तकम् ॥ ११८ ।

मुखस्थमन्तमशुभं न गृह्णीयात् कदाचन ।
पृष्ठस्थं शृणु यत्नेन निरर्थकमहाश्रमम् ॥ ११९ ।

श्रमगात्रस्य पीडाभिर्देवता कुप्यतेऽनिशम् ।
द्विपञ्चाशदक्षरादि एकषष्टितमान्तकान् ॥ १२० ।

वर्णान् पुच्छस्थितानेतान् नेत्रस्थान् शृणु वल्लभ ।
[2]द्विषष्टितमवर्णादि चतुःषष्ट्यक्षरान्तकान् ॥ १२१ ।

अङ्कं लोचनसंस्थं च[3] ततोऽन्यं रसनास्थितम् ।
तत्सर्वं शुभदं प्रोक्तमेतदन्यतमं स्मृतम् ॥ १२२ ।

वैष्णवानाञ्च शैवानां शाक्तानां मन्त्रजापने ।
ततोऽन्यदेवभक्तानां भुक्तिमुक्तिप्रदं नृणाम् ॥ १२३ ।

अथ वक्ष्ये महादेव चक्रसारं सुदुर्लभम् ।
रामचक्रं महाविद्या सर्वमन्दिरमेव च ॥ १२४ ।

सर्वसिद्धिप्रदं मन्त्रं निजनामस्थमाश्रयेत् ।
तदैव सिद्धिमाप्नोति सत्यं सत्यं महेश्वर ॥ १२५ ।

तत्प्रकारं शृणु क्रोधभैरव प्रियवल्लभ ।
नवाङ्कान् प्रलिखेद् विद्वान् वामदक्षिणभागतः ॥ १२६ ।

---

१. पञ्चत्रिंशादिद्विचत्वारिंशदर्णान्तमेव च ।

२. द्विषष्टितमो वर्णा आदिर्येषाम्, चतुःषष्ट्यक्षरमन्ते येषां तान् । बहुव्रीहिद्वयगर्भः कर्मधारयः ।

३. लोचनमन्त्रञ्च—इति क० ।

तन्मध्ये क्रमशो दद्यात्तथा सप्तदशाङ्ककान् ।
दक्षिणादिक्रमेणैव मुक्तविद्याः समालिखेत् ॥ १२७ ।

अकारादिक्षकारान्तं सर्वस्मिन् मन्दिरे लिखेत् ।
[1]वालादिदेवताः सर्वा भ्रामयेन्ताश्च देवताः ॥ १२८ ।

अस्याकाशविधे[2] गेहे सान्तनित्यं फलप्रदम् ।
पुनर्विलोममार्गेण आदिक्षान्तार्णमन्दिरे ॥ १२९ ।

रक्तदन्तादि श्रीविद्या मन्त्रान्तं विलिखेद् बुधः ।
क्षकाराद्यनुलोमेन अकारान्तं लिखेत्ततः ॥ १३० ।

पुनस्तच्छेषविद्याश्च शेषगेहे लिखेत् सदा ।
कायशोधनमुख्यादि[3] शैलवासिनि मन्त्रकम् ॥ १३१ ।

पञ्चविंशतिगेहस्थं गणयेत् साधकस्ततः ।
गृहस्थमङ्कं वक्ष्यामि शृणु योगीशवल्लभ ॥ १३२ ।

वालागृहादिशेषान्तं मुनिहस्तविधौ गृहे ।
क्रमेण शृणु तत्सर्वं सावधानावधारय ॥ १३३ ।

दक्षिणावर्तयोगेन गणयेत् क्रमशो बुधः ।
वसुसप्तपञ्चमेषु वह्निवेदानलस्तथा ॥ १३४ ।

मुनिषष्ठाद्यवेदाश्च[4] सप्तेषु मुनयस्तथा ।
[5]पञ्चवेदेषु वसवो वेदेषु वह्नयस्तथा ॥ १३५ ।

[6]वह्निवेदाश्च सम्प्रोक्ता आकाशं तदनन्तरम् ।
आकाशानन्तरे गेहे अनलं परिकीर्तितम् ॥ १३६ ।

---

१ वालादिदेवताः—इति श्लोकः क० पु० नास्ति ।

२. युग्माकाशविधौ गेहे सन्ति नित्यं फलप्रदाः, इति क. ।

३. कायशोधनमोक्षादि, इति क. ।

४. पञ्चर्षिः वसुवालाश्च वेदपञ्चमषष्टकाः ।
वह्न्यग्निबन्धुवसवः सप्ताष्टनवमास्तथा ॥
पञ्चवेदानङ्काश्च वेदवेदानलस्तथा । इति क. पु. अधिकः पाठः ।

५. पञ्च वेदा इषवो वसवः ।

६. वह्निपदेन त्रयः, वेदाश्चत्वारः, मध्यमपदलोपिसमासः ।

तत्पश्चात् सर्वगेहेषु सर्वाङ्कं दक्षतः शृणु ।
वह्निवह्निवेदवह्नि वेदवह्नय एव च ॥ १३७ ।

श्रवणाक्षिवेदवाण[1] वेदेषु सुपकास्तथा ।
षष्ठाष्टसप्तमाः प्रोक्ता वह्न्यग्नीषु मुनिस्तथा ॥ १३८ ।

मुनीषु वाणवेदाश्च मुन्यग्निवह्नयस्तथा ।
वह्निवेदवाणसप्त अष्टाङ्कवेदवाणकाः ॥ १३९ ।

पञ्चसप्तानलाग्निश्च वह्नीषु वाणवाणकाः ।
वाणवेदकान्तवेदकान्तश्रुतिचतुर्थकाः ॥ १४० ।

रार्मर्षिमुनिषष्ठाश्च सप्तेषु रामवेदकाः ।
वेदसप्ताष्टवसवो नवमाष्टमसप्तमाः ॥ १४१ ।

वह्न्यग्निवेदवाणाश्च वस्वष्टानलवेदकाः ।
सप्ताष्टमाश्च सम्प्रोक्ता गृहाङ्काः परिकीर्तिताः ॥ १४२ ।

येषां मनसि या विद्या सदा तिष्ठति भावने ।
तामाश्रित्य जपेद्विद्वान् तदा सिध्यति निश्चितम् ॥ १४३ ।

स्वनाम देवतानाम पूरयेत् षोडशाङ्ककैः ।
हरेन्निजगृहस्थेन चाङ्केन साधकोत्तमः ॥ १४४ ।

कृतशेषं बहुतरं शुभं देवस्य निश्चितम् ।
अल्पाङ्कसाधकस्यापि सौख्यमेव न संशयः ॥ १४५ ।

उक्तक्रमेण गणयेत् साधकः स्थिरमानसः ।
[2]महाविद्यानायिकादियज्ञभूतादिसाधने ॥ १४६ ।

सम्प्रोक्तं चक्रसारञ्च सर्वतन्त्रेषु गोपितम् ।
ततश्चक्रविचारेण सिद्धिमाप्नोति साधकः ॥ १४७ ।

चतुश्चक्रं प्रवक्ष्यामि शृणुष्व पार्वतीपते ।
वामदक्षिणयोगेन रेखापञ्चकमालिखेत् ॥ १४८ ।

---

१. श्रुत्यग्निवेदवाणाश्च इति क० ।

२. महाविद्या च नायिकादयश्च यज्ञभूतादयश्च तेषां साधने ।

पूर्वपश्चिमभेदेन रेखाः पञ्च समालिखेत् ।
चतुष्कोष्ठे दक्षभागे चतुष्कोष्ठे च मन्त्रवित् ।। १४९ ।
तदधश्चतुष्कोष्ठे तद्वामस्थे चतुर्गृहे ।
प्रलिखेत् क्रमशश्चाद्ये चतुर्मन्दिरमध्यके ।। १५० ।
शीघ्रञ्च शीतलं जप्तं सिद्धञ्चापि ततः परम् ।
अकारञ्च उकारञ्च लृसोकारं ततः परम् ।। १५१ ।
ऊर्द्ध्वस्थमिति वर्णन्तु शीतलस्थं शृणु प्रभो ।
अकारञ्च उकारञ्च लृ लृ सौकारञ्च ततः परम् ।। १५२ ।
तदधो जपगेहस्थं वर्णं शृणु महाप्रभो ।
इकारञ्च ऋकारञ्च एकारञ्च ततः परम् ।। १५३ ।
सिद्धगेहस्थितं वर्णं शृणु सर्वसुखप्रदम्[1] ।
तद्दक्षिणचतुर्गेहे स्थितान् वर्णान् वदामि तान् ।। १५४ ।
आह्लादञ्चाप्रत्ययञ्च [2]मुखञ्च शुद्धमित्यपि ।
एतत्कुलस्थान् सर्वार्णान् शुभाशुभफलप्रदान् ।। १५५ ।
ककारञ्च ऋकारञ्च[3] ॠकारञ्च ञकारकम् ।
आह्लादस्थमिति प्रोक्तं प्राप्तिमात्रेण सिद्धिदम् ।। १५६ ।
प्रत्ययस्थं गकारञ्च घकारं टठमित्यपि ।
मुखस्थं हि ङकारञ्च चकारं डढमित्यपि ।। १५७ ।
शुद्धस्थञ्च उकारञ्च जकारं णतमित्यपि ।
तदधःस्थं चतुर्गेहं लौकिकं सात्त्विकं तथा ।। १५८ ।
मानसिकं राजसिकं चतुर्गेहस्थितं त्त्विमम् ।
लौकिकस्थं थकारञ्च दकारञ्च मकारकम् ।। १५९ ।
सात्त्विकस्थं धकारञ्च लकारञ्च यकारकम् ।
मानसिकञ्च शृणु भो पकारञ्च फमित्यपि ।। १६० ।

---

१. सर्वं सुखं प्रददाति इति–सर्वसुखप्रदम् ।

२. आह्लादञ्चावि प्रत्यायं सुखञ्च शुद्धमित्यपि । इति क० ।

३. रवकारञ्च इति क० ।

श्रृणु राजसिकत्त्वञ्च भकारं वनमित्यपि ।
तन्नामस्थं चतुर्गेहं श्रृणु पञ्चानन प्रभो ।। १६१ ।
सुप्तं क्षिप्तञ्च लिप्तञ्च दुष्टमन्त्रं प्रकीर्तितम् ।
ऊद्र्ध्वगेहस्थितान् वर्णमन्त्रान् गृह्णाति यो नरः ।। १६२ ।
वर्जयित्त्वा सुप्तमन्त्रं क्षिप्तं लिप्तञ्च दुष्टकम् ।
ऐहिके सिद्धिमाप्नोति परे मुक्तिमवाप्नुयात् ।। १६३ ।
यद्यभाग्यवशात्सुप्तादिषु गेहेषु लभ्यते ।
तदा मन्त्रं शोधयेद् वै सुप्तस्तम्भितकीलितैः ।। १६४ ।
वर्द्धितैर्दोषजालस्थैरशुभं भूतशुद्धये ।
भूतलिप्या पुटीकृत्य जप्त्वा सिद्धिं ततो लभेत्[1] ।। १६५ ।
न तु वा वर्जयेद् गेहं चतुष्कं वर्णवेष्टितम् ।
सुप्तगेहस्थितं वर्णं श्रृणु पञ्चानन प्रभो ।। १६६ ।
वकारञ्च हकारञ्च ततोऽन्यद्गृहसंस्थितम् ।
शकारञ्च लकारञ्च क्षिप्तगेहस्थितद्वयम् ।। १६७ ।
धकारञ्च क्षकारञ्च लिप्तगेहस्थितं द्वयम् ।
दुष्टगेहस्थितं नाथ शकारगगनं तथा ।। १६८ ।
निजं सौभाग्ययुक्तं यत्तन्मन्त्रं तदुपाश्रयेत् ।
सूक्ष्मचक्रं प्रवक्ष्यामि हिताहितफलप्रदम् ।। १६९ ।
एतदुक्ताक्षरं शम्भो गृहीत्त्वा जपमाचरेत् ।
वामदक्षिणमारभ्य सप्तरेखाः समालिखेत् ।। १७० ।
भित्वा तदङ्कान् मन्त्री च रेखाचतुष्टयं लिखेत् ।
दक्षिणादिक्रमेणैव बद्धमन्दिरमध्यके ।। १७१ ।
मन्त्राक्षराणि विलिखेदङ्काचारेण साधकः ।
तदङ्कं श्रृणु यत्नेन नराणां भुक्तिमुक्तिदम् ।। १७२ ।
प्रथमे मन्दिरे नाथ भुजाङ्कं विलिखेत्ततः ।
विष्णुमन्त्रादिगेहे च वेदाङ्कं विलिखेद् बुधः ।। १७३ ।

---

१. पूर्ववत् परस्मैपदम् ।

तत्पश्चादष्टमाङ्कं च भुजाधः षष्ठमेव च ।
तद्गेहं शङ्करस्यापि तत्पश्चाद्दशमं गृहे ।। १७४ ।

तत्पश्चाद्द्वादशाङ्कञ्च नायिकास्थानमेव च ।
षष्ठाधोयुगलाङ्कञ्च तत्पश्चादष्टमन्तथा ।। १७५ ।

तद्गृहं शम्भुना व्यस्तं तत्पश्चादष्टमं तथा ।
युगलाधोगृहे चापि चतुर्दशाक्षरन्तथा ।। १७६ ।

तद्दक्षिणे सूर्यगेहं चतुर्द्दशाक्षरान्वितम् ।
तत्पश्चात्षोडशाङ्कञ्च पुनरङ्कं लिखेत्ततः ।। १७७ ।

तद्दक्षिणे वेदवर्णं तत्पश्चादष्टमाक्षरम् ।
ब्रह्ममन्दिरमेवन्तत् षोडशाधः पुनः शृणु ।। १७८ ।

अष्टमाङ्कं ततो युग्ममष्टादशाक्षरं ततः ।
प्रथमस्थं द्वितीयस्थं गृह्णीयाद् शुभदं स्मृतम् ।। १७९ ।

तृतीयस्थं महापापं सर्वमन्त्रेषु कीर्तितम् ।
द्वितीयं प्रथमं दुःखं तृतीयं सर्वभाग्यदम् ।। १८० ।

तृतीयञ्च तथा नाथ गृह्णीयान्निजसिद्धये ।
तृतीये प्रथमं भद्रं द्वितीयं दुःखदायकम् ।। १८१ ।

तृतीयञ्च तथा प्रोक्तमष्टाक्षरगृहं भयम् ।
चतुर्दशाक्षरं भद्रं सूर्यमन्त्रं द्वितीयकम् ।। १८२ ।

तृतीयस्थं षोडशाङ्के महाकल्याणदायकम् ।
[1]अष्टमूर्तिः षोडशाङ्के चतुर्थे शत्रुमारणम् ।। १८३ ।

तृतीयगृहमध्यस्थं ब्रह्मकल्याणदायकम् ।
[2]वस्वक्षरं सर्वशेषगृहमध्यस्थमेव च ।। १८४ ।

अष्टमञ्च महाभद्रं [3]क्षमं चित्तभयप्रदम् ।
अष्टादशाङ्कं शुभदं शेषगेहत्रये तथा ।। १८५ ।

---

१. अधोमुक्तिम् इति क० ।

२. वसूनि = अष्टौ अक्षराणि यस्मिन् ।

३. युग्मम् इति क० ।

येषां यदक्षराणाञ्च मन्त्रं चेतसि वर्तते ।
एतत् शुभाशुभं ज्ञात्वा मन्त्रवर्णं[1] तदाभ्यसेत् ॥ १८६ ।
विष्णुमन्त्रस्थितं[2] मन्त्रं नायिकास्थं शिवस्थकम् ।
सूर्यस्थं ब्रह्मसंस्थञ्च गृह्णीयात् शाक्त एव च ॥ १८७ ।
वैष्णवो विष्णुमन्त्रार्थं शैवः शिवमुपाश्रयेत् ।
[3]नायिकामन्त्रजापी च नायिकार्णं सदाभ्यसेत् ॥ १८८ ।
सूर्यमन्त्रविचारार्थी सूर्यमन्त्रं समाश्रयेत् ।
एकस्थं युगलस्थानं तृतीयस्थानमेव च ॥ १८९ ।
[4]ज्ञात्वा मन्त्रं प्रगृह्णीयात् अन्यथा चाशुभं भवेत् ।
एतदन्यतमं मन्त्रं दिव्यवीरेषु गीयते ॥ १९० ।
ततश्चक्रं पशोरुक्तं सर्वसिद्धिप्रदं ध्रुवम् ।
एतच्चक्रप्रभावेण पशुर्वीरोपमः स्मृतः ॥ १९१ ।
सर्वसिद्धियुतो भूत्वा वत्सरात्तां प्रपश्यति ॥ १९२ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महामन्त्रोद्दीपने सर्वचक्रानुष्ठाने सिद्धमन्त्रप्रकरणे भावनिर्णये भैरवीभैरवसंवादे चतुर्थः पटलः ॥

●

---

१. मन्त्रमार्गं इति क० ।
२. विष्णुशब्दस्थितं इति क० ।
३. नायिकामन्त्रं जपति तच्छीलः, नायिकामन्त्रजापी, णिनिप्रत्ययस्ताच्छील्यद्योतकः ।
४. कृत्वा इति क० ।

अथ पञ्चमः पटलः

महाकथहचक्रार्थं सर्वचक्रोत्तमोत्तमम् ।
यस्य विचारमात्रेण कामरूपी भवेन्नरः ॥ १ ।

ततः प्रकारं वीराणां नाथः त्वं क्रमशः शृणु ।
चतुरस्रे लिखेत् वर्णांश्चतुःकोष्ठसमन्विते ॥ २ ।

चतुःकोष्ठे चतुःकोष्ठे चतुश्चतुर्गृहान्वितम् ।
मन्दिरं षोडशं प्रोक्तं सर्वकामार्थसिद्धिदम् ॥ ३ ।

[1]चतुरस्रं लिखेत् कोष्ठं चतुःकोष्ठसमन्वितम् ।
पुनश्चतुष्कं तत्रापि लिखेद्धीमान् क्रमेण तु ॥ ४ ।

सर्वेषु गृहमध्येषु प्रादक्षिण्यक्रमेण तु ।
अकारादिक्षकारान्तं लिखित्वा गणयेत्ततः ॥ ५ ।

चन्द्रमग्निं रुद्रवर्णं नवमं युगलं तथा ।
वेदमर्कं दशरसं वसुं षोडशमेव च ॥ ६ ।

चतुर्दशं भौतिकञ्च सप्तपञ्चदशेति च ।
वह्नीन्दुकोष्ठगं वर्णं सङ्केताङ्कैः मयोदितम् ॥ ७ ।

एतदङ्कस्थितं वर्णं गणयेत्तदनन्तरम् ।
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम् ॥ ८ ।

चतुर्भिः कौष्ठैरेकैकमिति कोष्ठचतुष्टयम् ।
पुनः कोष्ठगकोष्ठेषु[2] सत्यतो नाम्न आदितः ॥ ९ ।

सिद्धः साध्यः सुसिद्धोऽरिः क्रमशो गणयेत्सुधीः ।
सिद्धः सिद्ध्यति कालेन साध्यस्तु जपहोमतः ॥ १० ।

सुसिद्धोऽग्रहणाज्ज्ञानी शत्रुर्हन्ति स्वमायुषम् ।
सिद्धार्णो बान्धवः प्रोक्तः साध्यः सेवक उच्यते ॥ ११ ।

---

१. चतुष्कोणमित्यर्थः ।

२. कोष्ठं गच्छन्ति—कोष्ठगानि, गमेर्डः । कोष्ठगानि च कोष्ठानि चेति कर्मधारयः ।

सिद्धकोष्ठस्थिता वर्णा बान्धवाः सर्वकामदाः ।
जपेन बहुसिद्धिः स्यात् सेवकोऽधिकसेवया ॥ १२ ।
पुष्णाति पोषकोऽभीष्टो घातको नाशयेद् ध्रुवम् ।
सिद्धः सिद्धो यथोक्तेन द्विगुणः सिद्धसाधकः ॥ १३ ।
सिद्धः सुसिद्धोद्ध्र्वजपात् सिद्धारिर्हन्ति बान्धवान् ।
साध्यः सिद्धो द्विगुणकः साध्ये साध्यो निरर्थकः ॥ १४ ।
तत्सुसिद्धो द्विगुणजपात् साध्यारिर्हन्ति गोत्रजान् ।
सुसिद्धसिद्धोद्ध्र्वजपात्तत्साध्यो द्विगुणाधिकात् ॥ १५ ।
तत्सुसिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा ।
अरिः सिद्धः सुतान् हन्यादरिसाध्यस्तु कन्यकाः ॥ १६ ।
तत्सुसिद्धिस्तु पत्नीघ्नस्तदरिर्हन्ति गोत्रजान्[1] ।
यदि वैरिमनोर्हस्तस्थितः स्यात् साधको भुवि ॥ १७ ।
तदन्ते रक्षणार्थं हि कुर्यादेवं क्रियादिकम् ।
तत्प्रकारं महावीर शृणुष्व गिरिजापते ॥ १८ ।
वटपत्रे लिखित्वारिमन्त्रं[2] स्रोतसि निक्षिपेत् ।
एवं मन्त्रविमुक्तः स्यान्ममाज्ञावशहेतुना ॥ १९ ।
पुनः प्रकारं विप्रस्तु गवां क्षीरे मुदान्वितः ।
द्रोणमिते जपेन्मन्त्रमष्टोत्तरसमन्वितम् ॥ २० ।
पीत्त्वा क्षीरं मनोमध्ये ध्यात्त्वा मन्त्रं समुच्चरन् ।
सन्त्यजन्नीरमध्ये तु वैरिमन्त्रप्रमुक्तये ॥ २१ ।
पुनः प्रकारं वक्ष्यामि त्रिरात्रमेकवासरम् ।
उपोष्य विधिनानेन पूजां कृत्त्वा शनौ कुजे ॥ २२ ।
सहस्रं वा शतं वापि अष्टोत्तरसमन्वितम् ।
जपित्त्वा सन्त्यजेन्मन्त्रं क्षीरसागरमण्डले ॥ २३ ।
अथवा तद्गुरोः स्थाने चान्यस्थाने च वा पुनः ।
विचार्य मन्त्रवर्णञ्च गृहीत्त्वा मोक्षमाप्नुयात् ॥ २४ ।

---

१. साधकम् इति क० । २. अरिः शत्रुः तन्मारकं मन्त्रम्, मध्यमपदलोपिसमासः ।

स्वप्ने यदि महामन्त्रं प्राप्नोति साधकोत्तमः ।
तदा सिद्धिमवाप्नोति सत्यं सत्यं कुलेश्वर ॥ २५ ।

तन्मन्त्रं कौलिके नाथ गुरोर्यत्नेन संग्रही ।
यदा भवति सिद्धिः स्यात्तत्क्षणान्नात्र संशयः ॥ २६ ।

अरिं वा देवदेवेश यदि विग्राहयेन्मनुम् ।
अन्यमन्त्रं विचार्यैव विष्णोश्चैव शिवस्य च ॥ २७ ।

शक्तिमन्त्रं यदि रिपुं तदा एवंप्रकारकम् ।
आदावन्ते च मध्ये च ॐवौषट् स्वाहयान्वितम् ॥ २८ ।

कृत्वा जप्त्वा[1] महासिद्धिं कामरूपस्थितामिव ।
प्राप्नोति नात्र सन्देहो ममाज्ञा वरवर्णिनि ॥ २९ ।

शृणु चक्रफलं नाथ विचाराचारमङ्गलम् ।
प्रासादञ्च महामन्त्रं सद्गुरोर्मुखपङ्कजात् ॥ ३० ।

लभ्यते यदि भाग्येन सिद्धिरेव न संशयः ।
तदभावे सिद्धिमन्त्रं दृष्टादृष्टफलोन्मुखम् ॥ ३१ ।

महाचमत्कारकरं हृदयोल्लासवर्द्धनम् ।
स्वप्ने वा सद्गुरोः स्थाने प्राप्तिमात्रेण मुक्तिदम् ॥ ३२ ।

तन्मन्त्रं वर्जयित्वा च घोरान्धकाररौरवे ।
वसन्ति सर्वकालं च ममाज्ञावशभागिनी ॥ ३३ ।

तत्रैव चक्रसारादि विचारं व्यर्थभाषणम् ।
अरिमन्त्रं महापुण्यं सर्वमन्त्रोत्तमोत्तमम् ॥ ३४ ।

कोटिजन्मार्जितैः पुण्यैर्महाविद्याश्रयी भवेत् ।
स्वप्ने कोटिकुलोत्पन्नैः पुण्यकोटिफलैरपि ॥ ३५ ।

प्राप्नोति साधको मन्त्रं भुक्तये मुक्तये ध्रुवम् ।
ततश्चक्रं न विचार्यं विचार्य मरणं भवेत् ॥ ३६ ।

---

१. जपधातुः सेट्कोऽपि पृषोदरादित्वादिटं न लेभे ।

किन्तु चक्रविचारञ्च यदि स्वप्ने चमत्कृतम् ।
एतेषां चक्रवर्णानां विचारादष्टसिद्धिदम् ॥ ३७ ।

वायुं मुक्तिं धनं योगसिद्धिमृद्धिं धनं शुभम् ।
धर्मदेहपवित्रञ्च अकाले मृत्युनाशनम् ॥ ३८ ।

वाञ्छाफलप्रदं गौरीचरणाम्भोजदर्शनम् ।
भुक्तिं मुक्तिं हरस्थानं प्राप्नोति नात्र संशयः ॥ ३९ ।

एषां चक्रादिकालञ्च क्रमशो गणितं फलम् ।
यदि सर्वविचारञ्च करोति साधकोत्तमः ॥ ४० ।

तदा सर्वफलं नित्यं प्राप्नोति नात्र संशयः ।
महाव्रतं[1] विवेकञ्च विचाराल्लभते ध्रुवम् ॥ ४१ ।

अकस्मात् सिद्धिमाप्नोति चक्रराजं विचारतः ।
सर्वे देवाः प्रशंसन्ति चक्रमन्त्राश्रितं[2] जलम् ॥ ४२ ।

वाक्यसिद्धिर्भवेत् क्षिप्रं प्राणायामादिसिद्धिभाक्[3] ।
सर्वेषां प्रणमेद् भूमौ विचरेत् साधको बली ॥ ४३ ।

इति ते कथितं नाथ चक्रं षोडशमङ्गलम् ।
चक्राणां लोकनादेव सायुज्यपदमाप्नुयात् ॥ ४४ ।

अतो विचारं सर्वत्र सर्वचक्रादिमङ्गलम् ॥ ४५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सर्वचक्रानुष्ठाने सिद्धतन्त्रप्रकरणे पञ्चमः पटलः ॥

●

---

१. महाप्रभावमेकञ्च इति ग० ।
२. चक्रमन्त्रमाश्रितम्, गम्यादीनामुपसंख्यानमिति द्वितीयान्तस्य समासः ।
३. प्राणायामादिसिद्धिं भजते इति भजो ण्विप्रत्ययः ।

अथ षष्ठः पटलः

अथ भावं वद श्रीदे दिव्यवीरपशुक्रमात् ।
पशूनां परमाश्चर्यभावं श्रोतुं समुत्सुकः ॥ १ ।
इच्छाम्याह्लादजलधौ स्थितोऽहं जगदीश्वरि ।
यदि भाग्यवशादाज्ञासारं चिन्तय सिद्धये ॥ २ ।

महाभैरव्युवाच—

पशुनाथ वीरनाथ दिव्यनाथ कृपानिधे ।
प्रकाशहृदयोल्लास चन्द्रशेखर तच्छृणु ॥ ३ ।
काली कलालताकारं तपस्याद्वयसंगतिम् ।
पशुभावस्थितां नाथ देवतां श्रृणु विस्तरात् ॥ ४ ।
दुर्गापूजां शिवपूजां यः करोति पशूत्तमः[1] ।
अवश्यं हि यः करोति पशुरुत्तमः स्मृतः । ५ ।
केवलं शिवपूजाञ्च करोति यदि साधकः ।
पशूनां मध्यमः श्रीमान् शिवया सह चोत्तमः ॥ ६ ।
केवलं वैष्णवोऽधीशः पशूनां मध्यमः स्मृतः ।
भूतानां देवतानाञ्च सेवां कुर्वन्ति ये सदा ॥ ७ ।
पशूनां मध्यमाः प्रोक्तं नरकस्था न संशयः ।
त्वत्सेवां मम सेवाञ्च विष्णुब्रह्मादिसेवनम् ॥ ८ ।
कृत्वान्यसर्वभूतानां नायिकानां महाप्रभो ।
यक्षिणीनां भूतिनीनां ततः सेवा शुभप्रदा ॥ ९ ।
यः पशुर्ब्रह्मकृष्णादि सेवां कुर्वन्ति ये सदा ।
तथा श्रीतारकब्रह्म सेवाद्वये नरोत्तमाः ॥ १० ।
तेषामसाध्या भूतादिदेवताः सर्वकामदाः ।
वर्जयेत् पशुमार्गेण विष्णुसेवापरो जनः ॥ ११ ।

---

१. 'पशुषु उत्तमः' सप्तमी-इति योगविभागस्य भाष्येऽदर्शनात् सुप्सुपेति समासः ।

प्रवक्तव्यञ्च पटले तेषां तेषां ततस्ततः ।
विधिना विधिना नाथ क्रमशः शृणु वल्लभ ॥ १२ ।

अतः प्रातः समुत्थाय पशुरुत्तमपण्डितः ।
गुरूणां चरणाम्भोजमङ्गलं [1]शीर्षपङ्कजे ॥ १३ ।

विभाव्य पुनरेकं हि श्रीपादं भावयेद् यदि ।
पूजयित्वा च वीरं वै उपहारैर्न मे स्तवैः ॥ १४ ।

त्रैलोक्यं तेजसा व्याप्तं मण्डलस्थां महोत्सवाम् ।
तडित्कोटिप्रभादीप्तिं चन्द्रकोटिसुशीतलाम् ॥ १५ ।

सार्द्धत्रिवलयाकारां[2] स्वयम्भूलिङ्गवेष्टिताम् ।
उत्थापयेन्महादेवीं महारक्तां मनोन्मयीम् ॥ १६ ।

श्वासोच्छ्वासद्वयावृत्ति द्वादशाङ्गुलरूपिणीम् ।
योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम् ॥ १७ ।

चतुर्वर्णस्वरूपान्तां वकारादिषसान्तकाम् ।
कोटिकोटिसहस्रार्ककिरणां[3] कुलमोहिनीम्[4] ॥ १८ ।

महासूक्ष्मपथप्रान्तवान्तरान्तरगामिनीम् ।
त्रैलोक्यरक्षितां[5] वाक्यदेवतां शम्भुरूपिणीम् ॥ १९ ।

महाबुद्धिप्रदां देवीं सहस्रदलगामिनीम् ।
महासूक्ष्मपथे तेजोमयीं मृत्युस्वरूपिणोम् ॥ २० ।

---

१. शिरः पर्यायभूतः शीर्षशब्दो यद्यपि छान्दसः, तथापि पृषोदरादित्वाल्लोकेऽपि क्वचित्साधुः ।

२ महावज्र सर्पराज सदृशीं ध्यानयोगिनीम् ।
सदावायुसाम्बश्रीं कारणोल्लासवर्धिनीम् ॥
सुप्तां योगिभिराभास्यां शोणवेदिकोपरि ।
योगिध्येयां सूक्ष्मविद्यां भाविनीमुन्मनोमयीम् ॥ इति क० पु० अधिकः पाठः ।

३. किरणोज्ज्वलमोहिनीम्, इति क० पा० ।

४. कुलं मोहयति तच्छीला, णिनिप्रत्यये सति साधुता ।

५. बाह्यदेवतां शब्दरूपिणीम्, इति क० पा० ।

कालरूपां सर्वरूपां सर्वत्र सर्वचिन्मयीम् ।
ध्यात्वा पुनः पुनः शीर्षे सुधाब्धौ विनिवेष्टिताम् ॥ २१ ।
सुधापानं कारयित्त्वा पुनः स्थाने समानयेत् ।
समानयनकाले तु सुषुम्नामध्यमध्यके ॥ २२ ।

अमृताभिप्लुतां कृत्त्वा पुनः स्थानेषु पूजयेत् ।
ऊद्ध्वोंद्गमनकाले तु महातेजोमयीं स्मरेत् ॥ २३ ।

प्रतिप्रयाणकाले तु सुधाधाराभिराप्लुताम् ।
महाकुलकुण्डलिनीममृतानन्दविग्रहाम् ॥ २४ ।

ध्यात्त्वा ध्यात्त्वा पुनर्ध्यात्त्वा सर्वसिद्धीश्वरो भवेत् ।
तस्मिन्स्थाने महादेवीं विभाव्य किरणोज्ज्वलाम् ॥ २५ ।

अमृतानन्दमुक्ति तां पूजयित्वा शुभां मुदा ।
मानसोच्चारबीजेन मायां वा कामबीजकम् ॥ २६ ।

पञ्चाशद्वर्णमालाभिर्ज्जप्त्वा[1]नुलोमसत्पथा ।
विलोमेन पुनर्जप्त्वा सर्वत्र जयदं स्तवम् ॥ २७ ।

पठित्त्वा सिद्धिमाप्नोति तत्स्तोत्रं शृणु भैरव ॥ २८ ।

जन्मोद्धारनिरक्षिणीहतरुणी[2] वेदादिबीजादिमां
नित्यं चेतसि भाव्यते भुवि कदा सद्वाक्यसञ्चारिणी ।
[3]मां पातु प्रियदा स विपदं संहारयित्रि धरे
धात्रि त्वं स्वयमादिदेववनितादीनातिदीनं पशुम् ॥ २९ ।

रक्ताभामृतचन्द्रिकालिपिमयी सर्पाकृतिर्निद्रिता
जाग्रत्कूर्मसमाश्रिता भगवती त्वं मां समालोकय ।
मांसोद्गन्धकुगन्धदोषजडितं वेदादिकार्यान्वितं
स्वल्पान्यामलचन्द्रकोटिकिरणैर्नित्यं शरीरं कुरु ॥ ३० ।

---

१. पृषोदरादित्वात् शिष्टप्रयुक्तत्वादिडभावः ।

२. जन्मोद्धारशिवक्षनीहतरुणी वेदादिबीजादिमा इति. क. पा. ।

३. मांसात्तु प्रियदासावपदसंधातया श्रीधरे ।

सिद्धार्थी निजदोषवित् स्थलगतिर्व्याजीयते विद्यया
कुण्डल्याकुलमार्गमुक्तनगरीमायाकुमार्गः श्रिया ।
यद्येवं भजति प्रभातसमये मध्याह्नकालेऽथवा
नित्यं यः [1]कुलकुण्डलीजपपदाम्भोजं स सिद्धो भवेत् ॥ ३१ ॥

वाय्वाकाशचतुर्दलेऽतिविमले वाञ्छाफलान्यालके[2]
नित्यं सम्प्रति नित्यदेहघटिता शाङ्केतिताभाविता ।
विद्याकुण्डलमानिनी स्वजननो [3]मायाक्रिया भाव्यते
यैस्तैः सिद्धकुलोद्भवैः प्रणतिभिः [4]सत्स्तोत्रकैः शंभुभिः ॥ ३२ ॥

[5]धाताशङ्करमोहिनीत्रिभुवनच्छायापटोद्गामिनी
संसारादिमहासुखप्रहरणी तत्रस्थिता योगिनी ।
सर्वग्रन्थिविभेदिनी स्वभुजगा सूक्ष्मातिसूक्ष्मापरा
ब्रह्मज्ञानविनोदिनी कुलकुटी व्याघातिनी भाव्यते ॥ ३३ ॥

वन्दे श्रीकुलकुण्डलीत्रिवलिभिः साङ्गैः स्वयम्भूं प्रियं
प्रावेष्टचाम्बरमारचित्तचपला बालाबलानिष्कला ।
या देवी परिभाति वेदवदना संभाविनी तापिनी
इष्टानां शिरसि स्वयम्भुवनितां[6] संभावयामि क्रियाम् ॥ ३४ ॥

वाणीकोटिमृदङ्गनादमदनानिश्रेणिकोटिध्वनिः
प्राणेशीरसराशमूलकमलोल्लासैकपूर्णानना ।
आषाढोद्भवमेघवाजनियुतध्वान्ताननास्थायिनी
माता सा परिपातु सूक्ष्मपथगे मां योगिनां शङ्करः[7] ॥ ३५ ॥

---

१. निजपदाम् क० । २. वाञ्छाफलोन्मूलके क० ।
३. मार क० । ४. संयोगिनिः क० ।
५. वाताशङ्करविमोहिनीतिवलच्छायापटोद्गामिनी ग० ।
६. स्वयम्भुवो वनिता, पृषोदरादित्वात् ऊकारस्य ह्रस्वः । अथवा भूधातुर्डुप्रत्ययान्तः ।
७. योगिनं शं कुरु क० ।

त्वामाश्रित्य नरा व्रजन्ति सहसा वैकुण्ठकैलासयोः
आनन्दैकविलासिनीं शशिशतानन्दाननां कारणाम् ।
मातः श्रीकुलकुण्डलीप्रियकरे काली कुलोद्दीपने
तत्स्थानं प्रणमामि भद्रवनिते मामुद्धर त्वं पशुम् ॥ ३६ ।

कुण्डलीशक्तिमार्गस्थं स्तोत्राष्टकमहाफलम् ।
यः पठेत् प्रातरुत्थाय स योगी भवति ध्रुवम् ॥ ३७ ।

क्षणादेव हि पाठेन कविनाथो भवेदिह ।
पठेत्[1] श्रीकुण्डलो योगो ब्रह्मलीनो भवेत् महान् ॥ ३८ ।

इति ते कथितं नाथ कुण्डलीकोमलं स्तवम् ।
एतत्स्तोत्रप्रसादेन देवेषु गुरुगीष्पतिः ॥ ३९ ।

सर्वे देवाः सिद्धियुताः अस्याः स्तोत्रप्रसादतः ।
द्विपरार्द्धं चिरंजीवी ब्रह्मा सर्वसुरेश्वरः ॥ ४० ।

त्वष्टापि मम निकटे स्थितो भगवतीपतिः ।
मां विद्धि परमां शक्तिं स्थूलसूक्ष्मस्वरूपिणीम् ॥ ४१ ।

सर्वप्रकाशकरणीं विन्ध्यपर्वतवासिनीम् ।
हिमालयसुतां सिद्धां सिद्धमन्त्रस्वरूपिणीम् ॥ ४२ ।

वेदान्तशक्तितन्त्रस्थां कुलतन्त्रार्थगामिनीम् ।
रुद्रयामलमध्यस्थां स्थितिस्थापकभाविनीम् ॥ ४३ ।

पञ्चमुद्रास्वरूपाञ्च शक्तियामलमालिनीम् ।
रत्नमालावलाकोटचां चन्द्रसूर्यप्रकाशिनीम् ॥ ४४ ।

सर्वभूतमहाबुद्धिदायिनीं[2] दानवापहाम्[3] ।
स्थित्युत्पत्तिलयकरीं करुणासागरस्थिताम् ॥ ४५ ।

महामोहनिवासाढचां दामोदरशरीरगाम् ।
छत्रचामररत्नाढचमहाशूलकरां पराम् ॥ ४६ ।

---

१. पावित्रीकुण्डली योगो ब्राह्मणी नो भवेत् महान् ग० । २. दानवादपहारिणीम् ग० ।

३. दानवान् अपहन्ति इति विग्रहे हन्धातोरौणादिको डाप्रत्ययः, टिलोपः । अथवा दानवान-पजहाति इति विग्रहे 'ओहाक् त्यागे' धातोः कर्तरि कप्रत्ययः, टाप् च ।

ज्ञानदां वृद्धिदां ज्ञानरत्नमालाकलापदाम् ।
सर्वतेजःस्वरूपाभामनन्तकोटिविग्रहाम्[1] ॥ ४७ ।

दरिद्रधनदां लक्ष्मीं नारायणमनोरमाम् ।
सदा भावय शम्भो त्वं योगनायकपण्डित ॥ ४८ ।

पुनर्भावं पशोरेव श्रृणु सादरपूर्वकम् ।
अकस्मात् सिद्धिमाप्नोति पशुर्नारायणोपमः ॥ ४९ ।

वैकुण्ठनगरे याति चतुर्भुजकलेवरः ।
शङ्खचक्रगदापद्महस्तो गरुडवाहनः ॥ ५० ।

महाधर्मस्वरूपोऽसौ महाविद्याप्रसादतः ।
पशुभावं महाभावं भावानां सिद्धिदं पुनः[2] ॥ ५१ ।

आदौ भावं पशोः कृत्वा पश्चात् कुर्यादवश्यकम् ।
वीरभावं महाभावं सर्वभावोत्तमोत्तमम् ॥ ५२ ।

तत्पश्चादतिसौन्दर्यं दिव्यभावं महाफलम् ।
फलाकाङ्क्षी मोक्षगश्च सर्वभूतहिते रतः ॥ ५३ ।

विद्याकाङ्क्षी धनाकाङ्क्षी रत्नाकाङ्क्षी चयो नरः ।
कुर्याद्भावत्रयं दिव्यं भावसाधनमुत्तमम् ॥ ५४ ।

भावेन लभते वाद्यं धनं रत्नं महाफलम् ।
[3]कोटिगोदानजैः पुण्यैः कोटिशालग्रामदानजैः ॥ ५५ ।

वाराणस्यां कोटिलिङ्गपूजनेन च यत्फलम् ।
तत्फलं लभते मर्त्यः क्षणादेव न संशयः ॥ ५६ ।

आदौ दशमदण्डे तु पशुभावमथापि वा ।
मध्याह्ने दशदण्डे तु वीरभावमुदाहृतम्[4] ॥ ५७ ।

सायाह्नदशदण्डे तु दिव्यभावं शुभप्रदम् ।
अथवा पशुभावस्थो यजेदिष्टादिदेवताम् ॥ ५८ ।

---

१. अनन्तकोटिविग्रहा यस्याः सा ताम् । २. परः क० ।

३. कोटि ब्राह्मणभोज्येन कोटिगोभोजनेन क० ।

४. उदाहृतं वीरभावं जानीयादिति कर्मणि अमिविभक्तौ वीरभावमिति पदम् ।

जन्मावधि यजेन्मन्त्री महासिद्धिमवाप्नुयात् ।
सर्वेषां गुरुरूपः स्यादैश्वर्यञ्च दिने दिने ॥ ५९ ।

यदि गुरुस्वभावः स्यात्तदा मधुमतीं लभेत् ।
यदि विवेकी निर्याति महावननिवासवान् ॥ ६० ।

ब्रह्मचर्यव्रतस्थो वा अथवा स्वपुरे[1] वसन् ।
पीठब्राह्मणमात्रेण महाषोढाश्रमेण च ॥ ६१ ।

पशुभावस्थितो मन्त्री सिद्धविद्यामवाप्नुयात् ।
यदि पूर्वापरस्थाञ्च महाकौलिकदेवताम् ॥ ६२ ।

कुलमार्गस्थितो मन्त्री सिद्धिमाप्नोति निश्चितम् ।
यदि विद्याः प्रसीदन्ति वीरभावं तदा लभेत् ॥ ६३ ।

वीरभावप्रसादेन दिव्यभावमवाप्नुयात् ।
दिव्यभावं वीरभावं ये गृह्णन्ति नरोत्तमाः ॥ ६४ ।

वाञ्छाकल्पद्रुमलतापतयस्ते न संशयः ।
आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः ॥ ६५ ।

भूत्वा वसेन्महापीठं सदाज्ञानी भवेद् यतिः ।
किमन्येन फलेनापि यदि भावादिकं लभेत् ॥ ६६ ।

भावग्रहणमात्रेण मम ज्ञानी भवेन्नरः[2] ।
वाक्यसिद्धिर्भवेत् क्षिप्रं वाणी हृदयगामिनी ॥ ६७ ।

नारायणं परिहाय लक्ष्मीस्तिष्ठति मन्दिरे ।
मम पूर्णन्तुमादृष्टी[3] तस्य देहे न संशयः ॥ ६८ ।
अवश्यं सिद्धिमाप्नोति सत्यं सत्यं न संशयः[4] ।

महाभैरव उवाच—

सूचितन्तु महादेवि कथयस्वानुकम्पया ॥ ६९ ।

---

१. अथवा गुरुस्वभाववान् क० ।
२. महाज्ञानी क० ।
३. चिन्तनीयोऽस्यार्थः ।
४. सदाशिव क० ।

सर्वतन्त्रेषु विद्यासु भावसङ्केतमेव हि ।
तथापि शक्तितन्त्रेषु विशेषात् सर्वसिद्धिदम् ।। ७० ।

भावविद्याविधिं विद्ये विस्तार्य भावसाधनम् ।

आनन्दभैरव उवाच—

भावस्तु त्रिविधो देव दिव्यवीरपशुक्रमात् ।। ७१ ।
गुरुरस्य त्रिधा चात्र तथैव मन्त्रदेवताः ।
दिव्यभावो महादेव श्रेयसां सर्वसिद्धिदम् ।। ७२ ।

द्वितीयो मध्यमः प्रोक्तस्तृतीयः सर्वनिन्दितः ।
बहुजपात्तथाहोमात् कायक्लेशादिविस्तरैः ।। ७३ ।

न भावेन विना देवि तन्त्रमन्त्राः फलप्रदाः ।
किं वीरसाधनेनैव मोक्षविद्याकुलेन किम् ।। ७४ ।

किं पीठपूजनेनैव किं कन्याभोजनादिभिः ।
स्वयोषित्प्रीतिदानेन किं परेषां तथैव च ।। ७५ ।

किं जितेन्द्रियभावेन किं कुलाचारकर्मणा ।
यदि भावो विशुद्धार्थो न स्यात् कुलपरायणः ।। ७६ ।

भावेन[1] लभते मुक्तिं भावेन कुलवर्द्धनम् ।
भावेन गोत्रवृद्धिः स्याद् भावेन कुलशोधनम् ।। ७७ ।

किं तथा पूजनेनैव यदि भावो न जायते ।
केन वा पूज्यते विद्या केन वा पूज्यते मनुः ।। ७८ ।

फलाभावश्च देवेश भावाभावात् प्रजायते ।
एतन्मन्त्रस्य कथने शङ्कते मम मानसः ।। ७९ ।

त्रिलोकं सञ्जयेत् प्रायः सर्वरत्नसमागमः ।
नावीक्ष्य निर्जनं कुर्यात् कथं तत् कथयामि ते ।। ८० ।

---

१. 'भावे हि विद्यते देवः, भावो हि भवनाशनः' इत्यादिनापि भावस्य महती प्रशंसा कृताऽस्ति ।

श्री-आनन्दभैरव उवाच—

त्वत्प्रसादान्महादेवि ? विद्यास्वप्नप्रबोधिनि ।
सर्वंपञ्चप्रपञ्चानां[1] दीक्षा देया महेश्वरि ॥ ८१ ।
यद्यतो देव सर्वेषां भूतानां स्वापकारणम् ।
करोमि कथय त्वं मां भावमार्गोत्तमोत्तमम् ॥ ८२ ।

श्रीमहाभैरव्युवाच—

प्रथमं दिव्यभावस्तु कौलिके श्रृणु यत्नतः ।
सर्वदेवार्चितां विद्यां तेजःपुञ्जप्रपूरिताम् ॥ ८३ ।
तेजोमयीं जगत्सर्वां विभाव्य मूर्तिकल्पनाम् ।
तत्तन्मूर्तिमयैः रूपैः स्नेहशून्ये[2] न वा पुनः ॥ ८४ ।
आत्मानं तन्मयं कृत्वा सर्वभावं तथैव च ।
तत्सर्व्वां योषितं ध्यात्वा पूजयेद्यतमानसः ॥ ८५ ।
अशेषकुलसम्पन्नां नानाजातिसमुद्भवाम् ।
नानादेशोद्भवां वापि सद्गुणालस्यसंयुताम् ॥ ८६ ।
द्वितीयवत्सरादूर्ध्वं यावत् स्यादष्टमाब्दकम् ।
तावज्जप्त्वा पूजयित्वा कन्यां सुन्दरमोहिनीम् ॥ ८७ ।
दिव्यभावः स्थितः साक्षात्तन्त्रमन्त्रफलं लभेत् ।
कुमारीपूजनादेव कुमारीभोजनादिभिः ॥ ८८ ।
एकद्वित्र्यादिबीजानां फलदा नात्र संशयः ।
ताभ्यः पुष्पफलं दत्त्वा अनुलेपादिकन्तथा ॥ ८९ ।
बलिप्रियञ्च नैवेद्यं दत्त्वा तद्भावभावितः ।
मुदा तदङ्गमाल्यानां बालभावविचेष्टितः ॥ ९० ।
जातिप्रियकथालापक्रीडाकौतूहलान्वितः[3] ।
यथार्थं तत् प्रियं तत्र कृत्वा सिद्धीश्वरो भवेत् ॥ ९१ ।

---

१. माया क० । २. स्नेहस्तेनैव यद्गतः क० ।
३. जातिप्रियश्चासौ कथालापक्रीडाकौतूहलान्वितश्चेति कर्मधारयः । कथालापक्रीडाकौतूहले-नान्वितः ।

कन्या सर्वसमृद्धिः स्यात् कन्या सर्वपरन्तपः ।
होमं मन्त्रार्चनं नित्यक्रियां कौलिकसत्क्रियाम् ॥ ९२ ।

नानाफलं महाधमं कुमारीपूजनं विना ।
तत्तदर्द्धफलं नाथ प्राप्नोति साधकोत्तमः ॥ ९३ ।

फलं कोटिगुणं वीरः कुमारीपूजया लभेत् ।
[1]कुसुमाञ्जलिपूर्णञ्च कन्यायां कुलपण्डितः ॥ ९४ ।

ददाति यदि तत्पुष्पं कोटिमेरुप्रदो भवेत् ।
तज्ज्ञानजं महापुण्यं क्षणादेव समालभेत् ॥ ९५ ।

कुमारी भोजिता येन त्रैलोक्यं तेन भोजितम् ।
एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती ॥ ९६ ।

त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका ।
सूर्यगा[2] पञ्चवर्षा च षड्वर्षा चैव रोहिणी ॥ ९७ ।

सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका ।
नवभिः कालसन्दात्री दशभिश्चापराजिता ॥ ९८ ।

एकादशे च रुद्राणी द्वादशेऽब्दे तु भैरवी ।
त्रयोदशे महालक्ष्मीर्द्विसप्तपीठनायिका ॥ ९९ ।

क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता ।
एवं क्रमेण सम्पूज्य यावत् पुष्पं न विद्यते ॥ १०० ।

प्रतिपदादिपूर्णान्तं वृद्धिभेदेन पूजयेत् ।
महापर्वसु सर्वेषु विशेषाञ्च पवित्रके ॥ १०१ ।

महानवम्यां देवेश कुमारीश्च[3] प्रपूजयेत् ।
तस्मात् षोडशपर्यन्तं युवतीति प्रचक्षते ॥ १०२ ।

तत्र भावप्रकाशः स्यात्स भावः परमो मतः ।
रक्षितव्यं प्रयत्नेन रक्षितास्ताः प्रकाशयेत् ॥ १०३ ।

---

१. कुसुमाञ्जलिना पूर्णम् ।   २. सुभग क० ।

३. कुमारीपूजाया महती प्रशंसा कृता ।

महापूजादिकं कृत्वा वस्त्रालङ्कारभोजनैः[1] ।
पूजयेन्मन्दभाग्योऽपि लभते जयमङ्गलम् ॥ १०४ ।

अन्येषां कथनेनाथ प्रयोजनमहाफलम् ।
विधिना पूजयेद् यस्तु दिव्यवीरपशुस्थितः ॥ १०५ ।

भावत्रये महासौख्यं दिव्ये सत्कर्म सत्फलम् ॥ १०६ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्याविलासे सिद्धमन्त्रप्रकरणे भावनिर्णये षष्ठः पटलः ॥

---

१. वस्त्रं च अलङ्कारश्च भोजनं चेति द्वन्द्वः ।

अथ सप्तमः पटलः

अथ पूजां प्रवक्ष्यामि कुमार्याश्चातिदुर्लभाम् ।
व्याधिवर्गविहीनानां शीघ्रं सिद्ध्यति भूतले ॥ १ ।

तत्प्रकारं महादेव वीराणामधिपाधिप ।
पूजास्थानं महापीठं देवालयमथापि वा ॥ २ ।

सुन्दरीं परमानन्दवर्द्धनीं जयदायिनीम् ।
कालरात्रिस्वरूपां श्रीं गौरीं रक्ताङ्गरागिणीम् ॥ ३ ।

कन्यां देवकुलोद्भूतां राक्षसीं वा नरोत्तमाम् ।
नटीकन्यां हीनकन्यां तथा कापालिकन्यकाम् ॥ ४ ।

रजकस्यापि कन्यां ते तथा नापितकन्यकाम् ।
गोपालकन्यकाञ्चैव तथा ब्राह्मणकन्यकाम् ॥ ५ ।

शूद्रकन्यां वैश्यकन्यां तथा वणिक्कन्यकाम् ।
चण्डालकन्यकां वापि यत्र कुत्राश्रमे स्थिताम् ॥ ६ ।

सुहृद्वर्गस्य कन्यां च समानीय प्रयत्नतः ।
पूजयेत् परमानन्दैरात्मध्यानपरायणः ॥ ७ ।

क्रमशः शृणु देवेन्द्र वरहस्तनिषेवित ।
परमानन्दसौन्दर्य कारणानन्दविग्रहः ॥ ८ ।

मम पूजां यः करोति प्रत्यहं शुद्धभक्तितः ।
तस्यावश्यं कुमारीणां पूजनं भोजनं रवेः ॥ ९ ।

तेजोरूपं विधोश्चाग्नेः सर्वभावे प्रशस्यते ।
तत्पूजनात्तदालापाद् भोजनादपि तत् शुभम् ॥ १० ।

मम प्रीतिर्भवेत्साक्षाद्देवतागुप्तिसंस्थिता ।
बालभैरवदेवस्य कामिनीवटुकस्य च ॥ ११ ।

मत्पुत्रस्य सर्वलोकपूजितस्य महौजसः ।
पूजाभिर्विविधैर्दिव्यैः कुमारी देवपूजिता ॥ १२ ।

कुमारी कन्यका प्रोक्ता सर्वज्ञा जगदीश्वरी ।
पूजार्थं सर्वलोकस्य समानीय सुरेश्वराः[1] ॥ १३ ।

पूजयन्ति[2] महादेवीं गुप्तभावनिवासिनीम् ।
सदा भोजनवाञ्छाघ्याँ[3] माल्यसन्तुष्टहासिनीम् ॥ १४ ।

वृथा न रौति सा देवी कुमारी देवनायिका ।
सरस्वतीस्वरूपा च पूज्यते सर्वनायकैः ॥ १५ ।

शिवभक्तैर्विष्णुभक्तैस्तथान्यदेवपूजितैः ।
सर्वलोकैः पूजिता सा चावश्यं पूज्यते बुधैः ॥ १६ ।

पूजया लभते पूजां पूजया लभते श्रियम् ।
पूजया धनमाप्नोति पूजया लभते महीम् ॥ १७ ।

पूजया लभते लक्ष्मीं सरस्वतीं महौजसम् ।
महाविद्याः[4] प्रसीदन्ति सर्वे देवा न संशयः ॥ १८ ।

बालभैरवब्रह्मेन्द्रा ब्राह्मणा ब्रह्मवादिनः ।
रुद्राश्च देववर्गाश्च वैष्णवा विष्णुरूपिणः ॥ १९ ।

अवताराश्च द्विभुजा विष्णवो मनुशोभिताः[5] ।
अन्ये दिक्पालदेवाश्च चराचरगुरुस्तथा ॥ २० ।

नानाविद्यायुतास्सर्वे दानवा कूटशालिनः ।
अपवर्गस्थिता ये ये ते ते तुष्टा न संशयः ॥ २१ ।

यद्यहं तुष्टिरूपा हि अन्ये लोके च का कथा ।
कुमारीपूजनं कृत्वा त्रैलोक्यं वशमानयेत् ॥ २२ ।

महाशान्तिर्भवेत् क्षिप्रं सर्वपुण्यं फलप्रदम् ।
तत्तन्मन्त्रसदुल्लेखात् क्षणात् पुण्ययुतं भवेत् ॥ २३ ।

---

१. सुरेश्वर ! क० । २. पूजयित्वा क० ।

३. वाञ्छाढ्या क० । द्वितीयाविभक्त्यन्तं पदमिदं संभाव्यते ।

४. महाविद्याः सर्वे देवाश्च प्रसीदन्ति इत्यन्वयः । ५. मनुसेविनः क० ।

मन्त्रेण पुटितं कृत्वा जप्त्वा सिद्धीश्वरो भवेत् ।
यद्यत् प्रकारमुच्चार्य वदामि सुरसुन्दर ।। २४ ।

तत्तत् कार्यमवश्यं च भिन्नबुद्धिं न कारयेत् ।
अथ बीजप्रभेदञ्च[1] वद शङ्करपूजिते ।। २५ ।

यदि मां[2] स्नेहपुञ्जोऽस्ति मत्कुलार्थप्रवेशिनि ।
वदस्व परमानन्द भैरवि प्राणवल्लभे ।। २६ ।

आनन्दभैरवी उवाच—

शृणु नाथ कुलार्थं मे कुमारीपूजने मनुम् ।
महामन्त्रं महामन्त्रं सिद्धमन्त्रं न संशयः ।। २७ ।

एतन्मन्त्रप्रसादेन जीवन्मुक्तो भवेत् सुधीः ।
अन्ते देवीपदं याति सत्यमानन्दभैरव ।। २८ ।

ऐहिकसुखसम्पत्तिर्म्मधुमत्याः प्रसादकम् ।
अवश्यं प्राप्नुयान्मर्त्यो विश्वासं[3] कुरु शंकर ।। २९ ।

वाग्भवेन पुरः क्षोभं मायाबीजे गुणाष्टकम् ।
श्रियोबीजे श्रियोलाभो मायाबीजे रिपुक्षयः ।। ३० ।

भैरवेण तु बीजेन खेचरत्त्वं सुरादिभिः ।
कुमारिका ह्यहं नाथ सदा त्वं हि कुमारकः ।। ३१ ।

अष्टोत्तरशतं वापि एकां वा परिपूजयेत् ।
पूजिताः प्रतिपद्यन्ते[4] निर्द्दहन्त्यवमानिताः ।। ३२ ।

कुमारी योगिनी साक्षात् कुमारी परदेवता ।
असुरा अष्टनागाश्च ये ये दुष्टग्रहा अपि ।। ३३ ।

भूतवेतालगन्धर्वा[5] डाकिनीयक्षराक्षसाः[6] ।
याश्चान्या देवताः सर्वाः भूर्भुवः स्वश्च भैरव ।। ३४ ।

---

१. प्रभावं च क० ।
२. अस्य कुत्रान्वयः ? इति चिन्तनीयमस्ति ।
३. विश्रामं क० ।
४. प्रतिपूज्यन्ते क० ।
५. भूताश्च वेतालाश्च गन्धर्वाश्चेति द्वन्द्वः ।
६. डाकिनी च यक्षश्च राक्षसश्चेति डाकिनीयक्षराक्षसाः, द्वन्द्वः ।

पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ३५ ।

ते तुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् ।
निधियुक्तां कुमारीन्तु[1] पूजयेच्चैव भैरव ॥ ३६ ।

पाद्यमर्घ्यं तथा धूपं कुङ्कुमं चन्दनं शुभम् ।
भक्तिभावेन सम्पूज्य कुमारीभ्यो निवेदयेत् ॥ ३७ ।

प्रदक्षिणत्रयं कुर्यादादौ मध्ये तथान्ततः ।
पश्चाच्च दक्षिणा देया रजतस्वर्णमौक्तिकैः ॥ ३८ ।

दक्षिणां विधिवद्दत्त्वा कुमारीभ्यः क्रमेण तु ।
विवाहयेत् स्वयं कन्यां ब्रह्महत्यां[2] व्यपोहति ॥ ३९ ।

यावच्च[3] पुण्यकाले तु कन्यादानं प्रकल्पयेत् ।
भुक्तिमुक्तिफलं तस्य सौभाग्यं सर्वसम्पदः ॥ ४० ।

रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान् हरः ।
तीर्थकोटिसहस्राणि अश्वमेधशतानि च ॥ ४१ ।

तत्फलं लभते सद्यो यस्तु कन्यां विवाहयेत् ।
वालुकासागरे ज्ञेया तावदब्दसहस्रकम् ॥ ४२ ।

एकैकं कुलमुद्धृत्य रुद्रलोके महीयते ।
तत्तदिष्टदेवानां प्रीतये तुष्टये सुधी ॥ ४३ ।

कन्यादानं समाहृत्य मुक्तिमाप्नोति भैरव ।
तत्तद्वर्षीयकन्यायास्तत्तद्बुद्ध्या च साधकः ॥ ४४ ।

विभाव्य शिवरूपत्वं सम्प्रदानीयकारके ।
पूर्णरूपं शिवं ध्यात्वा वरं सर्वांगसुन्दरम् ॥ ४५ ।

तेजोमयं यशःकान्तं बालभैरवरूपिणम् ।
[4]वटुकेशं महादेवं वरयेत् साधकाग्रणीः[5] ॥ ४६ ।

---

१. भोजयेच्चैव क० । २. ब्रह्महत्या विनश्यति क० ।
३. यो यश्च क० । ४. वटुका विद्यार्थिनस्तेषामीशः ।
५. साधकानामग्रणीः ।

बालरूपां भैरवीं च त्रैलोक्यसुन्दरीं वराम् ।
नानालंकारनम्राङ्गीं भद्रविद्याप्रकाशिनीम् ।। ४७ ।
चारुहास्यां महानन्दहृदयां शुभदां शुभाम् ।
ध्यात्त्वा द्वादशपत्राब्जे पूर्णचन्द्रनिभाननाम् ।। ४८ ।
सम्प्रदाने समानीय तत्तन्मन्त्रेण दापयेत् ।
एतत् श्रुत्त्वा महावीरो बलरूपी निरञ्जनः ।। ४९ ।
पुनर्जिज्ञासयामास परमानन्दभैरवीम् ।

आनन्दभैरव उवाच—

कुमारीकुलतत्त्वार्थं मन्त्रार्थं जपनक्रमम् ।। ५० ।
यजनादिप्रकारञ्च भोजनादिक्रमन्तथा ।
होमादिप्रक्रियां तस्याः स्तोत्रं प्रत्येकमेव हि ।। ५१ ।
कवचं च कुमारीणां वदस्व क्रमशः प्रिये ।
येन क्रमेण सा विद्या कुमारी परदेवता ।। ५२ ।
निर्जने साधकस्याग्रे महावाक्यं स्वयं वदेत् ।
बालिका चारुनयना केन हेतोः प्रसीदति ।। ५३ ।
तत्प्रकारं वद स्नेहादानन्दभैरवप्रिये ।

आनन्दभैरवी उवाच—

शृणु शम्भो प्रवक्ष्यामि कुमारीकुलमन्त्रकान् ।। ५४ ।
येन विज्ञानमात्रेण धरणीशो नरोत्तमः ।
सर्वेषां गुरुरूपः स्यात् कुमारीयजनेन च ।। ५५ ।
एकवर्षा वरा सन्ध्यादिकानां मनुमुत्तमम् ।
षोडशाच्छान्तरूपाणां मन्त्रं शृणु महाप्रभो ।। ५६ ।
क्रमादिकञ्च सर्वेषां चैतन्यसिद्धिसत्क्रियाम् ।
आनीय सुन्दरीं नारीं कुमारीं वरनायिकाम् ।। ५७ ।
रत्नालङ्कारसंयुक्तां शङ्खवस्त्रादिशोभिताम् ।
वाग्भवेन जलं नाथ तन्नाम्ना परिदापयेत् ।। ५८ ।

देवीबुद्ध्या सदा ध्यात्त्वा पूजयेत् साधकोत्तमः ।
मायाबीजेन तन्नाम्ना पाद्यं दद्यात् तथा प्रभो ॥ ५९ ।
लक्ष्मीबीजेन चार्घ्यन्तु कुर्याद् बीजेन चन्दनम् ।
मायाबीजेन पुष्पाणि कुमार्यै दापयेत् सुधीः ॥ ६० ।
सदाशिवेन मन्त्रेण धूपदीपौ महोत्तमौ ।
दत्त्वा षडङ्गमन्त्रेण पूजयेद् देवनायकः ॥ ६१ ।
तत्प्रकारं महादेव शृणुष्वानन्दरूपधृक् ।
महातेजोमयं शुभ्रं हृदयं हस्तदक्षिणैः ॥ ६२ ।
विभाव्य प्रपठेद् धीमान् तन्मन्त्रं शृणु शंकर ! ।
आदौ वाग्भवमुच्चार्य मायां लक्ष्मीन्तु कूर्चकम् ॥ ६३ ।
प्रेतबीजं ततो ब्रूयात् [1]सविसर्गेन्दुबिन्दुकम् ।
कुलशब्दं समुच्चार्य कुमारिके ततो वदेत् ॥ ६४ ।
हृदयायः नमः प्रोच्य ततः शिरसि भावयेत् ।
शुक्लवर्णं सर्वमयं बीजमुच्चार्य संन्यसेत् ॥ ६५ ।
हकारं वाग्भवाढ्यञ्च वकारं वाग्भवार्थकम् ।
मायां लक्ष्मीं वाग्भवं च द्विठान्ते शिरसे पदम् ॥ ६६ ।
वह्निजायावधिर्मन्त्रो न्यसेत् शिरसि साधकः ।
शिखामध्ये कृष्णवर्णं नीलाञ्जनचयप्रभम् ॥ ६७ ।
विभाव्य संन्यसेन्मन्त्रो कुमारीकुलसिद्धये ।
आदौ प्रणवमुद्धृत्य तदन्ते [2]वह्निसुन्दरी ॥ ६८ ।
शिखायै च समुद्धृत्य वषट्कारं ततो वदेत् ।
ततः कवचमध्ये च बलवन्तं सुतेजसम् ॥ ६९ ।
प्रथमारुणसंकाशं ध्यात्वा चारुकलेवरम् ।
वाग्भवञ्च समुच्चार्य कुलशब्दं ततो वदेत् ॥ ७० ।
वागीश्वरीपदं पश्चात् कवचाय ततो वदेत् ।
तारकब्रह्मशब्दञ्च कवचन्यासजालकम् ॥ ७१ ।

---

१. विसर्गेण सहितः सविसर्गः, तादृश इन्दुबिन्दुर्यस्य तत् । २. विष्णु-क० ।

ततो नेत्रत्रयं ध्यात्त्वा महाबीजं महाप्रभम् ।
रक्तवर्णं कोटिकोटिजवामण्डलमण्डितम् ॥ ७२ ।

विराजितं कोटिपुण्यार्जिततेजसि भास्करे ।
वाग्भवं च समुच्चार्य कुलेश्वरिपदं ततः ॥ ७३ ।

नेत्रत्रयाय शब्दान्ते वौषट् लोचनमन्त्रकम् ।
ततः साधकमन्त्रो च वामहस्ततले तथा ॥ ७४ ।

मध्यमातर्जनीभ्यां च तालद्वयमुपाचरेत् ।
तन्मन्त्रं कोटिसूर्योग्रज्योत्स्नाजालसमप्रभम्[1] ॥ ७५ ।

महाकाशोद्भवं शब्दं महोग्रपरिपीडनम् ।
मायाबीजं तथास्त्राय पदमुद्धृत्य यत्नतः ॥ ७६ ।

पान्तठान्तं समुद्धृत्य महामन्त्रं प्रकीर्तितम् ।
ततस्तस्या हृन्निलये ध्यात्त्वा च परिवारकान् ॥ ७७ ।

पूजयेद् यत्नतो मन्त्री भेषजामृतधारया ।
तर्पयेत् पूजयेद्भक्त्या भैरवं[2] बालभैरवम् ॥ ७८ ।

देवताभिः पूजयित्त्वा परिवारान् क्रमेण वै ।
ततो वाग्भवमुच्चार्य सिद्धजयाय शब्दतः ॥ ७९ ।

पूर्वं पदं समुच्चार्य वक्त्राय नम ईरितः ।
ततो वाग्भवमुच्चार्य जयाय शब्दमुद्धरेत् ॥ ८० ।

उत्तरवक्त्रमुद्धृत्य चतुर्थ्यन्तं नमःपदम् ।
ततो वाग्भवमाया श्रीबीजमुच्चार्य यत्नतः ॥ ८१ ।

कुब्जिके पश्चिमान्ते च वक्त्राय नमः कुर्व्वितः ।
ततो वाग्भवमुच्चार्य कालिके पदमुच्चरेत् ॥ ८२ ।

दक्षवक्त्राय शब्दान्ते [3]नानामन्त्रं प्रकीर्तितम् ।
एतन्मन्त्राक्षरं नाथ समुच्चार्य कुलेश्वर ॥ ८३ ।

१. कोटिः सूर्यास्तेषामुग्रज्योत्स्नाजालेन समा प्रभा यस्य तम् ।

२. कलिभैरवम्—क० । ३. नमोमन्त्रः प्रकीर्तितः—क० ।

पूजयित्वा क्रमेणैव भास्करं परिपूजयेत् ।
चन्द्रं दिक्पालदेवञ्च सन्ध्यादीन्[1] परिपूजयेत् ॥ ८४ ।
वीरभद्रां महाकालीं[2] कौलिनीं कुलगामिनीम् ।
अष्टादशभुजां कालीं चतुर्वर्गां प्रपूजयेत् ॥ ८५ ।
नैवेद्यादीन्समानीय नानाभोज्यादिसंयुतम् ।
दुग्धं घनावृतं क्षीरं पक्वान्नं पक्वसत्फलम् ॥ ८६ ।
यद्यत्कालोपयोग्यञ्च शर्करामधुमिश्रितम् ।
पञ्चतत्त्वं कुलद्रव्यं निजकल्याणवर्धनम् ॥ ८७ ।
नानाद्रव्यञ्च नैवेद्यं स्वस्वकल्पोक्तसाधितम् ।
कुमारीभ्यो निवेद्यैवं नानासौरभशोभितम् ॥ ८८ ।
शीतलं जलमानीय दद्यात्ताभ्यो महासुधीः ।
ततो हितं महामन्त्रं कुमार्याश्चातिदुर्लभम् ॥ ८९ ।
अथवा स्वीयमूलञ्च जप्त्वा सिद्धीश्वरो भवेत् ।
समर्थप्राणवायूनां धारयेत्कारयेत्[3] स्वयम् ॥ ९० ।
अष्टाङ्गादिप्रणामं च कुर्वन्स्तोत्रं पठन्दिशेत् ॥ ९१ ।
नमामि कुलकामिनीं परमभाग्यसन्दायिनीम् ।
कुमाररतिचातुरीं सकलसिद्धिमानन्दिनीम् ॥ ९२ ।
प्रवालगुटिकामृजां रजतरागवस्त्रान्विताम् ।
हिरण्यकुलभूषणां भुवनवाक्कुमारीं भजे ॥ ९३ ।
इति मन्त्रेण संन्यस्य तारिणीं परिपूजयेत् ।
शिवं गणेशं सम्पूज्य प्रणमेत् साधकोत्तमः ॥ ९४ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्याविन्यासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये सप्तमः पटलः ॥

१. एकवर्षा कन्या 'सन्ध्या' इति कथ्यते ।
२. महाकन्याम् ,, ,, ,, ।
३. धारणं कारयेत्स्वयम्–क० ।

अथाष्टमः पटलः

श्री-आनन्दभैरवी उवाच—

अथ वक्ष्ये महादेव कुमार्या जपहोमकम् ।
लक्षसंख्यजपं कृत्वा मायां वा वाग्भवं रमाम् ॥ १ ।

कालीबीजं वापि नाथ मायां वा कामबीजकम् ।
सदाशिवेन पुटितं बिन्दुचन्द्रविभूषितम् ॥ २ ।

[1]अथवा प्रणवेनापि पुटितं त्रिदशेश्वर ।
जपित्वा मूलमन्त्रञ्च लक्षसंख्याविधानतः ॥ ३ ।

तद्दशांशं महाहोमं घृताक्तबिल्वपत्रकैः ।
अथवा श्वेतपुष्पैश्च कुन्दपुष्पैर्महाफलम् ॥ ४ ।

एवं क्रमेण जुहुयात् करवीरप्रसूनकैः ।
घृताक्तैः कैवलैर्वापि चन्दनागुरुमिश्रितैः ॥ ५ ।

हविष्याशी[2] दिवाभागे रात्रौ पूजापरो भवेत् ।
निजपूजावशेषैस्तु कुलद्रव्यैः प्रपूजयेत् ॥ ६ ।

दिवासंख्यं जपेत्तत्र परमानन्दरूपधृक् ।
जपान्ते जुहुयान्मन्त्री मदुक्तद्रव्यसयुतैः ॥ ७ ।

ततः प्राणात्मकं वायुं शोधयित्वा पुनः पुनः ।
प्राणायामत्रयं कृत्वा चाष्टाङ्गं प्रणमेन्मुदा ॥ ८ ।

प्रणामसमये नाथ इदं स्तोत्रं पठेत् यतिः ।
कवचञ्च तथा पाठ्यं कुमारीणामथापि वा ॥ ९ ।

---

१. लक्षसंख्यां क्रमेणैव जप्त्वा सिद्धीश्वरो भवेत्–क० ।

२. हविष्यमश्नाति इति हविष्याशी, णिनिप्रत्ययः कर्तरि ।

निजदेव्या महास्तोत्रं पठेद्धि कवचं ततः ।
कुमारीणां महादेव सहस्रनाम साष्टकम् ॥ १० ।

पठित्वा सिद्धिमाप्नोति पठित्वा[1] साधकोत्तमः ।
[2]अग्रे संस्थाप्य ताः सर्वा रत्नकोटिसुशीतलाः ॥ ११ ।

ततः स्तोत्रं पठेद्धीमान् समाहितमना वशी ।
महादिव्याचाररतो[3] वीरभावोल्बणोऽपि वा ॥ १२ ।

एवं क्रमेण प्रपठेद् भक्तिभावपरायणः ।
महाविद्या महासेवा भक्तिश्रद्धाप्लुतार्पितः ॥ १३ ।

महाज्ञानी भवेत् क्षिप्रं वाञ्छासिद्धिमवाप्नुयात् ॥ १४ ।

आनन्दभैरव उवाच[4]—

देवेन्द्रादय इन्दुकोटिकिरणां वाराणसीवासिनीम् ।
विद्यां वाग्भवकामिनीं त्रिनयनां सूक्ष्मक्रियाज्वालिनीम्[5] ॥
चण्डोद्योगनिकृन्तिनीं त्रिजगतां धात्रीं कुमारीं वराम् ।
मूलाम्भोरुहवासिनीं शशिमुखीं[6] सम्पूजयामि श्रिये ॥ १५ ।

भाव्यां देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकाम् ।
सन्ध्यां नित्यगुणोदयां[7] द्विजगणे श्रेष्ठोदयां सारुणाम् ॥
शुक्लाभां परमेश्वरीं शुभकरीं भद्रां विशालाननाम् ।
गायत्रीं गणमातरं दिनगतिं कृष्णाञ्च वृद्धां भजे ॥ १६ ।

---

१. नात्र कार्या विचारणा—क० ।

२. तद् शक्तौ निजदेव्याः सहस्रनाम मङ्गलम् ।
अष्टोत्तरं पठित्वाथ सिद्धचक्रो क्षीणसंशयः ॥
तासां स्तोत्रं दिव्यनाथ शृणु सर्वत्र मङ्गलम् ।
अकस्मात् सिद्धिमाप्नोति पठित्वा साधकोत्तमः ॥ क० ।

३. महाविद्याचारटतो महाभावोल्बणोऽपि वा—ग० ।

४. श्री-आनन्दभैरवी उवाच—क० ।

५. नृक्षत्रियाकामिनीम्—ग० ।

६. शशिनो मुखमिव मुखं यस्यास्ताम् ।

७. सुखोदयाम्—क० ।

ब्रालां बालकपूजितां गणभृतां विद्यावतां मोक्षदाम् ।
धात्रीं शुक्लसरस्वतीं नववरां वाग्वादिनीं चण्डिकाम् ।।
स्वाधिष्ठानहरिप्रियां प्रियकरीं वेदान्तविद्याप्रदाम् ।
नित्यं मोक्षहिताय योगवपुषा चैतन्यरूपां भजे ।। १७ ।

नानारत्नसमूहनिर्मितगृहे पूज्यां सुरैर्बालिकां ।
वन्दे नन्दनकानने मनसिजे सिद्धान्तबीजानने ।।
अर्थं देहि निरर्थकाय पुरुषे हित्वा कुमारीं कलाम् ।
[1]सत्यं पातु कुमारिके त्रिविधमूर्त्या च तेजोमयीम् ।। १८ ।

वरानने सकलिकां कुलपथोल्लासैक[2]बीजोद्वहाम् ।
मांसामोदकरालिनीं हि भजतां कामातिरिक्तप्रदाम् ।।
बालोऽहं वटुकेश्वरस्य चरणाम्भोजाश्रितोऽहं सदा ।
हित्वा बालकुमारिके शिरसि [3]शुक्लाम्भोरुहेशम्भजे ।। १९ ।

सूर्याह्लादवलाकिनीं कलिमहापापादितापापहाम्[4] ।
तेजोऽङ्गां भुवि सूर्यगां भयहरां तेजोमयीं बालिकाम् ।।
वन्दे हृत्कमले सदा रविदले वालेन्द्रविद्यां सतीम् ।
साक्षात्सिद्धिकरीं कुमारिविमलेऽन्वासाद्य रूपेश्वरीम् ।। २० ।

नित्यं श्रीकुलकामिनीं कुलवतीं कोलामुमामम्बिकाम् ।
नानायोगनिवासिनीम् सुरमणीं नित्यां तपस्यान्विताम् ।।
वेदान्तार्थविशेषदेशवसना भाषाविशेषस्थिताम् ।
वन्दे पर्वतराजराजतनयां[5] कालप्रियो त्वामहम् ।। २१ ।

कौमारीं कुलकामिनीं रिपुगणक्षोभाग्निसन्दोहिनीम् ।
रक्ताभानयनां शुभां परममार्गमुक्तिसंज्ञाप्रदाम् ।।
भार्यां भागवतीं मतिं भुवनमामोदपञ्चाननां ।
पञ्चास्यप्रियकामिनीं भयहरां सर्पादिहारां भजे ।। २२ ।

---

१. मह्यं पातु कुमारिके त्रिविधमृत्याकाशतेजोमयीम्—ख० ।

२. बीजोद्गृहाम्—ग० ।

३. शुद्धाम्भोरुहेशं भजे—ख० ।

४. कलिमलापापासितां पापहाम्—ग० ।

५. पर्वतानां राजानः पर्वतराजानः, तेषां राजा पर्वतराजराजः, तस्य तनया, ताम् ।

चन्द्रास्यां[1] चरणद्वयाम्बुजमहाशोभाविनोदीं नदीम् ।
मोहादिक्षयकारिणीं वरकरां श्रीकुब्जिकां[2] सुन्दरीम् ॥
ये नित्यं परिपूजयन्ति सहसा राजेन्द्रचूडामणिम् ।
सम्पादं धनमायुषो जनयतो व्याप्येश्वरत्वं जगुः ॥ २३ ।

योगीशं भुवनेश्वरं प्रियकरं श्रीकालसन्दर्भया ।
शोभासागरगामिनं हरभवं वाञ्छाफलोद्दीपनम् ॥
लोकानामघनाशनाय शिवया श्रीसंज्ञया विद्यया ।
धर्मप्राणसदैवतां प्रणमतां कल्पद्रुमं भावये ॥ २४ ।

विद्यां तामपराजितां [3]मदनभावामोदमत्ताननाम् ।
हृत्पद्मस्थितपादुकां कुलकलां कात्यायनीं भैरवीम् ॥
ये ये पुण्यधियो भजन्ति परमानन्दाब्धिमध्ये मुदा ।
सर्व्वाच्छापिततेजसा भयकरीं मोक्षाय संकीर्त्तये ॥ २५ ।

रुद्राणीं प्रणमामि पद्मवदनां कोटचर्कतेजोमयीम् ।
नानालङ्कृतभूषणां कुलभुजामानन्दसन्दायिनीम् ॥
श्रीमायाकमलान्वितां हृदिगतां सन्तानबीजक्रियाम् ।
आनन्दैकनिकेतनां हृदि भजे साक्षादलब्धामहम् ॥ २६ ।

नमामि वरभैरवीं क्षितितलाद्यकालानलाम् ।
मृणालसुकुमारारुणां भुवनदोषसंशोधिनीम् ॥
जगद्भयहरां हरां हरति या च योगेश्वरी ।
महापदसहस्रकम् सकलभोगदान्तामहम् ॥ २७ ।

साम्राज्यं प्रददाति याचितवती विद्या महालक्षणा ।
साक्षादष्टसमृद्धिदातरि महालक्ष्मीः कुलक्षोभहा ॥
स्वाधिष्ठानसुपङ्कजे विवसितां विष्णोरनन्तप्रिये ।
वन्दे राजपदप्रदां शुभकरीं कौलेश्वरीं कौलिकीम् ॥ २८ ।

---

१. चन्द्रस्य आस्यं मुखमिव आस्यं यस्यास्ताम् । अस्यन्ति वर्णान् प्रक्षिपन्ति अनेनेति आस्यम्, करणे ण्यत्प्रत्ययः ।

२. श्रीचन्द्रिकाम्—क० । ३. मदनभारेति—क० ।

पीठानामधिपाधिपाम् असुवहां विद्यां शुभां नायिकाम् ।
सर्वालङ्करणान्वितां त्रिजगतां क्षोभापहां वारुणीम् ।।
वन्दे पीठगनायिकां[1] त्रिभुवनच्छायाभिराच्छादिताम् ।
सर्वेषां हितकारिणीं जयवतामानन्दरूपेश्वरीम् ।। २९ ।

क्षेत्रज्ञां मदविह्वलां कुलवतीं सिद्धिप्रियां प्रेयसीम् ।
शम्भोः श्रीवटुकेश्वरस्य महतामानन्दसञ्चारिणीम् ।। ३० ।

साक्षादात्मपरोद्गमां कमलमध्यसंभाविनीम्
शिरो दशशते दलेऽमृतमहाब्धिधाराधराम् ।
निजमनः क्षोभापहां शाकिनीम्
बाह्यार्थप्रकटामहं रजतभां वन्दे महाभैरवीम् ।। ३१ ।

प्रणामफलदायिनीं सकलबाह्यवश्यां गुणाम् ।
नमामि परमम्बिकां विषयदोषसंहारिणीम् ।।
सम्पूर्णविधुवन्मुखीं कमलमध्यसम्भाविनीम् ।
शिरो दशशते दलेऽमृतमहाब्धिधाराधराम् ।। ३२ ।

साक्षादहं त्रिभुवनामृतपूर्णदेहाम्
सन्ध्यादिदेवकमलां कुलपण्डितेन्द्राम् ।
नत्वा भजे दशशते दलमध्यमध्ये
कौलेश्वरीं सकलदिव्यजनाश्रयां ताम् ।। ३३ ।

विश्वेश्वरीं स्वरकुले वरबालिके त्वाम्
सिद्धासने प्रतिदिनं प्रणमामि भक्त्या ।
भक्तिं धनं जयपदं यदि देहि दास्यं
तस्मिन् महामधुमतीं लघुनाहताः स्यात् ।। ३४ ।

एतत्स्तोत्रप्रसादेन कवितावाक्पतिर्भवेत् ।
महासिद्धीश्वरो दिव्यो वीरभावपरायणः ।। ३५ ।

सर्वत्र जयमाप्नोति स हि स्याद्देववल्लभः ।
वाचामीशो भवेत्क्षिप्रं कामरूपो भवेन्नरः ।। ३६ ।

---

१. पीठं गच्छति या सा पीठगा, सा चासौ नायिका चेति पीठगनायिका ।

[1]पशुरेव महावीरो दिव्यो भवति निश्चितम् ।
सर्वविद्याः प्रसीदन्ति तुष्टाः सर्वे दिगीश्वराः ॥ ३७ ।

वह्निः शीतलतां याति जलस्तम्भं स कारयेत् ।
धनवान् पुत्रवान् राजा इह काले भवेन्नरः ॥ ३८ ।

परे च याति वैकुण्ठे कैलासे शिवसन्निधौ ।
मुक्तिरेव महादेव यो नित्यं सर्वदा पठेत् ॥ ३९ ।

महाविद्यापदाम्भोजं स हि पश्यति निश्चितम् ।
शृणु नाथ प्रवक्ष्यामि कुमारीतर्पणादिकम् ॥ ४० ।

यासां तर्पणमात्रेण कुलसिद्धिर्भवेद् ध्रुवम् ।
कुलबालां मूलपद्मस्थितां कामविहारिणीम् ॥ ४१ ।

शतधा मूलमन्त्रेण तर्पयामि तव प्रिये ।
मूलाधारमहातेजो जटामण्डलमण्डिताम् ॥ ४२ ।

सन्ध्यादेवीं तर्पयामि कामबीजेन मे शुभे ।
मूलपङ्कजयोगाङ्गीं कुमारीं श्रीसरस्वतीम् ॥ ४३ ।

तर्पयामि कुलद्रव्यैस्तव सन्तोषहेतुना ।
चक्रे मूलाधारपद्मे त्रिमूर्त्तिबालनायिकाम् ॥ ४४ ।

सर्वकल्याणदां देवीं तर्पयामि परामृतैः ।
स्वाधिष्ठाने महापद्मे षड्दलान्तःप्रकाशिनीम्[2] ॥ ४५ ।

श्रीबीजेन तर्पयामि भोगमोक्षाय केवलम् ।
स्वाधिष्ठानकुलोल्लास विष्णुसङ्केतगामिनीम् ॥ ४६ ।
कालिकां निजबीजेन तर्पयामि कुलामृतैः ।
स्वाधिष्ठानाख्यपद्मस्थां महातेजोमयीं शिवाम् ॥ ४७ ।

सूर्यगां शीर्षमधुना तर्पयामि कुलेश्वरीम् ।
मणिपूराब्धिमध्ये तु मनोहरकलेवराम् ॥ ४८ ।

---

१. क्रमशोऽप्यष्टसिद्धिः स्यात् वाग्मी भवति निश्चितम्—क० ।
२. षट्संख्याकानि दलानि, तेषामन्तर्मध्ये प्रकाशयति, तच्छीला, ताम् ।

उमादेवीं तर्पयामि मायाबीजेन पार्वतीम् ।
मणिपूराम्भोजमध्ये त्रैलोक्यपरिपूजिताम् ॥ ४९ ।
मालिनीं मलचित्तस्य सद्बुद्धिं तर्पयाम्यहम् ।
मणिपूरस्थितां रौद्रीं परमानन्दवर्धिनीम् ॥ ५० ।
आकाशगामिनीं देवीं कुब्जिकां तर्पयाम्यहम् ।
तर्पयामि महादेवीं महासाधनतत्पराम् ॥ ५१ ।
योगिनीं कालसन्दर्भां तर्पयामि कुलाननाम् ।
शक्तिमन्त्रप्रदां रौद्रीं लोलजिह्वासमाकुलाम् ॥ ५२ ।
अपराजितां महादेवीं तर्पयामि कुलेश्वरीम् ।
महाकौलप्रियां सिद्धां रुद्रलोकसुखप्रदाम् ॥ ५३ ।
रुद्राणीं रौद्रकिरणां तर्पयामि वधूप्रियाम् ।
षोडशस्वरसंसिद्धिं महारौरवनाशिनीम् ॥ ५४ ।
महामद्यपानचित्तां भैरवीं तर्पयाम्यहम् ।
त्रैलोक्यवरदां देवीं श्रीबीजमालयावृताम् ॥ ५५ ।
महालक्ष्मीं भवैश्वर्यदायिनीं तर्पयाम्यहम् ।
लोकानां हितकर्त्रीञ्च [1]हिताहितजनप्रियाम् ॥ ५६ ।
तर्पयामि रमाबीजां पीठाद्यां पीठनायिकाम् ।
जयन्तीं वेदवेदाङ्गमातरं सूर्यमातरम् ॥ ५७ ।
तर्पयामि सुधाभिश्च क्षेत्रज्ञां माययावृताम् ।
तर्पयामि कुलानन्दपरमां[2] परमाननाम् ॥ ५८ ।
तर्पयाम्यम्बिकादेवीं मायालक्ष्मीहृदिस्थिताम् ॥ ५९ ।
सर्वासां चरणद्वयाम्बुजतनुं चैतन्यविद्यावतीं ।
सौख्यार्थं शुभषोडशस्वरयुतां श्रीषोडशीसंकुलाम् ॥
आनन्दार्णवपद्मरागखचिते सिंहासने शोभिते ।
नित्यं तत् परितर्पयामि सकलं श्वेताब्जमध्यासने ॥ ६० ।

---

१. हिताश्चाहिताश्च हिताहिताः, ते च ते जनाश्च हिताहितजनाः, तेषु प्रिया, ताम् ।
२. पावनाम्—क० ।

ये नित्यं प्रपठन्ति चारुसफल स्तोत्रार्द्धसन्तर्पणम् ।
विद्यादाननिदानमोक्षपरमां मायामयं यान्ति ते ॥
नश्यन्ति क्षितिमण्डलेश्वरगणाः सर्वाविपत्कारका ।
राजानं वशयन्ति[1] योगसकलं नित्या भवन्ति क्षणात् ॥ ६१ ।

तर्पणात्मकमोक्षाख्यं पठन्ति यदि मानुषाः ।
अष्टैश्वर्ययुतो भूत्वा वत्सरात्तां प्रपश्यति ॥ ६२ ।

महायोगी भवेन्नाथ मासादभ्यासतः प्रभो ।
त्रैलोक्यं क्षोभयेत्क्षिप्रं वाञ्छाफलमवाप्नुयात् ॥ ६३ ।

भूमध्ये राजराजेशो[2] लभते वरमङ्गलम् ।
शत्रुनाशे तथोच्चाटे बन्धने व्याधिसंकटे ॥ ६४ ।

चातुरङ्गे तथा घोरे भये दूरस्य[3] प्रेषणे ।
महायुद्धे नरेन्द्राणाम् पठित्वा सिद्धिमाप्नुयात् ॥ ६५ ।

यः पठेदेकभावेन सन्तर्पणफलं लभेत् ।
पूजासाफल्यमाप्नोति कुमारीस्तोत्रपाठतः ॥ ६६ ।

यो न कुर्यात्कुमार्यर्चां स्तोत्रञ्च नित्यमङ्गलम् ।
स भवेत् पाशवः कल्पो मृत्युस्तस्य पदे पदे ॥ ६७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्या-विलासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये अष्टमः पटलः ॥

---

१. वशं कुर्वन्ति, वशयन्ति, तत्करोति-इति णिच् ।
२. राज्ञां राजानो राजराजाः, तेषामीशः ।
३. भये दुःखपदर्शने–क० ।

अथ नवमः पटलः

आनन्दभैरव[1] उवाच—

अथातः सम्प्रवक्ष्यामि कुमारीकवचं शुभम् ।
त्रैलोक्यं मङ्गलं नाम महापातकनाशकम् ।। १ ।

पठनाद्धारणाल्लोका महासिद्धाः प्रभाकराः ।
शक्रो देवाधिपः श्रीमान् देवगुरुर्बृहस्पतिः ।। २ ।

[2]महातेजोमयो वह्निर्धर्म्मराजो भयानकः ।
वरुणो देवपूज्यो हि जलानामधिपः स्वयम् ।। ३ ।

सर्वहर्त्ता महावायुः कुबेरः कुञ्जरेश्वरः ।
धराधिपः प्रियः शम्भोः सर्वे देवा दिगीश्वरः ।। ४ ।

न मेरुः प्रभुरेकायाः सर्वेशो निर्मलो द्वयोः ।
एतत्कवचपाठेन सर्वे भूपा धनाधिपाः ।। ५ ।

प्रणवो मे शिरः पातु माया सन्दायिका सती ।
ललाटोद्र्ध्वं महामाया पातु मे श्रीसरस्वती ।। ६ ।

कामाक्षा वटुकेशानी त्रिमूत्तिर्भालमेव मे ।
चामुण्डा बीजरूपा च वदनं कालिका मम ।। ७ ।

पातु मां सूर्यगा नित्यं तथा नेत्रद्वयं मम ।
कर्णयुग्मं कामबीजं स्वरूपोमातपस्विनी[3] ।। ८ ।

रसनाग्रं तथा पातु वाग्देवी मलिनी मम ।
डामरस्था कामरूपा दन्ताग्रं कुब्जिका मम ।। ९ ।

देवी प्रणवरूपाऽसौ पातु नित्यं शिवा मम ।
ओष्ठाधरं शक्तिबीजात्मिका स्वाहास्वरूपिणी ।। १० ।

---

१. आनन्दभैरवी उवाच—क० । २. सद्यः—ग० ।
३. अस्यार्थश्चिन्तनीयः ।

पायान्मे कालसन्दष्टा[1] पञ्चवायुस्वरूपिणी ।
गलदेशं महारौद्री पातु मे चापराजिता ।। ११ ।

क्षौं बीजं मे तथा कण्ठं रुद्राणी स्वाहयान्विता ।
हृदयं भैरवी विद्या पातु षोडश सुस्वरा ।। १२ ।

द्वौ बाहू पातु सर्वत्र महालक्ष्मीः प्रधानिका ।
सर्वमन्त्रस्वरूपं मे चोदरं पीठनायिका ।। १३ ।

पार्श्वयुग्मं तथा पातु कुमारी वाग्भवात्मिका ।
कैशोरी कटिदेशं मे मायाबीजस्वरूपिणी ।। १४ ।

जङ्घायुग्मं जयन्ती मे योगिनी कुल्लुकायुता ।
सर्वाङ्गमम्बिकादेवी पातु मन्त्रार्थगामिनी ।। १५ ।

केशाग्रं कमलादेवी नासाग्रं विन्ध्यवासिनी ।
चिबुकं चण्डिका देवी कुमारी पातु मे सदा ।। १६ ।

हृदयं ललिता देवी पृष्ठं पर्वतवासिनी ।
त्रिशक्तिः षोडशी देवी लिङ्गं गुह्यं सदावतु ।। १७ ।

श्मशाने चाम्बिका देवी गङ्गागर्भे च वैष्णवी ।
शून्यागारे पञ्चमुद्रा मन्त्रयन्त्रप्रकाशिनी ।। १८ ।

चतुष्पथे तथा पातु मामेव वज्रधारिणी ।
शवासनगता चण्डा मुण्डमालाविभूषिता[2] ।। १९ ।

पातु माने कलिङ्गे च वैखरी शक्तिरूपिणी ।
वने पातु महाबाला महारण्ये रणप्रिया ।। २० ।

महाजले तडागे च शत्रुमध्ये सरस्वती ।
महाकाशपथे पृथ्वी पातु मां शीतला सदा ।। २१ ।

रणमध्ये राजलक्ष्मीः कुमारी कुलकामिनी ।
अर्द्धनारीश्वरा पातु मम पादतलं मही ।। २२ ।

नवलक्षमहाविद्या कुमारी रूपधारिणी ।
कोटिसूर्यप्रतीकाशा चन्द्रकोटिसुशीतला ।। २३ ।

---

१. सन्दर्भा—ग० ।   २. मुण्डमालाभिर्विभूषिता ।

पातु मां वरदा वाणी वटुकेश्वरकामिनी ।
इति ते कथितं नाथ कवचं परमाद्भुतम् ॥ २४ ।
कुमार्याः कुलदायिन्याः पञ्चतत्त्वार्थपारग ! ।
यो जपेत् पञ्चतत्त्वेन स्तोत्रेण कवचेन च ॥ २५ ।
आकाशगामिनी सिद्धिर्भवेत्तस्य न संशयः ॥ २६ ।
वज्रदेही भवेत् क्षिप्रं कवचस्य प्रपाठतः ।
सर्वसिद्धीश्वरो योगी ज्ञानी भवति यः पठेत् ॥ २७ ।
विवादे व्यवहारे च संग्रामे कुलमण्डले ।
महापथे श्मशाने च योगसिद्धो भवेत् स च ॥ २८ ।
पठित्त्वा जयमाप्नोति सत्यं सत्यं कुलेश्वर ! ।
वशीकरणकवचं सर्वत्र जयदं शुभम् ॥ २९ ।
पुण्यव्रती पठेन्नित्यं यतिश्रीमान्भवेद्ध्रुवम् ।
सिद्धविद्या कुमारी च ददाति सिद्धिमुत्तमाम् ॥ ३० ।
पठेद्यः श्रृणुयाद्वापि स भवेत्कल्पपादपः ।
भक्ति मुक्ति तुष्टि पुष्टि राजलक्ष्मीं सुसम्पदाम् ॥ ३१ ।
प्राप्नोति साधकश्रेष्ठो धारयित्त्वा जपेद्यदि ।
असाध्यं साधयेद्विद्वान् पठित्त्वा कवचं शुभम् ॥ ३२ ।
धनिनाञ्च[1] [2]महासौख्यधर्म्मार्थकाममोक्षदम् ।
यो वशी दिवसे नित्यं कुमारीं पूजयेन्निशि ॥ ३३ ।
उपचारविशेषेण त्रैलोक्यं वशमानयेत् ।
पललेनासवेनापि मत्स्येन मुद्रया सह ॥ ३४ ।
नानाभक्ष्येण[3] भोज्येन गन्धद्रव्येण साधकः ।
माल्येन स्वर्णरजतालङ्कारेण सुचैलकैः ॥ ३५ ।

---

१. कुलीनानाम्—क० ।
२. महासौख्यं धर्ममर्थं कामं मोक्षं च ददाति इति ।
३. नाना क्षेत्रभवान्येव गन्धद्रव्याणि साधकः—ग० ।

पूजयित्त्वा जपित्त्वा च तर्पयित्त्वा वराननाम् ।
यज्ञदानतपस्याभिः प्रयोगेण महेश्वर ॥ ३६ ।

स्तुत्त्वा कुमारीकवचं यः पठेदेकभावतः ।
तस्य सिद्धिर्भवेत् क्षिप्रं राजराजेश्वरो भवेत् ॥ ३७ ।

वाञ्छार्थफलमाप्नोति यद्यन्मनसि वर्तते ।
भूर्जपत्रे लिखित्त्वा स कवचं धारयेद् हृदि ॥ ३८ ।

शनिमङ्गलवारे च नवम्यामष्टमीदिने ।
चतुर्दश्यां पौर्णमास्यां कृष्णपक्षे विशेषतः ॥ ३९ ।

लिखित्त्वा धारयेद् विद्वान् उत्तराभिमुखो भवन् ।
महापातकयुक्तो हि मुक्तः स्यात् सर्वपातकैः ॥ ४० ।

योषिद्वामभुजे धृत्त्वा सर्वकल्याणमालभेत् ।
बहुपुत्रान्विता[१] कान्ता सर्वसम्पत्तिसंयुता ॥ ४१ ।

तथाश्रीपुरुषश्रेष्ठो दक्षिणे धारयेद्भुजे ।
ऐहिके दिव्यदेहः स्यात् पञ्चाननसमप्रभः ॥ ४२ ।

शिवलोके परे याति वायुवेगी निरामयः ।
सूर्यमण्डलमाभेद्य परं लोकमवाप्नुयात् ॥ ४३ ।

लोकानामतिसौख्यदं भयहरं श्रीपादभक्तिप्रदं
मोक्षार्थं कवचं शुभं प्रपठतामानन्दसिन्धूद्भवम् ।
पार्थानां कलिकालघोरकलुषध्वंसैकहेतुं जयं
ये नाम प्रपठन्ति धर्ममतुलं मोक्षं व्रजन्ति क्षणात् ॥ ४४ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्याविन्यासे कुमारीकवचोल्लासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये नवमः पटलः ॥

---

१. बहुभिः पुत्रैरन्विता युक्ता । यद्यपि 'बहुप्रजा निर्ऋतिमाविवेश' इति मन्त्रे सन्ततीनामाधिक्यं निन्दितमस्ति, तथापि दुष्टसन्ततीनां कृते एषा स्थितिः । वीरसन्ततयः सद्‌गुणसम्पन्नाः सन्ततयस्तु श्लाघ्या एव । अत एव गोत्रं नो वर्धतामित्यपि प्रार्थनामन्त्रः श्राद्धकर्मणि ।

अथ दशमः पटलः

आनन्दभैरव उवाच—

वद कान्ते सदानन्दस्वरूपानन्दवल्लभे ।
कुमार्या देवतामुख्याः परमानन्दवर्धनम् ।। १ ।
अष्टोत्तरसहस्राख्यं नाम मङ्गलमद्भुतम् ।
यदि मे वर्तते विद्ये यदि स्नेहकलामला ।। २ ।
तदा वदस्व कौमारीकृतकर्मफलप्रदम् ।
महास्तोत्रं कोटिकोटि कन्यादानफलं भवेत् ।। ३ ।

आनन्दभैरवी उवाच—

महापुण्यप्रदं नाथ शृणु सर्वेश्वरप्रिय ।
अष्टोत्तरसहस्राख्यं कुमार्याः परमाद्भुतम् ।। ४ ।
पठित्त्वा धारयित्त्वा वा नरो मुच्येत सङ्कटात् ।
सर्वत्र दुर्लभं धन्यं धन्यलोकनिषेवितम् ।। ५ ।
अणिमाद्यष्टसिद्ध्यङ्गं[1] सर्वानन्दकरं परम् ।
मायामन्त्रनिरस्ताङ्गं मन्त्रसिद्धिप्रदं नृणाम् ।। ६ ।
न पूजा न जपं स्नानं पुरश्चर्याविधिश्च न ।
अकस्मात् सिद्धिमवाप्नोति सहस्रनामपाठतः[2] ।। ७ ।
सर्वयज्ञफलं नाथ प्राप्नोति साधकः क्षणात् ।
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रास्वरूपकम् ।। ८ ।
कोटिवर्षशतेनापि फलं वक्तुं न शक्यते ।
तथापि वक्तुमिच्छामि हिताय जगतां प्रभो ।। ९ ।
अस्याः श्रीकुमार्याः सहस्रनामकवचस्य
वटुकभैरवऋषिरनुष्टुप्छन्दः ।
कुमारीदेवता सर्वमन्त्र-
सिद्धिसमृद्धये विनियोगः ।। १० ।

---

१. सर्वाङ्गम्—क० । २. मन्त्रस्यातिशयबलवत्त्वमनेन व्यज्यते ।

ॐकुमारी कौशिकी काली कुरुकुल्ला कुलेश्वरी ।
कनकाभा काञ्चनाभा कमला कालकामिनी ॥ ११ ।

कपालिनी कालरूपा कौमारी कुलपालिका ।
कान्ता कुमारकान्ता च कारणा करिगामिनी ॥ १२ ।

कन्धकान्ता कौलकान्ता कृतकर्मफलप्रदा ।
कार्याकार्यप्रिया कक्षा कंसहन्त्री कुरुक्षया ॥ १३ ।

कृष्णकान्ता कालरात्रिः कर्णेषुधारिणीकरा ।
कामहा कपिला काला कालिका कुरुकामिनी ॥ १४ ।

कुरुक्षेत्रप्रिया कौला कुन्ती कामातुरा कचा ।
कलञ्जभक्षा कैकेयी काकपुच्छध्वजा कला ॥ १५ ।

कमला [1]कामलक्ष्मी च कमलाननकामिनी ।
कामधेनुस्वरूपा च कामहा काममर्दिनी ॥ १६ ।

कामदा कामपूज्या च कामातीता कलावती ।
भैरवी कारणाढ्या च कैशोरी कुशलाङ्गला ॥ १७ ।

कम्बुग्रीवा[2] कृष्णनिभा कामराजप्रियाकृतिः ।
कङ्कणालङ्कृता कङ्का केवला काकिनी किरा ॥ १८ ।

किरातिनी काकभक्षा करालवदना [3]कृशा ।
केशिनी केशिहा केशा कासाम्बष्ठा करिप्रिया ॥ १९ ।

कविनाथस्वरूपा च कटुवाणी कटुस्थिता ।
कोटरा कोटराक्षी च [4]करनाटकवासिनी ॥ २० ।

कटकस्था काष्ठसंस्था कन्दर्पा केतकी प्रिया ।
केलिप्रिया कम्बलस्था कालदैत्यविनाशिनी ॥ २१ ।

केतकीपुष्पशोभाढ्या कर्पूरपूर्णजिह्विका ।
कर्पूराकरकाकोला कैलासगिरिवासिनी ॥ २२ ।

---

१. कमलाक्षी च—क० ।
२. कम्बुः शंखः, स इव ग्रीवा यस्याः सा ।
३. कुशा—ख० ।
४. कूर्दनो कटवासिनी क० ।

कुशासनस्था कादम्बा कुञ्जरेशी कुलानना ।
खर्बा खड्गधरा खड्गा खलहा खलबुद्धिदा ।। २३ ।

खञ्जना खररूपा च क्षाराम्लतिक्तमध्यगा ।
खेलना खेटककरा खरवाक्या खरोत्कटा ।। २४ ।

खद्योतचञ्चला खेला[1] खद्योता खगवाहिनी ।
खेटकस्था खलाखस्था खेचरो खेचरप्रिया ।। २५ ।

खचरा खचरप्रेमा खलाढ्या खचरानना ।
खेचरेशी खरोग्रा च खेचरप्रियभाषिणी ।। २६ ।

खर्जूरासवसंमत्ता खर्जूरफलभोगिनी ।
खातमध्यस्थिता खाता खाताम्बुपरिपूरिणी ।। २७ ।

ख्यातिः ख्यातजलानन्दा खुलना खञ्जनागतिः ।
खल्वा खलतरा खारी खरोद्वेगनिकृन्तनी ।। २८ ।

गगनस्था च [2]भीता च गभीरनादिनी गया ।
गङ्गा गभीरा गौरी च गणनाथप्रिया गतिः ।। २९ ।

गुरुभक्ता ग्वालिहीना गेहिनी गोपिनी गिरा ।
गोगणस्था गाणपत्या गिरिजा गिरिपूजिता ।। ३० ।

गिरिकान्ता गणस्था च गिरिकन्या गणेश्वरी ।
गाधिराजसुता ग्रीवा गुर्वी गुर्व्यम्बशाङ्करी ।। ३१ ।

गन्धर्वकामिनी गीता गायत्री गुणदा गुणा ।
गुग्गुलुस्था गुरोः पूज्या गीतानन्दप्रकाशिनी ।। ३२ ।

गयासुरप्रियागेहा गवाक्षजालमध्यगा ।
गुरुकन्या गुरोः पत्नी गहना गुरुनागिनी ।। ३३ ।

गुल्फवायुस्थिता गुल्फा गर्द्दभा गर्दभप्रिया ।
गुह्या गुह्यगणस्था च गरिमा गौरिका गुदा ।। ३४ ।

---

१. एला-केला-खेला विलासे इति कण्ड्वादिगणे पाठे खेला इति प्रातिपदिकमपि विलासेऽर्थे साधुतामनुभवति ।

२. गणातीता—क० ।

गुदोर्ध्वस्था च गलिता गणिका गोलका गला ।
गान्धर्वा गाननगरी गन्धर्वगणपूजिता ॥ ३५ ।

घोरनादा घोरमुखी घोरा घर्मनिवारिणी ।
घनदा घनवर्णा च घनवाहनवाहना ॥ ३६ ।

घर्घरध्वनिचपला [1]घटाघटपटाघटा ।
घटिता घटना घोना घनरूपा घनेश्वरी ॥ ३७ ।

घुण्यातीता घर्घरा च घोराननविमोहिनी ।
घोरनेत्रा घनरुचा घोरभैरवकन्यका ॥ ३८ ।

घाताघातकहा घात्या घ्राणाघ्राणेशवायवी ।
घोरान्धकारसंस्था[2] च घसना घस्वरा घरा ॥ ३९ ।

घोटकेस्था घोटका च घोटकेश्वरवाहना ।
घननोलमणिश्यामा घर्घरेश्वरकामिनी ॥ ४० ।

ङकारकूटसम्पन्ना ङकारचक्रगामिनी ।
ङकारी ङसशा चैव[3] ङीपनीता ङकारिणी ॥ ४१ ।

चन्द्रमण्डलमध्यस्था चतुरा चारुहासिनी ।
चारुचन्द्रमुखी[4] चैव चलङ्गमगतिप्रिया ॥ ४२ ।

चञ्चला चपला चण्डी[5] चेकिताना चरुस्थिता ।
चलिता चानना चार्व्वी चारुभ्रमरनादिनी ॥ ४३ ।

चौरहा चन्द्रनिलया चैन्द्री चन्द्रपुरस्थिता ।
चक्रकौला चक्ररूपा चक्रस्था चक्रसिद्धिदा ॥ ४४ ।

चक्रिणी चक्रहस्ता च चक्रनाथकुलप्रिया ।
चक्राभेद्या चक्रकुला चक्रमण्डलशोभिता ॥ ४५ ।

---

१. घोटा घटपटी घटी—ग० ।
२. घोरान्धकारे संस्थानं यस्याः सा, संस्थाशब्दः संस्थानार्थकः सम्पदादित्वाद् भावक्विबन्तः ।
३. ङशशङ्कापनिता ङकारिणी—क० । ४. चारुचन्द्रा चन्द्रमुखी—क० ।
५. चान्द्री—क० ।

चक्रेश्वरप्रिया चेला चेलाजिनकुशोत्तरा ।
चतुर्वेदस्थिता चण्डा चन्द्रकोटिसुशीतला ॥ ४६ ॥

चतुर्गुणा चन्द्रवर्णा चातुरी चतुरप्रिया ।
चक्षुःस्था चक्षुवसतिश्चणका चणकप्रिया ॥ ४७ ॥

चार्व्वङ्गी चन्द्रनिलया[1] चलदम्बुजलोचना ।
चर्व्वरीशा चारुमुखी चारुदन्ता चरस्थिता ॥ ४८ ॥

चसकस्थासवा चेता चेतःस्था चैत्रपूजिता ।
चाक्षुषी चन्द्रमलिनी चन्द्रहासमणिप्रभा ॥ ४९ ॥

छलस्था छुद्ररूपा च छत्रच्छायाछलस्थिता ।
छलज्ञा छेश्वराछाया छाया छिन्नशिवा छला ॥ ५० ॥

छत्राचामरशोभाढ्या[2] छत्रिणां छत्रधारिणी ।
छिन्नातीता छिन्नमस्ता छिन्नकेशा छलोद्भवा ॥ ५१ ॥

छलहा छलदा छाया छन्ना छन्नजनप्रिया ।
छलछिन्ना[3] छद्मवती छद्मसद्मनिवासिनी ॥ ५२ ॥

छद्मगन्धा छदाछन्ना छद्मवेशा छकारिका ।
छगला रक्तभक्षा च छगलामोदरक्तपा ॥ ५३ ॥

छगलण्डेशकन्या च छगलण्डकुमारिका ।
छुरिका छुरिककरा छुरिकारिविनाशिनी ॥ ५४ ॥

छिन्ननाशा छिन्नहस्ता छोणलोला छलोदरी ।
छलोद्वेगा छाङ्गबीजमाला छाङ्गवरप्रदा ॥ ५५ ॥

जटिला जठरश्रीदा जरा जज्ञप्रिया जया ।
जन्त्रस्था[4] जीवहा जीवा जयदा जीवयोगदा ॥ ५६ ॥

जयिनी जामलस्था च जामलोद्भवनायिका ।
जामलप्रियकन्या च जामलेशी जवाप्रिया ॥ ५७ ॥

---

१. चारुनिलया । २. छत्रस्य आचामरस्य या शोभा तया आढ्या ।
३. छलाद्यक्ता छम्भवती छम्भसम्भनिवासिनी ख० । ४. जन्तुस्था जावजा जीवा क० ।

जवाकोटिसमप्रख्या जवापुष्पप्रिया[1] जना ।
जलस्था जगविषया जरातीता जलस्थिता ॥ ५८ ।

जीवहा जीवकन्या च जनाद्दर्नकुमारिका ।
जातुका जलपूज्या च जगन्नाथादिकामिनी ॥ ५९ ।

जीर्णाङ्गी जीर्णहीना च जीमूतात्त्यन्तशोभिता ।
जामदा[2] जमदा जृम्भा जृम्भणास्त्रादिधारिणी ॥ ६० ।

जघन्या जारजा प्रीता जगदानन्दवर्द्धिनी ।
जमलार्जुनदर्पघ्नी जमलार्जुनभञ्जिनी ॥ ६१ ।

जयित्रिजगदानन्दा जामलोल्लाससिद्धिदा ।
जपमाला जाप्यसिद्धिर्जपयज्ञप्रकाशिनी ॥ ६२ ।

जाम्बुवती जाम्बवतः कन्यकाजनवाजपा ।
जवाहन्त्री जगद्बुद्धिर्ज्जगत्कर्तृ जगद्गतिः ॥ ६३ ।

जननी जीवनी जाया जगन्माता जनेश्वरी ।
झङ्कला झङ्कमध्यस्था झणत्कारस्वरूपिणी ॥ ६४ ।

झणत्झणद्वह्निरूपा झननाझन्दरीश्वरी ।
झटिताक्षा झरा झञ्झा झर्झरा झरकन्यका ॥ ६५ ।

झणत्कारी झना झन्ना झकारमालयावृता ।
झङ्कारी झर्झरी झल्ली [3]झल्वेश्वरनिवासिनी ॥ ६६ ।

ञकारी ञकिराती च ञकारबीजमालिनी ।
ञनयोऽन्ता[4] ञकारान्ता ञकारपरमेश्वरी ॥ ६७ ।

ञान्तबीजपुटाकरा ञेकले ञैकगामिनी ।
ञैकनेला ञस्वरूपा ञहारा ञहरीतकी ॥ ६८ ।

---

१. जवापुष्पं प्रियं यस्याः सा । २. जामातृ जयदा ज्येष्ठा जृम्भणास्त्रादिधारिणी—क० ।
३. झल्लरेश्वरमालिनी—क० । ४. ञनमोऽन्ता ञान्तकान्ता ञपरेश्वरी—क० ।

टुन्टुनी[1] टङ्कहस्ता च टान्तवर्गा टलावती ।
टपला टापबालाख्या टङ्कारध्वनिरूपिणी[2] ॥ ६९ ।

टलाती[3] टाक्षरातीता टित्कारादिकुमारिका ।
[4]टाङ्कास्त्रधारिणी टाना टमोटार्णलभाषिणी ॥ ७० ।

टङ्कारी[5] विधना टाका टकाटकविमोहिनी ।
टंकारधरनामाहा टिवीखेचरनादिनी ॥ ७१ ।

ठठङ्कारी[6] ठाठरूपा ठकारबोजकारणा ।
डमरुप्रियवाद्या च डामरस्था डबीजिका ॥ ७२ ।

डान्तवर्गा डमरुका डरस्था डोरडामरा ।
डगरार्द्धा[7] डलातीता डदारुकेश्वरी डुता ॥ ७३ ।

ढार्द्धनारीश्वरा ढामा ढक्कारी ढलना ढला ।
ढकेस्था[8] ढेश्वरसुता ढेमनाभावढोनना ॥ ७४ ।

णोमाकान्तेश्वरी णान्तवर्गस्था णतुनावती ।
णनो माणाङ्ककल्याणी णाक्षवीणाक्षबीजिका ॥ ७५ ।

तुलसीतन्तुसूक्ष्माख्या तारल्या तैलगन्धिका ।
तपस्या तापससुता[9] तारिणी तरुणी तला ॥ ७६ ।

तन्त्रस्था तारकब्रह्मस्वरूपा तन्तुमध्यगा ।
तालभक्षत्रिधामूर्त्तिस्तारका तैलभक्षिका ॥ ७७ ।

---

१. टन्टुनी टङ्कहस्ता च टाङ्कवर्गा टनावती—क० ।

२. टङ्कारश्चासौ ध्वनिश्चेति टङ्कारध्वनिस्तस्य रूपमस्ति यस्यामिति मत्वर्थीय-इनिप्रत्ययः ।

३. टनती—क० ।

४. टङ्कास्त्रधारिणी टाभा टाभनवासिनी—क० ।

५. टङ्कारनिधना टाका टङ्कारणविमोहिनी ।
टङ्कारध्वनिमोहा च टिटि-खेचरनादिनी ॥ क० ।

६. ठङ्कारी ठातुरूपा च ठकारबीजकारणा—क० ।

७. डवर्गंता डलातीता डकारकेश्वरी डुता—क० ।

८. ढाकस्था ढेश्वरयुता ढेमला भाढ़ढोलना—क० ।

९. तापसंस्थाता—क० ।

तारोग्रा तालमाला च तकरा तिन्तिडीप्रिया ।
तपसः तालसन्दर्भा तर्जयन्ती कुमारिका ॥ ७८ ।

तोकाचारा[1] तलोद्वेगा तक्षका तक्षकप्रिया ।
तक्षकालङ्कृता तोषा तावद्रूपा तलप्रिया ॥ ७९ ।

तलास्त्रधारिणी तापा तपसां फलदायिनी ।
[2]तल्वल्वप्रहरालीता तलारिगणनाशिनी ॥ ८० ।

तूला तौली तोलका च तलस्था[3] तलपालिका ।
[4]तरुणा तप्तबुद्धिस्थास्तप्ता प्रधारिणी तपा ॥ ८१ ।

तन्त्रप्रकाशकरणी तन्त्रार्थदायिनी तथा[5] ।
तुषारकिरणाङ्गी च चतुर्धा[6] वा समप्रभा ॥ ८२ ।

तैलमार्गाभिसूता[7] च तन्त्रसिद्धिफलप्रदा ।
ताम्रपर्णा ताम्रकेशा [8]ताम्रपात्रप्रियातमा ॥ ८३ ।

तमोगुणप्रिया तोला तक्षकारिनिवारिणी[9] ।
तोषयुक्ता तमायाची[10] तमषोढेश्वरप्रिया ॥ ८४ ।

तुलना तुल्यरुचिरा[11] तुल्यबुद्धिस्त्रिधा मतिः ।
तक्रभक्षा तालसिद्धिः तत्रस्थास्तत्र गामिनी ॥ ८५ ।

तलया तैलभा[12] ताली तन्त्रगोपनतत्परा ।
तन्त्रमन्त्रप्रकाशा च त्रिशरेणुस्वरूपिणी ॥ ८६ ।

---

१. तोकमपत्यं बालकः, तस्य आचार इवाचारो यस्याः सा ।
२. तलप्रहारनिरता—क० ।
३. तलस्थजलपालिका—क० ।
४. तरुणास्त्री तप्तबुद्धिस्तप्तोग्रधारिणी तथा—क० ।
५ तुषा—क० ।
६. तुषारांशु समप्रभा—क० ।
७. तालामार्गाभिभूता च—क० ।
८. ताम्रवर्णप्रिया मता—क० ।
९. तक्षवारिनिवारिणी—क० ।
१०. तमाषढ़ी तमोषाढेश्वरप्रिया—क० ।
११. तुलना तुल्यरूपा च—क० ।
१२. तुलया तैलता तारी तन्त्रगोपालतत्परा—क० ।

त्रिंशदर्थप्रिया तुष्टा तुष्टिस्तुष्टजनप्रिया ।
थकारकूटदण्डीशा[1] थदण्डीशप्रियाऽथवा ।। ८७ ।

थकाराक्षररूढाङ्गी थान्तवर्गाथ कारिका ।
थान्ता थमीश्वरी थाका थकारबीजमालिनी ।। ८८ ।

[2]दक्षदामप्रिया दोषा दोषजालवनाश्रिता ।
दशा दशनघोरा च देवीदासप्रिया दया ।। ८९ ।

दैत्यहन्त्रीपरा दैत्या दैत्यानां मर्द्दिनी दिशा ।
दान्ता दान्तप्रिया दासा दामना दीर्घकेशिका ।। ९० ।

दशना रक्तवर्णा च दरीग्रहनिवासिनी ।
देवमाता च दुर्लभा च दीर्घाङ्गा दासकन्यका ।। ९१ ।

दशनश्री दीर्घनेत्रा दीर्घनासा च दोषहा ।
दमयन्ती दलस्था च द्वेष्यहन्त्री दशस्थिता ।। ९२ ।

दैशेषिका दिशिगता दशनास्त्रविनाशिनी ।
दारिद्र्यहा दरिद्रस्था दरिद्रधनदायिनी ।। ९३ ।

दन्तुरा देशभाषा च देशस्था देशनायिका ।
द्वेषरूपा द्वेषहन्त्री द्वेषारिगणमोहिनी ।। ९४ ।

दामोदरस्थाननादा[3] दलानां बलदायिनी ।
दिग्दर्शना[4] दर्शनस्था दर्शनप्रियवादिनी ।। ९५ ।

दामोदरप्रिया दान्ता दामोदरकलेवरा ।
द्राविणी द्रविणी[5] दक्षा दक्षकन्या दलदृढा ।। ९६ ।

---

१. थकारकूटदन्तीशथदन्तीशप्रियाऽथवा—क० ।

२. दयादामप्रिया दोषा दोषजालैर्वनावृता—क० ।

३. दामोदरस्था दलना दलानां बलदायिनी—क० ।

४. दिग्दर्शनस्थानदर्शदर्शनप्रियवादिनी—ग० ।

५. द्राविणीति दक्षा दक्षकन्या दलादृढ़ा—ख० ग० ।

दृढासनादासशक्तिर्द्वन्द्वयुद्धप्रकाशिनी[1] ।
दधिप्रिया दधिस्था च दधिमङ्गलकारिणी ।। ९७ ।

दर्पहा दर्पदा दृप्ता दर्भपुण्यप्रिया दधिः ।
दर्भस्था द्रुपदसुता द्रौपदी द्रुपदप्रिया ।। ९८ ।

धर्मचिन्ता धनाध्यक्षा धश्वेश्वरवरप्रदा ।
धनहा धनदा धन्वी धनुर्हस्ता धनुःप्रिया ।। ९९ ।

धरणी धैर्यरूपा च धनस्था धनमोहिनी ।
धोरा धीरप्रियाधारा[2] धराधारणतत्परा ।। १०० ।

धान्यदा धान्यबीजा च धर्माधर्मस्वरूपिणी ।
धाराधरस्था धन्या च धर्मपुञ्जनिवासिनी ।। १०१ ।

धनाढ्यप्रियकन्या च धन्यलोकैश्च[3] सेविता ।
धर्मार्थकाममोक्षाङ्गी धर्मार्थकाममोक्षदा ।। १०२ ।

धराधरा धुरोणा च धवला धवलामुखी ।
धरा च धामरूपा च ध्रुवा ध्रौव्या ध्रुवप्रिया ।। १०३ ।

धनेशी धारणाख्या च धर्मनिन्दाविनाशिनी ।
धर्मतेजोमयी धर्म्म्या धैर्याग्रभर्गमोहिनी ।। १०४ ।

धारणा धौतवसना धत्तूरफलभोगिनी ।
नारायणी नरेन्द्रस्था नारायणकलेवरा ।। १०५ ।

नरनारायणप्रीता धर्मनिन्दा[4] नमोहिता ।
नित्या नापितकन्या च नयनस्था नरप्रिया ।। १०६ ।

नाम्नी नामप्रिया नारा नारायणसुता नरा ।
नवीननायकप्रीता नव्या नवफलप्रिया ।। १०७ ।

---

१. दुग्धवृद्धिप्रकाशिनी—क० ।

२. धीराः प्रिया येषामथवा धीराणां प्रियाः, ते आधारो यस्याः सा ।

३. धन्यलोकनिशेविता—क० । ४. नीता नयनमोहिता—क० ।

नवीनकुसुमप्रीता नवीनानां [1]ध्वजानुता ।
नारी निम्बस्थितानन्दानन्दिनी [2]नन्दकारिका ।। १०८ ।

नवपुष्पमहाप्रीता नवपुष्पसुगन्धिका ।
नन्दनस्था नन्दकन्या नन्दमोक्षप्रदायिनी ।। १०९ ।

नमिता नामभेदा च [3]नाम्नार्त्तवनमोहिनी ।
[4]नवबुद्धिप्रियानेका नाकस्था नामकन्यका ।। ११० ।

निन्दाहीना नवोल्लासा नाकस्थानप्रदायिनी ।
[5]निम्बवृक्षस्थिता निम्बा नानावृक्षनिवासिनी ।। १११ ।

नाश्यातीता नीलवर्णा [6]नीलवर्णा सरस्वती ।
नभःस्था नायकप्रीता नायकप्रियकामिनी ।। ११२ ।

नैववर्णा निराहारा [7]निवीहाणां रजःप्रिया ।
निम्ननाभिप्रियाकारा[8] नरेन्द्रहस्तपूजिता ।। ११३ ।

नलस्थिता नलप्रीता नलराजकुमारिका ।
परेश्वरी परानन्दा परापरविभेदिका ।। ११४ ।

परमा परचक्रस्था पार्वती पर्वतप्रिया[9] ।
पारमेशो[10] पर्वनाना पुष्पमाल्यप्रिया परा ।। ११५ ।

परा प्रिया प्रीतिदात्री प्रीतिः प्रथमकामिनी[11] ।
प्रथमा प्रथमा प्रीता पुष्पगन्धप्रिया परा ।। ११६ ।

---

१. नवीना नीरजानुजा—क० । २. नन्दकन्यका—क० ।
३. नाम्नातुरमोहिनी—क० ।
४. नवबुद्धिप्रिया नैकान्तकस्थानाककन्यका—क० ।
५. निम्बचक्षुःस्थिता निम्ब्रा नानचेक्षनिवासिनी—ख० ।
६. नीलानीलसरस्वतो—क० । ७. निरोहा निरजप्रिया—क० ।
८. प्रभाकारा—ख० । ९. पर्वतः कैलासपर्वतः प्रियो यस्याः सा ।
१० परमेशी पर्वमाला—क० । ११. प्रथमकारिणी—क० ।

पौष्यी पानरता पीना पीनस्तनसुशोभना ।
[1]परमानरता पुंसां पाशहस्ता पशुप्रिया ।। ११७ ।

पललानन्दरसिका पलालधूमरूपिणी ।
पलाशपुष्पसंकाशा पलाशपुष्पमालिनी ।। ११८ ।

प्रेमभूता पद्ममुखी पद्मरागसुमालिनी ।
पद्ममाला पापहरा पतिप्रेमविलासिनी ।। ११९ ।

पञ्चाननमनोहारी[2] पञ्चवक्त्रप्रकाशिनी ।
फलमूलाशना फाली फलदा फाल्गुनप्रिया ।। १२० ।

फलनाथप्रिया फल्ली फल्गुकन्या फलोन्मुखी ।
फेत्कारीतन्त्रमुख्या च फेत्कारगणपूजिता ।। १२१ ।

फेरवी फेरवसुता फलभोगोद्भवा फला ।
फलप्रिया फलाशक्ता फाल्गुनानन्ददायिनी ।। १२२ ।

[3]फालभोगोत्तरा फेला फुलाम्भोजनिवासिनी ।
वसुदेवगृहस्था च वासवी वीरपूजिता ।। १२३ ।

विषभक्षा बुधसुता ब्लुङ्कारी ब्लूवरप्रदा ।
[4]ब्राह्मी बृहस्पतिसुता वाचस्पतिवरप्रदा ।। १२४ ।

वेदाचारा[5] वेद्यपरा व्यासवक्त्रस्थिता विभा ।
बोधज्ञा वौषडाख्या च वंशीवदनपूजिता ।। १२५ ।

वज्रकान्ता[6] वज्रगतिर्बंदरीवंशवर्द्धिनी ।
भारती[7] भवरश्रीदा भवपत्नी भवात्मजा ।। १२६ ।

---

१. पयः पानरता पुष्टा पाशवस्था पशुप्रिया—क० । २. पञ्चानपराभारि—क० ।
३. फलि भोगातुरा फेला फुल्लाम्भोजविलासिनी—क० । ४. बृही बृहस्पतिवाचा—ख० ।
५. वेदाचारी वेधपरा वासवक्त्रस्थिता विना—ख० । ६. वज्रकान्ता वक्रगति—ख० ।
७. भारती भारतश्रीदा भवपत्नी भवाम्बुजा—क० ।

भवानी भाविनी भीमा भिषग्भार्या तुरिस्थिता[१] ।
भूर्भुवःस्वःस्वरूपा च भृशार्त्ता[२] भेकनादिनी ॥ १२७ ।

भौती भङ्गप्रिया[३] भङ्गभङ्गहा भङ्गहारिणी ।
भर्त्ता भगवती भाग्या भगीरथनमस्कृता ॥ १२८ ।

भगमाला भूतनाथेश्वरी भार्गवपूजिता ।
भृगुवंशा भीतिहरा भूमिर्भुजगहारिणी ॥ १२९ ।

भालचन्द्राभभल्वबाला भवभूतिर्विभूतिदा ।
मकरस्था मत्तगतिर्मदमत्ता मदप्रिया ॥ १३० ।

मदिराष्टादशभुजा मदिरा मत्तगामिनी ।
मदिरासिद्धिदा मध्या मदान्तर्गतिसिद्धिदा ॥ १३१ ।

मीनभक्षा मीनरूपा मुद्रामुद्गप्रिया गतिः ।
मुषला मुक्तिदा मूर्त्ता मूकीकरणतत्परा ॥ १३२ ।

मृषार्त्ता मृगतृष्णा[४] च मेषभक्षणतत्परा ।
मैथुनानन्दसिद्धिश्च [५]मैथुनानलसिद्धिदा ॥ १३३ ।

महालक्ष्मीर्भैरवी च महेन्द्रपीठनायिका[६] ।
मनःस्था[७] माधवीमुख्या महादेवमनोरमा ॥ १३४ ।

यशोदा[८] याचना यास्या यमराजप्रिया यमा ।
यशोराशिविभूषाङ्गी[९] यतिप्रेमकलावती ॥ १३५ ।

रमणी रामपत्नी च रिपुहा रीतिमध्यगा ।
रुद्राणी रूपदा रूपा रूपसुन्दरधारिणी ॥ १३६ ।

---

१. भुवि स्थिता—क० ।
२. भूशार्ता—ग० ।
३. भैमी भोगवती भौती भङ्गदा भङ्गहारिण—क० ।
४. मृगदृष्टा च—क० ।
५. मैथुनाह्लादसिद्धिदा—क० ।
६ पीठपूजिका—क० ।
७. भल्लस्था—क० ।
८. यशोदा याचनी याभ्या—क० ।
९. यशोराशिरेव विशिष्टा भूषा विशिष्टा अलङ्काराः, ते अङ्केषु यस्याः सा ।

रेतःस्था रेतसः प्रीता रेतःस्थाननिवासिनी ।
[1]रेन्द्रादेवसुतारेदा रिपुवर्गान्तकप्रिया ॥ १३७ ।
रोमावलीन्द्रजननी रोमकूपजगत्पतिः[2] ।
रौप्यवर्णा रौद्रवर्णा रौप्यालङ्कारभूषणा ॥ १३८ ।
रङ्गिणी रङ्गरागस्था[3] रणवह्निकुलेश्वरी ।
लक्ष्मीः लाङ्गलहस्ता च लाङ्गली कुलकामिनी ॥ १३९ ।
लिपिरूपा लीढ़पादा लतातन्तुस्वरूपिणी ।
लिम्पती[4] लेलिहा लोला लोमशप्रियसिद्धिदा ॥ १४० ।
लौकिकी लौकिकीसिद्धिर्लङ्कानाथकुमारिका ।
लक्ष्मणा [5]लक्ष्मीहीना च लप्रिया लार्णमध्यगा ॥ १४१ ।
विवसा वसनावेश्या विवस्यकुलकन्यका ।
वातस्था वातरूपा च वेलमध्यनिवासिनी ॥ १४२ ।
श्मशानभूमिमध्यस्था[6] श्मशानसाधनप्रिया ।
शवस्था परसिद्धयर्थी शववक्षसि शोभिता ॥ १४३ ।
शरणागतपाल्या च शिवकन्या शिवप्रिया ।
षट्चक्रभेदिनी षोढा न्यासजालदृढानना ॥ १४४ ।
सन्ध्यासरस्वती सुन्द्या[7] सूर्यगा सारदा सती ।
हरिप्रिया हराहाला लावण्यस्था क्षमा क्षुधा ॥ १४५ ।
क्षेत्रज्ञा सिद्धिदात्री च अम्बिका चापराजिता ।
आद्या इन्द्रप्रिया ईशा उमा ऊढा ऋतुप्रिया ॥ १४६ ।
सुतुण्डा स्वरबीजान्ता हरिवेशादिसिद्धिदा ।
एकादशीव्रतस्था च ऐन्द्री ओषधिसिद्धिदा ॥ १४७ ।

---

१ रैन्द्रदेवसुतारैन्द्रद्या—क० । २. रोमकूपजर्नाहती—क० ।
३. रङ्गिणी रङ्गरागस्था राजराज्ञि कुलेश्वरी—क० । ४. लयन्ति—क० ।
५. लक्ष्महीना वा—क० ।
६. श्मशानभूमिमध्ये तिष्ठतीति, श्मशानभूमिमध्यस्था । शवानां शयनं यत्र तत् श्मशानम् । शवशब्दस्य श्मादेशः, शयनशब्दस्य शानादेशः, पृषोदरादिः ।
७. सूक्ष्मा—क० ।

औपकारी अंशरूपा अस्त्रबीजप्रकाशिनी ।
इत्येतत् कामुकीनाथ[1] कुमारीणां सुमङ्गलम् ।। १४८ ।
त्रैलोक्यफलदं नित्यमष्टोत्तरसहस्रकम् ।
महास्तोत्रं धर्मसारं धनधान्यसुतप्रदम् ।। १४९ ।
सर्वविद्याफलोल्लासं भक्तिमान् यः पठेत् सुधीः ।
स सर्वदा दिवारात्रौ स भवेन्मुक्तिमार्गगः ।। १५० ।
सर्वत्र जयमाप्नोति वीराणां वल्लभो लभेत् ।
सर्वे देवा वशं यान्ति वशीभूताश्च मानवाः ।। १५१ ।
ब्रह्माण्डे ये च शंसन्ति ते तुष्टा नात्र संशयः ।
ये वशन्ति च भूर्लोके देवतुल्यपराक्रमाः ।। १५२ ।
ते सर्वे भृत्यतुल्याश्च सत्यं सत्यं कुलेश्वर ।
अकस्मात् सिद्धिमाप्नोति होमेन यजनेन च ।। १५३ ।
जाप्येन कवचाद्येन महास्तोत्रार्थपाठतः ।
विना यज्ञैर्विना दानैर्विना जाप्यैर्लभेत् फलम् ।। १५४ ।
यः पठेत् स्तोत्रकं नाम[2] चाष्टोत्तरसहस्रकम् ।
तस्य शान्तिर्भवेत् क्षिप्रं कन्यास्तोत्रं पठेत्ततः ।। १५५ ।
वारत्रयं प्रपाठेन राजानं वशमानयेत् ।
वारैकपठितो मन्त्री धर्मार्थकाममोक्षभाक् ।। १५६ ।
त्रिदिनं प्रपठेद्विद्वान् यदि पुत्रं समिच्छति ।
वारत्रयक्रमेणैव वारैकक्रमतोऽपि वा ।। १५७ ।
पठित्त्वा धनरत्नानामधिपः सर्ववित्तगः ।
त्रिजगन्मोहयेन्मन्त्री वत्सरार्द्धं प्रपाठतः ।। १५८ ।
वत्सरं वाप्य[3] यदि वा भक्तिभावेन यः पठेत् ।
चिरजीवी खेचरत्त्वं प्राप्य योगी भवेन्नरः ।। १५९ ।

१. कथितं नाथ—क० । २. स्त्रोत्रकमलम् अष्टोत्तर—क० ।
३. आ समन्तात् आप्त्वा, आप्य, प्राप्येत्यर्थः । आप्लृ व्याप्तौ धातोः क्त्वाप्रत्ययः, आङा सह समासे ल्यबादेशे साधुता ।

महादूरस्थितं वर्णं[1] पश्यति स्थिरमानसः ।
महिलामण्डले स्थित्वा शक्तियुक्तः पठेत् सुधीः ॥ १६० ॥

स भवेत्साधकश्रेष्ठः क्षीरी कल्पद्रुमो भवेत् ।
सर्वदा यः पठेन्नाथ भावोद्गतकलेवरः ॥ १६१ ॥

दर्शनात् स्तम्भनं कर्त्तुं क्षमो भवति साधकः ।
[2]जलादिस्तम्भने शक्तो वह्निस्तम्भादिसिद्धिभाक् ॥ १६२ ॥

वायुवेगी महावाग्मी वेदज्ञो भवति ध्रुवम् ।
कविनाथो महाविद्यो वन्धकः पण्डितो भवेत् ॥ १६३ ॥

सर्वदेशाधिपो भूत्वा देवीपुत्रः स्वयं भवेत् ।
कान्तिं श्रियं यशो वृद्धिं प्राप्नोति बलवान् यतिः ॥ १६४ ॥

अष्टसिद्धियुतो नाथ यः [3]पठेदर्थसिद्धये ।
उज्जटेऽरण्यमध्ये च पर्वते घोरकानने ॥ १६५ ॥

वने वा प्रेतभूमौ च शवोपरि महारणो[4] ।
ग्रामे भग्नग्रहे वापि शून्यागारे नदीतटे ॥ १६६ ॥

गङ्गागर्भे महापीठे योनिपीठे गुरोर्गृहे ।
धान्यक्षेत्रे[5] देवगृहे कन्यागारे कुलालये ॥ १६७ ॥

प्रान्तरे गोष्ठमध्ये वा राजादिभयहीनके ।
निर्भयादिस्वदेशेषु शिवलिङ्गालयेऽथवा ॥ १६८ ॥

भूतगर्त्ते चैकलिङ्गे वा शून्यदेशे[6] निराकुले ।
अश्वत्थमूले बिल्वे वा कुलवृक्षसमीपगे ॥ १६९ ॥

अन्येषु सिद्धदेशेषु कुलरूपाश्च साधकः ।
दिव्ये वा वीरभावस्थो यष्ट्वा कन्यां कुलाकुलैः ॥ १७० ॥

---

१. महाहवस्थिवर्णं—ग० ।
२. जलस्तम्भानिलस्तम्भवह्निस्तम्भादिसिद्धिभाक्—क० ।
३. आत्मसिद्धये—क० ।
४. शवोपरि महारणे, इति सप्तम्यन्तः पाठो युक्ततरः प्रतीयते ।
५. धामक्षेत्रे—ग० ।
६. ग्राम्यदेवो—ग० ।

कुलद्रव्यैश्च विविधैः सिद्धिद्रव्यैश्च साधकः ।
मांसासवेन जुहुयान्मुक्तेन[1] रसेन च ॥ १७१ ।

हुतशेषं कुलद्रव्यं ताभ्यो दद्यात् सुसिद्धये ।
तासामुच्छिष्टमानीय जुहुयाद् रक्तपङ्कजे ॥ १७२ ।

घृणालज्जाविनिर्मुक्तः साधकः स्थिरमानसः ।
पिबेन्मांसरसं[2] मन्त्री सदानन्दो महाबली ॥ १७३ ।

महामांसाष्टकं ताभ्यो मदिराकुम्भपूरितम् ।
तारो माया रमावह्निजायामन्त्रं पठेत् सुधीः ॥ १७४ ।

[3]निवेद्य विधिनानेन पठित्वा स्तोत्रमङ्गलम् ।
स्वयं प्रसादं भुक्त्वा हि सर्वविद्याधिपो भवेत् ॥ १७५ ।

शूकरस्योष्ट्रमांसेन पीनमीनेन मुद्रया ।
महासवघटेनापि दत्त्वा पठति यो नरः ॥ १७६ ।

ध्रुवं स सर्वगामी स्याद् विना होमेन पूजया ।
रुद्ररूपो भवेन्नित्यं महाकालात्मको भवेत् ॥ १७७ ।

सर्वपुण्यफलं नाथ [4]क्षणात् प्राप्नोति साधकः ।
क्षीराब्धिरत्नकोषेशो [5]वियद्व्यापी च योगिराट् ॥ १७८ ।

भक्त्याह्लादं दयासिन्धुं निष्कामत्त्वं लभेद् ध्रुवम् ।
महाशत्रुपातने च महाशत्रुभयार्द्दिते ॥ १७९ ।

वारैकपाठमात्रेण शत्रूणां वधमानयेत् ।
समर्दयेत् [6]शत्रून् क्षिप्रमन्धकारं यथा रविः ॥ १८० ।

उच्चाटने मारणे च भये घोरतरे रिपौ ।
पठनाद्धारणान्मर्त्यो देवा वा राक्षसादयः ॥ १८१ ।

---

१. मदात्तकरसेन—ख० ।
२. मांसासवं मन्त्री—क० ।
३. नैवेद्यविधिदानेन—ख० ।
४. कुलात्—ख० ।
५. वियद्गामो—ग० ।
६. भक्त्यानादम्—ग० ।

प्राप्नुवन्ति झटित् शान्ति कुमारीनामपाठतः ।
पुरुषो दक्षिणे बाहौ नारी वामकरे तथा ।। १८२ ।

धृत्वा पुत्रादिसम्पत्तिं लभते नात्र संशयः ।। १८३ ।

ममाज्ञया मोक्षमुपैति साधको गजान्तकं नाथ सहस्रनाम च ।
पठेन्मनुष्यो यदि भक्तिभावतस्तदा हि सर्वत्र फलोदयं लभेत् ।। १८४।

मोक्षं सत्फलभोगिनां स्तववरं सारं परानन्ददं
ये नित्यं हि मुदा पठन्ति विफलं सार्थञ्च चिन्ताकुलाः ।
ते नित्याः प्रभवन्ति कीर्तिकमले श्रीरामतुल्यो जये
[1]कन्दर्पायुततुल्यरूपगुणिनः क्रोधे च रुद्रोपमाः ।।१८५।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने कुमार्युपचर्या-विन्यासे सिद्धमन्त्रप्रकरणे दिव्यभावनिर्णये अष्टोत्तरसहस्रनाममङ्गलोल्लासे दशमः पटलः ।।

---

१. कन्दर्पाः कामदेवाः, तेषामयुतं दशसहस्रम्, तेन तुल्या रूपगुणाः, ते सन्ति येषु ते ।

अथैकादशः पटलः

आनन्दभैरवो उवाच—

अथातः सम्प्रवक्ष्यामि दिव्यभावादिनिर्णयम् ।
यमाश्रित्य महारुद्रो भुवनेश्वरनामधृक् ।। १ ।

यं ज्ञात्वा कमलानाथो देवतानामधीश्वरः ।
चतुर्वेदाधिपो ब्रह्मा साक्षाद्ब्रह्म सनातनः ।। २ ।

वटुको मम पुत्रश्च शक्रः स्वर्गाधिदेवता ।
अष्टसिद्धियुताः सर्वे दिक्पालाः खेचरादयः ।। ३ ।

तत्प्रकारं महादेव आनन्दनाथभैरव ।
सुरानन्द हृदयानन्द ज्ञानानन्द दयामय ।। ४ ।

शृणुस्वैकमना नाथ यदि त्वं सिद्धिमिच्छसि ।
मम प्रियानन्दरूप यतो मे त्वं तनुस्थितः ।। ५ ।

त्रिविधं दिव्यभावञ्च वेदागमविवेकजम् ।
वेदार्थमधमं सम्प्रोक्तं मध्यमं चागमोद्भवम् ।। ६ ।

उत्तमं सकलं प्रोक्तम् विवेकोल्लाससम्भवम्[1] ।
तथैव त्रिविधं भावं दिव्यवीरपशुक्रमम् ।। ७ ।

दिव्यं विवेकजं प्रोक्तं सर्वसिद्धिप्रदायकम् ।
उत्तमं तद्विजानीयादानन्दरससागरम् ।। ८ ।

मध्यमं चागमोल्लासं वीरभावं क्रियान्वितम् ।
वेदोद्भवं फलार्थञ्च पशुभावं हि चाधमम् ।। ९ ।

सर्वनिन्दा समाख्यातं भावानामधमं पशोः ।
उत्तमे उत्तमं ज्ञानं भावसिद्धिप्रदं नृणाम् ।। १० ।

मध्यमे मधुमत्याश्च मत्कुलागमसम्भवम् ।
अकालमृत्युहरणं[2] भावानामतिदुर्लभम् ।। ११ ।

---

१. विवेकोल्लासेन सम्भवो यस्येति बहुव्रीहिः । २. अकाले यो मृत्युस्तस्य हरणम् ।

वीरभावं विना नाथ न सिद्ध्यति कदाचन ।
अधमे अधमा व्याख्या निन्दार्थवाचकं सदा ॥ १२ ।
यदि निन्दां न करोति तदा तत्फलमाप्नुयात् ।
पशुभावेऽपि सिद्धिः स्यात् यदि वेदं सदाभ्यसेत् ॥ १३ ।
वेदार्थचिन्तनं नित्यं वेदपाठध्वनिप्रियम् ।
सर्वनिन्दाविरहितं हिंसालस्यविवर्जितम् ॥ १४ ।
लोभमोहकामक्रोधमदमात्सर्यवर्जितम् ।
यदि भावस्थितो मन्त्रो पशुभावेऽपि सिद्धिभाक् ॥ १५ ।
पशुभावं महाभावं ये जानन्ति महीतले ।
किमसाध्यं महादेव श्रमाभ्यासेन यान्ति तत् ॥ १६ ।
श्रमाधीनं जगत् सर्वं श्रमाधीनाश्च देवताः ।
श्रमाधीनं महामन्त्रं श्रमाधीनं परन्तपः ॥ १७ ।
श्रमाधीनं कुलाचारं पशुभावोपलक्षणम् ।
वेदार्थज्ञानमात्रेण पशुभावं कुलप्रियम् ॥ १८ ।
स्मृत्यागमपुराणानि वेदार्थविविधानि च ।
अभ्यस्य सर्वशास्त्राणि तत्त्वज्ञानात्तु बुद्धिमान् ॥ १९ ।
पललमिव धान्यार्थी सर्वशास्त्राणि सन्त्यजेत् ।
ज्ञानी भूत्वा भावसारमाश्रयेत् साधकोत्तमः ॥ २० ।
वेदे वेदक्रिया कार्या मदुक्तवचनादृतः[1] ।
पशूनां श्रमदाहानामिति लक्षणमीरितम् ॥ २१ ।
आगमार्थं क्रिया कार्या मत्कुलागमचेष्टया ।
वीराणामुद्धतानाञ्च मत् शरीरानुगामिनाम् ॥ २२ ।
[2]मच्चेच्छाकुलतत्त्वानामिति लक्षणमीरितम् ।
विवेकसूत्रसंज्ञाज्ञा कार्यं सुदृढचेतसाम् ॥ २३ ।

---

१. वचनान्वितः—ग० ।
२. मम चेष्टा, मच्चेष्टा, तया आकुलानि तत्त्वानि, तेषाम्, अथवा मत् इति पञ्चम्यन्तम् । मत्तः प्रवृत्ता इच्छा, तया आकुलतत्त्वानामिति ।

सर्वत्र समभावानां भावमात्रं हि साधनम् ।
सर्वत्र मत्पदाम्भोजसम्भवं सचराचरम् ॥ २४ ।

पृष्ट्वा[1] यत्कुरुते कर्म चाखण्डफलसिद्धिदम् ।
अखण्डज्ञानचित्तानामिति भावं विवेकिनाम् ॥ २५ ।

निर्मलानन्ददिव्यानामिति लक्षणमीरितम् ।
दिव्ये तु त्रिविधं भावं यो जानाति महीतले ॥ २६ ।

न नश्यति महावीरः कदाचित् साधकोत्तमः ।
[2]दिव्यभावं विना नाथ मत्पदाम्भोजदर्शनम् ॥ २७ ।

य इच्छति महादेव स मूढः साधकः कथम् ।
पशुभावं प्रथमके द्वितीये वीरभावकम् ॥ २८ ।

तृतीये दिव्यभावञ्च दिव्यभावत्रयं क्रमात् ।
तत्प्रकारं शृणु शिव त्रैलोक्यपरिपावन ॥ २९ ।

भावत्रयविशेषज्ञः षडाधारस्य भेदनः ।
पञ्चतत्त्वार्थभावज्ञो[3] दिव्याचाररतः तदा ॥ ३० ।

स एव भवति श्रीमान् सिद्धनामादिपारगः ।
शिववद् विहरेत् सोऽपि अष्टैश्वर्यसमन्वितः ॥ ३१ ।

सर्वत्र शुचिभावेन आनन्दघनसाधनम् ।
प्रातःकालादिमध्याह्नकालपर्यन्तधारणम् ॥ ३२ ।

भोजनञ्चोक्तद्रव्येण संयमादिक्रमेण वा ।
यः साधयति स सिद्धो दिव्यभावे पशुक्रमात् ॥ ३३ ।

दिव्यभावे वीरभावं वदामि तत्पुनः शृणु ।
मध्याह्नादिकसन्ध्यान्तं शुचिभावेन साधनम् ॥ ३४ ।

---

१. दृष्ट्वा—ख० ।

२ क्रमेण दिव्यभावादिमाश्रित्य साधयेद् यदि ।
दिव्यभावे महासिद्धिं प्राप्नोति साधकोत्तमः ॥ क० ।

३. पञ्चतत्त्वानामर्थं भावं च जानाति, इति विग्रहः ।

जपनं धारणं वापि चित्तमादाय यत्नतः ।
एकान्तनिर्जने देशे सिद्धो भवति निश्चितम् ।। ३५ ।

तत्कालं वीरभावार्थं भावमात्रं हि साधनम् ।
भावेन लभते सिद्धिं [1]वीरादन्यन्न कुत्रचित् ।। ३६ ।

रात्रौ गन्धादिसम्पूर्णस्ताम्बूलपूरिताननः ।
विजयानन्दसम्पन्नो[2] जीवात्मपरमात्मनोः ।। ३७ ।

ऐक्यं चित्ते समाधाय आनन्दोद्रेकसंभ्रमः ।
यो जपेत् सकलां रात्रिं गतभीर्निर्जने गृहे ।। ३८ ।

स भवेत् कालिकादासो दिव्यानामुत्तमोत्तमः ।
एवं भावत्रयं ज्ञात्वा यः कर्म साधयेत्ततः ।। ३९ ।

अष्टैश्वर्ययुतो भूत्वा सर्वज्ञो भवति ध्रुवम् ।
भावत्रयाणां मध्ये तु [3]भावपुण्यार्थनिर्णयम् ।। ४० ।

शृणु नाथ प्रवक्ष्यामि सावधानाऽवधारय ।
अकस्मात् सिद्धिमाप्नोति ज्ञात्वा सङ्केतलाञ्छितम् ।। ४१ ।

यो जानाति महादेव तस्य सिद्धिर्न संशयः ।
द्वादशे पटले सूक्ष्मसङ्केतार्थं वदामि तत् ।। ४२ ।

आनन्दभैरवो उवाच—

एकादशे च पटले शुद्धभावार्थनिर्णयम् ।
भावेन लभ्यते सर्वं भावाधीनं जगत्त्रयम्[4] ।। ४३ ।

भावं विना महादेव न सिद्धिर्जायते क्वचित् ।
पशुभावाश्रयाणाञ्च अरुणोदयकालतः ।। ४४ ।

दशदण्डाश्रितं कालं प्रश्नार्थं केवलं प्रभो ।
चक्रं द्वादशराशेश्च मासद्वादशकस्य च ।। ४५ ।

---

१. भावादन्यद्—ख० ।
२ विजयेनानन्दो विजयानन्दः, सुप्सुपेति समासः, तेन सम्पन्नः ।
३. भावपुष्टार्थ—ख० ।   ४. भावाधीनमिदं जगत्—ख० ।

दशदण्डे विजानीयाद् भावाभावं विचक्षणः ।
अनुलोमविलोमेन पञ्चस्वरविभेदतः ॥ ४६ ।
[1]बाल्यकैशोरसौन्दर्यं यौवनं वृद्धसञ्ज्ञकम् ।
अष्टमितं क्रमाज्ज्ञेयो विधिः पञ्चस्वरः स्वयम् ॥ ४७ ।
स्वकीयं नासिकाग्रस्थं पञ्चमं परिकीर्तितम् ।
यन्नासापुटमध्ये तु वायुर्भवति भैरव ॥ ४८ ।
तन्नासापुटमध्ये तु भावाभावं विचिन्तयेत् ।
आकाशं वायुरूपं हि तैजसं वारुणं प्रभो ॥ ४९ ।
पार्थिवं क्रमशो ज्ञेयं बाल्यास्तादिक्रमेण तु ।
वामोदये शुभा वामा दक्षिणे पुरुषः शुभः ॥ ५० ।
वायूनां गमनं ज्ञेयं गगनावधिरेव च ।
केवलं मध्यदेशे तु गमनं पवनस्य च ॥ ५१ ।
तदाकाशं विजानीयाद् बाल्यभावं प्रकीर्तितम् ।
तिर्यंगतिस्तु नासाग्रे वायोरुदयमेव च ॥ ५२ ।
केवलं भ्रमणं ज्ञेयं सर्वमङ्गलमेव च ।
किशोरं तद्विजानीयाद् वायौ तिर्यग्गतौ विभो ॥ ५३ ।
केवलोर्द्ध्वनासिकाग्रे वायुर्गच्छति दण्डवत् ।
तत्तैजसं विजानीयाद् [2]गमनं बलवद् भवेत् ॥ ५४ ।
तद्वृद्धगतभावञ्च विलम्बोऽधिकचेष्टया ।
प्राप्नोति परमां प्रीतिं वरुणाम्भोदये रुजाम्[3] ॥ ५५ ।
यदाधो गच्छति क्षिप्रं किञ्चिद् ऊर्ध्वमगोचरम् ।
यदा करोति प्रश्वासं तदा रोगोल्बणोदयः ॥ ५६ ।
पृथिव्या उन्नतं भाग्यं [4]योगातपप्रपीडितम् ।
अस्तमितं महादेव अनुलोमविलोमतः ॥ ५७ ।

---

१. बाल्यं च कैशोरं च तयोः सौन्दर्यं यस्मिन् । २. तदा व्यामोहमेव च—ख० ।
३. वारुणोदयनीरुजम्—ख० ।
४. योगेनातपः योगातपः, तेन प्रपीडितम् । रोगातप—ख० ।

पवनो गच्छति क्षिप्रं वामदक्षिणभेदतः[1] ।
वामनासापुटे याति पृथिवी जलमेव च ॥ ५८ ।
सदा फलाफलं दत्ते मुदिता कुण्डमण्डले ।
तयोर्वै वायवी शक्तिः फलभागं तदा लभेत् ॥ ५९ ।
यद्येवं वामभागे तु वामायाः प्रश्नकर्मणि ।
यदि तत्र पुमान्प्रश्नं करोति [1]वामगामिने ॥ ६० ।
तदा रोगमवाप्नोति कर्महीनो भवेद् ध्रुवम् ।
यदि वायूदयो वामे दक्षिणे पुरुषः स्थितः ॥ ६१ ।
तदा फलमावाप्नोति द्रव्यागमनदुर्लभम् ।
अकस्माद् द्रव्यहानिः स्यान्मनोगतफलापहम्[2] ॥ ६२ ।
[3]सुहृद्भङ्गविवादञ्च भिन्नभिन्नोदये शुभम् ।
केवलं वरुणस्यैव पुरुषो दक्षिणे शुभम् ॥ ६३ ।
अशुभं पृथिवीदक्षे भेदोऽयं वरदुर्लभः ।
सदोदयं दक्षिणे च वायोस्तैजस एव च ॥ ६४ ।
आकाशस्य विजानीयात् शुभाशुभफलं प्रभो ।
यदि भाग्यवशादेव वायोर्मन्दा गतिर्भवेत् ॥ ६५ ।
दक्षनाशामध्यदेशे तदा वामोदयं शुभम् ।
तदा वामे विचारञ्च वायुतेजोद्वयस्य च ॥ ६६ ।
ज्ञात्वोदयं विजानीयाद् मित्रे हानिः सुरे भयम् ।
एवं[4] सुभवनागारे यदि गच्छति वायवी ॥ ६७ ।
तस्मिन् काले पुमान्दक्षो दक्षभागस्थसम्मुखः ।
तदा कन्यादानफलं यथा प्राप्नोति मानवः ॥ ६८ ।

---

१. वामदक्षिणे—क० ।

२. मनोगतं फलमपजहाति इति विग्रहे 'आतश्चोपसर्गे' इति कप्रत्यये सति आलोपे च सति साधुता ।

३. सुखभङ्ग—क० । ४. स्वनामावामे तु—ख० ।

तदा वायुप्रसादेन प्राप्नोति धनमुत्तमम् ।
देशान्तरस्थभावार्त्ता[1] आयान्ति पुत्रसम्पदः ॥ ६९ ।

बाल्यादिकं भावत्रयं राशिभेदे शुभं दिशेत् ।
एतच्चक्रे फलं तस्य राशिद्वादशचक्रके ॥ ७० ।

सूक्ष्मं फलं विजानीयात् चक्रं नाम शृणु प्रभो ।
आज्ञाचक्रं कामचक्रं फलचक्रञ्च सारदम् ॥ ७१ ।

प्रश्नचक्रं[2] भूमिचक्रं स्वर्गचक्रं[3] ततः परम् ।
तुलाचक्रं [4]वारिचक्रं षट्चक्रं त्रिगुणात्मकम् ॥ ७२ ।

सारचक्रमुल्काचक्रं मृत्युचक्रं क्रमात्प्रभो ।
षट्कोणं[5] चात्र जानीयादनुलोमविलोमतः ॥ ७३ ।

सर्वचक्रे स्वरज्ञानं सर्वत्र वायुसंगतिम् ।
सर्वंप्रश्नादिसञ्चारं भावेन[6] जायते यदि ॥ ७४ ।

तदा तद्दण्डमानञ्च ज्ञात्वा राश्युदयं बुधः ।
कुर्यात् प्रश्नविचारञ्च यदि कीर्तिमिहेच्छति ॥ ७५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थबोधनिर्णये पशुभाव-विचारे सारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे एकादशः पटलः ॥

---

१. देशान्तरस्थेन भावेन ऋता, देशान्तरस्थभावार्ता । 'ऋते च तृतीयासमासे' इति वृद्धिः । देशान्तरक्षमारार्ता ख० ।

२. पुष्पचक्रम्—क० ।

३. खड्गचक्रम्—क० ।

४. राशिचक्रम्—ख० ।

५. षट्कालम्—क० ।

६. भगवन् ज्ञायते यदि—क० ।

अथ द्वादशः पटलः

आनन्दभैरवी उवाच—

तद्वामसन्धिदेशस्थमष्टमाङ्कमथो लिखेत् ।
तदधः सन्धिदेशस्थं सप्ताङ्कं विलिखेद्[1] बुधः ॥ १ ।
तदूर्ध्वं[2] वामकोणे च तृतीयाङ्कं लिखेत्ततः ।
तदूर्ध्वं कोणगेहे च युग्माङ्कं विलिखेत्तथा ॥ २ ।
तद्दक्षिणे गृहे चैकमङ्कवर्णं शृणु प्रभो ।
वसुभावं[3] शून्यभावं षष्ठभावञ्च शून्यकम् ॥ ३ ।
एतन्मध्ये नास्ति वर्णं कोणाङ्कञ्च सवर्णकम् ।
[4]टतवर्गौ श श लिखेत् शरे शून्याध एव च ॥ ४ ।
वेदाङ्कस्थौ कचवर्गौ एऐकारसमन्वितौ ।
तृतीयाङ्कस्थितं वर्णं आदिक्षान्तं टवर्गमौम् ॥ ५ ।
[5]तपवर्गौ युगान्तस्थौ मकारं सावधानतः ।
विलिखेद्दक्षिणे तस्य गेहे चैकाङ्कमध्यके ॥ ६ ।
उयुगं पतवर्गौ च अकारं युग्मशीर्षके ।
एतत्[6] चक्रं कामचक्रं प्रश्नकाले फलप्रदम् ॥ ७ ।
वामावर्त्तेन गणयेत् दशकोणस्थवर्णकान् ।
अनुलोमविलोमेन पञ्चस्वरादिनामतः ॥ ८ ।

---

१. महेश्वर—क० ।

२. तद्दक्षिणे सन्धिभागे षडङ्कं कामचक्रके ।
तद्दक्षिणे सन्धौ च आकाशं सर्वपुण्यदम् ॥
शून्याधः कोणगेहे च स्वरञ्चापि विलोमतः ।
तद्वामकोणगेहे च वेदाङ्कं विलिखेद् बुधः ॥

३. वायुभावमन्यभावं षष्ठभावञ्च गुण्यकम्—ग० ।

४. टतवर्गौ मूर्द्धनि लिखेत् शरं शून्याध एव च—ख० ग० ।

५. उपवर्गौ⋯अकारम्—ग० ख० ।

६. प्रोक्तम्—ख० ग०, प्रश्नकार—ख० ग० ।

यस्मिन्गृहे स्वीयनाम प्राप्नोति वेदपारगः ।
तद्गृहावधि प्रश्नार्थं गणयेद्[1] ग्रहसिद्धये ॥ ९ ।

नवग्रहनवस्थानं वर्णं ज्ञात्वा सुबुद्धिमान् ।
बाल्यभावादिकं ज्ञात्वा यत्र ग्रहस्थितिर्भवेत् ॥ १० ।

तन्नक्षत्रं समानीय द्वाराधिकारमानयेत् ।
विना त्रिकोणयोगेन [2]षट्कोणं लिखेद् बुधः ॥ ११ ।

तन्मध्ये अष्टकोणञ्च भित्त्वा देवगृहान्तरम् ।
तन्मध्ये चापि षट्कोणं तन्मध्ये च त्रिकोणकम् ॥ १२ ।

क्रमेण विलिखेद् वर्णं दक्षिणावर्त्तयोगतः ।
ऊर्द्ध्ववामदेशभागे अ आ इ च कवर्गकम् ॥ १३ ।

तद्दक्षिणे ई इ युगं टवर्गञ्च लिखेद् बुधः ।
दक्षपार्श्वे अधोभागे ऋयुगं तृ तवर्गकम् ॥ १४ ।

तदधो लृ लृ ए ऐ रूपञ्च पवर्गञ्च लिखेद् बुधः ।
तद्वामपार्श्वभागे च ओ औ यरलवान् लिखेत् ॥ १५ ।

शेषगेहे लिखेदं अः शादिक्षान्तं हि षड्गृहे ।
[3]मध्यस्तमादिकोणे च एकाङ्कं सर्वकस्तुनुम् ॥ १६ ।

रुद्राग्निमूर्त्तिमनिलं अग्निकोणे लिखेद् बुधः ।
यजमानः पशुपतिमूर्तिषष्ठञ्च दक्षिणे ॥ १७ ।

महादेवं सोममूर्त्ति सप्तमं नैर्ऋते लिखेत् ।
[4]जलमूर्त्तिभवं युग्मं पश्चिमे विलिखेद् बुधः ॥ १८ ।

उग्रवीरं वायुमूर्त्ति वायुकोणे चतुर्थकम् ।
भीमरूपाकाशमूर्त्ति पञ्चमं चोत्तरे लिखेत् ॥ १९ ।

---

१. भाव—ख० ।
२. न—ख० ।
३. भूमादि—क० ।
४. जलमूर्तौ भवम्, जलमूर्तिभवम् ।

ईशानं सूर्यमूर्त्तिश्च ईशाने[1] षड्दलं लिखेत् ।
अधः षट्कोणमध्ये च [2]षट्कोणं विलिखेत्ततः ।। २० ।
ऊद्ध्र्वकोणे ग्रीष्मकालं शिशिरञ्चापि दक्षिणे ।
वर्षाकालमधस्तस्य स सर्वाधश्च वसन्तकम् ।। २१ ।
शरत्कालं पञ्चकोशे शीतकालञ्च षष्ठके ।
त्रिकोणे चापि तन्मध्ये वह्निरूपं वकारकम् ।। २२ ।
लिखित्त्वा गणयेन्मन्त्रो वर्णदेवाङ्कवह्निभिः ।
एतच्चक्रं [3]महासूक्ष्मं फलचक्रं विशारदम् ।। २३ ।
अधुना कुलनाथेश [4]पृष्ठचक्रं पुनः शृणु ।
विना ज्ञानेन यस्यैवं पृष्ठभावो[5] न जायते ।। २४ ।
यदि[6] पृष्ठचक्रभावं जानाति साधकोत्तमः ।
तदा निजफलं ज्ञात्वा सिद्धिमाप्नोति निश्चितम् ।। २५ ।

आनन्दभैरव उवाच[7]—

षट्कोणं कारयेन्मन्त्री विना त्रिकोणसाधनैः ।
तन्मध्ये च चतुष्कोणं तन्मध्ये शादिवर्णकान् ।। २६ ।
लिखित्त्वा विलिखेत्तत्र षडङ्कमध्यदेशतः ।
षडङ्कं दापयेन्मन्त्री दीर्घदीर्घक्रमेण तु ।। २७ ।
तदग्रे षड्गृहं कुर्यात्तत्राङ्कार्णान् लिखेत्सुधीः ।
ऊद्ध्र्वप्रथमगेहे च कवर्गं विलिखेद् बुधः ।। २८ ।
तद्दक्षिणे मन्दिरे च चवर्गं विलिखेद् बुधः ।
टवर्गं दक्षिणे चाधः सर्वाधस्तु तवर्गकम् ।। २९ ।
तद्वामे मन्दिरे नाथ पवर्गं वर्णमङ्गलम् ।
तदूर्ध्वे यादिवान्तं च दक्षिणावर्त्तयोगतः ।। ३० ।

---

१. अष्टमं लिखेत्—ख० ।
२. चाष्टकोणम्—ख० ।
३. सिद्धया—ख० ।
४. राशिचक्रम्—ख० ।
५. प्रश्नभारो—ख० ।
६. प्रश्नचक्र—ख० ।
७. आनन्दभैरव उवाच—क० पुस्तके नास्ति ।

अकारादिस्वरान् तत्र मन्दिरे विलिखेद् बुधः ।
यावत् स्वरस्थितिर्याति तावत्कालं विचारयेत् ।। ३१ ।
मेषादिराशिसद्भावं वर्गलेखनमानतः ।
अनुलोमविलोमेन विलिखेत् षष्ठमन्दिरे ।। ३२ ।
यद्यद्गृहे साध्यनाम चास्ति नाथ स्वरादिकम् ।
[1]एकत्रीकृत्य हरणात् यदङ्कं[2] प्राप्यते वरम् ।। ३३ ।
षडङ्केन ततो नाथ हरेदनलसंख्यया ।
यदङ्कं प्राप्यते तत्र स राशिस्तत् क्षणस्य च ।। ३४ ।
आज्ञाचक्रं फलं सिद्धं विद्यानाथ वदामि तत् ।
येन विज्ञातमात्रेण सर्वज्ञो भवति ध्रुवम् ।। ३५ ।
अकस्मात् शक्तिमाप्नोति विद्यारत्नं ददामि तत् ।
रव्यादिसप्तवारञ्च कृते भद्रविवर्धनम् ।। ३६ ।
शन्यादिसप्तवारं च त्रेतायां सौख्यवर्द्धनम् ।
गुर्व्वादिसप्तवारञ्च द्वापरे धर्मसाधनम् ।। ३७ ।
शुक्रादिवारसप्तञ्च कलौ युगफलप्रदम् ।
अतः शुक्रादिपर्यन्तं गणनीयं विचक्षणैः ।। ३८ ।
गणयेत् सप्तवारञ्च मध्ये चतुर्द्दले सुधीः ।
पूर्वादिक्रमतो वारान् गणयेद् तन्त्रवित्तमः ।। ३९ ।
निजवारो यत्र पत्रे समास्तिस्तूद्भवञ्च तत् ।
तद्भराशिं समानीय वर्णभेदं समानयेत् ।। ४० ।
सामान्यफलमूलञ्च वदा[र्णा]दिपत्रभेदतः ।
आज्ञाचक्रं शुभं मन्त्री आज्ञाचक्रं विचारयेत् ।। ४१ ।
तत्फलाफलमाहात्म्यं शृणु सङ्केतपण्डित ।। ४२ ।

---

१. एकस्थीकृत्य, इति पाठ उचितः ।
अथवा—एकं त्रायते इति एकत्रम् । अनेकत्रमेकत्रं कृत्वा इति एकत्रीकृत्य ।

२. हरेदङ्कं वाञ्छितम्—ख० ।

आनन्दभैरव[1] उवाच—

दले पूर्वभागे आकारार्धं इन्दुस्फुटे
राज्यलाभं हकारान्तशब्दम् ।
सामानार्थभावं विशिष्टार्थयोगं
क्रतुक्षेमयुक्तं तथा पुत्रलाभम् ॥ ४३ ।

दयायुक्तभूषाश्रयत्वं जयत्वं
समाप्नोति मर्त्यो विवाहं सुवाहम् ।
सुखं नाथ लोकानुरागं सुभोगं
विभाधावकानां समाप्ते क्षणादिम् ॥ ४४ ।

पद्मे दक्षिणपत्रके प्रियपदा मोददहं[2] भास्वरं
नानालक्षणदुःखदं शुचिपदा आन्दोलितस्तैरहम् ।
[3]माहेन्द्रामृतयोगरागहननं साक्षाद्यमारोपणं
चित्तानां परिचञ्चलं खलगुणाह्लादेन सामोदितम् ॥ ४५ ।

पात्रार्थलाभं यदि वाध एव
प्रगच्छति क्रूरखलप्रतापः ।
तथापि हन्तुं न च वर्णमध्ये
क्षमः स्वसिद्धं भजते क्षमादि ॥ ४६ ।

रसार्थप्रश्नं कुरुते यदि स्याद्
वारो हि चारो गृहमध्यभागे ।
स्वकीय इन्दुप्रियवद्धवेद्ध्रुवम्
मनोगतं सौख्यविवर्धनञ्च ॥ ४७ ।

शत्रूणां हननं तदा कुलगतं सञ्चारवातं मुदा
रोगाणां परिमर्दनं प्रभुपदे भक्त्यर्थिनां ज्ञापनम् ।
आह्लादं हृदयाम्बुजेऽमृतधनं तीर्थागमं शोकहं
सूक्ष्मार्थं गणयेत्ततः प्रचपला वाग्देवतादर्शनम् ॥ ४८ ।

---

१. आनन्दभैरवी उवाच—क० ।
२. मोदप्रदम्, इति पाठ उचितः ।
३. माहेन्द्रामृतयोगे यो रागः, तस्य हननं यस्मिन् ।

आथर्वे पत्रमध्ये निवसति कमला कोमला वाद्यदात्री
आगन्तव्यादिवार्तां कथयति सहसा सर्वदा मङ्गलानि ।
नित्यावश्यं प्रतापं प्रियगणहितां प्रेमभावाश्रयत्त्वं
नित्यं कान्तामुखाम्भोरुहविमलमधुप्रेमपानाभिलाषम्[1] ॥ ४९ ॥

मेषे तृप्तिमुपैति सिंह इषुभिः कुम्भेन तेषां फलं
लाभं कुञ्जरघातकेषु रजतं चौर्येण यद्यद्गतम् ।
एवं कास्यविहारणं शतपले सूर्योदयात्तिष्ठति
प्रातःकालफलाफलं कथयति श्रीकेशरीमध्यगः ॥ ५० ॥

पश्यादेकशतं पलेन्दुधनुषा व्याप्तं यदा भूतले
वित्तानां हरणं तदा जलगते मित्रस्य राज्यादिकम् ।
दूरस्थादिकथागतादिसमयं शत्रोर्महापीडनम्
वाञ्छावर्गकुलोदयं समुदयात् सूर्यस्य चागण्यते ॥ ५१ ॥

शेषे चैकशते फले समुदिते कुम्भो महादुर्बली
दारिद्र्यस्य कथा कदा सुविषयं विद्यार्थभूषञ्चयम् ।
लाभं देशविदेशकार्यगमनं शीघ्रं धनाद्यागमं
देवानां खलु दर्शनार्यकथनं व्यामोहसन्नाशनम् ॥ ५२ ॥

वारे शुक्रे शनिगतदिनलवटाहौ च सूर्ये
नित्यं ज्ञानोदयनिजपथ आयुषां निर्णयं तत् ।
अष्टौ वर्गानुदयति मुदा प्राप्य वीरो महत्त्वं
लोको दोषं प्रथमखचरे चायुषां पृष्टमात्रम् ॥ ५३ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थबोधनिर्णये वाशवकल्पे आज्ञाचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे द्वादशः पटलः ॥

---

१. कान्तामुखमम्भोरुहं कमलमिव शोभनगन्धाधायकं तस्य यद् विमलं मधु, तत्र यत्प्रेम, तस्य पाने अभिलाषो यस्य ।

अथ त्रयोदशः पटलः

आनन्दभैरवी[1] उवाच—

आज्ञाप्रश्नार्थभावञ्च वर्णविन्यासनिर्णयम् ।
अधुना शृणु सर्वज्ञ भावज्ञानपरायण ॥ १ ।

यदि मेषे स्वनक्षत्रं स्ववारसंयुतं शुभम् ।
ज्ञात्वा शुभादिपत्रञ्च पलमानेन साधकः ॥ २ ।

गणयेद्वर्णसारञ्च येन तत्प्रश्ननिर्णयः ।
पूर्वे दले ककारस्य वर्णभेदं शृणु प्रभो ॥ ३ ।

मनसि सुखसमूहं प्राणसौख्यार्थचिन्ता
वसनगमनलाभं प्रीतिपुत्रार्थयोग्यम् ।
स्थिरपदमपि देशे दर्शनं प्राणबन्धोः
सकलकलुषहानिश्चादिपत्रे ककारे ॥ ४ ।

सदा नृनासिके सुखं सुखोल्बणस्य सेवनं
सदाशिवे च भक्तिदं स्वकीयगेहसत्फलम् ।
कलाधरस्य दृष्टिभिः प्रधानलोकपूजनं
हिताहितं न बाधते विवाहकेलिना सुखम् ॥ ५ ।

ऋकारं विपदां ध्वंसं धैर्ये विद्याविबोधनम् ।
व्याधिपीडादुर्जनानां पीडाप्रश्नं वदेत्तदा ॥ ६ ।

उकारे वायुभावस्य वृथागमनमेव च ।
[2]दारिद्रयहानयोर्यान्ति दूरागमनदुर्लभम् ॥ ७ ।

खकारे द्रव्यप्रश्नञ्च शुभकार्ये गते भयम् ।
आशु भयं समाप्नोति प्राप्य[3] निर्धनतां व्रजेत् ॥ ८ ।

---

१. आनन्दभैरव उवाच—ख० । २. दारिद्रयं च हानं च तयोः ।

३. प्र + आप्त्वा इत्यत्र नित्यसमासे ल्यपि सति साधुता ।

पञ्चत्वजिज्ञासनमेव सत्यं
नित्यं सुखानामुदयाय चेष्टा ।
शत्रोर्विनाशाय हिताय बन्धोः
पकारकूटे परचौरचेष्टा ।। ९ ।

मारीभीतिविरोधनं धनपतेरानन्दपुञ्जोदयं ।
गोविद्याश्रियमाशु लाभविविधं धर्मार्थचिन्ताकुलम्[1] ।।१०।
हरिपूजा[2] हरिध्यानं हरिपादाम्बुजे रतिः ।
चौर्याहरणद्रव्यस्य न हानिर्जन्महार्दके ।। ११ ।
आकारे तेजसो हानिर्महाशब्दे विनाशनम् ।
आगतानाञ्च हानिः स्यात् पक्षपातं गतौ जयम् ।। १२ ।
उशतोनिजगेहस्था उल्बणव्याधिपीडनम् ।
उत्साहध्वंसशून्यञ्च पाठे पाण्डित्यमुल्बणम् ।। १३ ।
दीर्घलृकारवर्णे च लावण्यलोचनो नृपः ।
लज्जानष्टक्षेमबुद्धिर्मित्रतुल्यप्रियो भवेत् ।। १४ ।
दीर्घप्रणवमोंकारे निराश्रयो न जीवति ।
महदाश्रयमात्रेण सर्वं चूर्णं करोति हि ।। १५ ।
सिंहे कार्मुकमेषलग्नसमये नित्याशिषं प्राप्नुयात्
किञ्चिद्भ्राति पराक्रमी गतिमतां श्रेष्ठो भवेत् कर्मणि ।
किञ्चिद्दोषकुलापहं नरपतेरुत्साहसंवर्धनं
क्रोधी नित्यपराक्रमी भवति सः शीघ्राभिलाषान्वितः ।। १६ ।
अथ वक्ष्ये महादेव वीराणामुत्तमोत्तम ।
सर्वशास्त्रार्थतत्त्वज्ञ तत्त्वज्ञानपरायण ।। १७ ।
दक्षिणस्थदलस्यापि वर्णभेदार्थनिर्गमम् ।
फलमत्यन्तनिष्कर्षं वाञ्छावाक्यफलप्रदम् ।। १८ ।

---

१. इदं छन्दस्त्रुटतिं प्रतिभाति । बहुशः प्रयत्ने कृतेऽपि पूरकमुपकरणं नावाप्तम् ।
२. कैवल्यादिसमापनं निजमनो दुष्टव्यायहं कामिनां
नानाभोगविनाशनं कनकरौप्यराजप्रदं स्वके ।।
बालस्य पीडया दुःखी कणध्वंसिनृपाश्रयम् ।
मरणं गमने क्षीवी लौल्यं लेख्यमरेचके ।। क० ।

कान्ते बीजे [1]कमलनिलया गेहभागस्थिरा या
नानादेशभ्रमणभयदा नैव कुत्रापि सुस्था ।
चण्डोद्वेगापहसति खलानाञ्च हानिः प्रबुद्धो
वाणी वश्या वसति वदने चक्रिणां हानयः स्युः ॥ १९ ।

चारुप्रतापं चरणो गुरूणां
भक्तिर्दृढा स्याद्गमनेषु चारु ।
तदागतानां नृपतिप्रियाणां
सम्प्रेरणं चारुफलञ्च कूटे ॥ २० ।

कान्तेषु कान्तावदनारविन्दे
सूषट्पदत्वं रमणीविलासम् ।
आयुःक्षयोद्वेगविनाशकारणं
चाकर्षणं देशसुखं धनानाम् ॥ २१ ।

टकारे धारणं देशे सुखं शेषे निशामुखम् ।
विदेशस्थधनादीनां स्यादागमनमुत्तमम् ॥ २२ ।

दकूटमधनं विना भवति विघ्नहानिः सदा
जयं स्वगृहकामिनो कमलनेत्रकान्ता यथा ।
सुसिद्धकरमेव हि प्रबलभावनातो भवेत्
भवे जयति मानुषस्तु पृष्टस्य जिज्ञासने ॥ २३ ।

व्याख्यातं मुनिभिः फलं फलमयं कालं[2] रिपूणां सदा
लोकानां वशकारणं कुलवरो वेदागमे पारगः ।
प्राप्नोति प्रियपुत्रकं नरपतेरुत्साहसं कारणं
कार्ये दुर्जनपीडनं भयसमूहानां विनाशङ्कके[3] ॥ २४ ।

यशसि वयसि तेजो बुद्धिरेव यकूटे
समयफलभूपोल्लासवृद्धिः समृद्धया ।
यजनमपि सुराणां चौर्यमात्रं न भूया-
दतिशयधनवृद्धिः क्रेयविक्रेयकाले ॥ २५ ।

१. कमलस्य निलयः, अथवा कमलं निलयः यस्याः सा कमलनिलया ।
२. कालम्—ख० । ३. विनाशङ्कं स्वके—ख० ।

शीतकाले धनप्राप्तिः स्वर्णरौप्यादिलाभकम् ।
पुत्रप्राप्तिः सुखप्राप्तिः सङ्कटे वदति ध्रुवम् ॥ २६ ।

लक्ष्मीः प्रियं धनं दातुं मुदिता भूमिमण्डले ।
जलेन जायते हानिर्लयं देवेन कूटके ॥ २७ ।

प्रश्नाद्यक्षरमित्यादिस्वरमूलं हि यो नरः ।
जिज्ञासनं यदा कुर्यात् तदा स्यादुत्कटं फलम् ॥ २८ ।

श्रृणु तत्तत् स्वरं नाथ एतत्पत्रस्थमाक्षयम् ॥ २९ ।

इकारकूलमङ्गले धनादितृष्णयान्वितोः ।
विशेषधर्मलक्षणं धनञ्च पैतृकं लभेत् ॥ ३० ।

गतिप्रियं सुदेवता सुसम्पदं सदासुखम् ।
तथा हि सूक्ष्मबुद्धिभिः परास्तमाकरोदरिम् ॥ ३१ ।

ईकारमपरप्रियं परमतध्वंससंवर्द्धनम् ।
विदेशगमनं नहि प्रभवतीह बाह्यं दया ॥ ३२ ।

जगज्जनमभिप्रियं तरुणदोषसम्माननम् ।
विकाररहितं सुखं भवति पृष्ट आवेदके ॥ ३३ ।

ए बीजे बद्धसन्तोषं कामनाफलसिद्धिदम् ।
वायुना हरणं चैव प्राप्नोति नृपमाननम् ॥ ३४ ।

अमीत्येकाक्षरे बीजे बीजभूते जगत्पतेः ।
प्राप्नोति कन्यादानादिफलं वस्त्रञ्च तैजसम् ॥ ३५ ।

गोकन्यामकरे खगे खगचरता सौन्दर्यलक्ष्मीर्भवेत्
शेषे [1]काञ्चनपुञ्जलाभमतुलं सन्तोषसारं गतौ ।
संसारे निजदायिकास्वजनता रत्नादिकं सञ्चयम्
सर्वं सञ्चयति प्रभो हितकरं प्रश्नार्थमाद्याक्षरे ॥ ३६ ।

तृतीयदलमाहात्म्यं[2] यद् यद् वर्णे विचारयेत् ।
प्रश्नाद्यक्षरवर्णेषु नीत्वा च गगनं चरेत् ॥ ३७ ।

---

१. काञ्चनस्य सुवर्णस्य पुञ्जः समूहः, तस्य लाभस्तम् । २. राहित्यं यद्वा—ख० ।

तत्प्रकारं श्रृणु प्राणवल्लभ प्रेमपारग ।
यज्ज्ञानात्प्रश्नसिद्धिः स्यादकालफलदं नृपम् ॥ ३८ ।

दृष्ट्वा ज्ञात्वा भावराशिमुत्तमाधममध्यमम् ।
[1]लोकभावविधानज्ञो निजविद्यादिकं[2] तथा ॥ ३९ ।

सर्वं विषयरूपेण भावसारं विचारयेत् ।
गबीजं मङ्गलं ज्ञेयं फलमत्यन्तभाग्यदम् ॥ ४० ।

गतद्रव्यादिलाभञ्च तथा लोकवशं फलम् ॥ ४१ ।

दकारकूटे कठिनं रिपूणां विद्रावणं धर्मविनाशकस्य ।
भूमिपतेर्वा मरणं विनाशनं दिव्याङ्गनाया वररत्नलाभम् ॥४२।

टकारे दूरगानाञ्च दर्शनं भवति ध्रुवम् ।
उद्वाहः पुत्रसम्पत्तिः षष्ठमासेन लभ्यते ॥ ४३ ।

टान्ते चौरभयं नास्ति तद्द्रव्यागमनं भवेत् ।
विधिविद्याप्रकाशेन[3] शिवे विष्णौ च भक्तिमान् ॥ ४४ ।

धकारकूटे धरणीपतित्वं व्याधेर्भयं नास्ति तथा पशोश्च ।
प्रवेशमात्रेण गतौ कलापि जीवादिसम्पत्तिमुपैति लक्ष्मीम् ॥४५।

रबीजे सिद्धः सम्यक् खगकुलवरो धीरगमनम्,
वाञ्छातुल्यं विभवमतुलं राजराज्यप्रियं स्यात् ।
प्रतापं साम्राज्यं सकलहितगोलोकरसता
रसं सर्वं लोकं प्रियमतिसुखं लाभविविधम् ॥ ४६ ।

चकारे[4] बह्निबीजे च जितं सर्वं चराचरम् ।
यथा [5]क्रमेण सर्वत्र गमने भाग्यदं फलम् ॥ ४७ ।

षकारमध्यमे देशे वार्त्तदिशादुपैति हि ।
पत्रिकागमनं [6]कार्यं यः करोति धनं लभेत् ॥ ४८ ।

---

१. लोकभावयोर्विधानं जानाति इति ।
२. विद्यादिकम्—ख० ।
३. विधीनां विद्याः, तासां प्रकाशेन ।
४. वाकरे—ख० ।
५. जयेन—ख० ।
६. क्रेयम्—ख० ।

क्षकारे सख्यभावश्च मित्रभावं यदा लभेत् ।
[1]सुप्रीतिश्च भवेत्तस्मात् तदा प्रश्नभयं न च ।। ४९ ।

स्वराज्ये च भवेत् सौख्यं पुष्पजिज्ञासकर्मणि ।
हसनान्ते तथा वर्णे पाचकं देहि चादिदम् ।। ५० ।

यदि स्यादुच्यते नाथ विपरीतफलं न च ।। ५१ ।

दीर्घीकारे विषयघटना नाथ पादे मतिः स्याद्
यद्यारम्भो भवति कुलनं दीर्घजीवी नरेन्द्रः ।
बालापत्यं गमयति मुदा कालदेशाधिकारी
लोकारण्ये सकलकलुषध्वंसहेतोर्मृगेन्द्रः ।। ५२ ।

सुखञ्चचार चाष्टमे महाधनेशसन्निधौ
प्रबुद्धवान् भवेन्नरः समाहितो भवेद् ध्रुवम् ।
विचित्रचातुरी यदा महाकुचोरगा प्रभो
प्रहस्यते क्षणादपि प्रभातसूर्यदर्शनात्[2] ।। ५३ ।

अतीव धैर्यतां लभेत्
विचित्रवाग्भवेज्जयम् ।
जयेन सेवितं पुरा पुराण वाक्यलाभकं
जगज्जनादिसेवनं लभेत्...... ।। ५४ ।

न चाकुलागमं गयागभीरतुल्यसत्फलम् ।
सदा हि पुण्यसागरे गुरोः पदाम्बुजं लभेत् ।। ५५ ।

विसर्जनीये सुस्वरे समाप्तिकोमलान्वितम् ।
जनागमं धनागमं विशालवेदनान्वितम् ।। ५६ ।

मनोगतं कुबुद्धिदं स्वकीयबन्धुसज्जनम् ।
विसर्जनं कुलक्षणं भवेल्लभेत् कुबन्धनम् ।। ५७ ।

सकुलं निष्कुलं कान्तं विदुः श्रेष्ठा महर्षयः ।
हास्यसुखे हास्यफलं भावनायां भवेन्नहि ।। ५८ ।

---

१. अप्रीतिश्च भवेत् तस्य तदा प्रश्नभयं न च—ख० ।
२. प्रभाते प्रातःकाले यः सूर्यः, तस्य दर्शनात् ।

क्रोधक्रमेणैव तदैव चक्षुषो-
विकारभावेन हरेत् समस्तम् ।
शीर्षे करौ चेत् कलिकालसंयुतं
फलं हि लाभे वध एव भूषणम् ।। ५९ ।

शेषे वेददले वराभयकरे हारावशब्दापहा
दूरादागमनं भवेद्धि नियतं बालागणैरावृतम् ।
घोरापायविसर्जनं जलगुणाह्लादेन सामोदितम्
कूटे कूटघकारवर्गलहरी भासापभासारसे ।। ६० ।

जवर्गे जतुकं स्वर्णं जीवनोपायचिन्तनम् ।
जराव्याधिसमाक्रान्तं जीर्णवस्त्रापहारणम् ।। ६१ ।

ठकारकूटे यदि चक्रवर्ती
भूमण्डले स्यात्पततीति निश्चितम् ।
अन्तःसुखं हन्ति यदादिभावे
ठकारमात्रेण [1]रिपूत्तमो भवेत् ।। ६२ ।

आद्यप्रश्नाक्षरं नाथ तकारं तरुणप्रियम् ।
[2]पापान्धकारपटलध्वंसाय कल्पयते तदा ।। ६३ ।

नकारमाद्ये यदि प्रश्नवाग्गमी
जिज्ञासमानो ध्रुवमर्थसञ्चयम् ।
आलापमात्रेण नरा वशा स्युः
प्रवेशने राजकुलेन्द्रसन्निधौ ।। ६४ ।

भीतो भवति देशे च भयस्थाने न दुःखभाक् ।
[3]भूषासम्पत्तिवृद्धिश्च भकारकूटमङ्गले ।। ६५ ।

लोकानुरागं सर्वत्र आद्यक्षरविचारतः ।
लकारस्यापि लोकेश भार्यादुःखं विमुञ्चति ।। ६६ ।

सकारे मैथुनं कान्ताकुलस्य कुलवर्द्धनम् ।
धनवृद्धिर्वंशवृद्धिः सरस्वतीकृपा भवेत् ।। ६७ ।

---

१. विभोत्तमो—ख० । २. पापान्धकारपटलस्य ध्वंसायेत्यर्थः ।
३. भूषायाः सम्पत्तेश्च वृद्धिः ।

वेदपत्रे अकारस्य फलमाहात्म्यनिर्णयम् ।
शृणु नाथ प्रवक्ष्यामि सावधानाऽवधारय[1] ॥ ६८ ।
ककारादिक्षकारान्तं व्याप्य तिष्ठति तत्त्वतः ।
अकारेण विना शक्तिर्ज्जायते कुत्र न प्रभो ॥ ६९ ।
अकारे ग्रथितं सर्वं चराचरकलेवरम् ।
यद्यकारमाद्यभागे प्रश्नजिज्ञासने भवेत् ॥ ७० ।
कुफलेऽपि सत्फलानां सञ्चयं भवति ध्रुवम् ।
शत्रूणां वासहेतोर्धनादीनाञ्चैव सञ्चये ॥ ७१ ।
अन्तर्यजनविद्यासु लोकस्यागमने तथा ।
निजदुःखानुतापे स्याद्यकारविधिरुच्यते ॥ ७२ ।
उकारफलमाहात्म्यं शृणु प्रश्नार्थपण्डित ।
उषाकाले चौर्यप्रश्नमुल्लासं मानसोद्भमम् ॥ ७३ ।
उत्तमस्थलवासञ्च उत्कृष्टभोजनादिकम् ।
उल्बणाबुद्धिरुत्पत्तिरुमादेवीपदे मतिः[2] ॥ ७४ ।
रकारलक्षणं चक्षुः शब्दस्य वचनं भवेत् ।
लोचने दर्शनं स्त्रीणां लिखनं दूरसम्भवम् ॥ ७५ ।
प्राप्नोति परमां लक्ष्मीं लोकवश्याय केवलम् ।
लाङ्गलानां सञ्चयञ्च भूमिलाभो भवेद् ध्रुवम् ॥ ७६ ।
ओकारे राज्यवृद्धिः स्यात् पुत्रवृद्धिस्तथैव च ।
सदा सन्तोषमाप्नोति प्रणवः सर्वसिद्धिदः ॥ ७७ ।
मीने कर्कटराशिवृश्चिकतुले धर्माग्निभानूदये
गेहे वेदविचारणे शुभफलं श्रीलाभगत्युन्नतिम् ।
विद्यावेदकथादिकं जयवतामानन्दसिन्धोः फलम्
प्राप्नोति प्रतिपत्तिसिद्धपदवीं मर्त्यो मुदा हर्षणम् ॥ ७८ ।
पत्रप्रमाणं कथितं हीनविद्याविनिर्गमम् ।
पुनः शृणु महाकाल कलिकालस्य उद्भवम् ॥ ७९ ।

---

१. सावधानोऽवधारयेति पाठ उचितः, नाथेत्यस्य विशेषणम् सावधान इत्येव । अथवा हे नाथ सावधाना अहं प्रवक्ष्यामि, इत्यन्वयः ।

२. उमा देवि पदे सति—ख० ।

यद्यन्मासस्य प्रथमे तथा चाह्नोऽर्भकस्य च ।
दण्डद्वये शुभफलं प्रथमस्य महेश्वर ॥ ८० ।
तृतीयैकदण्डमात्रं विपरीतफलप्रदम् ।
तत्र दण्डेषु नक्षत्रं यदि चेन्नाशुभं भवेत् ॥ ८१ ।
अश्विन्याद्यष्टनक्षत्रं पूर्वप्रथमपत्रके ।
तत्सुतारं[1] विजानीयात् दुष्टदोषे सुखं भवेत् ॥ ८२ ।
आश्लेषाभादिचित्रान्तं द्वितीये दक्षिणे दले ।
तत्फलं विपरीताख्यं सफलेऽपि फलापहम् ॥ ८३ ।
स्वात्यादिवसुनक्षत्रं तृतीयाधोदले लिखेत् ।
तत्सुतारं क्रमाज्ज्ञेयं नान्यथा शुभमानयेत् ॥ ८४ ।
तत्फलार्थं कुत्सितञ्च विपरीतफलस्थले ।
अशुभं तत्फलस्थाने कुफले सुफलं भवेत् ॥ ८५ ।
उत्तराषाढकातारादिरेवत्यन्तमेव च ।
तत्फलन्तु भवेद् मर्त्यो यदि कर्मपरो भवेत् ॥ ८६ ।
अथ वक्ष्ये महादेव अश्विन्यादिफलं प्रभो ।
यज्ज्ञात्वा देवताः सर्वा दिग्विदिक्ष्वादिरक्षकाः ॥ ८७ ।
तत्प्रकारं महापुण्यं देवदेव फलोद्भवम् ॥ ८८ ।

त्रैलोक्ये सौख्यपूजां त्रिभुवनविदितां त्रैगुणाह्लादसिद्धां
सिद्धभ्रान्तो विशालो वरदविदलितां वेदनार्द्रापशङ्काम् ।
मन्दानां मन्दभाग्योपहगुणहननं हीनदीनापदाहां
लोकानां सत्फलानां फलगतवपुषा साश्विनी सा ददौ चेत् ॥ ८९ ।

एवं क्रमेण देवेश तारकाणां फलाफलम् ।
पुनः पुनः शृणु प्राणवल्लभ प्रेमभावक ॥ ९० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे आज्ञाचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे त्रयोदशः पटलः ॥

●

---

१. सुष्ठु तार्यते इति सुतारम्, तॄधातोर्घञ्प्रत्ययः कर्मणि ।

अथ चतुर्दशः पटलः

आनन्दभैरवी उवाच—

अथातः सम्प्रवक्ष्यामि योगमार्गेण शङ्कर ।
भरण्यादिसर्पविशान् नक्षत्रार्थं सुसत्फलम् ॥ १ ।
तत्फलाफलमाहात्म्यं साक्षात्कारकलेः फलम् ।
फलार्थं भरणीक्षेत्रं धर्मविद्यादिनिर्णयम् ॥ २ ।
धर्मचिन्ताविनिर्बोधं गमनाभावमङ्गलम् ।
मकारादिवर्णजातां प्राप्नोति भरणीं भके ॥ ३ ।
कृत्तिकायां शादिवर्णं व्याधिशङ्करसंक्षयम् ।
आरोग्याय धनस्यार्थे तत्र सूर्यं न चाचरेत् ॥ ४ ।
या रोहिणी धनवतां धनहानयोर्नं
प्राणप्रियं गणसुबुद्धविबुद्धिशुद्धिम् ।
नागादिदोषशमनं क्षितिचक्रमध्ये
राजश्रियं विबुधशुद्धिमुपैति वृद्धिम् ॥ ५ ।
मृगेन्द्रशीर्षंगामिनी नरेन्द्रमन्दिरे निधिं
ददाति पापनिर्मले जले धन्यशून्यके ।
भयं विवाहकालके कुले शुभं शुभेक्षणा
स्वकीयकिल्बिषं दहेदनन्तबुद्धिसञ्चयम् ॥ ६ ।
आर्द्राविद्रुमरूपिणी रतिकलाकोलाहलोल्लासिनी
सा मत्यार्पणमेव सम्प्रकुरुते काले फलालापनम् ।
सौख्यं मुख्यसमृद्धिदा दरदलाम्भोजच्छटालिम्पटा
सा धोरं परिरक्ष्यति प्रतिदिनं शान्तं दृशान्तं दहेत् ॥ ७ ।
पुनर्वसुसुतारिका तरुणरूपकूपा कृपा-
विशिष्टफलभावनारहितचित्तदोषापहा[1] ।
धनमन्तपरिमाणगं प्रचुरशोकसंघापहा
प्ररक्षति महाग्रहः परमपीडितं मानुषम् ॥ ८ ।

---

१. विशिष्टफलभावनाभिः रहितं यच्चित्तम्, तस्य दोषान् अपजहातीति कप्रत्यये सति साधुत्वम् ।

पुण्या पौषमाकरोति सहसा तेजस्विनां कान्तिदा
कान्तायाः कनकादिलाभविपदां ध्वंसेन वंशादिदा ।
वाधायां फलदा मृगा मृगपतेरानन्दतुल्यं श्रियम्
काद्या पञ्चमवर्णज्ञानललिता पातीह पुत्रं यथा ॥ ९ ।

एतद्धि पूर्वपत्रान्ते तारा मङ्गलदायिकाः ।
प्रतिभान्ति यथा चक्रे ग्रहाणां भ्रामणे शुभे ॥ १० ।

विपरीतफलं नाथ प्राप्नोति पातके बहु ।
पुष्यायां स भवेत् क्रूरः कर्कटस्थोऽपि भास्करः ॥ ११ ।

एतासां तारकाणाञ्च राशिदेवान् शृणु प्रभो ।
मेषः सिंहो धनुश्चैव अश्विन्यादिकदेवताः ॥ १२ ।

येषां राशिस्थितं वर्णं न हानिर्विषयास्पदे ।
सर्वत्र जयमाप्नोति ग्रहे क्रूरेऽपि सौख्यदः ॥ १३ ।

विभिन्नराशौ संभिन्नो धर्मनिन्दाविवर्जितः ।
[1]स्वनक्षत्रफलं ज्ञात्वा प्रश्नार्थं कोमलं वदेत् ॥ १४ ।

तत्तन्नक्षत्रसुफलं कुफलं वा भवेद्यदि ।
तदा वर्णविचारञ्च कृत्वा [2]पुष्पं तदा वदेत् ॥ १५ ।

अक्षमालाक्रमेणैव तद्वर्णानां विचारतः ।
तत्तद्वर्णविचारे तु यद्यत् सौख्यं प्रवर्त्तते ॥ १६ ।

अधिके दोषजाले तु अधिकं दुःखमेव च ।
[3]बहुसौख्यं नित्यसौख्यं[4] प्राप्नोति साधकोत्तमः ॥ १७ ।

---

१. अल्पजयमल्पकार्यंप्रधानफलमङ्गलम् ।
अल्पकर्मणि संसक्तो हीनबुद्ध्या विबोधनम् ॥
अथवा स्वस्वनक्षत्रं यदि यागादिसंयुतम् ।
तथापि फलमाप्नोति निन्दधर्मविवर्जितः ॥

२. प्रश्नं—ग० ।

३. बहु अतिशयितं सौख्यम्, सुखमेव सौख्यम्, स्वार्थे ष्यञ् ।

४. नित्यं सार्वकालिकं सौख्यम् । सुखं बहु भवेत्, सदा भवेत्—इति भावः ।

एतासां तारकाणान्तु वारान् शृणु यथाक्रमम् ।
रव्यादिरविवारान्तं ताराणामधिपं शुभम् ॥ १८ ।
अशुभञ्च तथा रुद्र ज्ञात्वा प्रश्नार्थमावदेत् ।
तद्वारनिर्णयं वक्ष्ये पूर्वपङ्केरुहे दले ॥ १९ ।
रवौ राज्यं बालकानां यदि प्रश्नं प्रियं फलम् ।
धर्मार्थलाभमेवं हि त्रयोविंशाधिके नरे ॥ २० ।
संहितं परमानन्दं योगेन तत्त्वचिन्तनम् ।
इत्यादि रविवारस्य वृद्धानामशुभं शुभे ॥ २१ ।
सोमे रत्नमुपैति देवकुसुमामोदेन पूर्णं सुखम्
बालायां नवकन्यकाशुभफलं मुद्रामयार्थं लभेत् ।
कैवल्यार्थविचेष्टनं नृपवधूप्रेमाभिलापः सदा
वाञ्छा पुण्यसुखास्पदेषु विमला भक्तिश्च सोमे दिने ॥ २२ ।
पृथ्वीपुत्रो रुधिरवदनो बालबाली विशेषो
मुख्यं कार्यं दहति सहसा साहसं वासनायाम् ।
हन्ति प्रायो विफलघटितं शोकसन्तानसारं
[1]मोक्षं पुण्यं घटयति सदा मङ्गले भूमिवारे ॥ २३ ।
बुधे वारमुख्ये महापुण्यपुञ्जं[2]
समाप्नोति मर्त्यस्तथा दुर्बलञ्च ।
सदा कालदोषं महाघोरदुःखं
रिपूणां धनीनां महावीर्यदर्पम्[3] ॥ २४ ।
सुराणां देवानां विविधधनलाभं वितरणं
प्रतापं सत्कीर्त्ति क्रतुफलविशेषं विधिगतम् ।
जनानामानन्दं समरवसगतानन्दहृदये
प्रतिष्ठा सद्धर्मं गमयति मुदा वासनगुरौ ॥ २५ ।
मन्दारमालान्वितदेहधारी नाकस्थले गच्छति देवनिष्ठः ।
हरेः पदे भक्तिमुपैति सत्यं प्रसाधनात् शुक्रसुवारकाले ॥ २६ ।

१. मुख्यम्—ख० ।
२. महान्ति यानि पुण्यानि, विद्यादानान्नदानकन्यादानादिजानि तेषां पुञ्जम् ।
३. महान्ति यानि वीर्याणि, तेषां दर्पम् ।

शनैश्चरदिने भयं [1]भुवनदोषमोहान्वितं
क्षितिप्रियसुतप्रियं परमतारकं स्त्रीसुखम् ।
विशिष्टधननीरदं वयसि सिद्धिऋद्धयर्कंजं
भजन्ति यदि मानुषाः सकलकामनादेः प्रभोः ॥ २७ ।

पुनश्चरविवारगं फलमतीव दुःखास्पदं
प्रचण्डकिरणं सदा विकललोकरोगापहम् ।
तमेव परिभावनं परिकरोति यो वा नरो
[2]न नश्यति कदाचन प्रचुरतापशापाकरम् ॥ २८ ।

कलाधरफलं शृणु प्रणवबाह्यसूदमाश्रयं
समग्रखचराफलं फलवतां हि सञ्ज्ञाफलम् ।
गभीरवचनं नृपप्रियकरस्य रक्षाकरं
यदीन्दुभजनं यदा कलिशुभादिशम्भोऽकरोत् ॥ २९ ।

द्वितीयदलमाहात्म्यं नक्षत्रमण्डलावृतम् ।
तत्तत्ताराफलं वक्ष्ये येन प्रश्नार्थनिर्णयः ॥ ३० ।

[3]अश्लेषा बहुदुःखवादनगतं व्यामोहशोभावृतं
नानाभृङ्गनिषेवणं धनवतां हानिः पदे सम्पदे ।
भूपानां परिवर्ज्जनं खलजनैराच्छादितं तापितं
सन्दद्यात् क्षितिजातिभाति नियतं कोलाहले नारके ॥ ३१ ।

मघायां महेशि धनं हन्ति मध्ये
महोल्लासवृद्धिं भयं तस्य शत्रोः ।
क्षितिक्षोभहन्तारमेत्यन्तभावं
कुकामातुराणां सदा सङ्गकारम् ॥ ३२ ।

पूर्वफल्गुनिनक्षत्रे दूरगानां[4] फलं पठेत् ।
अतिधैर्यं शत्रुपक्षे हानयो यान्ति निश्चितम् ॥ ३३ ।

---

१. गुरुजनेषु दोषान्वितम्—ख० । २. लभ्यते—ख० ।
३. आश्लेषा इति पाठ उचितः ।
४. दूरगाणामिति पाठ उचितः, कुमति चेति नित्यं णत्वप्राप्तेः ।

फलमुत्तरफल्गुन्या दीयते गतिरीश्वरी ।
यदि देवपरो नाथ तदा सर्वत्र सुन्दरम् ॥ ३६ ।

हस्तामस्तकक्रीडया शुभविलोकत्रये भाग्यदा
रक्ताङ्गीगतिचञ्चलामलगुणाह्लादेन कल्याणदा ।
सा नित्यं प्रददाति रुक्मशतकं भक्ताय यज्ञार्थिने
नानाव्यञ्जनभोजनैरतिसुखी संज्ञासमूहं ददेत् ॥ ३७ ।

ददाति वित्तं जगतीह चित्रा
मनोरथं व्याकुलतामलङ्कृता ।
कदाचिदेवं हि शरीरदुःखदं
न प्राप्नुयादीश्वरभक्तिमालभेत् ॥ ३८ ।

अश्लेषानाथ शुक्रो विपदमपि कदा नो ददाति प्रदुःखं
दक्षे पत्रे विहारोत्तरभयहराचण्डतापं न हन्ति ।
जीवः श्रीमानमोघाशाधनमपि विविधं ब्राह्मणः पीतवर्णः
पूर्वान्तःफल्गुनीशो विधुतनुजवरो नीलवर्णः [1]स्वपत्रम् ॥३९।

कुरुते बहुसुखवित्तं उत्तरफल्गुनीनाथो मङ्गलेन ।
हस्तायाः पतिश्चन्द्रो विभवमनन्तं चित्रेशो रविः ॥ ४० ।

अधस्तृतीयपत्रस्य नक्षत्राणि शृणु प्रभो ।
यासां वारविशिष्टानां प्रश्ननिष्कर्षसत्फलम्[2] ॥ ४१ ।
स्वातीं रविः पाति महोग्रतेजसा[3]
विनाशकाले विपरीतबुद्धिदः ।
इन्दुर्विशाखां सुखदः सरस्वतीं
भुजोऽनुराधां विपदां प्रबाधाम् ॥ ४२ ।
बुधो हि पायात् सकलार्थसाधिनीं
तथा हि मूलां सुखदाञ्च जीवः ।
तदा धनार्थं प्रददाति शुक्रः
पूर्वान्विताऽऽषाढिकयाऽन्वितः सुखम् ॥ ४३ ।

---

१. सुपुत्रम्—ख० । २. प्रश्नस्य यो निष्कर्षः, सारांशः तस्य सत्फलम् ।
३. महच्च तदुग्रं चेति महोग्रम्, तच्च तत्तेजश्च, तेनत्यर्थः ।

चतुर्थपत्रं वामस्थं महामङ्गलकारणम् ।
अथर्ववेदरूपं तत् सर्वप्रश्नकथावृतम् ॥ ४४ ।
विपरीते महद्दुखं वर्णसौख्येऽपि हानयः ।
भवन्ति तारकाणाञ्च शुभदृष्टया महोदयाः ॥ ४५ ।
तत्तारकानाथगुणं शुभाशुभफलप्रदम् ।
प्रश्नवर्णसमूहानां मतमालोक्य निर्णयम् ॥ ४६ ।
शनिः पात्युत्तराषाढां हानिरूपां विपाकदाम् ।
दुःखदारिद्रचसंयुक्तां देवनिष्ठेन बाधते ॥ ४७ ।
रविः प्रपाति श्रवणां धनादिभिः
प्रधानदेवाश्रयनिर्विकल्पाम् ।
तथा धनिष्ठां फलदां सुधांशुः
कुजो विपत्तिं शतभिग्गणेशः ॥ ४८ ।
पूर्वभाद्रपदानाथो[1] बुधः काञ्चनवर्धनः ।
तथा लोकं महादेवोत्तरभाद्रपदापतिः ॥ ४९ ।
बृहस्पतिः सुखोल्लासं रेवतीशस्तथा भृगुः ।
ददाति परमाह्लादं स्वस्वपत्रस्थराशिभिः ॥ ५० ।
अभिजित्तारकं पाति शनिः श्रीमान् धनप्रदः ।
फलभागं मुदा दातुं शनी राजमृगान्तिके ॥ ५१ ।
तच्चन्द्रोच्चस्थमिति के वदन्ति परमप्रियम् ।
राहुराजा ग्रहाः क्षेत्रे अभिजित् कालवेष्टितः ॥ ५२ ।
तत्कालं सूक्ष्मतद्रूपं यो जानाति महीतले ।
सन्ध्याकालमिति ज्ञेयं शनिराहू सुखान्तयोः ॥ ५३ ।
तत्सन्धिकालमेवं हि सत्त्वगुणमहोदयम् ।
तत्कुम्भकं विजानीयान्मदीयदेहसम्भवम् ॥ ५४ ।
महासूक्ष्मक्षणं तद्धि कुण्डलीमण्डलं यथा ।
तस्याः प्रथमभागे च धारणाख्यः शनिः प्रभुः ॥ ५५ ।

१. पूर्वभाद्रपदाया नाथः, बुधो देवः काञ्चनस्य सुवर्णस्य वर्धनः, वर्धक इत्यर्थः । एवमेव सर्वनक्षत्रेषु स्वामिफलं बोध्यम् ।

स्वयं ब्रह्मा मुदा भाति निरञ्जनकलेवरः ।
तस्याः शेषे रेचनाख्यः संहारविग्रहः शुचिः ॥ ५६ ।
राहुरूपी स्वयं शम्भुः पञ्चतत्त्वविधानवित् ।
कालरूपी महादेवो विकटास्यो[1] भयङ्करः ॥ ५७ ।
सर्वपापानलं हन्ति चन्द्ररूपी सुधाकरः ।
कृष्णवर्णः कालयमः पुण्यापुण्यनिरूपकः ॥ ५८ ।
द्वयोर्मध्ये सूक्ष्मरूपा तडित्कोटिसमप्रभा ।
महासत्त्वाश्रिता देवी विष्णुमायाग्रहाश्रिता ॥ ५९ ।
अभिजित्तारका सूक्ष्मा सन्धिकाललया जया ।
कुम्भकाक्रान्तहृदया ग्रहचक्रपुरोगमा ॥ ६० ।
नक्षत्रमण्डलग्राममध्यस्था तिथिषोडशी ।
असामयी सूक्ष्मकला तरुणानन्दनिर्भरा ॥ ६१ ।
अस्या आद्यभागसंस्थो ब्रह्मरूपी रजोगुणः ।
अस्याः शेषः कालरूपी तमोगुणलयप्रियः ॥ ६२ ।
चन्द्रो ब्रह्मा शिवः सूर्यो महामायातनूत्तरः ।
आत्रेयी परमा शक्तिः सुषुम्नान्तरगामिनी ॥ ६३ ।
मध्यस्था ब्रह्मशिवयोर्विधिशास्त्रस्य सिद्धिदा ।
यैर्ज्ञायते सर्वसंस्था सर्वानन्दहृदि स्थिता ॥ ६४ ।
तैरानन्दफलोपेतैः सत्त्वसम्भोगकारिणी ।
महाविष्णुर्महामाया चन्द्रतारास्वरूपिणी ॥ ६५ ।
मुक्तिदा भोगदा भोग्या शम्भोराद्या महेश्वरी ।
अज्ञानावृतता घोरान्धकारकालसंहारहंसिनी ॥ ६६ ।
मन्दवायुप्रिया यस्य कल्पनार्थे च वीरहा ।
सा पाति जगतां लोकान् तस्याधीनमिदं जगत् ॥ ६७ ।
नाकाले म्रियते कश्चिद् यदि जानाति वायवीम् ।
वायवी परमा शक्तिरिति तन्त्रार्थनिर्णयः ॥ ६८ ।

१. विकटमास्यं मुखं यस्य स इत्यर्थः ।

सूक्ष्मागमनरूपेण सूक्ष्मसिद्धिं ददाति या ।
नराणां भजनार्थाय अष्टैश्वर्यजयाय[1] च ॥ ६९ ।

कथितं ब्रह्मणा पूर्वं शिष्याय तनुजाय च ।
लोभमोहकामक्रोधमदमात्सर्यहाय च ॥ ७० ।

तत्क्रमं परमं प्रीतिवर्धनं भूतले प्रभो ।
आज्ञाचक्रस्य मध्ये तु वायवी परितिष्ठति ॥ ७१ ।

चन्द्रसूर्याग्निरूपा सा धर्माधर्मविवर्जिता ।
[2]मनोरूपा बुद्धिरूपा शरीरं व्याप्यं तिष्ठति ॥ ७२ ।

आज्ञाद्विदलमध्ये तु चतुर्द्दशमुदाहृतम् ।
वेददले वेदवर्णं वादिशान्तं महाप्रभम् ॥ ७३ ।

तदग्निरूपसम्पन्नम् ऋग्वेदादिसमन्वितम् ।
शृणु तद्वेदमाहात्म्यं क्रमशः क्रमशः प्रभो[3] ॥ ७४ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे भावप्रश्नार्थनिर्णये आज्ञाचक्र-सङ्केते वेदप्रकरणे भैरवीभैरवसंवादे चतुर्दशः पटलः ॥

---

१. अष्टौ च तानि ऐश्वर्याणि चेति अष्टैश्वर्याणि, तेषां जयाय, तदुपरि विजयसिद्धये ।

२. मनोरूपं शरीरं हि व्याप्य तिष्ठति खेचरी—ख० ।

३. प्रभो ! इति सम्बोधनान्तः पाठ उचितः ।

अथ पञ्चदशः पटलः

आनन्दभैरवी[1] उवाच—

देवकार्यं वेदशाखापल्लवं [2]प्रणवं परम् ।
वदामि परमानन्दभैरवाह्लादमाशृणु ॥ १ ।
आद्यपत्रे अकारश्च ऋग्वेदं परमाक्षरम् ।
ब्रह्माणं तं विजानीयाद् आद्यवेदार्थनिर्णयम् ॥ २ ।
वेदेन लभ्यते सर्वं वेदाधीनमिदं जगत् ।
वेदमन्त्रविहीनो[3] यः शक्तिविद्यां समभ्यसेत् ॥ ३ ।
स भवेद्धि कथं योगी कौलमार्गपरायणः ।

श्रीआनन्दभैरव उवाच—

ब्रह्मस्तोत्रं हि किं देवि ! ब्रह्मविद्या च कीदृशी ॥ ४ ।
ब्रह्मज्ञानी च को वा स्यात् को वा ब्रह्मशरीरधृक् ।
तत्प्रकारं कुलानन्दकारिणि प्रियकौलिनि ॥ ५ ।
वद शीघ्रं यदि स्नेहदृष्टिश्चेन्मयि सुन्दरि ।

श्रीआनन्दभैरवी उवाच—

तदेव ब्रह्मणः स्तोत्रं वायवीशक्तिसेवनम् ॥ ६ ।
सूक्ष्मरूपेण[4] मग्ना या ब्रह्मविद्या प्रकीर्तिता ।
[5]सदा वायू[6] प्राणरससूक्ष्मोन्मत्तप्रसन्नधीः ॥ ७ ।

---

१. आनन्दभैरव उवाच—ख० । २. देवकार्यात् देवशाखा—ख० ।

३. वेदानां मन्त्रैर्विहीनो रहितः ।

४. ऋग्वेदस्थं परमहंसमण्डलारूढमीश्वरम् ।
वेदवक्त्रं वेदविद्या वेदकायं प्रकाशकम् ॥
श्रुतिकन्या वेदकन्या सुन्दरानन्दमाश्रिता ।
वायुकृष्टशरीरे च प्राणिनां वायवी श्रुतिः ॥ क० अ० पाठः ।

५. पानरससूक्ष्मा प्रसन्नधीः—ख० । ६. वायुप्राण इति समस्तं पदं प्रतिभाति ।

एकान्तभक्तिः श्रीनाथे ब्रह्मविद्या प्रकीर्तिता ।
अष्टाङ्गन्यासनिहतः सूक्ष्मसंचारहृत् शुचिः ॥ ८ ।
[1]सदा विवेकमाकुर्याद् ब्रह्मज्ञानी प्रकीर्तितः ।
ब्रह्मानन्दं हृदि श्रीमान् शक्तिमाधाय वायवीम् ॥ ९ ।
सदा भजति यो ज्ञानी ब्रह्मज्ञानी प्रकीर्तितः ।
विजयारससारेण विना बाह्यासवेन च ॥ १० ।
वायव्यानन्दसंयुक्तो ब्रह्मज्ञानी प्रकीर्तितः ।
सदानन्दरसे मग्नः परिपूर्णकलेवरः ॥ ११ ।
[2]आनन्दाश्रुजलोन्मत्तो ज्ञातो ब्रह्मशरीरधृक् ।
[3]शक्तिः कुण्डलिनी देवी जगन्मातास्वरूपिणी ॥ १२ ।
प्राप्यते यैः सदा भक्तैः [4]मुक्तिरेवागमं फलम् ।
आद्यपत्रे प्रतिष्ठन्ति वर्णजालसमाश्रिताः ॥ १३ ।
वायवीशक्तयः कान्ता ब्रह्माण्डमण्डलस्थिताः ।
राशिनक्षत्रतिथिभिः सर्वदोज्ज्वलनायिकाः[5] ॥ १४ ।
भवानी ब्रह्मशक्तिस्था सा अवश्यमेवमाश्रयेत् ।
मासेन जायते सिद्धिः खेचरी वायुशोषणी ॥ १५ ।
द्विमासे वज्रदेहः स्यात् क्रमेण वर्धयेत् पुमान् ।
द्विमासे कल्पसंयुक्तो यस्य सम्बन्धरूपतः ॥ १६ ।
चैतन्या कुण्डली शक्तिर्वायवी बलतेजसा ।
चैतन्यसिद्धिहेतुस्था ज्ञानमात्रं ददाति सा ॥ १७ ।

---

१. एकान्तभक्तिः श्रीनाथे जीवात्मपरमात्मनि ।
विवेकी विचरेदेको ज्ञातो ब्रह्मशरीरधृक् ॥
वायवीं शक्तिमाश्रित्य सदा ध्यानपरायणः ।
वशी ज्ञानवशाच्छन्नो ज्ञातो ब्रह्मशरीरधृक् ॥

२. विवेकमत् कुर्यातः—ख० ।

३. आनन्दोद्भूतो योऽश्रुजलात्मको रसः, तेन उन्मत्त इति भावः ।

४. सर्वदा जननायिकाः—ख० ।

५. भान्ति ब्रह्मसिद्धये सा—ख० । सर्वदोज्ज्वलनायिका इत्येकवचनान्तः पाठ उचितः ।

ज्ञानमात्रेण मोक्षः स्याद् वायवी ज्ञानमाश्रयेत् ।
महाबली महावाग्मी वर्धते च दिने दिने ।। १८ ।
आयुर्वृद्धिः सदा तस्य जरामृत्युविवर्जितः ।
कुण्डलीकृपया नाथ विना किञ्चिन्न सिद्ध्यति ।। १९ ।

ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो देव वायवी परिकल्पिता ।। २० ।
एते षट्शङ्कराः सर्वसिद्धिदाः चित्तसंस्थिताः ।
सर्वे तिष्ठन्ति [1]पत्राग्रेऽमृतधारारसाप्लुताः ।। २१ ।
अधोमुखाः सूक्ष्मरूपाः कोटिसूर्यसमप्रभाः ।
ब्रह्ममार्गस्थिताः सर्वे सन्ति षट्चक्रमण्डले ।। २२ ।

आज्ञया अध एवं हि चक्रं द्वादशकं स्मरेत् ।
गलितामृतधाराभिराप्लुतं कुण्डलीप्रियम् ।। २३ ।
आग्नेयीं कुण्डलीं मत्त्वा अधोधाराभितर्पणम् ।
प्रकुर्वन्ति परानन्दरसिकाः षट्शिवाः सदा ।। २४ ।
चन्द्रमण्लसञ्जाता जोवरूपधरा यथा ।
आत्मज्ञानसमाशक्ताः शक्तितर्पणतत्पराः ।। २५ ।
द्वितीयदलरूपं हि यजुर्वेदं कुलेश्वर ।
अकस्मात् सिद्धिकरणं विष्णुना परिमीलितम् ।। २६ ।
वज्रकोटिमहाध्वानघोरनादसमाकुलम् ।
हरिमीश्वरमीशानं वासुदेवं सनातनम् ।। २७ ।
सत्त्वाधिष्ठानविनयं चतुर्वर्गफलप्रदम् ।
वाञ्छातिरिक्तदातारं कृष्णं योगेश्वरं प्रभुम् ।। २८ ।
राधिका राकिणी देवी वायवीशक्तिलालितम् ।

महाबलं महावीरं शंखचक्रगदाधरम् ।। २९ ।

पीताम्बरं सारभूतं यौवनामोदशोभितम्[2] ।
श्रुतिकन्यासमाक्रान्तं[3] श्रीविद्याराधिकाप्रभुम् ।। ३० ।

---

१. मन्त्राधिष्ठानविलयम्—ख० । २. यौवनस्यामोदेन सौरभेण शोभितम् ।
३. श्रुतयः एव कन्याः, ताभिः समाक्रान्तम् – व्याप्तम् ।

दैत्यदानवहन्तारं शरीरस्य सुखावहम् ।
भावदं भक्तिनिलयं यदा सागरचन्द्रकम् ।। ३१ ।
गरुडासनसमारूढं मनोरूपं जगन्मयम् ।
यज्ञकर्मविधानज्ञं आज्ञाचक्रोपरि स्थितम् ।। ३२ ।
अधः परामृतरसपानोन्मत्तकलेवरः ।
साधको योगनिरतः स्वाधिष्ठानगतं यथा ।। ३३ ।
तदाकारं विभाव्याशु सिद्धिमाप्नोति शंकर ।
को वैष्णवो वाजिकः को धार्मिको वापि को भुवि ।। ३४ ।
को वा भवति योगी च तन्मे वद सुरेश्वरि ।

आनन्दभैरवो उवाच—

शङ्कर शृणु[1] वक्ष्यामि कालनिर्णयलक्षणम् ।। ३५ ।
वैष्णवानां वैष्णवत्वं आज्ञाचक्रे फलाफलम् ।
आज्ञाचक्रं महाचक्रं यो जानाति महीतले ।। ३६ ।
तस्याऽसाध्यं त्रिभुवने न किञ्चिदपि वर्तते ।
सदा शुचिर्ध्याननिष्ठो मुहुर्जाप्यपरायणः ।। ३७ ।
स्मृतिवेदक्रियायुक्तो विधिश्रुतिमनुप्रियः ।
सर्वत्र[2] समभावो यो वैष्णवः परिकीर्तितः ।। ३८ ।
समता शत्रुमित्रेषु कृष्णभक्तिपरायणः ।
योगशिक्षापरो नित्यं वैष्णवः परिकीर्तितः[3] ।। ३९ ।
यजुर्वेदाभ्यासरतः सदाचारविचारवान् ।
सदा साधुषु संसर्गो वैष्णवः परिकीर्त्तितः ।। ४० ।
त्रिवेकधर्मविद्यार्थी[4] कृष्णे चित्तं निधाय च ।
शिववत् कुरुते कर्म वैष्णवः परिकीर्तितः ।। ४१ ।

---

१. 'शृणु शङ्कर ! वक्ष्यामि' इति पाठ उचितः प्रतिभाति ।
२. ध्यात्वा यः कुरुते कर्म—ख० ।
३. शिवे विष्णौ तुल्यभावं दुर्गामन्त्रपरायणः ।
ध्यात्वा यः कुरुते कर्म वैष्णवः परिकीर्तितः ।। ख० ।
४. विवेकश्च धर्मश्च विद्या च, ता अर्थयते तच्छीलो विवेकधर्मविद्यार्थी इति ।

यज्ञिको ब्राह्मणो धीरो भवः प्रेमाभिलाषवान् ।
वनस्थो घोरविपिने नवीनतरुशोभिते ।। ४२ ।

एकाको कुरुते योगं जीवात्मपरमात्मनोः ।
वाय्वग्नी रेचकः सूर्यः पूरकश्चन्द्रमा तथा ।। ४३ ।

ज्वलच्छिखा सूर्यरूपा न च योजनमेव च ।
पुनः पूरकयागश्च चन्द्रस्य तेजसा हविः ।। ४४ ।

ऊर्द्ध्वविषा[1] ज्वलद्वह्नौ वायवीबलचञ्चले ।
योऽनिश कुरुते होमं मौनी याज्ञिक उच्यते ।। ४५ ।

[2]जीवसूर्याग्निकिरणे आत्मचन्द्राद्यपूरकैः ।
काये यः कुरुते होमं याज्ञिकः परिकोर्त्तितः ।। ४६ ।

सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयम् ।
शक्त्यग्नौ जुहुयान्मांसं याज्ञिकः परिकोर्तितः ।। ४७ ।

विधिवत् कुलकुण्डे च कुलवह्नौ शिवात्मकैः ।
पूर्णहोमं यः करोति याज्ञिकः परिकीर्तितः ।। ४८ ।

भूमण्डले धर्मशीलो निर्जने कामवेश्मनि[3] ।
दृढभक्त्या जीवसारं[4] यो जपेत् स हि धार्मिकः ।। ४९ ।

[5]मणौ लोष्टे समं ध्यानं धर्मेऽधर्मे जयेऽजये ।
कृत्वा त्यागी भवेद्यस्तु ब्रह्मज्ञानी स साधकः[6] ।। ५० ।

सदा ईश्वरचिन्ता च गुरोराज्ञा व्यवस्थितिः ।
सुशीलो [7]दीनबन्धुश्च धार्मिकः परिकीर्तितः ।। ५१ ।

कालज्ञो विधिवेत्ता च [8]अष्टाङ्गयोगविग्रहः ।
पर्वते कन्दरे मौनी भक्तो योगी प्रकीर्तितः ।। ५२ ।

---

१. ऊर्ध्वहविषा इति पाठः प्रतिभाति ।
२. तीव्र–ख० ।
३. कान्त–क० ।
४. बीजसारम्–ख० ।
५. रत्ने–ख० ।
६. स धार्मिकः–ख० ।
७. दीनानां बन्धुः, अथवा दीना बन्धवो यस्य ।
८. अष्टाङ्गोज्ज्वल–क० ।

ब्रह्मज्ञानी चावधूतः [1]पुण्यात्मा सुकृती शुचिः ।
वाञ्छाविहीनो धर्मात्मा स योगी परिकीर्तितः ॥ ५३ ।

वाग्वादिनीकृपापात्रः[2] षडाधारस्य भेदकः ।
ऊर्ध्वरेता स्त्रीविहीनः स योगी परिकीर्तितः ॥ ५४ ।

यजुर्वेदपुरोगामी यजुःपत्रस्थवर्णधृक् ।
वर्णमालाचित्तजापो भावुकः स हि योगिराट् ॥ ५५ ।

मासद्वादशकग्रस्तं राशिद्वादशकान्वितम् ।
तिथिवारन्तु नक्षत्रयुक्तमाज्ञाम्बुजं भजेत् ॥ ५६ ।

दिक्कालदेशप्रश्नार्थं वायवीशक्तिनिर्णयम् ।
बालवृद्धास्तादिदण्डपलनिश्वाससंख्यया ॥ ५७ ।

व्याप्तमाज्ञाचक्रसारं भजेत् परमपावनम् ।
चक्रे सर्वत्र सुखदं सतां हानिर्न च प्रभो ॥ ५८ ।

खलानां विपरीतञ्च निन्दकानां पदे पदे ।
दुःखानि प्रभवन्तीह पापिनाञ्च फलाफलम् ॥ ५९ ।

पापी पञ्चत्वमाप्नोति ज्ञानी याति परं पदम् ।
यः श्वासकालवेत्ता च स ज्ञानी परिकीर्तितः ॥ ६० ।

श्वासकालं न जानाति स पापी परिकीर्तितः ।
यजुर्वेदं सत्त्वगुणं सत्त्वाधिष्ठाननिर्मलम् ॥ ६१ ।

गुरोराज्ञाक्रमेणैव अधस्तत्त्वेन कुण्डलीम् ।
महाशक्तिं समाप्नोति ऊद्‌र्ध्वाधः क्रमयोगतः ॥ ६२ ।

[3]यजुर्वेदमहापात्रसत्त्वाधिष्ठानसेवया[4] ।
ललाटामृतधाराभिश्चैतन्या कुण्डली भवेत् ॥ ६३ ।

---

१. कृतः सिद्धो वशी ।

२. वाग्वादिन्याः कृपा, सैव पात्रं पानसाधनंतृप्तिसाधनं यस्य सः ।

३. पन्ने–क० ।

४. यजुर्वेदो महापात्रसत्त्वं तस्याधिष्ठानं तत्सेवया इति तात्पर्यम् ।

विभाव्य द्विदलं चक्रं होमं कुर्यादहर्निशम् ।
शुद्धाज्यैर्जुहुयान्मन्त्री अधस्तुण्डे कुण्डलीम् ।। ६५ ।

भजन्ति रुद्धेन्द्रि[1]शुद्धयोगं[2]
प्रचण्डरश्मिप्रगताङ्गसुन्दराः ।
आम्बुजं चक्रवरं चतुर्द्दलं
यन्मध्यदेशे शतकोटितेजसम् ।। ६६ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे आज्ञाचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे वेदप्रकरणोल्लासे भैरवभैरवीसंवादे पञ्चदशः पटलः ।।

१. 'रुद्धेन्द्रियशुद्धयोगम्' इति पाठः प्रतिभाति । रुद्धेन्द्रियैः विषयविवर्जितेन्द्रियैः शुद्धो योगो यस्य तम् ।

२. योगिनम्–ख० ।

अथ षोडशः पटलः

आनन्दभैरवो उवाच—

श्रृणुष्वानन्दरुद्रेश तृतीयदललक्षणम् ।
सामवेदमधश्चक्रं तमोगुणनिराकुलम् ।। १ ।

वर्णजालादिनाक्रान्तं रुद्ररूपं महेश्वरम् ।
लयस्थानं कामरूपं परमानन्दमन्दिरम् ।। २ ।

[1]वह्निवृत्तिसुस्थानं विभाव्य योगिराड् भवेत् ।
तत्स्थानं योगिनां धर्मो गुरोराज्ञाफलप्रदम् ।। ३ ।

तत्पदाब्जं श्रीगुरूणां भ्रूमध्ये द्विदलाम्बुजे ।
मुहुर्मुहुः शनैर्ध्यायेत् समीरास्पदभास्वरम् ।। ४ ।

विभाव्य मनसा वाचा कर्मणा सूक्ष्मवायुना ।
लीनं कृत्वा सदा ध्यायेत् सदा हर्षकलेवरः ।। ५ ।

सहस्रारे यथा ध्यानं तद्ध्यानं द्विदलाम्बुजे ।
गुरुमात्मानमीशानं देवदेवं सनातनम् ।। ६ ।

अकस्मात् सिद्धिदातारं योगाऽष्टाङ्गफलप्रदम् ।। ७ ।

नित्यं शब्दमयं [2]प्रमाणविषयं नित्योपमेयं गुरुं
चन्द्रोल्लासतनुप्रभं शतविधूल्लासास्यपङ्केरुहम् ।
सर्वंप्राणगतं गतिस्थमचलं ज्ञानाधिनिर्लेपनं
रूढालास्यगुणालयं लयमयं स्वात्मोपलब्धिं भजे ।। ८ ।

यदि भजेज्जगताममलेश्वरं स्मरहरं गुरुमीश्वरमात्मनि ।
परमसुन्दरचन्द्रसामाकुलं निपतिताद्यकुलानलसञ्चयम्[4]।। ९ ।

---

१. वाङ्निवृत्ति–ख० ।
२. प्रभाविषयगम्–ख० ।
३. कुलानन–ख० ।
४. योगश्चासौ अष्टाङ्गश्च तस्य फलं प्रददाति इति कप्रत्ययान्तोऽयं शब्दः ।

प्रणमतां समतां कुरुते गुरो यदि भवान् विफलं परिहन्ति मे ।
तव पदाम्बुजमद्भुतलीलया परिभजे भवसागरपारगम् ॥१०।

गुरुपदं सितपङ्कजराजितं कनकनूपुरसुन्दरसञ्जनम् ।
रचितचित्रितचारुनखेन्दुकं भुवनभावनपावनमाश्रये ॥११।

सकलसत्फलपालनकोमलं विमलशोणितपङ्कजमण्डितम् ।
पदतलं खलनिग्रहपालनं खचितरत्नधराचलनं भजे ॥१२।

सुकनकाजडितासनपङ्कजे परिभवं भवसागरसम्भवम् ।
यदि कृपा विभवेन्मयि पामरे व्यवतु मां तव पादतलं भजे ॥१३।

परमहंसमनुं [1]हररूपिणं सकलमक्षवशङ्गुरुमीश्वरम् ।
सकललक्षणचन्द्रमसःकरं तरुगुरोर्मुखपङ्कजमाश्रये ॥ १४ ।

गुरोराज्ञाचक्रं भुवनकरणं केवलमयं
सकारं [2]नादेन्दुकुमुदहृदयं कामकलया ।
[3]लयस्थाने वायोर्नवमधुरसमोदमिलिते
दले वेदक्षेत्रे विधुविरहिते तत्र पदके ॥ १५ ।

तमोगुणसमाक्रान्ते अधोमण्डलमण्डिते ।
द्विबिन्दुनिलये स्थाने द्विदले श्रीगुरोः पदम् ॥ १६ ।

महावह्निशिखाकारं तन्मध्ये चिन्तयेत् सुधीः ।
एतद्योगप्रसादेन बीजवाग्भवकूटकैः ॥ १७ ।

चिरजीवी भवेत् क्षुद्रो वागीशत्वमवाप्नुयात् ।
[4]श्रीगुरोश्चरणाम्भोजनिःसृतं यत् परामृतम् ॥ १८ ।

तत्परामृतधाराभिः[5] सन्तर्प्य कुलनायिकाम् ।
पुनः पुनः समाकुञ्च्य[6] प्रवुद्धान्तां स्मरेत् सदा ॥ १९ ।

---

१. तनुरूपिणं—क० । २. कुमुदहृदयाङ्के—ख० ।
३. लयापाङ्गे—ख० । ४. समाकृत्य—क० ।
५. श्रिया सहितो गुरुः, तस्य चरणाम्भोजाद् निःसृतम् ।
६. तच्च तत्परामृतं च तत्परामृतम्, तस्य धाराभिः ।

पर्यायत्त्वापररसं धारयेन्मारुतं सुधीः ।
[1]तत्परामृतधाराभिः सन्तर्प्य कुलनायिकाम् ॥ २० ।

[2]ततः पुनः पुनः पाठ्यं सर्वपुण्यफलं प्रिये ।
धनरत्नमहालक्ष्मीः प्राप्नोति साधकोत्तमः ॥ २१ ।

सर्वत्र जयमाप्नोति युद्धे क्रोधे महाभये ।
महायुधि स्थितो याति सुशीलो मोक्षमाप्नुयात् ॥ २२ ।

इति ते कथितं नाथ ब्रह्मज्ञानमनुत्तमम् ।
आज्ञाचक्रत्रिखण्डस्य दलस्य कामरूपतः ॥ २३ ।

सत्फलं समवाप्नोति विचार्य भावयेद्यदि ।
आज्ञाचक्रे त्रिखण्डे च कामरूपं महेश्वरम् ॥ २४ ।

[3]चीनाचारसमाक्रान्तं श्मशानाधिपवेष्टितम् ।
कालं कालकरं चक्रं महाकालं कलानिधिम् ।
पलानुपलविपलद्दण्डतिथ्यातिपदपक्षकैः ॥ २५ ।

मासवत्सरादियुगैर्महाकालैः समन्वितम् ।
उल्काकोटिसमं नेत्रं तीक्ष्णदंष्ट्रं सुरेश्वरम् ॥ २६ ।

कोटिकोटिनेत्रजालशोभिताननपङ्कजम् ।
चिद्रूपं सदसन्मुक्तिरूपिणं बहुरूपिणम् ॥ २७ ।

---

१. एतत् स्तोत्रं ततः पाठ्यं सर्वपुण्यफलाप्तये—क० ।

२. तत्परामृतमित्यतः प्रिये पर्यन्तम्—क० ।

३. महारुद्रं धर्मलिङ्गं सर्वधर्मवहिष्कृतम् ।
अधर्मध्वान्तमिहिरं कोटिकोटिविधूद्भवम् ॥
विद्यारमणकामेशं हेमवाराणसीपुरम् ।
शुद्धकामकलाचिह्नं कोटिकोटिकलेवरम् ॥
सामवेदमहामन्त्रमूलास्यानुगतं शिवम् ।
कामलिङ्गं बिन्दुलिङ्गं विसर्गपदभूषणम् ॥
परशिवं देवदेवं हाकिनीशक्तिमुक्तिदम् ।
कुलचूडामणिं सिद्धं बुद्धरूपिणमीश्वरम् ॥

ध्यात्वा त्वतिसुखेनैव कालरुद्रं परेश्वरम् ।
नासिकोद्‌र्ध्वे भ्रुवोर्मध्ये आज्ञाचक्रे महाप्रभो ।। २८ ।
विभाव्य परमं स्थानं तत्क्षणात्तन्मयो भवेत् ।
हाकिनीं भावयेन्मन्त्री रौरवादिविनाशिनीम् ।। २९ ।
कोटिसौदामिनीभासाममृतानन्दविग्रहाम् ।
[1]अमातत्त्वपूर्णशोभां हेमवाराणसीस्थिताम् ।। ३० ।
नानालङ्कारशोभाङ्गीं नवयौवनशालिनीम् ।
[2]पीनस्तनीं बलोन्मत्तां सर्वाधारस्वरूपिणीम् ।। ३१ ।
दीर्घप्रणवजापेन[3] तोषयन्तीं त्रिविक्रमम् ।
मौनां मनोमयीं देवीं सर्वविद्यास्वरूपिणीम् ।। ३२ ।
महाकालीं महानीलां पीतवर्णां शशिप्रभाम् ।
त्रिपुरां सुन्दरीं वामां वामकामदुघां[4] शिवाम् ।। ३३ ।
ध्यायेदेकासने वामे परनाथस्य पावनीम् ।
सर्वाधारात्मिकां शक्तिं दुर्निवार्यां दुरत्ययाम् ।। ३४ ।
श्वासमात्रेण वसयेत् कुलमार्गं न पण्डितः ।
कुलाकुलविभागेन आत्मानं नीयते परे ।। ३५ ।
श्वासाभ्यासं विना नाथ अष्टाङ्गाभ्यसनेन च ।
विना दमेन धैर्येण कुलमार्गो न सिद्ध्यति ।। ३६ ।
तथा पूरकयोगेन[5] रेचकेनापि तिष्ठति ।
विना कुम्भकसत्त्वेन यथैतौ नापि तिष्ठतः ।। ३७ ।
तथा योगं विना नाथ अष्टाङ्गाभ्यसनं विना ।
कुलमार्गो महातत्त्वो न सिद्ध्यति कदाचन ।। ३८ ।

---

१. अयुतेन्दु–ख० ।
२. नवीन यौवनोन्मत्ताम्–क० ।
३. कामहराम्–क० ।
४. प्रणवस्य जापः, प्रणवजापः, दीर्घश्चासौ प्रणवजापश्चेति भावः ।
५. 'पूरकयोगेण' इत्युचितः पाठः, कुमति चेति नित्यं णत्वप्राप्तिः, अथवा युवादेर्न इति वार्तिकेन णत्वनिषेधः ।

कुलमार्गं विना मोक्षं कः प्राप्नोति महीतले ।
कुलमार्गं न जानाति योगवाक्यागमाकुलम् ॥ ३९ ।
स कथं पूजयेद्देवीं तस्य योगः कृतः प्रभो ।
[1]अज्ञात्वा वीरनाथमाचारं यः करोति हि ॥ ४० ।
[2]तेषां बहुदिने योगशिक्षा भवति निश्चितम् ।
प्राणायामं महाधर्मं वेदानामप्यगोचरम् ॥ ४१ ।
सर्वपुण्यस्य सारं हि पापराशितुलानलम्[3] ।
महापातककोटीनां तत्कोटीनाञ्च दुष्कृतम् ॥ ४२ ।
पूर्वजन्मार्जितं पापं नानादुष्कर्मपातकम् ।
नश्यत्येव महादेव षण्मासाभ्यासयोगतः ॥ ४३ ।
सन्ध्याकाले प्रभाते च यः करोत्यप्यहर्निशम् ।
वशी षोडशसंख्याभिः प्राणायामान् पुनः पुनः ॥ ४४ ।
संवत्सरं वशी ध्यात्वा खेचरो योगिराड् भवेत् ।
योगी भूत्वा कौलमार्गं समाश्रित्यामरो भवेत् ॥ ४५ ।
महाविद्यापतिर्भूत्वा विचारात् साधकोत्तमः ॥ ४६ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थबोधनिर्णये पाशवकल्पे आज्ञाचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे षोडशः पटलः ॥

---

१. योगाभ्यासं सदा कुर्यात् कुलमार्गप्रसिद्धये ।
आदौ भूत्वा महायोगी कुलीनः प्रभवेत् ततः ॥
आदौ कुलाचारभावं यः करोति नराधमः ।
योगाभ्यासं विहायापि स भवेत् ब्रह्मराक्षसः ॥ क० ।

२. वज्रानले–ख० ।

३. पापराशिः तुलः, तूलः तयानलमिव अग्निरिव । अथ तुलशब्दे ह्रस्व-उकारश्छन्दोऽनुरोधात् ।

अथ सप्तदशः पटलः

आनन्दभैरवी उवाच—

अथ वक्ष्ये महादेव अथर्ववेदलक्षणम् ।
सर्ववर्णस्य सारं हि शक्त्याचारसमन्वितम् ।। १ ।
अथर्ववेदादुत्पन्नं सामवेदं तमोगुणम् ।
सामवेदाद्यजुर्वेदं महासत्त्वसमुद्भवम् ।। २ ।
रजोगुणमयं ब्रह्मा ऋग्वेदं यजुषः स्थितम् ।
[1]मृणालसूत्रसदृशी[2] अथर्ववेदरूपिणी ।। ३ ।
अथर्वे सर्ववेदाश्च जलखेचरभूचराः ।
निवसन्ति महा विद्या[3] कुलविद्या महर्षयः ।। ४ ।
समाप्तिपत्रशेषार्थं समीपं लोकमण्डले ।
शक्तिचक्रसमाक्रान्तं दिव्यभावात्मकं शुभम् ।। ५ ।
तत्रैव वीरभावञ्च तत्रैव पशुभावकम् ।
सर्वभावात् परं तत्त्वमथर्वं वेदपत्रकम् ।। ६ ।
द्विबिन्दुनिलयस्थानं ब्रह्मविष्णुशिवात्मकम् ।
चतुर्वेदान्वित तत्त्वं शरीरं दृढनिर्मितम् ।। ७ ।
चतुर्विंशतितत्त्वानि सन्ति गात्रे मनोहरे ।
ब्रह्मा रजोगुणाक्रान्तः पूरकेणाभिरक्षति ।। ८ ।
विष्णुः सत्त्वगुणाक्रान्तः[4] कुम्भकैः स्थिरभावनैः ।
हरस्तमोगुणाक्रान्तो रेचकेणापि विग्रहम् ।। ९ ।
अथर्ववेदचक्रस्था कुण्डली परदेवता ।
एतन्माया तु यो नैव ब्रह्मविष्णुशिवेन च ।। १० ।

---

१. शूकसूत्रसदृशी–क० ।
२. विद्या–क० ख० ।
३. मृणालसूत्रेण कमलतन्तुना सदृशी ।
४. सत्त्वगुणैराक्रान्तः ।

शरीरं देवनिलयं भक्तं ज्ञात्वा प्रवक्ष्यति ।
सर्ववेदमयी देवी सर्वमन्त्रस्वरूपिणी ॥ ११ ॥
सर्वयन्त्रात्मिका विद्या वेदविद्याप्रकाशिनी ।
चैतन्या सर्वधर्मज्ञा स्वधर्मस्थानवासिनी ॥ १२ ॥
अचैतन्या ज्ञानरूपा हेमचम्पकमालिनी ।
अकलङ्का निराधारा शुद्धज्ञानमनोजवा ॥ १३ ॥
सर्वसङ्कटहन्त्री च सा शरीरं प्रपाति हि ।
तस्याः कार्यमिदं विश्वं तस्याः पुण्यानि हन्ति हि ॥ १४ ॥
तस्याश्चैतन्यकरणे सदा व्याकुलचेतसः ।
महात्मानः प्रसिद्ध्यन्ति यदि कुर्वन्ति चेतनाम् ॥ १५ ॥
तस्या अनुग्रहादेव किं न [1]सिद्ध्यति भूतले ।
षण्मासाभ्यासयोगेन चैतन्या कुण्डली भवेत् ॥ १६ ॥
सा देवी वायवी शक्तिः परमाकाशवाहिनी ।
तारिणी वेदमाता च बहिर्याति दिने दिने ॥ १७ ॥
द्वादशाङ्गुलमानेन आयुः क्षरति नित्यशः ।
द्वादशाङ्गुलवायुश्च क्षयं कुर्याद्दिने दिने ॥ १८ ॥
यावद् यावद् बहिर्याति कुण्डली परदेवता ।
तावत्तावत्खण्डलयं भवेद्धि पापमोक्षणम् ॥ १९ ॥
यदा यदा न क्षरति वायवी सूक्ष्मरूपिणी ।
बाह्यचन्द्रे महादेव आग्नेयी सोममण्डले ॥ २० ॥
मूलाधारे कामरूपे ज्वलन्ती चण्डिका शिखा ।
यदा शिरोमण्डले च सहस्रदलपङ्कजे ॥ २१ ॥
तेजोमयी सदा याति शिवं कामेश्वरं प्रभुम् ।
अच्युताख्यं महादेवं तदा ज्ञानी स योगिराट् ॥ २२ ॥
यदि क्षरति सा देवी बाह्यचन्द्रे मनोलये ।
तदा योगं समाकुर्यात् यावत् शीर्षेण[2] गच्छति ॥ २३ ॥

---

१. किं न सिद्ध्यति, सर्वं सिध्यति इति तात्पर्यम् ।
२. वैदिकोऽयं शब्दः क्वचिल्लोकेऽपि ।

यदि शीर्षे समागम्यामृतपानं करोति सा ।
वायवी सूक्ष्मदेहस्था सूक्ष्मालयप्रिया सती ।। २४ ।
[1]तदेव परमा सिद्धिर्भक्तिमार्गो न संशयः ।
चतुर्वेदज्ञानसारं अथर्वं परिकीर्तितम् ।। २५ ।
अथर्ववेदविद्या च देवता वायवी मता ।
तस्याः सेवनमात्रेण रुद्ररूपो भवेन्नरः ।। २६ ।
केवलं कुम्भकस्था सा एका ब्रह्मप्रकाशिनी ।

भैरव उवाच—

केन वा वायवी शक्तिः[2] कृपा भवति पार्वति ।। २७ ।
स्थिरचेता भवेत् केन विवेकी वा कथं भवेत् ।
मन्त्रसिद्धिर्भवेत् केन कायसिद्धिः कथं भवेत् ।। २८ ।
विस्तार्य वद चामुण्डे आनन्दभैरवेश्वरी ।

आनन्दभैरवी उवाच—

शृणुष्वैकमनाः शम्भो मम प्राणकुलेश्वर ।। २९ ।
एकवाक्येन सकलं कथयामि समासतः ।
श्रद्धया परया भक्त्या मनोनियमतत्परः ।। ३० ।
स प्राप्नोति पराशक्तिं वायवीं [3]सूक्ष्मरूपिणीम् ।
धैर्यक्षमामिताहारी[4] शान्तियुक्तो यतिर्महान् ।। ३१ ।
सत्यवादी ब्रह्मचारी दयाधर्मसुखोदयः ।
मनसः संयमज्ञानी दिगम्बरकलेवरः ।। ३२ ।
सर्वत्र समबुद्धिश्च परमार्थविचारवित् ।
शरशय्या भूमितले वायवीं परमामृतम् ।। ३३ ।

---

१. रूपिणी—ग० । २. आनन्दभैरव—ग० ।
३. गामिनीम्—ग० ।
४. केन हेतुना या वायवी शक्तिः तन्त्रशास्त्रप्रसिद्धा, तस्याः कृपा भवति, पार्वति ! इति सम्बोधनम् ।

य एवं पिबति क्षिप्रं तत्रैव वायवी कृपा ।
गुरुसेवापरे धीरे[1] शुद्धसत्त्वतनुप्रभे ।। ३४ ।
भक्ते अष्टाङ्गनिरते वायवी सुकृपा भवेत् ।
अतिथिं भोजयेद्यस्तु न भुक्ता स्वयमेव च । ३५ ।।
सर्वपापविनिर्मुक्तो वायवी सुकृपा ततः ।
अन्तरात्मा महात्मा यः कुरुते वायुधारणम् ।। ३६ ।
देवगुरौ सत्यबुद्धिर्वायवी सुकृपा ततः ।
एककालो वृथा याति नैव यस्य महेश्वर ।। ३७ ।
वायव्यां चित्तमादाय तत्रानिलकृपा भवेत् ।
विचरन्ति महीमध्ये योगशिक्षानिबन्धनम् ।। ३८ ।
प्राणायामेच्छुको यो वा वायवी सुकृपा ततः ।
प्रतिवत्सरमानेन पीठे पीठे वसन्ति ये ।। ३९ ।
वायवीं प्रजपन्तीह वायवी सुकृपा ततः ।
अल्पाहारी निरोगी च विजयानन्दनन्दितः ।। ४० ।
वायवीं भजतो योगी वायवी सुकृपा भवेत् ।
अन्तर्यागे पीठचक्रे चित्तमाधाय यत्नतः ।। ४१ ।
नामनिष्ठो धारणाख्यो वायवी सुकृपा ततः ।
पशुभावसमाक्रान्तः सदा रेतोविवर्जितः ।। ४२ ।
शुक्रमैथुनहीनश्च वायवी सुकृपा ततः ।
अकालेऽपि सकालेऽपि नित्यं धारणतत्परः ।। ४३ ।
योगिनामपि सङ्गी यो वायवी सुकृपा ततः ।
बन्धुवान्धवहीनश्च विवेकाक्रान्तमानसः ।। ४४ ।
[2]शोकाशोकसमं भावं वायवी सुकृपा ततः ।
सर्वदानन्दहृदयः कालज्ञो भौतसाधनः ।। ४५ ।

१. परमाणु-ग० ।
२. शोकः, अशोकः शोकाभावः, उभाभ्यां समं भावमधिगच्छति वायवीकृपया इति भावः ।

मौनधारणजापश्च वायवी सुकृपा ततः ।
[1]निर्जनस्थाननिरतो निश्चेष्टो दीनवत्सलः ॥ ४६ ।

बहुजल्पनशून्यश्च स्थिरचेताः प्रकीर्तितः ।
हास्यसन्तोषहिंसादिरहितः[2] पीठपारगः ॥ ४७ ।

योगशिक्षासमाप्त्यर्थी स्थिरचेताः प्रकीर्तितः ।
मत्कुलागमभावज्ञो महाविद्यादिमन्त्रवित् ॥ ४८ ।

शुद्धभक्तियुतः शान्तः स्थिरचेताः प्रकीर्तितः ।
मूलाधारे कामरूपे हृदि जालन्धरे तथा ॥ ४९ ।

ललाटे पूर्णगिर्याख्ये उड्डीयाने तदूर्ध्वके ।
वाराणस्यां भ्रुवोर्मध्ये ज्वलन्त्यां लोचनत्रये ॥ ५० ।

मायावत्यां सुखवृत्ते कण्ठे चाष्टपुरे तथा ।
अयोध्यायां नाभिदेशे कट्यां काञ्च्यां महेश्वर ॥ ५१ ।

पीठेष्वेतेषु भूलोके चित्तमाधाय यत्नतः ।
उदरे पूरयेद् वायुं सूक्ष्मसङ्केतभाषया ॥ ५२ ।

पादाङ्गुष्ठे च जङ्घायां जानुयुग्मे च मूलके ।
चतुर्दले षड्दले च तथा दशदले तथा ॥ ५३ ।

दले द्वादशके चैव सिद्धिसिद्धान्तनिर्मले[3] ।
कण्ठे षोडशपत्रे च द्विदले पूर्णतेजसि ॥ ५४ ।

कैलासाख्ये [4]ब्रह्मरन्ध्रपदे निर्मलतेजसि ।
सहस्रारे महापद्मे कोटिकोटिविधुप्रभे ॥ ५५ ।

चालयित्वा महावायुं कुम्भयित्वा पुनः पुनः ।
पूरयित्वा रेचयित्वा रोमकूपाद्विनिर्गतम् ॥ ५६ ।

---

१. सर्वशास्त्रार्थवेत्ता च विधिवेत्ता च धार्मिकः ।
सूक्ष्मवायुप्रसादज्ञो वायवी सुकृपा ततः ॥
सहसा बहु इष्टज्ञो निन्दाधर्मविवर्जितः ।
शिल्पकर्माभिमानी यो वायवी सुकृपा ततः ॥ इति क० अ० पु० पाठः ।

२. हास्यसन्तोषहिंसादिभिः रहितः, तृतीयातत्पुरुषः ।

३. सिद्धिसिद्धान्ताभ्यां निर्मले । ४. लोकमुखात्-ग० ।

तिस्रः कोटयर्धकोटि च यानि लोमानि मानुषे ।
नाडीमुखानि सर्वाणि धर्मबिन्दुं च्यवन्ति हि ॥ ५७ ।

यावत्तद्विन्दुपातश्च तावत्कालं लयं[1] स्मृतम् ।
तावत्कालं प्राणयोगात् प्रस्वेदाधमसिद्धिदम् ॥ ५८ ।

सूक्ष्मवायुसेवया च किन्न सिद्धयति भूतले ।
लोमकूपे मनो दद्यात् लयस्थाने मनोरमे ॥ ५९ ।

स्थिरचेता भवेत् शीघ्रं नात्र कार्या विचारणा ।
वायुसेवां विना नाथ कथं सिद्धिर्भवेद्ध्रुवे ॥ ६० ।

स्थिरचित्तं विना नाथ मध्यमापि न जायते ।
स्थाने स्थाने मनो दत्वा वायुना कुम्भकेन च ॥ ६१ ।

धारयेन्मारुतं मन्त्री कालज्ञानी दिवानिशम् ।
एकान्तनिर्जने स्थित्वा स्थिरचेता भवेद् ध्रुवम् ॥ ६२ ।

स्थिरचित्तं विना शम्भो सिद्धिः स्यादुत्तमा कथम् ॥ ६३ ।

निवार्य पञ्चेन्द्रियसञ्ज्ञकानि
यत्नेन धैर्यायतिरीश्वरस्त्वम् ।
प्राप्नोति मासत्रयसाधनेन
विषासवं भोक्तुमसौ समर्थः ॥ ६४ ।

मासत्रयाभ्याससुसञ्चयेन
स्थिरेन्द्रियः स्यादधमादिसिद्धिः ।
सा खेचरी सिद्धिरत्र प्रबुद्धा
चतुर्थये मासे तु भवेद्विकल्पनम् ॥ ६५ ।

तदाधिकारी पवनाशनोऽसौ
स्थिरासनानन्दसुचेतसा भुवि ।
प्रकल्पने सिद्धि यथार्थगामिनी-
मुपैति शीघ्रं वरवीरभावम् ॥ ६६ ।

---

१. लयमिति लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नियमेन नपुंसकता, अन्यथा 'घञजपाः पुंसि' इति सूत्रेणाच्प्रत्ययान्ततया पुंल्लिङ्गता स्यात् ।

सा वयवी शक्तिरनन्तरूपिणी
लोभावलीनां कुहरे महासुखम् ।
ददाति सौख्यं गतिचञ्चलं जयं
स्थिराशयत्वं सति शास्त्रकोविदम् ।। ६७ ।

षण्मासयोगासननिष्ठदेहा[1]
वायुश्रमानन्दरसाप्तविग्रहः ।
विहाय कल्पान्वितयोगभावं
श्रुत्यागमान् कर्तुमसौ समर्थः ।। ६८ ।

स्थिरचेता महासिद्धिं प्राप्नोति नात्र संशयः ।
संवत्सरकृताभ्यासे महाखेचरतां व्रजेत् ।। ६९ ।

यावन्निर्गच्छति प्रीता वायवी शक्तिरुत्तमा ।
नासाग्रमववार्यैव स्थिरचेता महामतिः ।। ७० ।

चण्डवेगा यदा क्षिप्रमन्तरालं न गच्छति ।
सर्वत्रगामी स भवेत् तावत्कालं विचक्षणः ।। ७१ ।

यदि शीर्षादूर्ध्वदेशे द्वादशाङ्गुलकोपरि ।
गन्तुं समर्थो भगवान् शिवतुल्यो गणेश्वरः ।। ७२ ।

सर्वत्रगामी प्रभवेत् खेचरो योगिराड् वशी ।
इति सिद्धिर्वत्सरे स्यात् स्थिरचित्तेन शङ्कर ।। ७३ ।

योगी भूत्वा मनःस्थैर्यं न करोति यदा भुवि ।
कृच्छ्रेण पदमारुह्य प्रपतेन्नारकी यथा ।। ७४ ।

अत एव महाकाल स्थिरचेता भव प्रभो ।
तदा मां प्राप्स्यसि क्षिप्रं वायवीमष्टसिद्धिदाम्[2] ।। ७५ ।

यदि सिद्धो भवेद् भूमौ वायवीसुकृपादिभिः ।
सदा कामस्थिरो भूत्वा गोपयेन्मातृजारवत्[3] ।। ७६ ।

---

१. सर्वत्रगामिनो भावात्–ग० । २. अष्टौ सिद्धयोऽष्टसिद्धयस्ता ददाति या सा ताम् ।
३. मातुः जारो यथा गोपनीयो भवति, तद्वत् ।

यदा यदा महादेव योगाभ्यासं करोति यः ।
शिष्येभ्योऽपि सुतेभ्योऽपि दत्वा कार्यं करोति यः ॥ ७७ ।

तदैव स महासिद्धिं प्राप्नोति नात्र संशयः ।
संवत्सरं चरेद्धर्मं योगमार्गं हि दुर्गमम् ॥ ७८ ।

प्रकाशयेन्न कदापि कृत्वा मृत्युमवाप्नुयात् ।
योगयोगाद् भवेन्मोक्षो मन्त्रसिद्धिरखण्डिता ॥ ७९ ।

न प्रकाश्यमतो योगं भुक्तिमुक्तिफलाय च ।
नित्यं सुखं महाधर्मं प्राप्नोति वत्सराद् बहिः ॥ ८० ।

आत्मसुखं नित्यसुखं मन्त्रं यन्त्रं तथागमम् ।
प्रकाशयेन्न कदापि कुलमार्गं कुलेश्वर ॥ ८१ ।

यद्येवं कुरुते धर्मं तदा मरणमाप्नुयात् ।
योगभ्रष्टो विज्ञानज्ञोऽजडो मृत्युमवाप्नुयात् ॥ ८२ ।

येन मृत्युवशो याति तत्कार्यं नापि दर्शयेत् ।
दत्तात्रेयो महायोगी शुको नारद एव च ॥ ८३ ।

येन कृतं सिद्धिमन्त्रं वर्णजालं कुलार्णवम् ।
एकेन लोकनाथेन योगमार्गपरेण च ॥ ८४ ।

तथा मङ्गलकार्येण ध्यानेन साधकोत्तमः[1] ।
उत्तमां सिद्धिमाप्नोति वत्सराद् योगशासनात् ॥ ८५ ।

आदौ वै ब्रह्मणो ध्यानं पूरकाष्टाङ्गलक्षणैः ।
कुर्यात् सकलसिद्ध्यर्थमम्बिकापूजनेन च ॥ ८६ ।

ऋग्वेदं चेतसि ध्यात्वा मूलाधारे चतुर्दले ।
वायुना चन्द्ररूपेण धारयेन्मारुतं सुधीः ॥ ८७ ।

अथर्वान्निर्गतं सर्वं ऋग्वेदादि चराचरम् ।
तेन पूर्णचन्द्रमसा जीवेनार्यामृतेन च ॥ ८८ ।

जुहुयादेकभावेन कुण्डलीसूर्यगोऽनले ।
कुम्भकं कारयेन्मन्त्री यजुर्वेदपुरःसरम् ॥ ८९ ।

---

१. साधकेषु उत्तमः, सुप्सुपेति समासः ।

सर्वंसत्त्वाधिष्ठितं तत् सर्वविज्ञानमुत्तमम् ।
वायव्याः पूर्णसंस्थानं योगिनामभिधायकम् ॥ ९० ।

पुनः पुनः कुम्भयित्वा सत्त्वे निर्मलतेजसि ।
महाप्रलयसारज्ञो[1] भवतीति न संशयः ॥ ९१ ।

रेचकं शम्भुना व्याप्तं तमोगुणमनोलयम्[2] ।
सर्वमृत्युकुलस्थानं व्याप्तं धर्मफलाफलैः ॥ ९२ ।

पुनः पुनः क्षोभनिष्ठो रेचकेन निवर्तते ।
रेचकेन लयं याति रेचनेन परं पदम् ॥ ९३ ।

प्राप्नोति साधकश्रेष्ठो रेचकेनापि सिद्धिभाक् ।
रेचकं वह्निरूपञ्च कोटिवह्निशिखोज्ज्वलम् ॥ ९४ ।

द्वादशाङ्गुलमध्यस्थं ध्यात्वा बाह्ये[3] लयं दिशेत् ।
चन्द्रव्याप्तं सर्वलोकं सर्वपुण्यसमुद्भवम् ॥ ९५ ।

रेचकाग्निर्दहतीह वायुसख्यो महाबली ।
तत् शशाङ्कजीवरूपं पीत्वा जीवति वायवी ॥ ९६ ।

आग्नेयी दह्यति क्षिप्रं एष होमः परो मतः ।
एतत् कार्यं यः करोति स न मृत्युवशो भवेत् ॥ ९७ ।

एतयोः सन्धिकालञ्च कुम्भकं तत्त्वसाधनम् ।
तदेव भावकानाञ्च परमस्थानमेव च ॥ ९८ ।

महाकुम्भकलाकृत्या स्थिरं स्थित्त्वा च कुम्भके ।
अथर्वगामिनीं देवीं भावयेदमरो महान् ॥ ९९ ।

अनन्तभावनं शम्भोरशेषसृष्टिशोभितम् ।
अथर्वं भावयेन्मन्त्री शक्तिचक्रक्रमेण तु ॥ १०० ।

आज्ञाचक्रे वेददले चतुर्दलसुमन्दिरे ।
अथर्वयोगिनीं ध्यायेत् समाधिस्थेन चेतसा ॥ १०१ ।

---

१. महाप्रलयस्य सारं जानाति ।

२. तमोगुणविशिष्टस्य मनसो लयो यस्मिन् रेचके, तत् । ३. राज्ये-ग० ।

ततोऽच्युताख्यं जगतामीश्वरं शीर्षपङ्कजे ।
प्रपश्यति जगन्नाथं नित्यसूक्ष्मसुखोदयम्[1] ॥ १०२ ।
आज्ञाचक्रे शोधनमशेषदलमथवं परिकीर्तितम् ।
ज्योतिश्चक्रे तन्मध्ये योगमार्गेण सद्विलम् ॥ १०३ ।
प्रपश्यति महाज्ञानी बाह्यदृष्टया यथाम्बुजम् ।
कालेन सिद्धिमाप्नोति ब्रह्मज्ञानी च साधकः ॥ १०४ ।
ततो भजेत् कौलमार्गं ततो विद्यां प्रपश्यति ।
महाविद्यां कोटिसूर्यज्वालामालासमाकुलम् ॥ १०५ ।
एतत्तत्त्वं विना नाथ न पश्यति कदाचन ।
वसिष्ठो ब्रह्मपुत्रोऽपि चिरकालं सुसाधनम् ॥ १०६ ।
चकार निर्जने देशे कृच्छ्रेण तपसा वशी ।
शतसहस्रं वत्सरं च व्याप्य योगादिसाधनम् ॥ १०७ ।
तथापि साक्षाद्विज्ञानं न बभूव महीतले ।
ततो जगाम क्रुद्धोऽसौ तातस्य निकटे प्रभुः ॥ १०८ ।
सर्वं तत् कथयामास स्वीयाचारक्रमं प्रभो ।
अन्यमन्त्रं देहि नाथ एषा विद्या न सिद्धिदा ॥ १०९ ।
अन्यथा सुदृढं शापं तवाग्रे प्रददामि हि ।
ततस्तं वारयामास एवं न कुरु भो सुत ॥ ११० ।
पुनस्तां भज भावेन योगमार्गेण पण्डित ।
ततः सा वरदा भूत्वा आगमिष्यति तेऽग्रतः ॥ १११ ॥
सा देवी परमा शक्तिः सर्वसङ्कटतारिणी ।
कोटिसूर्यप्रभा नीला चन्द्रकोटिसुशीतला ॥ ११२ ।
स्थिरविद्युल्लताकोटिसदृशी कालकामिनी ।
[2]सा पाति जगतां लोकान् तस्याः कर्म चराचरम् ॥ ११३ ।

---

१. नित्यं सूक्ष्मसुखोदयो यस्मिन्, तं जगन्नाथमित्यर्थः ।
२. सर्वस्वरूपा सर्वाख्या धर्माधर्मविवर्जिता ।
शुद्धचीनाचारता शक्तिचक्रप्रवर्तिका ॥

भज पुत्र स्थिरानन्द कथं शप्तुं समुद्यतः ।
एकान्तचेतसा नित्यं भज पुत्र दयानिधे ॥ ११४ ॥
तस्या दर्शनमेवं हि अवश्यं समवाप्स्यसि ।
एतत् श्रुत्वा गुरोर्वाक्यं प्रणम्य च पुनः पुनः ॥ ११५ ॥
जगाम जलधेस्तीरे वशी वेदान्तवित् शुचिः ।
सहस्रवत्सरं सम्यक् जजाप परमं जपम् ॥ ११६ ॥
आदेशोऽपि न बभूव ततः क्रोधपरो मुनिः ।
व्याकुलात्मा महाविद्यां वसिष्ठः शप्तुमुद्यतः ॥ ११७ ॥
द्विराचम्य महाशापः प्रदत्तश्च सुदारुणः ।
तेनैव मुनिना नाथ मुनेरग्रे कुलेश्वरी ॥ ११८ ॥
आजगाम महाविद्या योगिनामभयप्रदा ।
अकारणमरे विप्र शापो दत्तः सुदारुणः ॥ ११९ ॥
मम सेवां न जानाति मत्कुलागमचिन्तनम्[१] ।
कथं योगाभ्यासवशात् मत्पदाम्भोजदर्शनम् ॥ १२० ॥
प्राप्नोति मानुषो देवे मनध्यानमदुःखदम् ।
यः कुलार्थी सिद्धमन्त्री मद्वेदाचारनिर्मलः ॥ १२१ ॥
ममैव साधनं पुण्यं वेदानामप्यगोचरम् ।
बौद्धदेशेऽथर्ववेदे महाचीने तदा व्रज ॥ १२२ ॥
तत्र गत्वा महाभावं विलोक्य मत्पदाम्बुजम् ।
मत्कुलज्ञो महर्षे त्वं महासिद्धो भविष्यसि ॥ १२३ ॥
एतद्वाक्यं कथयित्वा सा वायव्याकाशवाहिनी ।
निराकाराऽभवत् शीघ्रं ततः साकाशवाहिनी ॥ १२४ ॥
ततो मुनिवरः श्रुत्वा महाविद्यां सरस्वतीम् ।
जगाम चीनभूमौ च यत्र बुद्धः प्रतिष्ठति ॥ १२५ ॥

अनन्तानन्तमहिमा संसारावर्तनाशिनी ।
बुद्धेश्वरी बुद्धमाता अर्भकवेदश्लाधिनी ॥ क० ।

१. मत्कुलस्य आगमस्तस्य चिन्तनं ध्यावम् ।

पुनः पुनः प्रणम्यासौ वसिष्ठः क्षितिमण्डले ।
रक्ष रक्ष महादेव सूक्ष्मरूपधराव्यय ।। १२६ ।
अतिदीनं वसिष्ठं मां सदा व्याकुलचेतसम् ।
ब्रह्मपुत्रो महादेवीसाधनायाजगाम च ।। १२७ ।
सिद्धिमार्गं न जानामि वेदमार्गपरो हर ।
तवाचारं समालोक्य भयानि सन्ति मे हृदि ।। १२८ ।
तन्नाशय मम क्षिप्रं दुर्बुद्धिं भेदगामिनीम् ।
वेदवहिष्कृतं कर्म सदा ते चालये प्रभो ।। १२९ ।
कथमेतत् प्रकारञ्च मद्यं मांसं तथाङ्गनाम् ।
सर्वे दिगम्बराः सिद्धा रक्तपानोद्यता वराः ।। १३० ।
मुहुर्मुहुः प्रपिबन्ति रमयन्ति वराङ्गनाम् ।
सदा मांसासवैः पूर्णा मत्ता रक्तविलोचनाः ।। १३१ ।
निग्रहानुग्रहे शक्ताः पूर्णान्तःकरणोद्यताः ।
वेदस्यागोचराः सर्वे मद्यस्त्रीसेवने रताः ।। १३२ ।
इत्युवाच महायोगी दृष्ट्वा वेदबहिष्कृतम् ।
प्राञ्जलिर्विनयाविष्टो वद चैतत् कुलं प्रभो ।। १३३ ।
मनःप्रवृत्तिरेतेषां कथं भवति पावन ।
कथं वा जायते सिद्धिर्वेदकार्यं विना प्रभो ।। १३४ ।

श्रीबुद्ध उवाच—

वसिष्ठ शृणु वक्ष्यामि कुलमार्गमनुत्तमम् ।
येन विज्ञातमात्रेण रुद्ररूपी भवेत् क्षणात् ।। १३५ ।
साक्षेपेण सर्वसारं कुलसिद्ध्यर्थमागमम् ।
आदौ शुचिर्भवेद् धीरो विवेकाक्रान्तमानसः[1] ।। १३६ ।
पशुभावस्थिरचेताः[2] पशुसङ्गविवर्जितः ।
एकाकी निर्जने स्थित्वा कामक्रोधादिवर्जितः ।। १३७ ।

१. विवेकेनाक्रान्तं मानसं यस्य सः ।
२. पशुभावे स्थिरं चेतो यस्य सः ।

दमयोगाभ्यासरतो योगशिक्षादृढव्रतः ।
वेदमार्गाश्रयो नित्यं वेदार्थनिपुणो महान् ।। १३८ ।

एवं क्रमेण धर्मात्मा शीलो दार्ढ्यगुणान्वितः ।
धारयेन्मारुतं नित्यं श्वासमार्गे मनोलयम् ।। १३९ ।

एवमभ्यासयोगेन वशी योगी दिने दिने ।
शनैः क्रमाभ्यासाद् दहेद् स्वेदोद्गमोऽधमः । १४० ।।

मध्यमः कल्पसंयुक्तो भूमित्यागः परो मतः ।
प्राणायामेन सिद्धिः स्यान्नरो योगेश्वरो भवेत् ।। १४१ ।

योगी भूत्वा कुम्भकज्ञो मौनो भक्तो दिवानिशम् ।
शिवे कृष्णे ब्रह्मपदे एकान्तभक्तिसंयुतः ।। १४२ ।

ब्रह्मविष्णुशिवा एते वायवीगतिचञ्चला ।
एवं विभाव्य मनसा कर्मणा वचसा शुचिः ।। १४३ ।

आदौ चित्तं समाधाय चिद्रूपायां स्थिराशयः ।
ततो महावीरभावं कुलमार्गं महोदयम् ।। १४४ ।

शक्तिचक्रं सत्त्वचक्रं वैष्णवं नवविग्रहम् ।
समाश्रित्य भजेन्मन्त्री कुलकात्यायनीं पराम् ।। १४५ ।

प्रत्यक्षदेवतां श्रीदां चण्डोद्वेगनिकृन्तिनीम् ।
चिद्रूपां ज्ञाननिलयां चैतन्यानन्दविग्रहाम्[1] ।। १४६ ।

कोटिसौदामिनीभासां[2] सर्वतत्त्वस्वरूपिणीम् ।
अष्टादशभुजां रौद्रीं शिवमांसाचलप्रियाम् ।। १४७ ।

आश्रित्य प्रजपेन्मन्त्रं कुलमार्गाश्रयो नरः ।
कुलमार्गात् परं मार्गं को जानाति जगत्त्रये ।। १४८ ।

एतन्मार्गप्रसादेन ब्रह्मा स्रष्टा स्वयं महान् ।
विष्णुश्च पालने शक्तो निर्मलः सत्त्वरूपधृक् ।। १४९ ।

---

१. चैतन्यं चानन्दश्च विग्रहो यस्यास्ताम् । २. कोटिसौदामिनीनां भासोऽस्ति यस्यास्ताम् ।

सर्वसेव्यो महापूज्यो यजुर्वेदाधिपो महान् ।
हरः संहारकर्त्ता च वीरेशोत्तममानसः ।। १५० ।

सर्वेषामन्तकः क्रोधी क्रोधराजो महाबली ।
वीरभावप्रसादेन दिक्पाला रुद्ररूपिणः ।। १५१ ।

वीराधीनमिदं विश्वं कुलाधीनञ्च वीरकम् ।
अतः कुलं समाश्रित्य सर्वसिद्धीश्वरो जडः ।। १५२ ।

मासेनाकर्षणं सिद्धिर्द्विमासे वाक्पतिर्भवेत् ।
मासत्रयेण संयोगाज्ज्ञायते सुखवल्लभः ।। १५३ ।

एवं चतुष्टये मासि भवेद् दिक्पालगोचरः ।
पञ्चमे पञ्चबाणः स्यात्षष्ठे रुद्रो भवेद् ध्रुवम् ।। १५४ ।

एतदाचारसारं हि सर्वेषामप्यगोचरम् ।
एतन्मार्गं कौलमार्गं कौलमार्गं परं नहि ।। १५५ ।

योगिनां दृढचित्तानां भक्तानामेकमासतः ।
कार्यसिद्धिर्भवेन्नारी कुलमार्गप्रसादतः ।। १५६ ।

पूर्णयोगी भवेद् विप्रः षण्मासाभ्यासयोगतः ।
शक्ति विना शिवोऽशक्तः किमन्ये जडबुद्धयः ।। १५७ ।

इत्युक्त्वा बुद्धरूपी च कारयामास साधनम् ।
कुरु विप्र महाशक्तिसेवनं मद्यसाधनम् । १५८ ।।

महाविद्यापदाम्भोजदर्शनं[1] समवाप्स्यसि ।
एतच्छ्रुत्वा गुरोर्वाक्यं स्मृत्वा देवीं सरस्वतीम् ।। १५९ ।

मदिरासाधनं कर्त्तुं जगाम कुलमण्डले ।
मद्यं मांसं तथा मांसं मुद्रा मैथुनमेव च ।। १६० ।

पुनः पुनः साधयित्वा पूर्णयोगी बभूव सः ।
योगमार्गं कुलमार्गमेकाचारक्रमं[2] प्रभो ।। १६१ ।।

---

१. महाविद्यायाः पदाम्भोजयोः दर्शनम् । २. एकाचारस्य क्रमः, तम् ।

योगी भूत्वा कुलं ध्यात्वा सर्वसिद्धीश्वरो भवेत् ।
सन्धिकालं कुलपथं योगेन जडितं सदा ।। १६२ ।

भगसंयोगमात्रेण सर्वसिद्धीश्वरो भवेत् ।
एतद्योगं विजानोयाज्जीवात्मपरमात्मनोः ।। १६३ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये
सिद्धमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवभैरविसंवादे
सप्तदशः पटलः ।।

अथ अष्टादशः पटलः

आनन्दभैरवी उवाच—

श्रृणु नाथ प्रवक्ष्यामि असाध्यसाधनं परम् ।
कामचक्रस्य वर्णानां वर्णनं प्रश्ननिर्णयम् ॥ १ ।
आज्ञाचक्रमध्यभागे नाडोकोटिरसालिनी ।
तन्मध्ये भावयेन्मन्त्री कामचक्रं मनोरमम् ॥ २ ।
कामचक्रे पूर्वोक्तवर्णमालोक्य साधकः ।
न्यासमन्त्रे पुटीकृत्य जपित्वा योगिराड् भवेत् ॥ ३ ।
एको मन्दिरमध्यस्थो मन्त्रमाश्रित्य यत्नतः ।
निजनामाक्षरं तत्र तत्कोष्ठमनुमाश्रयेत् ॥ ४ ।
एतेषां कोष्ठसंस्थानां वर्णानां हि फलाफलम् ।
वद कान्ते रहस्यं मे कामचक्रफलोद्भवम् ॥ ५ ।
कामचक्रं कालरूपं ततो वाराणसीपुरम् ।
तत्र सर्वपीठचक्रं चक्राणामुत्तमोत्तमम् ॥ ६ ।
एतच्चक्रप्रसादेन ते पादाम्बुजदर्शनम् ।
प्राप्नोति साधकान् सत्यं सर्वं जानाति साधकः ॥ ७ ।
कामनाफलसिद्धयर्थं मन्त्रार्थादिविचारणाम् ।
बुद्धमस्तमितं त्यक्त्वा गृह्णीयान्मन्त्रमुत्तमम् ॥ ८ ।

आनन्दभैरव उवाच—

श्रृणु वर्णफलं नाथ असाध्यप्रश्ननिर्णयम्[1] ।
वर्णानाञ्च नाथ राशिभेदेन संश्रृणु प्रभो ॥ ९ ।
बाल्यादिषु स्थितान् वर्गान् आश्रयेत् साधकोत्तमः ।
वर्जयेद् वृद्धभावञ्च तथास्तमितमेव च ॥ १० ।

---

१. असाध्या निरुत्तरा ये प्रश्नास्तेषा निर्णयम् ।

आश्रयेद् राशिभावेन बाल्यकैशोरयौवनम् ।
अथ बाल्यं वर्गभेदं विचारे वामयोगतः ॥ ११ ।

मन्त्राणाञ्चापि गणयेत् प्रश्नकर्माणि दक्षिणात् ।
मध्यकोणावधि नाथ गणनीयं विचक्षणैः ॥ १२ ।

ऊर्द्ध्वदक्षिणयोगेन गणयेत् प्रश्नकर्मणि ।
वामयोगेन गणयेद् मन्त्रादीनां विचारणे ॥ १३ ।

शृणु तद्वर्गवर्गाणां फलमत्यन्तसुन्दरम् ।
वदामि परमानन्दरससिन्धुमधुव्रतः[1] ॥ १४ ।

कवर्गं कामाख्याभवनमणिपीठे त्रिजगतां
धरित्री सा धात्री वसति सततं सिद्धिनवके ।
[2]हुताशेष्वाकाशे जलदतनुसाकाशजननी
गभीरा खड्गाभा करहरकरा घोरमुखरा ॥ १५ ।

अभ्यासयोगात् कलिकालपावनी
कालीं[3] कुलानन्दमयीं रमेशीम् ।
महारसोल्लाससुवक्त्रलोचनां
कामेश्वरीं कूर्मपदं भजेज्जयी ॥ १६ ।
कालागुरोरुत्तमसिद्धसेविता
मनोहरा खेचरसारशाखिनी[4] ।
उल्कासमग्रा भवदीपवृत्ति
स्तेजकूटामलनीलदेहा ॥ १७ ।

खड्गायुधा खर्परधारिणी सा
चण्डोद्गमा वायुपथस्थ खेचरी ।
विद्याभयाखञ्जनलोचना गतिः
क्षितिक्षये खेचरवर्गधारिणी ॥ १८ ।

१. परमानन्दरससिन्धौ मधुव्रतः । २. हुताश्वेषाकाशे–ग० ।
३. कुलानन्दरूपं रमेशीं महेशीम्–ग० ।
४. खेचरसारस्य शाखा, खेचरसारशाखा, सा अस्ति यस्यां सा, इनिप्रत्यये सति साधुता ।

खारी विहारी खलखेलनेन
खराखरोन्मत्तगतिप्रिया खगा ।
[1]महाखगारूपखलस्थिता सदा
प्रपाति विद्याबलविक्रमस्थिता ।। १९ ।

व्यापारनिद्रागहनार्थचिन्ताखरप्रभाति यदा यदा ।। २० ।

गायत्री गणनायिका मतिगतिग्लानिरगूढाशया
गीता गोकुलकामिनी गुरुतरा गर्ह्याग्निजेयोदया ।
गोरूपा गयहा गया गुणवती गाथापथस्थायिनी
श्रीगुर्वी प्रतिपालनं त्रिजगतां गायन्ति यां तां भजेत् ।। २१ ।

वायोर्घर्मकरानन्दमोहिनी घर्घरा घना ।
निद्रामाध्याति घटना नीला घोटकवाहिनी ।। २२ ।

बिन्दुस्था विषभोजनानलकथा वीजश्रमायोप्रिया ।
पञ्चाढ्यामनुनासिकासुखमयी वेदक्रिया षण्मुखी ।। २३ ।

[2]विचित्रवस्त्राचरणाब्जचालनम् ।
विचारचेष्टां मयि देहि चञ्चले ।। २४ ।

इति वर्णं चवर्गस्य महापातकनाशनम् ।
कामचक्रे स्थितं यद्यत् प्रश्ने मन्त्रगृहे यथा ।। २५ ।

चवर्गफलमत्यन्तनिष्कर्षं सूक्ष्मभावनम् ।
धिया सर्वाक्षरश्रेणीं भावयन्ति पुनः पुनः ।। २६ ।

---

१. रुपोढषादा खलसंस्थिता—ग० ।

२. कृत्या भूतनिवारिणी करणगणने गात्रशिष्टामुखी ।
वरस्याहितकारिणी कलियुगे योगाटवी पातु वः ।।
चराचरत्वं चमरी चचार प्रचार—चन्द्राननचञ्चला च । क० ।

[1]सर्वं जानाति शंभो त्वं परं किं कथयामि ते ।
तथापि वर्गमाहात्म्यं कामचक्रस्थनिर्मलम् ॥ २७ ।

यो जानाति कामचक्रं यमो हन्ति न तं जनम् ।
तत्प्रकारं भावयुक्तं [2]भावनाध्याननिर्मलम् ॥ २८ ।

[3]ध्यात्वा कामरूपस्था मूलाधारनिवासिनः ।
देवताः पार्थिवाः सर्वे आत्मानं परमेष्ठिनः ॥ २९ ।

न जानन्ति बालका मे तेषां योगादिसिद्धये ।
कामचक्रं कामरूपं कामनाफलसिद्धिदम् ॥ ३० ।

तन्मन्त्रग्रहणादेव साक्षादीशो भवेन्नरः ।
श्रुतिशास्त्राणि सर्वाणि करे तस्य न संशयः ॥ ३१ ।

योगशिक्षादिकं सर्वं जानाति [4]कामचक्रतः ।
कामचक्रप्रसादेन कामरूपी भवेद् ध्रुवम् ॥ ३२ ।

तद्वर्णस्थं तदन्तःस्थं दशकोणस्थमेव च ।
अष्टदलस्थं तत्रापि विचार्यं साधकोत्तमः ॥ ३३ ।

अनुलोमविलोमेन शास्त्रस्यानुक्रमेण च ।
बाल्यं कैशोरमुल्लासं वृद्धिः सिद्धिश्च यौवने ॥ ३४ ।

वृद्धो वृद्धत्वमाप्नोति अस्ते च निधनं भवेत् ।
नवग्रहास्तत्र मध्ये पञ्चप्राणाश्च सन्ति वै ॥ ३५ ।

अनुलोमविलोमेन गणयेद्दशकोणके ।
दशकोणे सर्वसिद्धिरष्टसिद्धिश्च तत्र वै ॥ ३६ ।

---

१. वृद्धास्तमितमेवं हि त्यक्त्वा मन्त्राणि दापयेत् ।
अन्यकोणस्य वर्णानां गृह्णीयान्मन्त्रमुत्तमम् ॥
चवर्गपुत्रजालस्या देबता दयिता प्रभो ।
तत्प्रकारं प्रवक्ष्यामि शृणुष्व विश्वभावन ॥ क० ॥

२. ज्ञान–ग० । ३. ज्ञात्वा–ग० । ४. ब्राह्मणा शुद्ध–ग० ।

अष्टपत्रे प्रशंशन्ति अधोऽनन्तमध्ये गृहे ।
ब्राह्मणमूर्ध्वगेहे च मन्त्रवर्णांश्च तत्तु तान् ॥ ३७ ।

समाश्रित्य जपेद्विद्यां सूरयः क्रमरूपिणीम् ।
ह्रस्वदेवीं ह्रस्वबुद्धिं ददाति साधकाय च ॥ ३८ ।

यदि क्रोधपरा विद्या भक्षयेत् साधकं लघु ।
अतः समवयोरूपां देवतामष्टसिद्धिदाम् ॥ ३९ ।

देवो भूत्वा यजेद्देवं तदा मोक्षं समाप्नुयात् ।
यदि वर्णं न जानाति कौलपुत्रोऽप्यधो व्रजेत् ॥ ४० ।

डाकिनी तं भक्षयति दीक्षामन्त्रार्णहीनकम् ।
ततो वर्णविचारञ्च प्रवक्ष्यामि समासतः ॥ ४१ ।

चापान् धृत्वा नरेन्द्रस्तमपि मनुजकं पालयन्तीह लोके
[1]सर्वं चन्द्रो विघातं प्रचुरमयभयं भास्करो हन्ति शोकान् ।
चातुर्थ्या चक्रपाणेः पदमपि चपला सन्ददातीह माया-
योगोद्योगी[2] चरुगतमनसा साधकायाऽऽशु योगम् ॥ ४२ ।

छत्राशा कमले स्थिता स्थितिलये वाञ्छाफलश्रीधरा
छायामण्डपमध्यगाच्छलगता छत्रञ्छटा तेजसा ।
त्रैलोक्यं प्रतिपाति पाशुपतिभिः क्षेत्राधिपैः श्रीधरैः
प्राणप्रेमविहारिणी भगवतीच्छत्रेण तं साधकम् ॥ ४३ ।

जातिख्यातिरनुत्तमा[3] प्रभवति प्रीतायमाभ्यासतां
जीवानामतिदुःखराशिहननात् एकार्थसञ्चारिणी ।
वज्रा जीवनमध्यगा गतिमती विद्या जया यामिनी
जाता जातनिवारिणी जनमनःसंहारचिन्तावतु ॥ ४४ ।

झं झंत्वादविवादं झटिति झरझरा झारयावीजझंकां
गंगाहन्ति हता शुभा धनमुखी कैवल्यमुक्तिप्रदा ।
कृत्वा रक्षति साधकं झरझनत्कारेण सूक्ष्मानिला
कामक्रोधविनाशिनी शशिमुखी झंकारशब्दप्रिया ॥ ४५ ।

---

१. चिन्ता–ग० । २. योगे उदयोगी । ३. नास्ति उत्तमो यस्याः सा ।

ञकारबीजामलभावसारैः बाणस्य पुञ्जं प्रतिहन्ति योगिनी ।
खड्गायुधा सा रसपानमत्ता संहारनिद्राकुलसाधुदुःखहा ॥ ४६ ।

चन्द्रातपस्निग्धसुकान्तविग्रहा
टंकास्त्रवज्रास्त्रहतारिपुङ्गवाः ।
टिं टिं महामन्त्रजपेन सिद्धिदा
हन्ति श्रियं कापुरुषस्य पातकम् ॥ ४७ ।

विशालनेत्रा यदि चारुकाङ्गी[1]
ठं ठं स्वबीजं परिपाति कक्षरी ।
मनोगतं दुःखममूहमुर्वशी
रत्नाकरा सैन्यकुलं निहन्ति ॥ ४८ ।

डामरा जगतामाद्या डं डां डिं डों स्वरूपिणी ।
कामचक्रे सुखं दत्वा सारयैवं तनोति सा ॥ ४९ ।
ढं ढां बीजात्मिका विद्या रत्नमन्दिरसंस्थिता ।
ढक्कारी पाशहस्ता च साधकं पाति सुन्दरी ॥ ५० ।

णं णां णि णों जपति सुजनो जीवनीमध्यसंस्था
अष्टैश्वर्या प्रभवति हृदि क्षोभपुञ्जापहाय ।
वाराणस्यां सकलभयहा सन्ददातीह लक्ष्मीं
सूक्ष्मात्यन्तानलपथमुखी कालजालं निहन्त्री ॥ ५१ ।
तारारूपा तरुस्था त्रिनयनकुटिला तारकाख्या निहन्त्री
तन्वश्रेणी तरुवरकलात्राणहेतोरतीता ।
तालक्षेत्रा तडिदिव कलाकोटिसूर्यप्रकाशा
तोकादीनां बहलतरुणी तारकं पाति भक्तम् ॥ ५२ ।

कालक्रमेणैव विमुक्तिदायिनी
मनोरमा नीरजनेत्रकोमला[2] ।
स्थिता क्षकाराक्षरमालिनीस्थला
प्रपाति मुख्यं वरसाधकं शिवा ॥ ५३ ।

---

१. चक्कवाङ्गी-क० । २. नीरजे इव नेत्रे, तयोः (तदवच्छेदेन) कोमला ।

दाली दरिद्रातिनिकृष्टदु:खहा
दान्तप्रिया दैत्यविदारिणी दहा ।
दानस्थलस्था दयिता जगत्पते-
र्दयां ददाति द्रवदेवदारा ।। ५४ ।

धात्री धराधारणतत्परा धनी-
धनप्रदा धर्मगतिर्धरित्री ।
दधार धीरं धनबीजमालिनी
ध्यानस्थिता धर्मनिरूपणाय ।। ५५ ।

नन्दस्य प्रतिपालनाय जगतामानन्दपुञ्जोदया
योगिन्यो नयनाम्बुजोज्ज्वलशिखाशोभाप्रमालक्षरा ।
नीता नावपथस्थिता मतिमती या: पालयन्तीह ता:
पान्तु श्रीमुखतेजसा खलु यथा कालक्रमात् साधकम् ।। ५६ ।

पीता प्रेमविलासिनी वरपथज्ञानाश्रया पालनात्
पूज्या पायसपा परापरपदा पीताम्बरा पोषणा ।
प्रौढा प्रेमवती पुराणकथना पायात् पुरा पावनी
या कामेश्वरपावनं परजनं श्रीसाधकं प्रस्थिता ।। ५७ ।

फुत्फणिवरमाला फेरवी फेरुरूपा
फणधरमुखकुल्याम्भोजवाक्यामृताब्धौ ।
निरवधिहरिकण्ठे वाक्यरूपा फलस्था
फलगतफणिचूडा पातु फुल्लारविन्दे ।। ५८ ।

वज्राख्यां वशकारिणीं यदि जपेत् श्रीपादसंसेवनात्
बाल्यं वेदविनिर्गतां भगवती श्रीरामदेवोर्व्वराम् ।
वश्या तस्य कराम्बुजे वसति सा वीरासनस्था वशा
वक्त्राम्भोरुहकोमले भगवती भूतेश्वरी भूतगा ।। ५९ ।

माता मन्दिरमालिनी मतिमतामानन्दमालामला[1]
मिथ्यामैथुनमोहिनी मनसि या मिला महन्मेलनी ।

१. आनन्दमाला चासौ अमला चेति आनन्दमालामला ।

मानी तं वदते महेश्वरमहित्वं तस्य वक्षःस्थले ।
स्थित्वा सा मरणं निहन्ति सहसा [1]मौनावलम्बी भवेत् ॥६० ।

[2]यातप्रिया या प्रतिभाति योगिनी
यामास्थिता योगमुखास्पदा यथा ।
योनिस्थले सा यतिसाधकं यशो-
यात्रा सदा पाति यमादिकं दहेत् ॥ ६१ ।

रत्नस्था रतिराजिता रणमुखे राज्ञः [3]प्रियाभीतिहा-
रुक्मालङ्कृतरङ्गिणी रसवती रागापहा रोगहा ।
राजेन्द्रं रजनीस्थे प्रकुपिता राधामृता पाति तं
स्वाहारूपमनोरमा सुरमणी रामा रकाराक्षरी ॥ ६२ ।

लक्ष्मीर्लाङ्गलिलक्षणा सुललना लोलामला निर्भया
[4]बालामूलमिवासतां लवणाकुला सिन्धूल्लासलीलाकुला ।
[5]लोलाकोलकुलान्नजानलमुखी लग्नालघूराकुला
[6]कौलार्काकुललोचना लयकरी लीलालयं पाति माम् ॥ ६३ ।

विषासवस्थानरणस्थवाना
वश्यावहन्ती[6] ललनावशार्थम् ।
सा पाति वीरं यदि तां भजेद् वशी
विषाशनं ते निवसन्ति वारुणोम् ॥ ६४ ।

शीतां शशीशोकविशेषनाशिनीं
भजेत् सुशीलां स भवेद्दिवाकरः ।
शिवां शचीं शौचशुभां शवप्रियां
शवस्थितां शीतलदेशशोभिताम् ॥ ६५ ।

---

१. मौनमवलम्बते तच्छीलः । २. याति प्रिया–ग० । ३. रीतिहा–ग० ।
४. मूलामूलनिरामतां सबलकुल्लासलोलाकुला–क० ।
५. कुलानलमूलीलग्नालधूरा कुला—ग० ।
६. कौलालौलिललोचना नयबला वालोज्ज्वला पाति नः–क० । ६. सकला–ग० ।

षट्चक्रे षट्पदाषाढी षडङ्गस्था षडानना ।
षट्चक्रे सिद्धिदा पाति साधकं षोडशी मुदा ।। ६६ ।

सा मा सूक्ष्मा [1]वहति सुजलं सप्तनाकस्थलाढ्या[2]
सारा साक्षात् सुखसमरसोज्ज्वालसाह्लादसाम्या ।
साकारा साम्बुजमधुगिरा पूरयन्ती महार्थं
वेदा सौरा सुरमतिनिवहा सामवेदान्तरस्था ।। ६७ ।

हठात्कारेण सहारा हरति प्राणहं जनम् ।
निहारिणं न सा हन्ति हिरण्याहारमालिनी ।। ६८ ।

आलोका लक्षजपदा लाक्षरंल्लक्षणा[3] समा ।
आलग्दानाल सालापा ? पाति तं यो भजेल्लघु ।। ६९ ।

क्षयं क्षितौ याति सुसूक्ष्मभावनं
विहाय मन्त्री क्षयरोगहारिणी ।
सूक्ष्मातिसूक्ष्मान्यतमं विचिन्तयेत्
क्षोभादिकं पक्षकलाक्षयन्ती ।। ७० ।

षोडशस्वरभेदेन फलं शृणु महाप्रभो ।
संक्षेपेण प्रवक्तव्यमुत्कृष्टं फलकाङ्क्षिणाम् ।। ७१ ।

श्लोकत्रयेण तत्सर्वं फलमत्यन्तसाधनम् ।
ये कुर्वन्ति महादेव कामचक्रोत्सवं यथा ।। ७२ ।

आद्याष्टस्वरमङ्गलं जपति यः श्रीनाथवक्त्राम्बुजां
प्राप्य श्रीधरनायकः क्षितितले सिद्धो भवेत् तत्क्षणात् ।
राजा राजकुलेश्वरो जयपथे दीपोज्ज्वलामालया
सम्पश्येत् परमां कलां जयति सः कामानलं ताडयेत् ।। ७३ ।

अ आ इ ई उ ऊ ऋ ॠ
शेषाष्टौस्वरपावनी [4]प्रियजनानन्देन मन्दोदरी
मन्त्रं हन्ति मदानना त्रिजगतां [5]साधूत्तमानां सुखम् ।

---

१. सा मासूक्ष्मा रस इति सुजनं सप्तलोकस्थलाद्या–क० ।
२. सप्तानां नाकस्थलानामाढ्या स्वामिनी । ३. आलोका लक्षजयदा लालाक्षराङ्कलोमशा–क० ।
४. आलम्लोल्वान–क० । ५. प्रियतम–ग० ।

दत्त्वा पालयति प्रभाप्रबलये कौटिल्यविद्यापहा
[1]भक्तये क्षितिपालनं निजजपध्यानाकुलामङ्गलम्[2]।। ७४ ।

लृ लॄ ए ऐ ओ औ अं अः ।
इति वर्णफलं ज्ञात्वा यो गृह्णाति मनूत्तमम् ।
स भवेत् कुलयोगार्थी सिद्धज्ञानी महीतले ।। ७५ ।

वर्गे वर्गे फलं नाथ शृणु वक्ष्यामि अद्भुतम् ।
प्रश्नादीनाञ्च कथनं यो जानाति स साधकः ।। ७६ ।

कवर्गे कामसम्पत्ति श्रिया व्याप्तं सुमन्दिरम् ।
प्राप्नोति कामचक्रार्थं राशिनक्षत्रसम्मतम् ।। ७७ ।

चवर्गे दीर्घजीवी स्यात् दृढसम्पदमेव च ।
वृत्ति प्राप्नोति गमनादनुद्दिश्य शरीरिणः ।। ७८ ।

समाचारं समाप्नोति गमने सर्वमुत्तमम् ।
टवर्गे सम्भवे नाथ महदुच्चाटनादिकम् ।। ७९ ।

पुत्राणामपि वृद्धिः स्यात् तवर्गे धनलाभकम् ।
पवर्गे मरणं नाथ यादिक्षान्ते महागुणी ।। ८० ।

कामचक्रफलं नाथ राशिदण्डेन योजयेत् ।
निजगेहस्थितं राशिं ज्ञात्वा हि दिनदण्डतः ।। ८१ ।

गणयित्वाशुभं ज्ञानी अनुलोमविलोमतः ।
घटस्थं सकलं [3]सन्धिकोणस्थं पार्श्वके शुभम् ।। ८२ ।

शुभमन्त्रं गृहीत्वा तु सिद्धिमाप्नोति साधकः ।। ८३ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे कामचक्रसारसङ्केते सिद्धिमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवभैरवीसंवादे अष्टादशः पटलः ।।

---

१. साध्योत्तमानाम्–ग० । २. निजजपध्यानाकुला इति कृत्वा मङ्गलम् ।
३. त्यक्त्वा यः–ग० ।

अथोनविंशः पटलः

आनन्दभैरवी उवाच—

इदन्तु श्रृणु वक्ष्यामि सर्वतन्त्रार्थगोपनम् ।
तत्सर्वं प्रश्नचक्रे च षडाधारस्य भेदनम् ॥ १ ।
कालचक्रफलं तत्र [1]निर्विकल्पादिसाधनम् ।
प्रश्नचक्रं कामरूपं चैतन्यं सर्वदात्मनोः ॥ २ ।
षड्मन्दिरे षट्कलापं कैवल्यसाधनादिकम् ।
नानाभोगं योगसिद्धिं हित्वा यो मन्त्रमाजपेत् ॥ ३ ।
स भवेद् देवताद्रोही कोटिकल्पेन सिध्यति ।
हृदि यस्य महाभक्तिः प्रतिभाति महोदया ॥ ४ ।
क्षणादेव हि सिद्धिः स्यात् किं जपैर्मन्त्रसाधनैः ।
अतो भक्तिं सदा कुर्याद् देवताभावसिद्धये ॥ ५ ।

भैरव उवाच—

एतच्चक्रप्रसादेन को वा किं सिद्धिमाप्नुयात् ।
एतस्य भावनादेव किं फलं भावनं शुभम् ॥ ६ ।
को वा प्रश्नादिकथने क्षमो भवति सुन्दरि ।
तत्प्रकारं विधानेन वद मे फलसिद्धये ॥ ७ ।

आनन्दभैरवो उवाच—

यः करोति पूर्णहोमं पुत्रार्थं योगसिद्धये ।
कुण्डलीक्रमयोगेन पुनः पुनः क्रमेण च ॥ ८ ।
एतच्चक्रार्थभावज्ञः स एव नात्र संशयः ।
यः करोति सदा नाथ वायुनिर्गमलक्षणम् ॥ ९ ।
ऊर्ध्वं संस्थाप्य विधिवद् भावनां कुरुते नरः ।
स एव सिद्धिमाप्नोति सिद्धमार्गो न संशयः ॥ १० ।

---

१. समाधिर्द्विविधः, निर्विकल्पः सविकल्पश्च, निर्विकल्प आदिर्यस्य तस्य साधनम् ।

फलमेतद्भावनार्थं कामक्रोधादिवर्जितः ।
भावनाफलसिद्ध्यर्थं वायुसंयोगसंक्रमात् ॥ ११ ।
लेपयित्वा शोधयित्वा मन्त्रयित्वा पुनः पुनः ।
धर्माधर्मविरोधेन सूक्ष्मवायुक्रमेण च ॥ १२ ।
प्राप्नोति महतीं सिद्धिमेतच्चक्रस्य तत्फलम् ।
फलञ्च द्विविधं प्रोक्तं स्थूलसूक्ष्मपरस्थितम् ॥ १३ ।
स्थूलं त्यक्त्वा महासूक्ष्मे मनो याति यदा यदा ।
तदा हि महती सिद्धिरमरस्तत्क्षणाद् भवेत् ॥ १४ ।
एकबारं भावयेद्यः सिद्धचक्रस्य वर्णकान् ।
तस्यैव भावसिद्धिः स्याद् भावेन किं न सिद्ध्यति ॥ १५ ।
महद्भावं विना नाथ कः सिद्धिफलकग्रही ।
योगभ्रष्टः स्थूलफले परजन्मनि सिद्धिभाक् ॥ १६ ।
ऐहिके सिद्धिमाप्नोति सूक्ष्मफलक्रमेण च ।
यो जानाति सूक्ष्मफलं स योगी भवति ध्रुवम् ॥ १७ ।
स एव प्रश्नकथने योग्यो भवति साधकः ।
यः सूक्ष्मफलभोक्ता स्यात् क्रियागोपनतत्परः ॥ १८ ।
निरन्तरं प्रश्नचक्रं आज्ञाचक्रोपरि स्थितम् ।
विभाव्य कालसिद्धिः स्यात् सर्वज्ञो वेदपारगः[1] ॥ १९ ।
कालज्ञानी च सर्वज्ञ इति तत्त्वार्थनिर्णयः ।
प्रश्नचक्रस्थितं वर्णं सूक्ष्मकालफलावहम्[2] ॥ २० ।
मनोरूपं दण्डभेदं मासभेदं सवर्गकम् ।
मनसो भ्रम एवं हि काल एको न संशयः ॥ २१ ।
मृत्युवशं करोत्येव कालज्ञानी स योगिराट् ।
कालेन लीयते सर्वं त्रैलोक्यं सचराचरम् ॥ २२ ।
कालाधीनमिदं विश्वं तस्मात् कालवशं नयेत् ।
तत्कालं सूक्ष्मनिलयं दुर्वाच्यं[3] प्रश्नकं श्रृणु ॥ २३ ।

---

१. वेदानाम् ऋगादीनां पारं गच्छति । २. सूक्ष्मकालस्य फलमावहति ।
३. दुर्भाव्यम्–ग० ।

मेषं तुलाराशिमनुत्तमं सदा
वैशाखमासे फलसिद्धिकारणम्[1] ।
कवर्गमावाप्य स्वरान् स एव
विभावयेत् स क्षितिनाथ आभवेत् ॥ २४ ।

आज्ञाचक्रोपरि ध्यात्वा सर्वचक्रं महाप्रभो ।
एकक्षणेन सिद्धिः स्यात् परभावेन हेतुना ॥ २५ ।
सिद्धेशचक्रचैतन्यं यो जानाति महीतले ।
वाक्सिद्धिर्जायते मासाद्द्विवारात्रिक्रमण च ॥ २६ ।
वर्णमालासमाक्रान्तं राशिनक्षत्रसंयुतम् ।
ग्रहचक्रं भावयित्वा सर्वं जानाति साधकः ॥ २७ ।
चवर्गं वृषमोनस्थं कैशोरसिद्धिकारणम् ।
द्विमाससाधनादेव सर्वज्ञो भवति ध्रुवम् ॥ २८ ।
योगिनो खेचरो[2] भूत्वा प्रयाति निकटे सताम् ।
ग्रहचक्रप्रसादेन जीवन्मुक्तस्तु साधकः ॥ २९ ।
यदि कर्म करोत्येव एकान्तचित्तनिर्मलः[3] ।
तस्याऽसाध्यं त्रिभुवने न किञ्चिदपि वर्तते ॥ ३० ।
प्रश्नचक्रप्रसादेन सर्वे वै योगिनो भुवि ।
यदि योगी भवेद् भूमौ तदा मोक्षमवाप्नुयात् ॥ ३१ ।
विना योगसाधनेन कः सिद्धो भूमिमण्डले ।
साधनेन विना सिद्धिः कस्य भक्तस्य जायते ॥ ३२ ।
भक्तानां निकटे सर्वे प्रतिष्ठन्ति महर्षयः ।
अतो भक्तिं सदा कुर्यात् सर्वधर्मान् विहाय च ॥ ३३ ।
तत्कालं भक्तिमाप्नोति प्रश्नचक्रप्रसादतः ।
तत्प्रकारं महाधर्मं को वक्तुं क्षम एव हि ॥ ३४ ।
कश्चित्तद्भावसारञ्च प्रश्नचक्रे वदाम्यहम् ।
चवर्गभावनादेव भक्तिं प्राप्नोति साधकः ॥ ३५ ।

---

१. फलानां सिद्धयस्तासां कारणम् । २. विद्या आयाति–ग० ।
३. एकान्ते चित्तम्, अत एव निर्मलम् । एकान्ते—एकलक्ष्ये इत्यर्थः ।

समाधाय परं देवमाज्ञाचक्रोपरि प्रभो ।
विभाव्य नित्यभावं हि प्राप्नोति तत्कुलादपि ॥ ३६ ।

आनन्दाश्रूणि पुलको देहावेशमनोलयम्[1] ।
सर्वकर्म स्वयं-त्यागी यः करोति स योगिराट् ॥ ३७ ।

टवर्गे वासनासिद्धिः संसाररहितो भवेत् ।
बलवान् सर्वविज्ञानी त्रिमासे खेचरो भवेत् ॥ ३८ ।

खेचरीमेलनं तस्य [2]परं प्राप्नोति चक्रतः ।
टवर्गं व्याप्य तिष्ठन्ति मिथुनं कुम्भयोनयः ॥ ३९ ।

स्वनक्षत्रस्वयोगञ्च विभाव्य योगिराड् भवेत् ।
चतुर्मासे पूर्णयोगी तवर्गसाधनादपि ॥ ४० ।

वेतालादिमहासिद्धिमिन्द्र[3]सिद्धि समाप्नुयात् ।
तवर्गं व्याप्य तिष्ठन्ति [4]मकरवृश्चिककर्कटाः ॥ ४१ ।

चिरजीवी भवेदीश [5]इन्द्रतुल्यप्रियो भवेत् ।
तिष्ठेत् प्रलयपर्यन्तं महाप्रलयरूपवान् ॥ ४२ ।

कृत्वा कालवशं मन्त्री महावायौ महालयम् ।
महाचक्रे सूर्यमध्ये वह्निमण्डलमध्यगे ॥ ४३ ।

[6]वाग्देवता तस्य साक्षाद्भवतीति न संशयः ।
पवर्गं व्याप्य तिष्ठन्ति धनुःसिंहास्तु [7]चित्कलाः ॥ ४४ ।

---

१. देहावेशं देहे इष्टस्यावेशं मनोलयं च करोति इत्यनेनान्वयः ।

२. सुरम्—क० । ३. इन्दु—क० । ४. मकरावृक्षकर्कटा—ग० ।

५. इन्दु—क० । ६. चन्द्र—क० ।

७. महाप्रलयभावेन लीनं कुर्य्याद् महानिले ।
महाप्रलयपर्यन्तं सैव तिष्ठति निश्चितम् ॥
पञ्चमे मासि सम्प्राप्ते पवर्गंशुभलक्षणे ।
मनो निधाय यो योगी ध्यानचिन्तापरो यदि ॥ क० ।

विभाव्य परमस्थानं स नश्यति महानिलम् ।
त्रैलोक्यमष्टवर्गं च षट्चक्रं चक्षुषा क्षणात् ।। ४५ ।

यदि वान्तं ब्रह्मरूपं सर्वतीर्थपदाश्रयम् ।
महासत्त्वगुणाक्रान्तं मत्वा निर्मलचक्षुषा ।। ४६ ।

कन्यावृश्चिकराशिभ्यां ब्रह्ममार्गं विलोकयेत् ।
षण्मासेन सिद्धिः स्याद् महाकौलो भवेद् ध्रुवम् ।। ४७ ।

मौनी एकान्तभक्तः स्यात् श्रीपादाम्भोजदर्शनम् ।
प्राप्नोति साधकश्रेष्ठः सायुज्यपदवीं लभेत् ।। ४८ ।

ततो मध्ये प्रगच्छन्ति योगिनस्तत्त्वचिन्तकाः ।
शादिक्षान्ते चतुष्कोणे सर्वयोगाश्रये पदे ।। ४९ ।

विभाव्य याति शीघ्रं सः श्रीदेवीलोकमण्डले ।
महाकालो भवेद् धीमान् प्रश्नचक्रस्य भावकः ।। ५० ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे प्रश्नचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवभैरवीसंवादे ऊनविंशः पटलः ।।

●

अथ विंशः पटलः

आनन्दभैरवी उवाच—

अथ वक्ष्ये महादेव सिद्धमन्त्रविचारणम् ।
जपित्वा भावयित्वा च नरो मुच्येत सङ्कटात् ॥ १ ॥

आनन्दभैरव[1] उवाच—

फलचक्रे सर्वमन्त्रं सर्वसारं तनुप्रियम् ।
क्रियायोगाद् भवेत् सिद्धिर्वायवीशक्तिसेवनात्[2] ॥ २ ॥
वह्निबीजं त्रिकोणस्थं षट्कोणं तद् बहिः प्रभो ।
षट्कोणे षण्मनुं ध्यात्वा षण्मासाद्रुद्ररूपिणः ॥ ३ ॥
अष्टकोणे स्थितान् वर्णान् अङ्कभेदेन पण्डितः ।
अङ्कसंख्याक्रमेणैव ध्यात्वा तद् बहिरेव च ॥ ४ ॥
तत्संख्यासु गतान् वर्णान् विभाव्य खेचरो भवेत् ।
विना त्रिकोणयोगेन षट्कोणं तत्र वर्णकान् ॥ ५ ॥
आज्ञाचक्रमध्यदेशे कामचक्रं मनोरमम् ।
कामचक्रं मध्यदेशे महासूक्ष्मफलोदयम् ॥ ६ ॥
प्रश्नचक्रं षट्पदार्थं षट्चक्रफलसाधनम् ।
प्रश्नचक्रे फलचक्रं योगाष्टाङ्गफलप्रदम् ॥ ७ ॥
फलचक्रस्योद्ध्र्वभागे वर्णमालाक्रमेण तु ।
तद्वर्णान् मौनजापेन फलसारं समाप्नुयात् ॥ ८ ॥
फलचक्रप्रसादेन तत्त्वचिन्तापरो मतिः ।
स्थित्वा भ्रूमध्यकुहरे सदा भावयतीश्वरम् ॥ ९ ॥
भावज्ञानी भवेत् शीघ्रं मूढोऽपि भावनावशात् ।
आदौ सूक्ष्मफलं वक्ष्ये वर्णभेदेन शङ्कर ॥ १० ॥

---

१. इति-क० । २. वायवी चासौ शक्तिश्च, संज्ञात्वात् पुंवद्भावाभावः, तस्याः सेवनात् ।

वह्निर्भाति निरन्तरं त्रिजगतां नाशाय रक्षाकरो
जीवः सर्वचलाचलस्थदहनं श्रीकालिकाविग्रहः ।
सर्वव्यापक ईश्वरः क्षयति यः कामान् मनःपल्लवं
ध्यात्वा तं समरूपवान् परशिवज्ञानी भवेत्तत्क्षणात् ।। ११ ।

वह्निबीजं सूक्ष्मफलं साक्षात् प्रत्यक्षकारणम् ।
त्रिकोणस्थं वह्निबीजं विधिविद्याप्रकाशकम् ।। १२ ।
अकस्मात् सिद्धिदातारं यो भजेत् स भवेत् सुखी ।
षट्कोणस्थवर्णमन्त्रान् शृणुष्वानन्दभैरव ।। १३ ।
यज्ज्ञात्वा देवताः सर्वा दिग्विदिक्षु प्रपालकाः ।
तद्भेदं रमणीयार्थं सङ्केतशुद्धिलाञ्छितम् ।। १४ ।
वह्निबीजस्योद्ध्वंदेशे चन्द्रबीजमनुत्तमम् ।
तत्र यो भावयेन्मन्त्री स सिद्धो नात्र संशयः ।। १५ ।

विधोर्बीजं सूक्ष्मं विमलकमलं कान्तकिरणं
सदा [1]जीवस्थानं प्रलयनिलयं वायुजडितम् ।
ततो वामे सूर्यं सकलविफलध्वंसनिकरं
महावह्निस्थानं भजति सुजनो भावविधिना ।। १६ ।

तदधः कोणगेहे च श्रीबीजं पञ्चमस्वरम् ।
भावकल्पलतासारमकारादिकुलाक्षरम् ।। १७ ।
चतुःपञ्चाशदङ्कस्थं वायुबीजमधस्ततः ।
विभाव्य वायवीसिद्धिमवाप्नोति नराधिपः ।। १८ ।
तदङ्गं दक्षिणे नाथ भवानीबीजमण्डलम् ।
युग्मस्वरसमाक्रान्तं विभाव्य योगिराड् भवेत् ।। १९ ।
तद्दक्षिणोर्ध्वकोणे च सोमबीजमनुत्तमम् ।
विभाव्य जगतामीशदर्शनं प्राप्नुयान्नरः ।। २० ।
तदूर्ध्वे परमं बीजं साक्षात्कारफलप्रदम् ।
मासैकभावनादेव देवलोके गतिर्भवेत् ।। २१ ।

१. जीवस्थानम्, अस्य भावयेदित्यनेनान्वयः ।

तदूर्ध्वकोणगेहे च रुक्मिणीबीजमद्भुतम्[1] ।
साधनादेव सिद्धिः स्याल्लक्ष्मीनाथो भवेदिह ॥ २२ ।

अङ्गक्रमेण सर्वत्र ज्ञेयं स्वरविधानकम् ।
येन केन स्वरेणापि वेष्टितं फलबीजकम् ॥ २३ ।

[2]भवत्येव महादेव वायुसिद्ध्यादिकारणम् ।
अष्टकोणं तले नाथ षट्कोणे यानि सन्ति वै ॥ २४ ।

तद्बीजानि सत्फलानि ध्यात्वा वाक्सिद्धिमाप्नुयात् ।
रेफोर्द्ध्वे कमलाबीजं भावकल्पद्रुमाकरम् ॥ २५ ।

सर्वत्र तेजसा व्याप्तं विभाव्य योगिनीपतिः ।
तदधः शीतलाबीजं वामभागक्रमेण तु ॥ २६ ।

विभाव्य परमानन्दरसे मग्नो महासुखी ।
तदधः कामबीजञ्च कामनाफलसिद्धिदम् ॥ २७ ।

यो जपेत् परमानन्दो नित्यज्ञानी च वायुना ।
तदग्रे वेदकोणे च वारुणं बीजमुत्तमम् ॥ २८ ।

विभाव्य भावको भूत्वा चिरजीवी स जीवति ।
[3]तदूर्ध्वे पञ्चमे कोणे वज्रबीजं वकारकम् ॥ २९ ।

[4]अष्टसिद्धिकरं साक्षाद् भजतां शीघ्रसिद्धिदम् ।
षट्कोणे च तदूर्ध्वे च सुरबीजं महाफलम् ॥ ३० ।

---

१. अद्भुतं कमनीयार्थम्—ग० । २. मण्डितम्—ग० । ३. फलत्येव ।

४. अष्टसिद्धिकरं साक्षाद् भजतां शीघ्रसिद्धिदम् ।
षट्कोणे च तदूर्ध्वे च स्वरबीजं महाफलम् ॥
हृदि यो भावयेन्मन्त्री तस्य सिद्धिः प्रतिष्ठिता ।
अष्टकोणस्योर्ध्वदेशे वर्णमालाविधिं शृणु ॥
येन भावेन मात्रेण सर्वज्ञो जगदीश्वरः ।
ओ औ पवर्गमेवं हि यो नित्यं भजतेऽनिशम् ॥

हृदि यो भावयेन्मन्त्री तस्य सिद्धिः प्रतिष्ठिता ।
अष्टकोणस्योद्‌र्ध्वदेशे वर्णमालाविधिं शृणु ॥ ३१ ।

येन भावनमात्रेण सर्वज्ञो जगदीश्वरः ।
ओ औ पवर्गमेवं हि यो नित्यं भजतेऽनिशम् ॥ ३२ ।

तस्य सिद्धिः क्षणादेव वायवोरूपभावनात् ।
चन्द्रबीजस्योद्‌र्ध्वदेशे विभाति पूर्णतेजसा ॥ ३३ ।

लृ ए ऐ तवर्गञ्च तद्दक्षिणविधानतः ।
तेजोमयी वायुशक्तिर्ददाति सर्वमङ्गलम् ॥ ३४ ।

टवर्गं भावयेन्मन्त्री ऋ ॠ लृ स्वरसंयुतम् ।
अष्टैश्वर्यप्रदं नित्यं कमलासनसिद्धिदम् ॥ ३५ ।

तदधो भावयेद् यस्तु स भवेत् कल्पपादपः ।
भवानीबीजरूपस्य अधोगेहे विभावयेत् ॥ ३६ ।

इ ई युग्मं चवर्गञ्च भावयित्वामरो भवेत् ।
अ आ इ संयुतो नाथ कवर्गं कुरुते जयम् ॥ ३७ ।

तस्य सिद्धिः क्षणादेव वायवीरूपभावनात् ।
चन्द्रबीजस्योर्ध्वदेशे विभाति पूर्णतेजसा ॥
ट ए ऐ तवर्गञ्च तद्दक्षिणविधानतः ।
तेजोमयी वायुशक्तिर्ददाति सर्वमङ्गलम् ॥
टवर्गं भावयेन्मन्त्री ऋ ॠ ऌ स्वरसंयुतम् ।
अष्टैश्वर्यप्रदं नित्यं कमलामन्त्रसिद्धिदम् ॥
तदधो भावयेद् यस्तु स भवेत् कल्पपादपः ।
भवानीबीजरूपस्य ह्यधोगेहे विचारयेत् ॥
इ ई युग्मं चवर्गञ्च भावयित्वाऽमरो भवेत् ।
अ आ इ संयुतं चात्र कवर्गं चारुतेजसम् ॥
भावयेत् परया भक्त्या सोऽभीष्टं फलमाप्नुयात् ।
इत्येतत् कथितं ह्यत्र फलचक्रञ्च सारदम् ॥
एतच्चक्रभावनाभिः महाविद्यापतिर्भवेत् ।
कामरूपमहापीठे लिङ्गपीठे प्रयत्नतः ॥

भावयेत् परया भक्त्या सोऽभीष्टं फलमाप्नुयात् ।
इत्येतत् कथितं नाथ फलचक्रं च सारदम् ॥ ३८ ।

एतच्चक्रभावनाभिर्महाविद्यापतिर्भवेत् ।
कामरूपे महापीठे लिङ्गपीठे प्रयत्नतः ॥ ३९ ।

आज्ञाचक्रं चतुश्चक्रं भावयित्वाऽमरो भवेत् ।
महायोगी हिरण्याक्षो मासैकभावनावशात् ॥ ४० ।

सप्तद्वीपेश्वरो भूत्वा अन्ते विष्णुर्बभूव सः ।
स्थिरचेताः स योगी स्यादिति तन्त्रार्थनिश्चयः ॥ ४१ ।

एतानि चक्रसाराणि आज्ञाचक्रस्थितानि च ।
विभाव्य [1]परमानन्दैरात्मसिद्धिर्भवेद्ध्रुवम् ॥ ४२ ।

सूक्ष्मवायुप्रसादेन चिरजीवो भवेदिह ॥ ४३ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावप्रश्नार्थनिर्णये पाशवकल्पे फलचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे चतुर्वेदोल्लासे भैरवीभैरवसंवादे विंशः पटलः ॥

---

१. परमाश्च ते आनन्दाश्च, तैः विभाव्य पूर्णरूपेण विचार्य ।

अथैकविंशः पटलः

श्रीभैरव उवाच—

वद कान्ते रहस्यं मे येन सिद्धो भवेन्नरः ।
तत्प्रकारं विशेषेण देवानामपि दुर्लभम् ।। १ ।
वीरभावस्य माहात्म्यमकस्मात् सिद्धिदायकम् ।
करुणादृष्टिरानन्दा यदि चेदस्ति सुन्दरि ।। २ ।

आनन्दभैरवी उवाच—

परमानन्दसारज्ञो योगक्षेत्रप्रपालक[1] ।
रहस्यं शृणु मे नाथ महाकालज्ञ भावग ।। ३ ।
योगमार्गानुसारेण वीरभावं श्रयेत कः ।
आनन्दोद्रेकपुञ्जं तत् शक्तिवेदार्थनिर्णयम् ।। ४ ।
वेदाधीनं महायोगं योगाधीना च कुण्डली ।
कुण्डल्यधीनं चित्तं तु चित्ताधीनं चराचरम् ।। ५ ।
मनसः सिद्धिमात्रेण शक्तिसिद्धिर्भवेद् ध्रुवम् ।
यदि शक्तिर्वशीभूता त्रैलोक्यञ्च तदा वशम् ।। ६ ।
अमरः स भवेदेव सत्यं सत्यं कुलेश्वर ।
सहस्रश्लोकयोगेन वीरयोगार्थनिर्णयम् ।। ७ ।
[2]पटलैकादशक्षेमयोगेन योगमण्डलम् ।
षट्चक्रबोधिनी विद्या सहस्रदलपङ्कजम् ।। ८ ।
कैलासाख्यं सूक्ष्मपथं ब्रह्मज्ञानाय योगिनाम् ।
कथयामि महावीर क्रमशः क्रमशः शृणु ।। ९ ।
वीराणामुत्तमानाञ्च श्रद्धानां प्रहिताय च ।
साक्षात् सिद्धिकरं यद्यत् तत्सर्वं प्रवदामि ते ।। १० ।

---

१. क्षेत्रपारग—ग० ।

२. एकादशश्चासौ पटलश्चेति पटलैकादशः, पूर्वनिपातस्यानित्यत्वाद् व्यवस्था, क्षेमश्च योगश्चानयोः समाहारः, ततः षष्ठीतत्पुरुषः ।

[1]योगशास्त्रक्रमेणैव यः सिद्धिफलमिच्छति ।
स सिद्धो भवति क्षिप्रं ब्रह्ममार्गे न संशयः ।। ११ ।

ब्रह्मविद्यास्वरूपेण जपहोमार्चनादिकम् ।
कुरुते फलसिद्ध्यै यः स ब्रह्मज्ञानवान् शुचिः ।। १२ ।

षट्चक्रभेदने प्रीतिर्यस्य साधनचेतसः ।
संसारे वा वने वापि स सिद्धो भवति ध्रुवम् ।। १३ ।

षट्चक्रार्थं न जानाति यो भजेदम्बिकापदम् ।
तस्य पापं क्षयं याति सप्तजन्मसु सिद्धिभाक् ।। १४ ।

ज्ञात्वा षट्चक्रभेदञ्च यः कर्म कुरुतेऽनिशम् ।
संवत्सरात् भवेत् सिद्धिरिति तन्त्रार्थनिर्णयः ।। १५ ।

प्रस्वेदनं समाप्नोति मासत्रयनिषेवणात् ।
अष्टमासात् कल्पनाशो वत्सरात् खेचरी गतिः ।। १६ ।

प्रस्वेदमधमं प्रोक्तं कल्पनं मध्यमं स्मृतम् ।
भूमेरुत्थापनं नाथ खेचरत्वं महासुखम् ।। १७ ।

द्वात्रिंशद्ग्रन्थिभेदञ्च मूलाधारावधिस्थितम् ।
मेरुदण्डाश्रितं देशं कृत्वा ब्रह्ममयो भवेत् ।। १८ ।

सुषुम्ना बाह्यदेशे च यद् यद् ग्रन्थिपदं प्रभो ।
क्रमशः क्रमशो भित्वा खेचरो भवति ध्रुवम् ।। १९ ।

अल्पकार्ये मनो दत्वा ध्यानज्ञानविवर्जितः ।
उन्मत्तः स भवेदेव शास्त्राणां योगिराड् भवेत् ।। २० ।

[2]हिमकुन्देन्दुधवलां बालां शक्तिं महोज्ज्वलाम् ।
कलिकालफलानन्दां मूले ध्यात्वा भवेद् वशी ।। २१ ।

मूलपद्मं महाज्ञानी ध्यात्वा चारुचतुर्दले ।
कपिलाकोटिदानस्य फलं प्राप्नोति योगिराट् ।। २२ ।

---

१. मार्ग–ग० ।

२. हिमं च कुन्दश्च हिमकुन्दौ, ताभ्यां सहित इन्दुः, हिमकुन्देन्दुः, मध्यमपदलोपिसमासः । स इव धवला, 'उपमानानि सामान्यवचनैः' इति कर्मधारयसमासः ।

मूलपद्मे कोटिचन्द्रकलायुक्तं सरक्तकम् ।
[1]गलत्सुधारसामोदवदनाब्जं फलं भजेत् ।। २३ ।
निर्मलं कोटिवीरोग्रतेजसं ब्रह्मरूपिणम् ।
वामपार्श्वे कुण्डलिन्या विभाव्य शीतलो भवेत् ।। २४ ।
ततः श्रीयामलं वीरं तदाकारं तदुद्भवम् ।
ललाटवह्निजं देव्या नाथं भजति योगिराट् ।। २५ ।
तत्र पद्मपूर्वदले सिन्धूरारुणविग्रहम् ।
वकारं कोटिचपलामालं भजति योगिराट् ।। २६ ।
तत्पार्श्वे शोणितदले आज्ञाचक्रं मनोरमम् ।
यथा ध्यानं कुण्डलिन्या आज्ञाचक्रे तथात्र च ।। २७ ।
भूमिचक्रक्रमं नाथ शृणु शङ्कर योगिनाम् ।
यं ध्यात्वा सिद्धिमाप्नोति सिद्धिदं षड्गृहं भवेत् ।। २८ ।
षड्गृहं त्रिकालागेहमेकत्रस्थं महाप्रभम् ।
ध्यायेद् योगिनीगेहं मध्यगेहे रबीजकम् ।। २९ ।
वकारं दक्षिणे गेहे हेममालिनमञ्जनम् ।
डाकिनीपरमाबीजं ब्रह्मबीजं विभावयेत् ।। ३० ।
वकारवामपार्श्वे च योगिनां योगसाधनम् ।
सदाशिवमहाबीजं विभाव्य योगिराड् भवेत् ।। ३१ ।
वं बीजं वारुणाध्यक्षं हिमकुन्देन्दुनिर्मलम् ।
तद्विष्णोर्जन्मसंस्थानं सत्त्वं द्रवमुपाश्रयेत् ।। ३२ ।
तदूर्ध्वपूर्वगेहे च लं बीजमिन्द्रपूजितम् ।
विद्युल्लताहेमवर्णं विभाव्य योगिनां पतिः ।। ३३ ।
इन्द्रबीजं दक्षपार्श्वे श्रीबीजं बिन्दुलाञ्छितम् ।
स्थिरविद्युल्लतारूपमिन्द्राण्याः साधु भावयेत् ।। ३४ ।
तद्वामपार्श्वभागे च प्रणवं ब्रह्मसेवितम् ।
विभाव्य कोटिमिहिरं योगिराड् भवति ध्रुवम् ।। ३५ ।

---

१. गलँश्चासौ सुधारसश्च, गलत्सुधारसस्तस्यामोदो गलत्सुधारसामोदः, तेन पूर्णं वदनाब्जम्, मध्यमपदलोपिसमासः ।

वं बीजाधोमन्दिरे श्रीविद्यायाः बीजतेजसम् ।
[1]कोटिसूर्यप्रभाकारं विभाव्य सर्वगो भवेत् ॥ ३६ ।
निजदेव्या वामभागे अधः कनकमन्दिरे ।
श्रीगुरो रमणं बीजं ध्यात्वा वाग्भवमीश्वरम् ॥ ३७ ।
निजदेव्या दक्षपार्श्वे दीर्घप्रणवतेजसम् ।
कोटिसूर्यप्रभारूपं ध्यात्वा योगी भवेद् यतिः ॥ ३८ ।
निजदेवीं तत्र पद्मे मनःसद्वाक्ययोगकैः ।
यथा ध्यानं तथा मौनं ध्यानं कुर्याज्जगत्पतेः ॥ ३९ ।
ब्रह्मणः पूरकेणैव महायोगक्रमेण तु ।
सूक्ष्मवायूद्गमेनापि भूमिचक्रे जपञ्चरेत् ॥ ४० ।
चतुष्कोणं धरायास्तु नवभूमिगृहान्वितम् ।
अष्टगेहं विभेद्यादौ वसुशून्ये यजेद् यतिः ॥ ४१ ।
धराबीजं वान्तवर्णं शक्रेण परिपूजितम् ।
विभाव्य कुण्डलीतत्त्वं सर्वसिद्धीश्वरो भवेत् ॥ ४२ ।
भजेदिन्द्रं तत्र नाके श्वेतकुञ्जरवाहनम् ।
चतुर्बाहुं देवराजं विद्युत्पुञ्जं भवक्षयम् ॥ ४३ ।
डाकिन्या मन्दिरे कान्तं ब्रह्माणं हंसहंसगम् ।
नवीनार्कं चतुर्बाहुं चतुर्वक्त्रं भजेद् वशी ॥ ४४ ।
ब्रह्माणं डाकिनीयुक्तं सिन्दूराप्लुतभास्करम्[2] ।
परमामोदमत्तं तं विभाव्य योगिराड् भवेत् ॥ ४५ ।
विद्युल्लतावदुज्ज्वलां श्रीदेवडाकिनीं सुराट् ।
अभीक्षां रक्तनयनां हंसस्थां भावयेद् वशी ॥ ४६ ।
हंसोद्र्ध्वे कमलाबीजं सर्वालङ्कारभूषितम् ।
महालक्ष्मीस्वरूपं यत्तद् भजन्ति महर्षयः ॥ ४७ ।
इन्द्रपृथ्वीबीजवामे प्रणवं ब्रह्मसेवितम् ।
प्राणायामसिद्धिदं यत्तद् भजन्ति महर्षयः ॥ ४८ ।

---

१. कोटिसंख्याकाः सूर्याः, कोटिसूर्याः, मध्यमपदलोपिसमासः, तेषां प्रभां करोति इति विग्रहः ।
२. सिन्दूराप्लुतो भास्करो यस्येति विग्रहो बहुव्रीहौ ।

तदधः प्राणनिलयं प्रेतबीजं शशिप्रभम् ।
विभाव्य शिवतुल्यः स्याद् भूमिचक्रे सदाशिवः ॥ ४९ ॥
तदधो वाग्भवं ध्यायेत् कोटिसौदामिनीप्रभम् ।
गुरुबीजं भूमिचक्रे महाविद्यागुरुर्भवेत् ॥ ५० ॥
दक्षिणे मध्यगेहे च श्रीविद्यानिर्मलं पदम् ।
विभाव्य मानसध्यानात् सिद्धो भवति साधकः ॥ ५१ ॥
तद्दक्षिणे शेषगेहे प्रणवान्तं मनूत्तमम् ।
सर्वाधारं ब्रह्मविष्णुशिवदुर्गापदं भवेत् ॥ ५२ ॥
एतत् श्रीभूमिचक्रार्थं सर्वं चैतन्यकारकम् ।
मूलाधारपूर्वदले वकारं व्याप्य तिष्ठति ॥ ५३ ॥
भूमिचक्रमण्डले तु वकारस्थं स्मरेद्यदि ।
ब्रह्माण्डमण्डलेशः स्यादण्डं व्याप्यैकपत्रकम् ॥ ५४ ॥
तदेकपत्रं पदस्य शोणितं निर्मलद्युतिम् ।
तन्मध्यान्ते भूमिचक्रे मध्ये वं भावयेद् वशी ॥ ५५ ॥
एतच्चक्रप्रसादेन वरुणो मदिरापतिः ।
अमृतानन्दहृदयः सर्वैश्वर्यान्वितो भवेत् ॥ ५६ ॥
द्वितीये दक्षिणे पत्रे वान्तबीजं महाप्रभम् ।
मनो विधाय योगीन्द्रो ध्यायेद् योगार्थसिद्धये ॥ ५७ ॥
तत्र ध्यायेत् स्वर्गचक्रं स्वर्गशोभासमाकुलम् ।
विभाव्य स्वर्गनाथः स्याद्देवेन्द्रसदृशो भुवि ॥ ५८ ॥
पञ्चकोणं विभेद्यापि पञ्चकोणं विभाति यत् ।
तन्मध्ये वृत्तयुगलं तत्र षट्कोणगं भजेत् ॥ ५९ ॥
एतत् स्वर्गाख्यचक्रन्तु भूपुरद्वयमध्यके ।
दक्षिणोत्तरपत्रस्थे विभाव्य वान्तमीश्वरम् ॥ ६० ॥
षट्कोणान्तर्गतं वान्तं विद्युत्कोटिसमप्रभम्[1] ।
तमाश्रित्य सुराः सर्वे दशकोणे वशन्ति ते ॥ ६१ ॥

---

१. विद्युतां कोटिः, तत्समा प्रभा यस्येति बहुव्रीहिः ।

पूर्वकोणे महेन्द्रश्च सर्वदेवसमास्थितः ।
इन्द्राणीसहितं ध्यात्वा योगीन्द्रो भवति ध्रुवम् ॥ ६२ ।
तद्दक्षिणे रक्तकोणे वह्नि स्वाहान्वितं स्मरेत् ।
[1]कोटिकालानलालोलं परिवारगणान्वितम् ॥ ६३ ।
तद्दक्षिणे कामरूपी भाति शक्तियुतः प्रभुः ।
परिवारान्वितं ध्यात्वा तं मृत्युवशमानयेत् ॥ ६४ ।
नैर्ऋतं विद्युदाकारं कन्दर्पदमनं प्रियम् ।
शक्तियुक्तं स्वरानन्दं विभाव्य योगिनीपतिः ॥ ६५ ।
तदधो वरुणं ध्यात्वा सुशक्तिपरिलालितम् ।
जलानामधिपं सत्त्वं नित्यसत्त्वश्रियो भवेत् ॥ ६६ ।
तद्वामे मरुतः कोणं मरुद्गणविभाकरम् ।
वायुस्थानं लयस्थानं वायुव्याप्तं भवेत् सुधीः ॥ ६७ ।
तत्पश्चाद् गणनाथञ्च मत्तं शक्तिसमन्वितम् ।
परिवारगणानन्दं विभाव्य स्याद् गणेश्वरः ॥ ६८ ।
तत्पश्चात् परमं स्थानमीशं शक्तिसमन्वितम् ।
परिवारान्वितं ध्यात्वा कामरूपी भवेद्यतिः ॥ ६९ ।
तत्पश्चात् कोणगेहे च चन्द्रसूर्याग्नितेजसम् ।
एकरूपमूद्ध्र्वसंस्थं ब्रह्माणं भावयेद्यतिः ॥ ७० ।
इन्द्रवामकोणगेहे अनन्तं वह्निरूपिणम् ।
[2]अनन्तसदृशं ध्यात्वा अनन्तसदृशो भवेत् ॥ ७१ ।
एतत् स्वचक्रमध्ये तु वृत्तयुग्मं महाप्रभम् ।
सर्वदा वह्निना व्याप्तं ज्वलदग्नि विभावयेत् ॥ ७२ ।
वृत्तमध्ये च षट्कोणं कोणे कोणे रिपुक्षयम् ।
लोभमोहादिषट्कञ्च हरेत् षट्कोणसंस्थितान् ॥ ७३ ।
लोभं हरति इन्द्राणी मोहं हरति दण्डधृक् ।
कामं नैर्ऋतवरुणौ क्रोधं वायुश्च योगिनाम् ॥ ७४ ।

---

१. कोटिकालानल इवालोलस्तम्, 'उपमानानि सामान्यवचनैः' इति समासः कर्मधारयः ।
२. अनन्तेन सदृशम्, 'पूर्वसदृशसमानार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति समासः ।

मदं हरेदधीशश्च ब्रह्मानन्तौ हि योगिनाम् ।
मात्सर्यं संहरत्येव मासत्रयनिषेवणात् ।। ७५ ।
षट्कोणमध्यदेशस्थं वान्तबीजं शशिप्रभम् ।
स्वर्णालङ्कारजडितं भावयेद् योगसिद्धये ।। ७६ ।
सदा व्याप्तं कुण्डलिन्या पालितं मण्डितं सुधीः ।
तैले यथा दीपपुञ्जं विभाव्य योगिराड् भवेत् ।। ७७ ।
स्वयंभूलिङ्गं तत्रैव विभाव्य चन्द्रमण्डलम् ।
आप्लुतं कारयेन्मन्त्री कुण्डलीसहितं वशी ।। ७८ ।
एवं क्रमेण सिद्धः स्यात् कुण्डल्याकुञ्चनेन च ।
सदाभ्यासी महायोगी संस्थाप्य वायवीं ततः ।। ७९ ।
वायव्याभासयुक्तेन एतच्चक्राश्रयेण च ।
मूकोऽपि वाक्पतिर्भूयात् फलभागी दिने दिने ।। ८० ।
तृतीयदलमाहात्म्यं योगिज्ञानोदयं परम् ।
भावसिद्धिर्भवेत्तस्य यो भजेदात्मचिन्तनम् ।। ८१ ।
दलमध्ये तुलाचक्रं चतुष्कोणो गृहाणि च ।
द्वात्रिंशद्ग्रन्थिरूपाणि सन्ति ग्रन्थिविभेदने ।। ८२ ।
तुलाचक्रस्य नाडीभिर्द्वात्रिंशद्ग्रन्थिभेदनम्[1] ।
गलदेशावधि ध्यानं मेरुमध्ये प्रकारयेत् ।। ८३ ।
द्वात्रिंशद्ग्रन्थिगेहस्य मध्ये वृत्तत्रयं शुभम् ।
तन्मध्ये च त्रिकोणे च खं मूर्द्धन्यं भजेद् वशी ।। ८४ ।
एतद्गेहे विभाव्यानि वर्णजालफलानि च ।
दक्षिणावर्तयोगेन विभाव्य वाक्पतिर्भवेत् ।। ८५ ।
अकारमाद्यगेहे च अनुस्वारं द्वितीयके ।
विसर्गन्तु तृतीये च यो भजेत्स भवेद्वशी ।। ८६ ।
एतदन्यमन्दिरेषु कादिहान्तं विभावयेत् ।
वादिसान्तं वर्जयित्वा सबिन्दुं स भवेद्वशी ।। ८७ ।

---

१. द्वात्रिंशत्संख्याकग्रन्थीनां भेदनमिति—मध्यमपदलोपिसमासगर्भः षष्ठीतत्पुरुषः ।

आज्ञाचक्रे यथानामफलं प्राप्नोति साधकः ।
वर्णानां मूलपद्मे तु तत्फलं हि तुलागृहे ॥ ८८ ।

भजेन्मध्यं सकारस्य त्रिवृत्तस्थ त्रिकोणके ।
[1]ज्वालामालसहस्राढ्यं स्वर्णालङ्कृतमाश्रयेत् ॥ ८९ ।

प्रत्येकवर्णपुटितं तुलाचक्रे च मौनवान् ।
मौनं जपं यः करोति षकारं व्याप्य योगिराट् ॥ ९० ।

एतद्योगप्रसादेन चैतन्या कुण्डली भवेत् ।
वाक्सिद्धिश्च भवेत्तस्य तापत्रयविनाशिनी ॥ ९१ ।

सिद्धिर्मन्त्रस्य वर्णानां जपमात्रेण शङ्कर ।
तुलाचक्रान्तरस्थानं विभाव्य मन्त्रसिद्धिभाक् ॥ ९२ ।

एतच्चक्रं विना नाथ कुण्डली नापि सिद्ध्यति ।
भावज्ञानं विना कुत्र योगी भवति भारते ॥ ९३ ।

अथान्यदलमाहात्म्यं शृणु वक्ष्यामि तत्त्वतः ।
योगसञ्चारसारं यत् कुण्डलीशक्तिसाधनम् ॥ ९४ ।

शक्तिबीजं बिन्दुयुक्तम् अष्टकोणस्थनिर्मलम् ।
विद्युत्पुञ्जं स्वर्णमालावेष्टितं भावयेद्यतिः ॥ ९५ ।

चतुष्कोणं विभेद्यापि चतुष्कोणं मनोहरम् ।
तन्मध्ये च चतुष्कोणं सबीजं भावयेत्ततः ॥ ९६ ।

कोटिसूर्यसमां देवीं कुण्डलीदेवमातरम् ।
पादाङ्गुष्ठावधि ध्यात्वा सर्वसिद्धीश्वरो भवेत् ॥ ९७ ।

यदि वारिचक्रमध्ये ध्यानं कुर्वन्ति मानुषाः ।
अमराः सत्त्वयोगस्थाः षट्चक्रफलभोगिनः ॥ ९८ ।

तच्चतुष्कं समावाप्य वारिव्याप्तं सुनिर्मलम् ।
वामावर्तस्थितं ध्यायेत् सप्तखण्डं महाबली ॥ ९९ ।

---

१. ज्वालानां मालाः ज्वालामालाः, तासां सहस्रेणाढ्या, इति विग्रहः । ङ्यापोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वः, छन्दोऽनुरोधात् ।

सप्तवृत्तोपरि ध्यायेद् दलषोडशपङ्कजम् ।
दले दले महातीर्थं सिद्धो भवति निश्चितम् ॥ १०० ।
तीर्थमालावृतं नाथ दलं षोडशशोभितम् ।
तदेकपत्रमध्ये तु भाति विद्युल्लतान्वितम् ॥ १०१ ।
पूर्वादौ दक्षिणे पातु तीर्थमालाफलं श्रृणु ।
येषां दर्शनमात्रेण जीवन्मुक्तस्तु साधकः ॥ १०२ ।
गङ्गा गोदावरी देवी गया गुह्या महाफला ।
यमुना कोटिफलदा बुद्धिदा च सरस्वती ॥ १०३ ।
मणिद्वीपं श्वेतगङ्गा महापुण्या महाफला ।
श्वेतगङ्गा महापुण्या भर्गगङ्गा महाफला ॥ १०४ ।
स्वर्गगङ्गा महाक्षेत्रं पुष्करं तीर्थपारणम् ।
कावेरी सिन्धुपुण्या च नर्मदा शुभदा सदा ॥ १०५ ।
अष्टकोणे अष्टसिद्धि वारिपूर्णां फलोदयाम् ।
सप्तकोणे सप्तसिन्धुं पूर्वादौ भावयेद् यतिः ॥ १०६ ।
[1]लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः ।
सकारं व्याप्य तिष्ठन्ति महासत्त्वं स्मरेद् यतिः ॥ १०७ ।
मध्ये चतुष्के शक्तिञ्च कोटिसौदामिनीतनुः ।
विभाव्य वारिचक्रे तु कोटिविद्यापतिर्भवेत् ॥ १०८ ।
शक्तिबीजं वामभागे आद्या प्रकृतिसुन्दरी ।
विभाति कामनाशाय योगिनी सा सताङ्गतिः ॥ १०९ ।
शक्तिबीजं दक्षिणे च पुङ्कला पुंशिवात्मकम् ।
सदा भावनरूपाभं यो भजेदीशसिद्धये ॥ ११० ।
शक्तिबीजस्योद्र्ध्वभागे पूर्णचन्द्रमनोहरम् ।
भजन्ति साधवः सर्वे धर्मकामार्थसिद्धये ॥ १११ ।
शक्तिबीजतले गेहे श्रीसूर्यं कालवह्निजम् ।
उल्काकोटिसमं ध्यात्वा वाञ्छातिरिक्तमाप्नुयात् ॥ ११२ ।

---

१. लवणेक्षुसुरासर्पिर्दधिदुग्धजलानामन्तं कुर्वन्ति इति विग्रहः । तत्करोति इति ण्यन्तात् ण्वुल्-प्रत्ययः । अन्तशब्दोऽत्र बन्धनवाची । तेन समुद्रोऽर्थः फलति ।

वारिचक्रप्रसादेन चिरजीवी भवेन्नरः ।
भूमौ महाकालरूपी मूलाधारे चतुर्द्दले ।। ११३ ।

चतुर्द्दलशेषदले वारिचक्रं सषान्तकम् ।
[1]कोटिसौदामिनीभासं विभाव्य योगिराड् भवेत् ।। ११४ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थनिर्णये पाशवकल्पे मूलपद्मोल्लासे भूमिचक्र-स्वर्गचक्र-तुलाचक्र-वारिचक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवभैरवीसंवादे एकविंशः पटलः ।।

●

---

१. कोटिसंख्याकाः सौदामिन्यः, तासां भासा प्रभा इव भासा यस्य वारिचक्रस्येति बहुव्रीहिः ।

अथ द्वाविंशः पटलः

श्रीआनन्दभैरवो उवाच—

शृणु शम्भो प्रवक्ष्यामि षट्चक्रस्य फलोदयम् ।
यज्ज्ञात्वा योगिनः सर्वे चिरं तिष्ठन्ति भूतले ॥ १ ।
मूलाधारं महापद्मं चतुर्दलसुशोभितम् ।
वादिसान्तं स्वर्णवर्णं शक्तिब्रह्मप्रदं व्रजेत् ॥ २ ।
क्षित्यप्तेजोमरुद्व्योममण्डलं षट्सु पङ्कजे ।
क्रमेण भावयेन्मन्त्री मूलविद्याप्रसिद्धये ॥ ३ ।
मूलपद्मोद्ध्र्वदेशे च स्वाधिष्ठानं महाप्रभम् ।
षड्दलं राकिणीं विष्णुं कर्णिकायां स्मरेद्यतिः ॥ ४ ।
षड्दलं बादिलान्तं च वर्णं ध्यात्वा सुराधिपः ।
कन्दर्पवायुना व्याप्तलिङ्गमूले भजेद्यतिः ॥ ५ ।
तदूर्ध्वे नाभिमूले च मणिकोटिसमप्रभम् ।
दशदलं योगधर्मं डादिफान्तार्थगं भजेत् ॥ ६ ।
लाकिनीसहितं रुद्रं ध्यायेद्योगादिसिद्धये ।
महामोक्षपदं दृष्ट्वा जीवन्मुक्तो भवेद् ध्रुवम् ॥ ७ ।
बन्धूकपुष्पसंकाशं [1]दलद्वादशशोभितम् ।
कादिठान्तार्णसहितमीश्वरं काकिनीं भजेत् ॥ ८ ।
तदूर्ध्वे षोडशोल्लासपदे साक्षात् सदाशिवम् ।
महादेवीं साकिनीगं कण्ठे ध्यात्वा शिवो भवेत् ॥ ९ ।
विशुद्धाख्यं महापुण्यं धर्मार्थकाममोक्षदम् ।
धूम्रधूमाकरं विद्युत्पुञ्जं भजति योगिराट् ॥ १० ।
आज्ञानामोत्पलं शुभ्रं हिमकुन्देन्दुमन्दिरम् ।
हंसस्थानं बिन्दुपदं द्विदलं भ्रूकुटे भजेत् ॥ ११ ।

---

१. द्वादशशब्दस्य संख्यापरत्वमभ्युपेत्य दलशब्देन षष्ठीतत्पुरुषः । अथवा—द्वादशसंख्याकानि दलानि इति मध्यमपदलोपिसमासे पूर्वनिपातव्यत्यासेन दलद्वादशेति सिध्यति, तैः शोभितमिति ।

लक्षवर्णद्वयाढ्यं यद् बिन्दुयुक्तं मनोलयम् ।
तयोः स्त्रीपुंप्रकृत्याख्यं कोटिचन्द्रोज्ज्वलं भजेत् ।। १२ ।
कण्ठे षोडशपत्रे च षोडशस्वरवेष्टितम् ।
अकारादिविसर्गान्तं विभाव्य कुण्डलीं नयेत् ।। १३ ।
आज्ञाचक्रे समानीय कोटिचन्द्रसमोदयाम् ।
कण्ठाधारां कुण्डलिनीं जीवन्मुक्तो भवेदिह ।। १४ ।
यदि श्वासं न त्यजति बाह्यचन्द्रमसि प्रभो ।
भ्रूमध्ये चन्द्रनिकरे त्यक्त्वा योगी भवेदिह ।। १५ ।
सूक्ष्मवायूद्गमेनैव त्यजेद् वायुं मुहुर्मुहुः ।
सहस्रादागतं मूले मूलात्तत्रैवमानयेत् ।। १६ ।
चन्द्रः सूर्ये लयं याति सूर्यश्चन्द्रमसि प्रभो ।
यो बाह्ये नानयेत् शब्दं तस्य बिन्दुचयो भवेत् ।। १७ ।
यावद् बाह्ये चन्द्रमसि मनो याति रविप्लुते ।
अन्तर्गते चन्द्रसूर्ये न तस्य दुरितं तनौ ।। १८ ।
केवलं सूक्ष्मवायुस्थं वायवीशक्तिलालितम् ।
मानसं यः करोतीति तस्य योगादिवर्द्धनम् ।। १९ ।
प्राप्ते यज्ञोपवीते यः श्रीधरो ब्राह्मणोत्तमः ।
योगाभ्यासं सदा कुर्यात् स भवेद्योगिवल्लभः ।। २० ।
यावत्कालं स्थितं बिन्दुं बाल्यभावे यथा यथा ।
तथा तथा योगमार्गं बिन्दुपातान्मरिष्यति ।। २१ ।
तथापि यदि मासं वा पक्षं वा दशभिर्द्दिनम् ।
यदि तिष्ठति बिन्दूग्रः साक्षादभ्यासतो जयी ।। २२ ।
[1]कामानलमहापीडाविशिष्टः पुरुषो यदा ।
तत्कामादिसंहरणे विना योगेन कः क्षमः ।। २३ ।
समसंसर्गगूढेन कामो भवति निश्चितम् ।
तत्कामात् क्रोध उत्पन्नो महाशत्रुर्विनाशकृत् ।। २४ ।

१. कामानामनलेन महापीडा, तया विशिष्ट इति तत्पुरुषसमासः ।

क्रोधाद्भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशाद् विनाशनम् ॥ २५ ।
अतः सम्बुद्धिमाधार्य मूलादिब्रह्ममण्डले ।
ध्यात्वा श्रीनाथपादाब्जं सिद्धो भवति साधकः ॥ २६ ।
ईश्वरस्य कृपाचिह्नमादौ शान्तिर्भवेद् हृदि ।
शान्तिभिर्जायते ज्ञानं ज्ञानान्मोक्षमवाप्नुयात् ॥ २७ ।
शान्तिर्विद्या प्रतिष्ठा च निवृत्तिरिति ताः स्मृताः ।
चतुर्व्यूहस्ततो देवः प्रोच्यते परमेश्वरः ॥ २८ ।
इदं ज्ञानमिदं ज्ञेयमिति चिन्तासमाकुलाः ।
पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः ॥ २९ ।
शिरो वहति पुष्पाणि गन्धं जानाति नासिका ।
पठन्ति मम तन्त्राणि दुर्लभा भावबोधकाः ॥ ३० ।
यज्ञोपवीतकाले तु पशुभावाश्रयो भवेत् ।
यावद्योगं न सम्प्राप्तं तावद् वीराचरं न च ॥ ३१ ।
आचारो विनयो विद्या प्रतिष्ठा योगसाधनम् ।
तस्यैव जायते सिद्धिरिष्टपादाम्बुजे मतिः ॥ ३२ ।
देवे गुरौ महाभक्तिर्यस्य नित्यं विवर्धते ।
संवत्सरात्तस्य सिद्धिर्भवत्येव न संशयः ॥ ३३ ।
वेदागमपुराणानां सारमालोक्य यत्नतः ।
मनः संस्थापयेदिष्टपादाम्भोरुहमण्डले ॥ ३४ ।
चेतसि क्षेत्रकमले षट्चक्रे योगनिर्मले ।
मनो निधाय मौनी यः स भवेद् योगवल्लभः ॥ ३५ ।
मनः करोति कर्माणि मनो लिप्यति पातके ।
मनःसंयमनी भूत्वा पापपुण्यैर्न लिप्यते ॥ ३६ ।

श्रीभैरव उवाच—

वद कान्ते रहस्यं मे येन सिद्धो भवेन्नरः ।
तत्प्रकारं विशेषेण योगिनामप्यगोचरम् ॥ ३७ ।

यत्रैव [1]गोपयेद्यद्यदानन्देन निरीक्षयेत् ।
पूजयेद् भावयेच्चैव वर्जयेन्न जुगुप्सयेत् ॥ ३८ ।

क्रमेण वद तत्त्वञ्च यदि स्नेहोऽस्ति [2]मां प्रति ।
[3]न ज्ञात्वापि च भूतत्त्वं योगी मोहाश्रितो भवेत् ॥ ३९ ।

आनन्दभैरवो उवाच—

त्रैलोक्ये योगयोग्योऽसि षट्चक्रभेदने रतः ।
त्वमेव परमानन्द महाधिष्ठाननिर्मल ॥ ४० ।

संघातयेन्महावीर एतान्दोषान्महाभयान् ।
कामक्रोधलोभमोहमदमात्सर्यसञ्ज्ञकान् ॥ ४१ ।

संघातयेन्महावीरो विकारं चेन्द्रियोद्भवम् ।
निद्रा-लज्जा-दौर्मनस्यं दशकालानलान् प्रभो ॥ ४२ ।

संगोपयेन्महावीरो महामन्त्रं कुलक्रियाम् ।
मुद्राक्षसूत्रतन्त्रार्थं गोपिनां वीरसङ्गमम् ॥ ४३ ।

अत्याचारं भैरवाणां योगिनीनां च साधनम् ।
नाडीग्रथनमानञ्च गोपयेन्मातृजारवत् ॥ ४४ ।

न निन्देत् प्राणनिधने देवतां गुरुमीश्वरम् ।
सुरां विद्यां महाक्षेत्रं पीठं योगाधिकारिणम् ॥ ४५ ।

योगिनो जडमुन्मत्तं जन्मकर्मकुलक्रियाम् ।
प्रयोगे धर्मकर्तारं न निन्देत् प्राणसंस्थितौ ॥ ४६ ।

पत्नीं भ्रातृवधूञ्चैव बौद्धाचारञ्च योगिनीम् ।
कर्म शुभाशुभञ्चैव महावीरो न निन्दयेत् ॥ ४७ ।

निरीक्षयेन्न कदापि कन्यायोनिं दिने रतिम् ।
पशुक्रीडां [4]दिग्वसनां कामिनीं [5]प्रकटस्तनीम् ॥ ४८ ।

---

१. घातयेत्—क० ।
२. योगिनी—ग० ।
३. अज्ञात्वा पीठतत्त्वं च—ग० ।
४. विवसनाम्—ग० ।
५. प्रकटौ स्तनौ यस्याः सा, ताम् ।

विग्रहं द्यूतपाशार्थं क्लीबं विष्ठादिकं शुचौ ।
अभिचारभारञ्च क्रियामप्रमत्तस्य[१] नेक्षयेत् ।। ४९ ।

पूजयेत्परया भक्त्या देवतां गुरुमीश्वरम् ।
शक्तिं साधुमात्मरूपं स्थूलसूक्ष्मं प्रयत्नतः ।। ५० ।

अतिथिं मातरं सिद्धं पितरं योगिनं तथा ।
पूजयेत् परया भक्त्या सिद्धमन्त्रं सुसिद्धये ।। ५१ ।

भावयेदेकचित्तेन साधूक्तं योगसाधनम् ।
गुरोर्वाक्योपदेशं च स्वधर्मं तीर्थदेवताम् ।। ५२ ।

कुलाचारं [२]वीरमन्त्रमात्मानं परमेष्ठिनम् ।
भावयेद्विधिविद्यां च तन्त्रसिद्धार्थनिर्णयम् ।। ५३ ।

वर्जयेत् साधकश्रेष्ठोऽगम्यागमनादिकम् ।
धूर्तसङ्गं वञ्चकञ्च प्रलापमनृताशुभम् ।। ५४ ।

वर्जयेत् पापगोष्ठीयमालस्यं बहुजल्पनम् ।
अवेदकर्मसञ्चारं गोसवं[३] ब्राह्मणस्य च ।। ५५ ।

जुगुप्सयेन्न कदापि विण्मूलं क्लेदशोणितम् ।
हीनाङ्गीं पिशितं नाथ कपालाहरणादिकम् ।। ५६ ।

सुरां गोपालनञ्चैव निजपापं रिपोर्भयम् ।
जुगुप्सयेन्न सुधर्म्मं यदि सिद्धिमिहेच्छति ।। ५७ ।

समयाचारमेवेदं योगिनां वीरभाविनाम् ।
गुर्वाज्ञया यः करोति जीवन्मुक्तो भवेद् भुवि ।। ५८ ।

वृथा धर्मं वृथा चर्यं वृथा दीक्षा वृथा तपः ।
वृथा सुकृतमाख्येति गुर्वाज्ञालङ्घनं नृणाम् ।। ५९ ।

ब्राह्मणक्षत्रियादीनामादौ योगादिसाधनम् ।
पश्चात् कुलक्रिया नाथ [४]योगविद्याप्रसिद्धये ।। ६० ।

---

१. अज्ञस्य—क० । २. तन्त्रम्—ग० ।
३. गोरसम्—ग० । ४. योगस्य विद्या, तस्याः प्रकर्षेण सिद्धिस्तस्यै ।

विना भावेन वीरेण पूर्णयोगी कुतो भवेत् ।
आदौ कुर्यात् पशोर्भावं पश्चात् कुलविचारणम् ।। ६१ ।

मम तन्त्रे महादेव केवलं सारनिर्णयम् ।
अकस्माद्भक्तिसिद्ध्यर्थं कुलाचारं च योगिनाम् ।। ६२ ।

ब्राह्मणानां कुलाचारं केवलं ज्ञानसिद्धये ।
ज्ञानेन जायते योगी योगादमरविग्रहः ।। ६३ ।

भूत्वा योगी कुलीनश्च योगाभ्यासमहर्निशम् ।
षट्चक्रं भूतनिलयं भावयेद्भावसिद्धये ।। ६४ ।

मूलपद्मस्योद्र्ध्वदेशे लिङ्गमूले महाशुचिः ।
स्वाधिष्ठाने महापद्मं पद्दले वायुना यजेत् ।। ६५ ।

एतत् षड्दलवर्णानां भावनां यः करोति हि ।
तस्य साक्षाद्भवेद्विष्णुः राकिणीसहितः प्रभो ।। ६६ ।

स्वाधिष्ठानषड्दलस्य कर्णिकामध्यमण्डले ।
दलाष्टकं भावयित्वा नागयुक्तं स ईश्वरः ।। ६७ ।

अष्टौ नागा अष्टदले प्रतिभान्ति यथारुणाः ।
जलस्योपरि पद्मे च ध्यायेत्तन्नागवल्लभाम् ।। ६८ ।

अनन्तं वासुकिं पद्मं महापद्मं च तक्षकम् ।
कुलीरं कर्कटं शङ्खं दक्षिणादौ दले भजेत् ।। ६९ ।

अष्टदलोपरि ध्यायेत् कर्णिकावृत्तयुग्मकम् ।
तदूर्ध्वे षड्दलं वादिलान्तयुक्तं सबिन्दुकम् ।। ७० ।

पूर्वादिक्रमयोगेन दक्षिणावर्त्तवायुना ।
पुनः पुनः कुम्भयित्वा ध्यायेत् षड्वर्णवायवीम् ।। ७१ ।

केशरं युगलं ध्यायेत् कुलोर्ध्वे साकृतिं मुदा ।
अष्टदले षड्दले च विभाव्य योगिराड् भवेत् ।। ७२ ।

अष्टदलस्योर्ध्वदेशे वृत्तयुग्मं मनोहरम् ।
तस्योपरि पुनर्ध्यायेत् षड्दले वादिलान्तकम् ।। ७३ ।

दलाष्टकाधो ध्यायेद्यो वृत्तयुग्मं मनोहरम् ।
वृत्ताधोमण्डलाकारं वं बीजं व्याप्य तिष्ठति ।। ७४ ।

वृत्तलग्नं समाव्याप्तं यं बीजं विद्युदाकरम् ।
कोटिसूर्यसमाभासं विभाव्य योगिनां पतिः ।। ७५ ।

यान्तबीजकलानान्तु अधःषट्कोणमण्डलम् ।
षट्कोणे दक्षिणादौ च भावयेद् यादिलान्तकम् ।। ७६ ।

तत्षट्कोणमध्यदेशे षट्कोणं धूम्र[1]मण्डलम् ।
तत्कोणे दक्षिणादौ च द्रव्यादिषट्कमाश्रयेत् ।। ७७ ।

द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकम् ।
समवायं क्रमेणैव षट्कोणेषु विभावयेत् ।। ७८ ।

पूर्वादिक्रमयोगेन दक्षिणावर्तवायुना ।
सर्वत्र भावयेन्मन्त्री कुम्भयित्वा पुनः पुनः ।। ७९ ।

द्रव्यषट्कोणमध्ये तु षट्कोणं चारुतेजसम् ।
कोणे कोणे च षड्वर्गान् भावयेत् स्थिरचञ्चलान् ।। ८० ।

तन्मध्ये च त्रिकोणे च राकिणीसहितं हरिम् ।
कोटिचन्द्रमरीचिस्थं ध्यायेद्योगी विशालधीः ।। ८१ ।

षड्दलान्तर्गतं पद्मं योगिनामपि साधनम् ।
यो नित्यं कुरुतेऽभ्यासं तस्य योगः प्रसिद्ध्यति ।। ८२ ।

एतच्चक्रप्रसादेन नीरोगी निरहंकृतः ।
सर्वज्ञो भवति क्षिप्रं श्रीनाथपदभावनात् ।। ८३ ।

ज्योतीरूपं योगमार्गं सूक्ष्मातिसूक्ष्मनिर्मलम् ।
त्रैलोक्यकामनासिद्धिं षट्चक्रे भावयेद्धरिम् ।। ८४ ।

यो हरिः शेषशम्भुश्च यः शम्भुः सूक्ष्मरूपधृक् ।
सूक्ष्मरूपस्थितो ब्रह्मा ब्रह्माधीनमिदं जगत् ।। ८५ ।

---

१. धूम्रतेजसम्-क० ।

एकमूर्त्तिस्त्रयो देवा ब्रह्मविष्णुपितामहाः ।
मम विग्रहसंश्लिष्टाः सृजत्यवति हन्ति च ॥ ८६ ।

प्राणायामोद्‍गता एते योगविघ्नकराः सदा ।
प्राणायामेन निष्पीड्य प्रसभं सिद्धिमाप्नुयात् ॥ ८७ ।

अकारं ब्रह्मणो वर्णं शब्दरूपं महाप्रभम् ।
प्रणवान्तर्गतं नित्यं योगपूरकमाश्रयेत् ॥ ८८ ।

उकारं वैष्णवं वर्णं शब्दभेदिनमीश्वरम् ।
प्रणवान्तर्गतं सत्त्वं योगकुम्भकमाश्रयेत् ॥ ८९ ।

मकारं शाम्भवं रूपं बीजभूतं विधूद्‍गतम् ।
प्रणवान्तस्थितं कालं लयस्थानं समाश्रयेत् ॥ ९० ।

[1]वर्णत्रयविभागेन प्रणवं परिकल्पितम् ।
प्रणवाज्जायते हंसो हंसः सोऽहं परो भवेत् ॥ ९१ ।

सोऽहं ज्ञानं महाज्ञानं योगिनामपि दुर्लभम् ।
निरन्तरं भावयेद्यः स एव परमो भवेत् ॥ ९२ ।

हं पुमान् श्वासरूपेण चन्द्रेण प्रकृतिस्तु सः ।
एतद्धंसं विजानीयात् सूर्यमण्डलभेदकम् ॥ ९३ ।

विपरीतक्रमेणैव सोऽहं ज्ञानं यदा भवेत् ।
तदैव सूर्यगः सिद्धः [2]स्वधास्वरप्रपूजितः ॥ ९४ ।

हकारार्णं सकारार्णं लोपयित्वा ततः परम् ।
सन्धि कुर्यात्ततः पश्चात् प्रणवोऽसौ महामनुः ॥ ९५ ।

एतद् हंसं महामन्त्रं स्वाधिष्ठाने मनोगृहे ।
मनोरूपं भजेद्यस्तु स भवेत् सूर्यमध्यगः ॥ ९६ ।

---

१. वर्णत्रयस्य अकारोकारमकारेति त्रयस्य ।
२. स्यात् सुरासुरप्रपूजितः–ग० ।

हंसं सूर्यं विजानीयात् सोऽहं चन्द्रो न संशयः ।
विपरीतो यदा भूयात्तदैव मोक्षभाग् भवेत् ॥ ९७ ।

यदि हंसमनोरूपं स्वाधिष्ठाने हरेः पदे ।
विभाव्य श्रीगुरोः पादे नीयते नात्र संशयः ॥ ९८ ।

सोऽहं यदा शक्तिकूटं अकाराकारसम्पुटम् ।
कृत्वा जपति यो ज्ञानी स भवेत् कल्पपादपः ॥ ९९ ।

जपहोमादिकं सर्वं हंसेन यः करोति हि ।
तदैव चन्द्रसूर्यंस्यात् हंसमन्त्रप्रसादतः ॥ १०० ।

एतज्जपं महादेव देहमध्ये करोम्यहम् ।
एकविंशसहस्राणि षट्शतानि च हंमनुः ॥ १०१ ।

पुंरूपेण हकारञ्च स्त्रीरूपेण सकारकम् ।
जप्त्वा रक्षां करोतीह [1]चन्द्रबिन्दुशतेन च ॥ १०२ ।

प्रणवान्तं महामन्त्रं नित्यं जपति यो नरः ।
वायुसिद्धिर्भवेत्तस्य वायवी सुकृपा भवेत् ॥ १०३ ।

बृहद् हंसं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।
कामरूपो [2]क्षणादेव वाक्सिद्धिरिति निश्चितम् ॥ १०४ ।

आदौ प्रणवमुच्चार्य ततो हंसपदं लिखेत् ।
तत्पश्चात् प्रणवं ज्ञेयं ततः परपदं स्मरेत् ॥ १०५ ।

[3]तर्पयामि पदस्यान्ते प्रणवं फडिति स्मरेत् ।
[4]एतद्धि हंसमन्त्रस्तु वीराणामुदयाय च ॥ १०६ ।

बृहद् हंसप्रसादेन षट्चक्रभेदको भवेत् ।
षट्चक्रे च प्रशंसन्ति सर्वे देवाश्चराचराः ॥ १०७ ।

---

१. चन्द्रबिन्दुः–ग० । २. कुलादेव–ग० ।
३. परमान्ते हंसपदं ततः प्रणवमेव च–क० ।
४. फडितिमन्त्रस्मरणमेव, एतदित्यस्यार्थः ।

योगसिद्धि विघाताय[1] भ्रमन्ति योगिनस्तनौ ।
यदि हंसं बृहद्धंसं जपन्ति वायुसिद्धये ।। १०८ ।

तदा सर्वे पलायन्ते राक्षसान्मानुषा यथा ।। १०९ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसङ्केते योगशिक्षाविधिनिर्णये सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे द्वाविंशः पटलः ।।

●

१. विदाया मे भ्रमन्ति क्रोधिनस्तनौ–ग० ।

अथ त्रयोविंशः पटलः

[1]श्रीभैरवी उवाच—

अथातः सम्प्रवक्ष्यामि ब्रह्ममार्गमनुत्तमम् ।
यद् यज्ज्ञात्वा सुराः सर्वे जयाख्याः [2]परमं जगुः ॥ १ ।

न तन्तेजःप्रकाशाय[3] महतां धर्मवृद्धये ।
योगाय योगिनां देव[4] भक्षप्रस्थनिरूपणम् ॥ २ ।

योगाभ्यासं यः करोति न जानातीह भक्षणम् ।
कोटिवर्षसहस्रेण न योगी भवति ध्रुवम् ॥ ३ ।

अतो वै भक्षमाहात्म्यं प्रवदामि[5] समासतः ।
यज्ज्ञात्वा सिद्धिमाप्नोति स्वाधिष्ठानादिभेदनम् ॥ ४ ।

आदौ विवेकी यो भूयाद् भूतले परमेश्वर ।
स एव भक्षनियमं[6] गृहेऽरण्ये समाचरेत् ॥ ५ ।

[7]वाय्वासनदृढानन्दपरमानन्दनिर्भरः ।
मिताहारं सदा कुर्यात् पूरकाह्लादहेतुना ॥ ६ ।

तदा पूरकसिद्धिः स्याद् भक्षणादिनिरूपणात् ।
उदरं पूरयेन्नित्यं कुम्भयित्वा पुनः पुनः ॥ ७ ।

निजहस्तप्रमाणाभिः[8] पूरयेत् पूर्णमेव च ।
तत्पूरयेत् स्थापयेन्नाथ विश्वामित्रकपालके ॥ ८ ।

---

१. भैरवी उवाच–ग० ।
२. परमा जगुः–क० ।
३. मनः स्थैर्य-क० ।
४. नाथ–क० ।
५. प्रवक्ष्यामि–क० ।
६. भक्षणोयञ्च–क० ।
७. वाय्वासने दृढानन्द एव परमानन्दः, तत्र निर्भरः ।
८. प्रमाणेनाभिप्रस्थं पूर्णमेव च-क० ।

हंसद्वादशवारेण शिलायामपि घर्षयेत् ।
नित्यं तत्पात्रपूर्णं च [1]पाकेनैकेन भक्षयेत् ॥ ९ ।

तण्डुलान् शालिसम्भूतान्कपालप्रस्थपूर्णकान् ।
दिने दिने क्षयं कुर्याद्भक्षणादिषु कर्मसु ॥ १० ।

हंसद्वादशवारेण जपेन संक्षयं चरेत् ।
शिलायां तत्कपालं च वर्द्धयेत् पूरकादिकम्[2] ॥ ११ ।

यावत्कालं क्षयं याति निजभक्षणनिर्णयम् ।
तत्कालं वायुनापूर्य [3]नोदरं कालचञ्चुभिः ॥ १२ ।

आकुञ्चयेत् सदा मूले कुण्डली भक्षधारणात्[4] ।
[5]तत्र सम्पूरयेद्योगी भक्षप्रस्थावनाशनात् ॥ १३ ।

कालक्रमेण तत् सिद्धिमवाप्नोति जितेन्द्रियः[6] ।
यत्स्थानं भक्षणस्यैव तत्स्थाने पूरयेत्सुखम् ॥ १४ ।

पुनः[7] पुनर्भक्षणेन[8] भक्षसिद्धिमुपैति हि ।
विना पूरकयोगेन भक्षणं नापि सिद्धयति ॥ १५ ।

अथवान्यप्रकारेण भक्षत्यागं विनिर्णयम् ।
येन हीना न सिद्धयन्ति [9]नाडीचक्रस्थदेवताः ॥ १६ ।

[10]द्वात्रिंशद्ग्रासमादाय त्रिपर्व्वणि यथास्थितम् ।
अर्द्धग्रासं विहायापि नित्यं भक्षणमाचरेत् ॥ १७ ।

सदा सम्पूरयेद् वायुं भात्रको गतभीर्महान् ।
भक्षस्थाने समायोज्य पिबेद् वायुमहर्निशम् ॥ १८ ।

---

१. वायुनैकेन–क० । २. पूरकानिलम्–क० ।
३. सोदरम्–क० । ४. वारणात्–क० ।
५. तत्र सम्पूरयेत् योगी भक्षणस्य विनाशनात्–अ० पा० क० ।
६. निजेन्द्रियः–क० । ७. यत् स्थानं भक्षणस्यैव तत्स्थानं पूरयेत्सुखम्–क० ।
८. प्रमादेव–क० । ९. चक्रस्य–ग० ।
१०. द्वात्रिंशतसंख्याको ग्रासः, ग्रासससमुदायः, अनया रीत्या अर्थबोधः कार्यः ।

[1]चतु:षष्टिदिने सर्वं क्षयं कृत्वा ततः सुधीः ।
पयोभक्षणमाकुर्यात् स्थिरचेता जितेन्द्रियः ॥ १९ ।

पयः प्रमाणं वक्ष्यामि हस्तप्रस्थत्रयं त्रयम् ।
शनैः शनैर्विजेतव्याः प्राणा मत्तगजेन्द्रवत् ॥ २० ।

षण्मासाज्जायते सिद्धिः पूरकादिषु लक्षणम् ।
क्रमेणाष्टाङ्गसिद्धिः स्यात् यतीनां कामरूपिणाम् ॥ २१ ।

बद्धपद्मासनं कृत्वा विजयानन्दनन्दितः ।
धारयेन्मारुतं मन्त्री मूलाधारे मनोलयम्[2] ॥ २२ ।

अथासनप्रभेदञ्च शृणु मत्सिद्धिकाङ्क्षिणाम् ।
येन विना पूरकाणां सिद्धिभाक् न महीतले ॥ २३ ।

अधो मुण्डासनं वक्ष्ये सर्वेषां प्राणिनां सुखम् ।
ऊद्ध्वंमार्गे पदं दत्त्वा धारयेन्मारुतं सुधीः ॥ २४ ।

सर्वासनानां श्रेष्ठं हि ऊद्ध्वंपादो यदा चरेत् ।
तदैव महतीं सिद्धि ददाति वायवी कला ॥ २५ ।

एतत्पद्मासनं कुर्यात् प्राणवायुप्रसिद्धये ।
शुभासनं तदा ध्यायेत्पूरयित्त्वा पुनः पुनः ॥ २६ ।

उरुमूले वामपादं पुनस्तद्दक्षिणं पदम् ।
वामोरौ स्थापयित्त्वा च पद्मासनमितिस्मृतम् ॥ २७ ।

सव्यपादस्य[3] योगेन आसनं परिकल्पयेत् ।
तदैकासनकाले तु द्वितीयासनमाभवेत् ॥ २८ ।

पृष्ठे करद्वयं नीत्त्वा वृद्धाङ्गुष्ठद्वयं सुधीः ।
कायसङ्कोचमाकृत्य[4] धृत्वा बद्धासनो भवेत् ॥ २९ ।

---

१. चतु:षष्टिशब्दः चतु:षष्टितमपरः, अत एव दिनेति एकवचनान्तस्य प्रयोगः ।
२. नलोदयम्–क० ।
३. सव्यापसव्य–क० ।
४. माहृत्य–क० ।

[1]बद्धपद्मासनं कृत्वा वायुबद्धं पुनः पुनः ।
चिबुकं स्थापयेद्यत्नाद् ह्लादितेजसि भास्करे ॥ ३० ।

इत्यासनं हि सर्वेषां प्राणिनां सिद्धिकारणम् ।
वायुवश्याय यः कुर्यात् स योगी नात्र संशयः ॥ ३१ ।

स्वभावसिद्धिकरणं सर्वेषां स्वस्तिकासनम् ।
वामपादतले कुर्यात्पाददक्षिणमेव च ॥ ३२ ।

सव्यापसव्ययोगेन आसनद्वयमेव च ।
सर्वत्रैवं प्रकारं च कृत्वा नाडीव [2]सारमेत् ॥ ३३ ।

आसनानि [3]श्रृणु ह्येतत्त्रिशतासंख्यकानि च ।
सव्यापसव्ययोगेन द्विगुणं प्रभवेदिह ॥ ३४ ।

चतुःषष्ट्यासनानीह वदामि वायुसाधनात् ।
द्वात्रिंशद्बिन्दुभेदाय[4] कल्पयेद् वायुवृद्धये ॥ ३५ ।

कार्मुकासनमाकृत्य[5] उदरे पूरयेत् सुखम् ।
तदा वायुर्वशो याति कालेन सूक्ष्मवायुना ॥ ३६ ।

कृत्वा पद्मासनं मन्त्री वेष्टयित्त्वा प्रधारयेत् ।
करेण दक्षिणेनैव वामपादान्तिकं तटम्[6] ॥ ३७ ।

सव्यापसव्यद्विगुणं कार्मुकासनमेव च ।
कार्मुकद्वययोगेन शरवद्वायुमानयेत् ॥ ३८ ।

कुक्कुटासनमावक्ष्ये नाडीनिर्मलहेतुना ।
मत्कुलागमयोगेन[7] कुर्याद् वायुनिषेवणम् ॥ ३९ ।

---

१. इति बद्धपद्मासनम्–क० । २. सावसेत्–क० ।
३. श्रृणुष्वैतत् द्वात्रिंशत्–क० । ४. ग्रन्थिभेदाय–क० ।
५. माहृत्य–क० । ६. पादाङ्गुलि–क० ।
७. मार्गेण–क० ।

निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः[१] ।
पद्भ्यां बद्धं यः करोति कूर्परद्वयमध्यतः ॥ ४० ।

सव्यापसव्ययुगलं कुक्कुटं ब्रह्मणा कृतम् ।
बद्धं कृत्वा अधःशीर्षं यः करोति खगासनम् ॥ ४१ ।

खगासनप्रसादेन श्रमलोपो[२] भवेद् द्रुतम् ।
पुनः पुनः श्रमादेव[३] विषयश्रमलोपकृत् ॥ ४२ ।

लोलासनं सदा कुर्याद् वायुलोलापघातनात् ।
स्थिरवायुप्रसादेन स्थिरचेता भवेद्द्रुतम्[४] ॥ ४३ ।

पद्मासनं समाकृत्य पादयोः सन्धिगह्वरे ।
हस्तद्वयं मध्यदेशं नियोज्य कुक्कुटाकृतिः ॥ ४४ ।

निजहस्तद्वयद्वन्द्वं[५] निपात्य हस्तनिर्भरम् ।
कृत्वा शरीरमुल्लाप्य[६] स्थित्वा पद्मासनेऽनिलः ॥ ४५ ।

स्थित्वैतदासने मन्त्री अधःशीर्षं करोति चेत् ।
उत्तमाङ्गासनं ज्ञेयं योगिनामतिदुर्लभम् ॥ ४६ ।

एतदासनमात्रेण शरीरं शीतलं भवेत् ।
पुनः पुनः प्रसादेन[७] चैतन्या कुण्डली भवेत् ॥ ४७ ।

[८]सव्यापसव्ययोगेन यः करोति पुनः पुनः ।
पूरयित्वा मूलपद्मे सूक्ष्मवायुं विकुम्भयेत्[९] ॥ ४८ ।

---

१. द्विजोत्तमः–क० ।
२. लेप–ग० ।
३. श्रयादेव–क० ।
४. ध्रुवम्–क० ।
५. तत्रद्वन्द्वम्–क० ।
६. मुत्थाप्य–क० ।
७. श्रमादेव–क० ।
८. सव्यापसव्ययोर्योगः, तेनेत्यर्थः ।
९. निकुम्भयेत्–क० ।

कृत्त्वा कुम्भकमेवं हि सूक्ष्मवायुलयं विधौ ।
मूलादिब्रह्मरन्ध्रान्ते स्थापयेल्लयगे पदे[1] ॥ ४९ ।

एतत् शुभासनं कृत्त्वा सूक्ष्मरन्ध्रे मनोलयम् ।
[2]सूचीरन्ध्रे यथासूत्रं पूरयेत् सूक्ष्मवायुना ॥ ५० ।

एतत् क्रमेण षण्मासान् पूरकस्यापि लक्षणम् ।
महासुखं समाप्नोति योगाष्टाङ्गनिषेवणात् ॥ ५१ ।

अथ वक्ष्ये महादेव पर्वतासनमङ्गलम् ।
यत्कृत्त्वा स्थिररूपी स्याद् षट्चक्रादिविलोपनम्[3] ॥ ५२ ।

योन्यासनं पर्वतेन योगं योगफलेऽनिलम्[4] ।
तत्कालफललन्तावत्[5] खेचरो यावदेव हि ॥ ५३ ।

पादयोगेन[6] चक्रस्य लिङ्गाग्रं यो नियोजयेत् ।
अन्यत्पदमूरौ दत्त्वा तत्र योऽन्यासनं भुवि ॥ ५४ ।

तत्र मध्ये[7] महादेव बन्धयोन्यासनं शृणु ।
यत्कृत्त्वा खेचरो भूत्वा विचरेदीश्वरो यथा ॥ ५५ ।

कृत्त्वा योन्यासनं नाथ लिङ्गगुह्यादिबन्धनम् ।
[8]मुखनासानेत्रकर्णकनिष्ठाङ्गुलिभिस्तथा ॥ ५६ ।

ओष्ठाधरं कनिष्ठाभ्यामनामाभ्याञ्च नासिके ।
मध्यमाभ्यां[9] नेत्रयुग्मं तर्ज्जनीभ्यां[10] परैः श्रुती[11] ॥ ५७ ।

---

१. लयगोपथे—क० ।
२. शुचिरन्ध्रे—क० ।
३. विलोडनम्—क० ।
४. फलोल्वणम्—क० ।
५. सफलस्तावत्—क० ।
६. पादाङ्गुष्ठेन चाक्रम्य—क० ।
७. एतन्मध्ये—क० ।
८. अथ—क० ।
९. मध्यमाख्यम्—क० ।
१०. छादयित्वा परैः श्रुतिम्—क० ।
११. श्रूयते आभ्यामिति श्रुती । करणे स्त्रियां क्तिन् । प्रथमाद्विवचनान्तं पदम् ।

कृत्वा योन्यासनं नाथ योगिनामतिदुर्लभम् ।
कृत्वा यः पूरयेद् वायुं मूलमाकुञ्च्य स्तम्भयेत् ॥ ५८ ।

सव्यापसव्ययोगेन सिद्धो भवति साधकः ।
शनैः शनैः समारुह्य कुम्भकं परिपूरयेत् ॥ ५९ ।

अरुणोदयकालाच्च वसुदण्डे[1] सदाशिव ।
सव्यापसव्ययोगेन [2]गृह्णीयाद्वायुगानिलम् ॥ ६० ।

द्वितीयप्रहरे कुर्याद् वायुपूजां[3] मनोरमाम् ।
एतदासनमाकृत्य[4] सिद्धो भवति साधकः ॥ ६१ ।

अथान्यदासनं वक्ष्ये यत्कृत्वा सोऽमरो भवेत् ।
मत्साधकः शुचिः श्रीमान् कुर्याद्गत्त्वा निराविले ॥ ६२ ।

[5]भेकानामासनं योगं निजवक्षसि सम्मुखम्[6] ।
निधाय पादयुगलं स्कन्धे बाहू पदोपरि ॥ ६३ ।

[7]ध्यायेद्धि चित्पदं भ्रान्तमासनस्थः सुखाय च ।
यदि सर्वाङ्गमुत्तोल्य गगने खेचरासनम् ॥ ६४ ।

[8]महाभेकासनं प्रोक्तं सर्वसिद्धिप्रदायकम् ।
महाविद्यां महामन्त्रं प्राप्नोति जपतीह यः ॥ ६५ ।

एतत् प्रभेदं वक्ष्यामि करोति यः स चामरः ।
एकपादमूरौ बद्ध्वा स्कन्धेऽन्यत्पादरक्षणम् ॥ ६६ ।

एतत्प्राणासनं नाम सर्वसिद्धिप्रदायकम् ।
वायुमूले समारोप्य ध्यात्त्वाऽऽकुञ्च्य प्रकारयेत् ॥ ६७ ।

---

१. वत्स्वदण्डे (दन्ते)—क० ।
२. गृह्णत्वं बाह्यगानिलम्—क० ।
३. बाह्यपूजाम्—क० ।
४. माहत्य—क० ।
५. मेकनामासनम्—क० ।
६. षण्मुखम्—क० ।
७. ध्यायेदिष्टपदं श्रीमानासनस्थः—क० ।
८. महांश्चासौ भेकश्चेति महाभेकः, महान् दर्दुरः, तस्यासनम् ।

केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः ।
एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो ॥ ६८ ।

अपानासनमेतद्धि सर्वेषां पूरकाश्रयम् ।
कृत्वा सूक्ष्मे शीर्षपद्मे समारोप्य[1] च वायुभिः ॥ ६९ ।

तदा सिद्धो भवेन्मर्त्यः प्राणापानसमागमः ।
अपानासनयोगेन कृत्वा योगेश्वरो भुवि ॥ ७० ।

समानासनमावक्ष्ये सिद्धमन्त्रादिसाधनात् ।
एकपादमूरौ दत्त्वा गुह्येऽन्यल्लिङ्गवक्त्रके[2] ॥ ७१ ।

एतद् वीरासनं नाथ समानासनसंज्ञकम् ।
इत्याकृत्य जपेन्मन्त्रं धृत्वा वायुं चतुर्दले ॥ ७२ ।

कुण्डलीं [3]भावयेन्मन्त्रं कोटिविद्युल्लताकृतिम् ।
[4]आत्मचन्द्रामृतरसैराप्लुतां योगिनीं सदा ॥ ७३ ।

वीरासनन्तु वीराणां योगवायुप्रधारणम् ।
यो जानाति महावीरः स योगी भवति ध्रुवम् ॥ ७४ ।

अथ वक्ष्ये महाकालसमानासनसाधनम्[5] ।
भेदक्रमेण यज्ज्ञात्वा वीराणामधिपो भवेत् ॥ ७५ ।

समानासनमाकृत्य वृद्धाङ्गुष्ठं करेण च ।
एकेन सोऽधिकारी स्यात् स्वरयोगादिसाधने ॥ ७६ ।

आसनं यो हि जानाति वायूनां हरणं तथा ।
कालादीनां निर्णयन्तु स कदाचिन्न नश्यति ॥ ७७ ।

कालेन लभ्यते सिद्धिः कालरूपो महोज्ज्वलः ।
साधकैर्योगिभिर्ध्येयः सिद्धवीरासनात्मना ॥ ७८ ।

---

१. स्वं समारोप्य–क० । २. लिङ्गरन्ध्रके–क० ।

३. मन्त्री–क० । ४. आत्मा च चन्द्रश्चेति आत्मचन्द्रौ, तयोरमृतरसैरित्यर्थः ।

५. सञ्ज्ञकम्–क० ।

अथ वक्ष्ये नीलकण्ठ ग्रन्थिभेदासनं शुभम् ।
ज्ञात्वा रुद्रो भवेत् क्षिप्रं सूक्ष्मवायुनिषेवणात् ॥ ७९ ।
कृत्वा पद्मासनं मन्त्री जङ्घयोः हृदये करौ ।
[1]कूर्परस्थानपर्यन्तं विभेद्य स्कन्धधारणम् ॥ ८० ।
भित्त्वा पद्मासनं मन्त्री सहस्रार्द्धेन[2] घाटनम् ।
येन शीर्षं भावनम्रं[3] सर्वाङ्गुलिभिराश्रमम् ॥ ८१ ।
ग्रन्थिभेदासनञ्चैतत् खेचरादिप्रदर्शनम् ।
कृत्वा सूक्ष्मवायुलयं परमात्मनि भावयेत् ॥ ८२ ।
अथान्यासनमावक्ष्ये योगपूरकरक्षणात् ।
कृत्वा पद्मासनं पादा [4]अङ्गुष्ठजङ्घयोः स्थितम् ॥ ८३ ।
हस्तमेकन्तु जङ्घायाः कार्मुकं कूर्परोर्द्धकम् ।
पद्मासने समाधाय अङ्गुष्ठं परिधावयेत् ॥ ८४ ।
कार्मुकासनमेतद्धि सव्यापसव्ययोगतः ।
पद्मासनं वेष्टयित्वा अङ्गुष्ठाग्रं प्रधावयेत्[5] ॥ ८५ ।
यः करोति सदा नाथ कार्मुकासनमुत्तमम् ।
तस्य रोगादिशत्रूणां क्षयं नीत्वा सुखी भवेत् ॥ ८६ ।
अथ वक्ष्येऽत्र संक्षेपात् सर्वाङ्गासनमुत्तमम् ।
यत्कृत्त्वा योगनिपुणो विद्याभिः पण्डितो यथा ॥ ८७ ।
अधो निधाय शीर्षं च ऊर्द्ध्वंपादद्वयं चरेत् ।
पद्मासनन्तु तत्रैव भूमौ कूर्परयुग्मकम् ॥ ८८ ।
दण्डे-दण्डे सदा कुर्यात् [6]श्रमशान्तिपरः सुधीः ।
नित्यं सर्वासनं हित्त्वा न कुर्याद् वायुधारणम् ॥ ८९ ।

---

१. कूर्परस्तनपर्यन्तम्—क० । २. हस्तोर्ध्वेन स्वघाटनम्—क० ।
३. येन शीर्षं भवेन्नम्रं सर्वाङ्गुलिभिराश्रयम्—क० ।
४. जङ्घा बहिःस्थितम्—क० । ५. प्रधारयेत्—क० ।
६. श्रमश्च शान्तिश्च श्रमशान्ती, तयोः परः । अथवा-श्रमजनिता शान्तिः श्रमशान्तिः, मध्यमपदलोपिसमासः, तत्र परः ।

मासेन[1] सूक्ष्मवायूनां गमनं चोपलभ्यते ।
[2]त्रिमासे देवपदवीं त्रिमासे शीतलो भवेत् ॥ ९० ।

अथ वक्ष्ये महादेव मयूरासनमुत्तमम् ।
भूमौ निपात्य हस्तौ द्वौ कूर्परोपरि देहकम् ॥ ९१ ।

कूर्परोपरि संस्थाप्य सर्वदेहं स्थिराशयः ।
केवलं हस्तयुगलं निपात्य भुवि सुस्थिरः ॥ ९२ ।

एतदासनमात्रेण नाडीसम्भेदनं भवेत् ।
पूरकेण दृढो याति सर्वत्राङ्गाश्रयेण च ॥ ९३ ।

अथान्यदासनं कृत्वा[3] सर्वव्याधिनिवारणम् ।
योगाभ्यासी भवेत्क्षिप्रं ज्ञानासनप्रसादतः ॥ ९४ ।

[4]दक्षपादोरुमूले च वामपादतलन्तथा ।
दक्षपादतलं दक्षपार्श्वे संयोज्य धारयेत् ॥ ९५ ।

एतज्ज्ञानासनं नाथ ज्ञानाद्विद्याप्रकाशकम् ।
निरन्तरं यः करोति तस्य ग्रन्थिः श्लथी भवेत् ॥ ९६ ।

सव्यापसव्ययोगेन मुण्डासनमिति स्मृतम् ।
कृत्वा ध्यात्वा स्थिरो भूत्वा लीयते परमात्मनि ॥ ९७ ।

गरुडासनमावक्ष्ये येन ध्यानं स्थिरं भुवि ।
सर्वदोषाद्विनिर्मुक्तो भवतीह महाबली ॥ ९८ ।

एकपादमुरौ बद्ध्वा एकपादेन दण्डवत् ।
जङ्घापादसन्धिदेशे ज्ञानव्यग्रं व्यवस्थितम् ॥ ९९ ।

एतदासनमाकृत्य पृष्ठे संहारमुद्रया ।
आराध्य योगनाथं च सदा सर्वेश्वरस्य च ॥ १०० ।

---

१. यामेन–क० ।
२. द्विमासे–क० ।
३. वक्ष्ये–क० ।
४. दक्षपादस्य ऊरुमूले इत्यर्थः ।

अथान्यदासनं वक्ष्ये येन सिद्धो भवेन्नरः ।
अकस्माद् वायुसंचारं कोकिलाख्यासनेन[1] च ॥ १०१ ।

ऊद्ध्वें हस्तद्वयं कृत्वा तदग्रे पादयोः सुधीः ।
वृद्धाङ्गुष्ठद्वयं नाथ शनैः शनैः प्रकारयेत् ॥ १०२ ।

पद्मासनं समाकृत्य कूर्परोपरि संस्थितः[2] ।
अथ[3] वक्ष्ये वीरनाथ आनन्दमन्दिरासनम् ॥ १०३ ।

यत्कृत्वा अमरो धीरो भवत्येवेह साधकः ।
हस्तयुग्मं पाददेशे पादयुग्मं प्रदापयेत् ॥ १०४ ।

प्रकृत्य दण्डवत् कौल नितम्बाग्रे प्रतिष्ठति ।
खञ्जनासनमावक्ष्ये यत्कृत्वा सुस्थिरो भवेत् ॥ १०५ ।

पृष्ठे पादद्वयं बद्ध्वा हस्तौ भूमौ प्रधारयेत् ।
भूमौ हस्तद्वयं नाथ पातयित्वानिलं पिबेत् ॥ १०६ ।

पृष्ठे पादद्वयं बद्ध्वा खञ्जनेन जयी भवेत् ।
अथान्यदासनं वक्ष्ये साधकानां हिताय वै ॥ १०७ ।

पवनासनरूपेण खेचरो योगिराड्भवेत् ।
स्थित्वा बद्धासने[4] धीरो नाभेरधःकरद्वयम् ॥ १०८ ।

ऊद्ध्र्वमुण्डः पिबेद् वायुं निरुद्ध्येत[5] यमाविले ।
अथ सर्पासनं वक्ष्ये वायुपानाय केवलम् ॥ १०९ ।

---

१. कोटिलाख्यामलेन च–क० । २. रञ्जसम्–क० ।

३. स्थापयेत् कौलिकानाञ्च कौलिकासनमुत्तमम् ।
एतदासनमाकृत्य वायुस्थम्माङ्गनिर्मलम् ॥
तिष्ठेत् ऊर्ध्वमुखो वीरः लिककासनमुत्तमम् ॥ क० अ० पा० ।

४. पद्मासने–क० । ५. निरुद्धेन्द्रियमारिणे–क० ।

शरीरं दण्डवत्तिष्ठेद्रज्जुबद्धस्तु[1] पादयोः ।
वायवी कुण्डली देवी कुण्डलाकारमङ्गुले ।। ११० ।

मण्डिता भूषणाद्यैश्च वक्ष्ये सर्पासनस्थितम् ।
निद्रालस्यभयान् त्यक्त्वा रात्रौ कुर्यात्पुनः पुनः ।। १११ ।

सर्वान् विघ्नान् वशीकृत्य निद्रादीन् वायुसाधनात् ।
अथ वक्ष्ये [2]काकरूपस्कन्धासनमनुत्तमम् ।। ११२ ।

कलिपापात् प्रमुच्येत वायवीं वशमानयेत् ।
निजपादद्वयं बद्ध्वा स्कन्धदेशे च साधकः ।। ११३ ।

नित्यमेतत्[3] पदद्वन्द्वं भूमौ पुष्टिकरद्वयम् ।। ११४ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावासननिर्णये पाशवकल्पे षट्चक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे त्रयोविंशः पटलः ।।

---

१. रज्वा–क० ।

२. कालरूप कल्पदासनमनुत्तमम्–क० । —काकरूपं यत्स्कन्धासनम्, इत्यर्थः ।

३. निपात्य–क० ।

अथ चतुर्विशः पटलः

आनन्दभैरवी उवाच—

अथ वक्ष्ये महादेव योगशास्त्रार्थनिर्णयम् ।
येन विज्ञानमात्रेण षट्चक्रग्रन्थिभेदकः ॥ १ ॥

पर्व्वातिरिक्तदिवसे कुर्यात् श्रीयोगसाधनम् ।
कालिकाकुलसर्वस्वं कला[1] कालसमन्वितम् ॥ २ ॥

आसनं विधिना ज्ञानं कोटिकोटिक्रियान्वितम् ।
शतलक्षसहस्राणि आसनानि महीतले ॥ ३ ॥

स्वर्गे पातालमध्ये तु सम्मुक्तानि महर्षिभिः ।
भेदाभेदक्रमेणैव कुर्यान्नित्यं सदासनम् ॥ ४ ॥

तत्प्रकारं च विविधं यत्कृत्त्वा सोऽमरो भवेत् ।
अमरः सिद्ध इत्याहुरष्टैश्वर्यसमन्वितम् ॥ ५ ॥

प्रतिभाति स एवार्थो मूलमन्त्रार्थवेदिनः[2] ।
अमरास्ते प्रशंसन्ति सर्वलोकनिरन्तरम् ॥ ६ ॥

देवाः श्रीकामिनीकान्ताः प्रभवन्ति जगत्त्रये ।
कालं हि वशमाकर्त्तुं नियुक्तो यश्च भावकः ॥ ७ ॥

ते सर्वे विचरन्तीह कोटिवर्षशतेषु च ।
तत्तदासननामानि शृणु तत्साधनानि च ॥ ८ ॥

येन विज्ञानमात्रेण साक्षादीशस्य भक्तिमान् ।
अथ कूर्मासनं नाथ कृत्वा वायुं प्रपूरयेत् ॥ ९ ॥

कामरूपो भवेत् क्षिप्रं कलिकल्मषनाशनम् ।
समानासनमाकृत्य लिङ्गाग्रे स्वीयमस्तकम् ॥ १० ॥

---

१. काली (?)—क० ।

२. मूलमन्त्रार्थं विदन्ति, तच्छीला मूलमन्त्रार्थवेदिनः, ताच्छील्ये णिनिः ।

नितम्बे हस्तयुगलं भूमौ सङ्कोचितः पतेत् ।
कुम्भीरासनमावक्ष्ये वायूनां धारणाय च ॥ ११ ॥

तिष्ठेत् कुण्डाकृतिर्भूमौ करौ शीर्षोपरिस्थितौ ।
पदोपरि पदं दत्त्वा शीर्षोपरि करद्वयम् ॥ १२ ॥

तिष्ठेत् कुण्डाकृतिर्भूमौ कुम्भीरासनमेव तत् ।
अथ मत्स्यासनं पृष्ठे हस्तोपरि कराङ्गुलिः ॥ १३ ॥

पादयुग्मप्रमाणेन[1] वृद्धाङ्गुष्ठस्य योजनम् ।
मकरासनमावक्ष्ये वायुपानाय कुम्भयेत् ॥ १४ ॥

पृष्ठे पादद्वयं दत्त्वा हस्ताभ्यां पृष्ठबन्धनम् ।
अथ सिंहासनं नाथ कूर्परोपरि जानुनी ॥ १५ ॥

स्थापयित्वा ऊर्ध्वमुखो वायुपानं समाचरेत् ।
अथ वक्ष्ये महादेव कुञ्जरासनमुत्तमम् ॥ १६ ॥

करेणैकेन पादाभ्यां भूमौ तिष्ठेत् शिरः करः ।
व्याघ्रासनमथो वक्ष्ये [2]क्रोधकालविनाशनम् ॥ १७ ॥

एकपादं शीर्षमध्ये मेरुदण्डोपरिस्थितम् ।
भल्लूकासनमावक्ष्ये यत्कृत्वा योगिराड् भवेत् ॥ १८ ॥

नितम्बे च पादगोष्ठी [3]हस्ताभ्यामङ्गुलीयकम् ।
अथ कामासनं वक्ष्ये कामसङ्गेन[4] हेतुना ॥ १९ ॥

गरुडासनमाकृत्य कनिष्ठाग्रं स्पृशोद्भवम्[5] ।
वर्त्तुलासनमावक्ष्ये यत्कृत्वा भैरवो भवेत् ॥ २० ॥

आकाशस्थितपादाभ्यां पृष्ठदेशं निबन्धयेत् ।
अथ मोक्षासनं वक्ष्ये यत्कृत्वा मोक्षमन्दिरम्[6] ॥ २१ ॥

---

१. समानेन–क० ।
२. क्रोध एव कालस्तस्य विनाशनं विनाशकमित्यर्थः ।
३. अङ्गुलीद्वयम्–क० ।
४. काममर्दनम्–क० ।
५. भुवि–क० ।
६. क्षेम–क० ।

दक्षहस्तं दक्षपादं केवलं स्थापयेत्सुधीः ।
अथ मालासनं नाथ यत्कृत्वा वायवीप्रियः ।। २२ ।

शुभयोगं समाप्नोति एकहस्तस्थितो नरः ।
अथ दिव्यासनं वक्ष्ये पृष्ठं हस्तेन बन्धयेत् ।। २३ ।

एकहस्तमध्यदेशं भूमिहस्तञ्च नासया ।
अर्द्धोदयासनं नाथ सर्वाङ्गं खे नियोजयेत् ।। २४ ।

केवलं हस्तयुगलं भूमिमालोक्य[1] नासया ।
अथ चन्द्रासनं वक्ष्ये पादाभ्यां स्वशरीरकम् ।। २५ ।

पुनः पुनः धारयेद्[2] यो वायुधारणपूर्वकम् ।
अथ हंसासनं वक्ष्ये शरीरेण पुनः पुनः ।। २६ ।

भूमौ सन्ताडयेत् श्वासैः प्राणवायुदृढः[3] सुधीः ।
अथ सूर्यासनं वक्ष्ये पृष्ठात् पादेन बन्धनम् ।। २७ ।

[4]पृष्ठे भेदान्वितं पादं तस्य हस्तेन[5] बन्धयेत् ।
अथ योगासनं वक्ष्ये यत्कृत्वा योगिराड् भवेत् ।। २८ ।

सर्वाः[6] पादतलद्वन्द्वं स्वाङ्गे बद्ध्वा करद्वयम् ।
गदासनमतो वक्ष्ये गदाकृतिर्वसेद्भुवि ।। २९ ।

ऊद्ध्र्वबाहुर्भवेद्येन कायशोधनहेतुना ।
अथ लक्ष्म्यासनं वक्ष्ये लिङ्गाग्रेऽङ्घ्रितलद्वयम् ।। ३० ।

गुह्यदेशे हस्तयुग्मं तलाभ्यां बन्धयेद्भुवि ।
अथ कुल्यासनं वक्ष्ये यत्कृत्वा कौलिको भवेत्[7] ।। ३१ ।

---

१. भुवि व्यालोड्य–क० । २. भ्रामयेत् यो वायुधारणतत्परः–क० ।
३. प्राणवायुं दृढं सुधीः–क० । ४. पृष्ठ–क० ।
५. अन्यहस्तेन–क० । ६. उर्वो–क० ।
७. कौलिको मुनिः–क० ।

एकहस्तं मस्तकस्थोऽधः शीर्षेऽभिन्नगे[1] करम् ।
ब्राह्मणासनमावक्ष्ये यत्कृत्वा ब्राह्मणो भवेत् ॥ ३२ ॥

एकपादमूरौ दत्त्वा तिष्ठेद्दण्डाकृतिर्भुवि ।
क्षत्रियासनमावक्ष्ये यत्कृत्वा धनवान् भवेत् ॥ ३३ ॥

केशेन पादयुगलं बद्ध्वा तिष्ठेदधोमुखः ।
अथ वैश्यासनं वक्ष्ये यत्कृत्वा सत्यवान्भवेत् ॥ ३४ ॥

वृद्धाङ्गुष्ठेन यस्तिष्ठेत्[2] हस्तयुग्मं स्वकोरसि[3] ।
अथ शूद्रासनं वक्ष्ये यत्कृत्वा सेवको भवेत् ॥ ३५ ॥

धृत्वाङ्गुष्ठद्वयं योज्यं नासाग्रपादमध्यके[4] ।
अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत् ॥ ३६ ॥

हस्ताङ्घ्रियुग्मं भूमौ च गमनागमनं ततः ।
पाशवासनमावक्ष्ये कृत्वा पशुपतिर्भवेत् ॥ ३७ ॥

पृष्ठे हस्तद्वयं दत्त्वा कूर्पराग्रे स्वमस्तकम् ।
एतेषां साधनादेव चिरजीवी भवेन्नरः ॥ ३८ ॥

संवत्सरं साधनाद्वै जीवन्मुक्तो भवेद्ध्रुवम् ।
श्रीविद्यासाधनं पश्चात् कथितव्यं तव प्रभो ॥ ३९ ॥

आसनं योगसिद्ध्यर्थं [5]कायशोधनहेतुना ।
इदानीं शृणु देवेश रहस्यं कोमलासनम् ॥ ४० ॥

योगसिद्धिविचाराय[6] रहस्यं चर्मासनं शुभम् ।
अथ नरासनं वक्ष्ये षोडशादिप्रकारकम् ॥ ४१ ॥

---

१. एकहस्तमस्तकस्याऽधःशीर्षेऽतिगे करम्–क० ।

२. सन्तिष्ठेत्–क० ।

३. स्ववक्षसि–क० ।

४. नासाग्रम्–क० ।

५. कायसाधन–क० ।

६. योगशिक्षा–क० ।

येन साधनमात्रेण योगी भवति साधकः ।
प्रकारं षोडशप्रोक्तं मत्कुलागमसम्भवम् ॥ ४२ ।

येन साधनमात्रेण साक्षाद्योगी महीतले ।
एकमासाद्भवेत्कल्पो[1] द्विमासे द्रुतकल्पनम्[2] ॥ ४३ ।

त्रिमासे योगकल्पः[3] स्याच्चतुर्मासे स्थिराशयः[4] ।
पञ्चमासे सूक्ष्मकल्पे[5] षष्ठमासे विवेकगः ॥ ४४ ।

सप्तमासे ज्ञानयुक्तो भावको भवति ध्रुवम् ।
अष्टमासेऽन्नसंयुक्तो[6] जितेन्द्रियकलेवरः ॥ ४५ ।

नवमे सिद्धिमिलनो दशमे चक्रभेदवान् ।
एकादशे महावीरो द्वादशे खेचरो भवेत् ॥ ४६ ।

इति योगासनस्थश्च[7] योगी भवति साधकः ।
नरासनं यः करोति स सिद्धो नात्र संशयः ॥ ४७ ।

तत्प्रकारं प्रवक्ष्यामि येन सिद्धो भवेत्प्रभो ।
अधोमुखं महादेव नरासनस्य साधने ॥ ४८ ।

करणीयं साधकेन्द्रैर्योगशास्त्रार्थसम्मतैः ।
अक्षीणं यौवनोद्दामं सुन्दरं [8]चारुकुन्तलम् ॥ ४९ ।

लोकानां श्रेष्ठमेवं हि पतितं रणसम्मुखे ।
[9]तत्सर्वं हि समानीय मङ्गले वासरे निशि ॥ ५० ।

---

१. कम्पो–क० । २. कम्पनम्–क० ।
३. कम्पः–क० ।
४. स्थिर आशयोऽन्तःकरणं यस्यासौ । आ समन्तात् शेते यस्मिन्नसौ आशयः ।
५. सूक्ष्मकम्पो–क० । ६. अष्टमे सत्त्वसंयुक्तो–क० ।
७. योगासनद्वन्द्वम्–क० । ८. मण्डलम्–क० ।
९. शवम्–क० ।

चन्द्रसूर्यासनं कृत्वा साधयेत्तत्र कौलिकः ।
अथान्यत् सम्प्रवक्ष्यामि सर्वसिद्धिप्रकारणम्[1] ॥ ५१ ।

भेकासनं यः करोति स एव योगिनीपतिः ।
अथान्यत् सम्प्रवक्ष्यामि यत्कृत्वा योगिराड् भवेत् ॥ ५२ ।

तत्सर्वोत्तरशिरसि[2] स्थित्वा चन्द्रासने जपेत् ।
अथान्यत् तत्प्रकारञ्च महाविद्यादिदर्शनात् ॥ ५३ ।

मत्सरे[3] गौरवर्णे च तत्र शैलासने जपेत् ।
अथान्यत्तत्प्रकारं योगिकौलो न संशयः ॥ ५४ ।

यद्येवं म्रियते सोऽपि तदा भद्रासने जपेत् ।
तत्तत्साधनकाले च एवं कुर्याद्दिने दिने ॥ ५५ ।

नृत्यवाद्यगीतरागभोगोनविंशतौ[4] दिने ।
चतुर्दशं न वीक्ष्येत[5] भैरवाणां भयार्द्दनात् ॥ ५६ ।

मनोनिवेशमात्रेण योगी भवति भैरव ।
स्वेच्छासनं[6] समाकृत्य मन्त्रं जपति यो नरः ॥ ५७ ।

महासारो[7] वीतरागः सिद्धो भवति निश्चितम् ।
अथान्यत् शवमाहात्म्यं शृणुष्वावहितो मम ॥ ५८ ।

तत्सर्वं[8] गृहमानीयाच्छाद्य शार्दूलचर्मणा ।
तत्र मन्त्री महापूजां कृत्वा [9]प्रविश्य संजपेत् ॥ ५९ ।

---

१. सर्वसिद्धिप्रकारणात्–क० । ––सर्वासां सिद्धीनां प्रकृष्टं कारणम्, तस्मात् ।
२. शवोत्तरशिरसि–क० ।
३. यत् शवे–क० ।
४. भोगीन–क० । ––नृत्यवादित्र ।
५. न वेक्षेत् (ना रक्षेत्)–क० ।
६. देहासनम्–क० ।
७. महाशवे–क० ।
८. तत् शवं गृहमानीयच्छाद्यं शार्दूलचर्मणा–क० । ––शार्दूलस्य चर्मणा, इति षष्ठीतत्पुरुषः ।
९. कृत्वोपविश्य–क० ।

पद्मासनस्थस्तस्यैव[1] झटिद् योगी न संशयः ॥ ६० ॥

एतत्प्रकारासनमाशु कृत्वा
जितेन्द्रियो योगफलार्थविज्ञः ।
भवेन्मनुष्यो मम चाज्ञया हि
सिद्धो गणोऽसौ[2] जगतामधोशः ॥ ६१ ॥

[3]मूलखड्गयष्टिपरडितरवारादिना युतम् ।
[4]···भूतसर्पराजव्याघ्रं सद्यो मृतं यजेत् ॥ ६२ ॥

यस्य मृत्युर्भवेन्नाथ भैरवस्य सुरापतेः ।
रणे सम्मुखयुद्धस्य तदानीय जपं चरेत् ॥ ६३ ॥

तत्र कौलासनं कृत्वा अथवा कमलासनम् ।
महाविद्यामहामन्त्रं जप्त्वा लिङ्गमवाप्नुयात्[5] ॥ ६४ ॥

एतत्सर्वं[6] न गृह्णीयाद्यदीच्छेदात्मनो हितम्[7] ।
कुव्याधिमरणं [8]कुष्ठं स्त्रीवश्यं पतितं [9]मृतम् ॥ ६५ ॥

दुर्भिक्षमृतमुन्मत्तमव्यक्तलिङ्गमेव च ।
हीनाङ्गं भूचरवृद्धं[10] पलायनपरं तथा[11] ॥ ६६ ॥

[12]अन्यद् यो यद् विचारेण हत्वा लोकं जपन्ति ये ।
ते सर्वे व्याघ्रभक्षा[13]स्युः खादन्ति व्याघ्ररूपिणः ॥ ६७ ॥

---

१. पद्मासनस्थस्तु सैव–क० । २. गणेशो–क० ।
३. ग० नास्ति । ४. शृणु शङ्ख····तव वारादिनायुतम् वृद्ध अथवा बहु–क० ।
५. सिद्धिम्–क० । ६. शवम्–क० ।
७. यदिच्छेत्–क० । ८. कुष्ठिम्–क० ।
९. गुरुम्–क० । १०. तु वरं वृद्धम्–क० ।
११. परायण–क० । १२. अन्यायादविचारेण–क० ।
१३. व्याघ्रभक्षाः स्यात्–मूले क० ।

पर्युषितं तथाश्वस्थमधिकाङ्गं[1] कुकिल्बिषम् ।
ब्राह्मणं गोमयं वीरं धार्मिकं सन्त्यजेत् सुधीः ॥ ६८ ।

स्त्रीजनं योगिनं त्यक्त्वा साधयेद्वीरसाधनम् ।
तदा सिद्धो भवेन्मन्त्री आज्ञया मे न संशयः ॥ ६९ ।

तरुणं सुन्दरं शूरं मन्त्रविद्यं समुज्ज्वलम् ।
गृहीत्वा जपमाकृत्य सिद्धो भवति नान्यथा ॥ ७० ।

मनुष्यशवहृत्पद्मे सर्वसिद्धिकुलाकुलाः[2] ।
तत्र सर्वासनान्येव सिद्ध्यन्ति नात्र संशयः ॥ ७१ ।

अथान्यत्तत्प्रकारन्तु यत्कृत्त्वा योगिराट्[3] भवेत् ।
कोमलाद्यासने स्थित्त्वा धारयन्[4] मारुतं सुधीः ॥ ७२ ।

[5]तत्कोमलासनं वक्ष्ये शृणुष्व मम तद्वचः ।
[6]अवृद्धकं मृतं बालं षण्मासात् कोमलं परम् ॥ ७३ ।

तद्विभेदं प्रवक्ष्यामि गर्भच्युतमहाशवम् ।
तद्धि व्याघ्रत्वचारूढं कृत्वा तत्र जपेत् स्थितः ॥ ७४ ।

षण्मासानन्तरं यावद्दशमासाच्च पूर्वकम् ।
मृतं चारुमुखं बालं गर्भाष्टमपुरःसरम् ॥ ७५ ।

एकहस्ते द्विहस्ते वा चतुर्हस्ते समन्ततः ।
विशुद्ध आसने कुर्यात् संस्कारं पूजनं ततः ॥ ७६ ।

---

१. तथास्पृश्यम्—क० ।
२. सर्वसिद्धिकलाकुला—क० ।
३. योगिनी—मूले क० ।
४. धारयेन् मारुतं सुधीः—क० ।
५. तत्कोमलादिमाहात्म्यं शृणुष्वासनं तत्त्वतः—क० ।
६. अचूडकम्—क० ।

पूर्णे पञ्चमवर्षे च साधको वीतभीः स्वयम् ।
[1]हीनवीतोपनयनो यो मृतस्तं हि कोमलम् ।। ७७ ।

गर्भच्युतफलं नाथ शृणु तत्फलसिद्धये ।
अणिमाद्यष्टसिद्धिः स्यात् संवत्सरस्य साधनात् ।। ७८ ।

मृतासने जपेन्मन्त्री महाविद्याममुं शुभम् ।
अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ।। ७९ ।

अथान्यत् शवमाहात्म्यं शृणु सिद्धिश्च[2] साधनात् ।
साधको योगिराट् भूत्वा मम पादतले वसेत् ।। ८० ।

दशसंवत्सरे पूर्णे यो म्रियेत शुभे दिने ।
शनौ मङ्गलवारे च तमानीय प्रसाधयेत् ।। ८१ ।

तत्र वीरासनं कृत्वा यो जपेद्भद्रकालिकाम् ।
अथवा बद्धपद्मे च स सिद्धो भवति ध्रुवम् ।। ८२ ।

अथ भावफलं वक्ष्ये येन शवादिसाधनम् ।
अकस्मात् प्राप्तिमात्रेण शवस्य विहितस्य च ।। ८३ ।

यं पञ्चदशवर्षीयं सुन्दरं पतितं रणे ।
तमानीय जपेद्विद्यां निशि वीरासने स्थितः ।। ८४ ।

शीघ्रमेव सुसिद्धिः स्यात् खेचरी वायुपूरणी ।
धारणाशक्तिसिद्धिः स्यात् यः करोतीह साधनम् ।। ८५ ।

अथ [3]षोडशवर्षीयं सर्वसिद्धिकरं नृणाम् ।
भोगमोक्षौ करे तस्य शवेन्द्रस्य च साधनात् ।। ८६ ।

एवं क्रमेण पञ्चाशद्वर्षीयं सुन्दरं वरम् ।
आनीय साधयेद्यस्तु स योगी भवति ध्रुवम् ।। ८७ ।

---

१. हीनवृद्धोपनयनम्—क० । २. तत् सिद्धिसाधनात्—क० ।

३. षोडशसंख्याकानि वर्षाणि इति षोडशवर्षाणि, मध्यमपदलोपिसमासः, तत्र भवं षोडशवर्षीयम् गहादित्वाच्छप्रत्ययः ।

शवं[1] रणस्थमानीय साधयेत्सुसमाहितः ।
इन्द्रतुल्यो भवेन्नाथ रणस्थशवसाधनात् ॥ ८८ ।

यदि सम्मुखयुद्धे वा[2] शृणु पट्टीशघातनम् ।
शवमानीय वीरेन्द्रो जपेद्वीरासनस्थितः ॥ ८९ ।

तत् शवन्तु महादेव पूजार्थं निजमन्दिरे ।
देवालये निर्णये च स्थापयित्वा जपं चरेत् ॥ ९० ।

तत्र वीरासनं किं वा योनिमुद्रासनादिकम् ।
पद्मासनं तथाकृत्य वायुं धृत्वा जपं चरेत् ॥ ९१ ।

मासैकेन भवेद्योगी विप्रो गुणधरः शुचिः ।
सूक्ष्मवायुधारणज्ञो जपेद् यौवनगे शवे ॥ ९२ ।

शवसाधनकालेन[3] यद्यत् कर्म करोति हि ।
तत्कर्मसाधनादेव योगी स्यादमरो नरः ॥ ९३ ।

[4]**आनन्दभैरवी उवाच—**

कालक्रियादिकं ज्ञात्वा सूक्ष्मानिलनिधारणम् ।
साधको विचरेद्वीरो वीराचारविवेचकः ॥ ९४ ।

[5]शवादे रणयातस्य क्रियामाहात्म्यमुत्तमम् ।
शृणु संकेतभाषाभिः शिवेन्द्रचन्द्रशेखर ॥ ९५ ।

[6]एकहस्तार्द्धमाने तु भूम्यधोविधिमन्दिरे[7] ।
संस्थाप्य सुशवं नाथ मायादवगतः प्रभो ॥ ९६ ।

एकाहं जगदाधारा आधारान्तर्गता सती ।
पतिहीना सूक्ष्मरूपादधरादि चराचरम् ॥ ९७ ।

---

१. एतद्रणस्थम्—क० ।
२. शूल—क० ।
३. वै—क० ।
४. इति श्रीरुद्रयामले विंशतिपटलः समाप्तः—क० ।
५. रणघातस्य—क० ।
६. हस्तोर्ध्वं—क० ।
७. भूमेरधःस्थिते विधिमन्दिरे इत्यत्र षष्ठीतत्पुरुषः । विधिर्ब्रह्मा ।

मदीयं साधकं पुण्यं धर्मकामार्थमोक्षगम् ।
[1]प्रकरोमि सदा रक्षां धात्रीरूपा सरस्वती ।। ९८ ।

केवलं तदभावेन [2] शम्भो योगपरायण ।
मग्ना संसारकरणात्त्वयि त्वच्चाहमेव च ।। ९९ ।

यद्यत्पदार्थनिकरे तिष्ठसि त्वं सदा मुदा ।
तत्रैव संस्थिरा हृष्टा चाहमेव न संशयः ।। १०० ।

एतद्भावं त्वं करोषि कस्य हेतोस्तव प्रिया ।
वामाङ्गे संस्थिरा नित्यं कामक्रोधविवर्जिता ।। १०१ ।

आनन्दभैरव उवाच—

किं प्रयोजनमेवं हि शवादीनाञ्च साधनात् ।
यदि ते श्रीपदाम्भोजमधून्मत्तो भवेद्यतिः ।। १०२ ।

त्रैलोक्यपूजिते भीमे वाग्वादिनीस्वरूपिणी ।
शवसाधनमात्रेण केन योगी भवेद्वद ।। १०३ ।

[3]आनन्दरसलावण्यमन्दहासमुखाम्बुजे ।
योगी भजति योगार्थं केन तत्फलमावद ।। १०४ ।

[4]आनन्दभैरवी उवाच—

यदि शङ्करभक्तोऽसि यदि मम जापपरायणः ।
तथापि शवभावेन शववत् शवसाधनम् ।। १०५ ।

रात्रियोगे प्रकर्त्तव्यं दिवसे न कदाचन ।
शवे स्थिरो यो बभूव स भक्तो मे न संशयः ।। १०६ ।

मे [5]शवाकृतिमद्द्रव्यं मम तुष्टिनिबन्धनम् ।
ममाज्ञापालने योग्यः कुर्याद् वीरः शवासनम् ।। १०७ ।

---

१. एकावामि—क० । २. तवभावेन—क० ।

३. आनन्दरसलावण्यं च मन्दहासश्च मुखाम्बुजे यस्याः सा ।

४. आनन्दभैरवी—क० । ५. मे शवा इति सद्द्रव्यम्—क० ।

यद्यहं तत्र गच्छामि तदैव स शिवो भवेत् ।
निःशेषत्यागमात्रेण शवत्त्वं प्रलयं तनोः ॥ १०८ ॥

यः करोति भावराशिं मयि देव्यां महेश्वर ।
त्रैलोक्यपूजितायान्तु स शिवः शवमाश्रयेत् ॥ १०९ ॥

अधिकारी[1] तु भक्तस्य पालनं [2]परपृष्ठतः ।
करोमि कामिनीनाथ सन्देहो नात्र भूतले[3] ॥ ११० ॥

यदाहं त्यज्यते गात्रं पशूनां मारणाय च ।
तदैते च मृताः सर्वे [4]जीवन्ते केन हेतुना ॥ १११ ॥

[5]तदाहुतिमहाद्रव्यं शवेन्द्रं रणहानिगम् ।
आनीय साधयेद्यस्तु स स्थिरो मे सुभक्तिगः ॥ ११२ ॥

सदा क्रोधी भवेद्यस्तु स क्रूरो नात्र संशयः ।
स कथं [6]वीररात्रौ च साधयेद् विह्वलः शवम् ॥ ११३ ॥

भयविह्वलचेता यः स क्रोधी नात्र संशयः ।
नास्ति क्रोधसमं पापं पापात् क्षिप्तो भवेत् शवे ॥ ११४ ॥

यो भक्तः पापनिर्मुक्तः सिद्धरूपी निराश्रयः ।
विवेकी ध्याननिष्ठश्च स्थिरः संसाधयेत् शवम् ॥ ११५ ॥

यावत्कालं स्थिरचित्तं न प्राप्नोति जितेन्द्रियः ।
तावत्कालं नापि कुर्यात् शवेन्द्रस्यापि साधनम् ॥ ११६ ॥

शवमानीय तद्द्वारे तेनैव परिखन्य च ।
तद्दिनात्तद्दिनं यावत् यद्बद्ध्वा[7] व्याप्य साधयेत् ॥ ११७ ॥

---

१. अधिकालाय भक्तस्य–क० ।
२. शव–क० ।
३. नात्र विद्यते इति–क० ।
४. केवलाकृतिहेतुना–क० ।
५. तदाकृति–क० ।
६. घोररात्रौ–क० ।
७. वत्सरं व्याप्य साधयेत्–क० । बद्ध्वा इति पाठे बन्धनार्थकबन्धधातोः क्त्वाप्रत्ययः । अनिदितामिति नलोपः ।

एवं कृत्वा हविष्याशी महाविद्यादिसाधनम् ।
जितेन्द्रियो मुदा कुर्याद् अष्टाङ्गसाधनेन च ॥ ११८ ।

तदष्टाङ्गफलं ह्येतत् यत्कृत्वा सिद्धिभाग् भवेत् ।
नाडीमुद्राभेदकञ्च कुलाचारफलान्वितम् ॥ ११९ ।

अष्टाङ्गसाधनादेव सिद्धरूपो महीतले ।
पश्चादन्य[१]स्वर्गगामी भवेन्न भूतलं विना ॥ १२० ।

आदौ भूतलसिद्धिः[२]स्याद् भुवो लोकस्य सिद्धिभाक् ।
[३]जनलोकस्य सिद्धीशस्तपोलोकस्य सिद्धिभाक् ॥ १२१ ।

सत्यलोकस्य सिद्धीशः पश्चाद् भवति साधकः ।
एवं क्रमेण सिद्धिः स्यात् स्वर्गादीनां महेश्वर ॥ १२२ ।

अष्टाङ्गसाधनार्थाय देवा भवन्ति भूतले ।
भूतले सिद्धिमाहृत्य गच्छन्ति ब्रह्ममन्दिरे ॥ १२३ ।

क्रमेणैवं विलीनास्ते अतो भूतलसाधनम् ।
भूतले शवमास्थाय ब्रह्मचारी दिवा शुचिः ॥ १२४ ।

निशायां पञ्चतत्त्वेन दिवसेऽष्टाङ्गसाधनम् ।
जितेन्द्रियो [४]निर्विकारो वित्तवानपरो नरः ॥ १२५ ।

शवं संसाधयेद्धीरश्चिन्तालस्यविवर्जितः ।
चिन्ताभिर्जायते लोभो लोभात् कामः प्रपद्यते ॥ १२६ ।

कामाद्भवति सम्मोहो मोहादालस्यसञ्चयः ।
आलस्यदोषजालेन निद्रा भवति तत्क्षणात्[५] ॥ १२७ ।

---

१. शून्य–क० । २. भुवोलोकस्य–क० ।

३. पश्चात् स्वरलोकसिद्धिः स्यात् महालोकस्य सिद्धिभाक्–क० ।

४. वित्तध्यानपरो–क० ।

५. स चासौ क्षणश्चेति कर्मधारयसमासः ।

महानिद्राविपाकेन मृत्युर्भवति निश्चितम् ।
[1]अपक्षनिद्राभङ्गेन क्रोधो भवति निश्चितम् ॥ १२८ ।

तत्क्रोधाच्चित्तविकलो विकलात् श्वासवर्द्धनः ।
वृथायुः क्षयमाप्नोति विस्तरे श्वाससंक्षये ॥ १२९ ।

बलबुद्धिक्षयं याति बुद्धिहीनो जडात्मकः ।
जडभावेन मन्त्राणां जपहीनो भवेन्नरः ॥ १३० ।

जपहीने[2] श्वासनाशः श्वासनाशे तनुक्षयम् ।
अतस्तनुं समाश्रित्य जपनिष्ठो भवेत् शुचिः ॥ १३१ ।

अष्टाङ्गधारणेनैव सिद्धो भवति नान्यथा ।
अष्टाङ्गलक्षणं वक्ष्ये साक्षात् सिद्धिकरं परम् ॥ १३२ ।

जन्मकोटिसहस्राणां फलेन कुरुते नरः ।
यमेन लभ्यते ज्ञानं ज्ञानात् कुलपतिर्भवेत् ॥ १३३ ।

यो योगेशः स कुलेशः शिशुभावस्थनिर्मलः ।
नियमेन भवेत् पूजा पूजया लभते शिवम् ॥ १३४ ।

यत्र कन्या[3] न सम्पूर्णा सम्पूर्णः शुचिरुच्यते ।
आसनेन दीर्घजीवी रोगशोकविवर्जितः ॥ १३५ ।

ग्रन्थिभेदनमात्रेण साधकः शीतलो भवेत् ।
प्राणायामेन शुद्धः स्यात् प्राणवायुवशेन च ॥ १३६ ।

वशी भवति देवेश आत्मारामेऽपि[4] लीयते ।
प्रत्याहारेण चित्तन्तु चञ्चलं कामनाप्रियम् ॥ १३७ ।

तत्कामनाविनाशाय स्थापयेत् पदपङ्कजे ।
धारणेन वायुसिद्धिरष्ट[5]सिद्धिस्ततः परम् ॥ १३८ ।

अणिमासिद्धिमाप्नोति अणुरूपेण वायुना ।
ध्यानेन लभते मोक्षं मोक्षेण लभते सुखम् ॥ १३९ ।

---

१. अपक्व—क० । २. बलहीने—क० ।
३. यत्र कल्याणसम्पूर्णः सम्पूर्णः शुचिरुच्यते—क० । ४. आत्मारामोऽपि—क० ।
५. रिष्टसिद्धि—क० ।—अष्टसंख्याका सिद्धिरष्टसिद्धिः, मध्यमपदलोपिसमासः ।

सुखेनानन्दवृद्धिः स्यादानन्दो ब्रह्मविग्रहः ।
समाधिना महाज्ञानी सूर्याचन्द्रमसोर्गतिः ॥ १४० ।

महाशून्ये लयस्थाने श्रीपदानन्दसागरः ।
तत्तरङ्गे मनो दत्त्वा परमार्थविनिर्मले ॥ १४१ ।

श्रीपादमूर्तिमाकल्प्य ध्यायेत् कोटिरवीन्दुवत् ।
श्रीमूर्तिं कोटिचपलां समुज्ज्वलां सुनिर्मलाम् ॥ १४२ ।

ध्यायेद्योगी सहस्रारे कोटिसूर्येन्दुमन्दिराम् ॥ १४३ ।

श्रीविद्यामतिसुन्दरीं त्रिजगतामानन्दपुञ्जेश्वरीं
कोटयर्कायुततेजसि प्रियकरीं योगादरीं शांकरीम् ।
तां मालां स्थिरचञ्चलां गुरुघनां [1]व्यालाचलां केवलां
ध्यायेत्[2] सूक्ष्मसमाधिना स्थिरमतिः सश्रीपतिर्गच्छति ॥१४४।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसङ्केते योगविद्याप्रकरणे मन्त्रसिद्धिशक्त्युपाये भैरवभैरवीसंवादे चतुर्विंशः पटलः ॥

●

---

१. व्यालोचनाय–क० । २. यः सुसमाधिना–क० ।

अथ पञ्चविंशः पटलः

आनन्दभैरव उवाच—

वद कान्ते रहस्यं मे तत्त्वावधानपूर्वकम् ।
यद् यज्ज्ञात्त्वा महायोगी प्रविशत्यनलाम्बुजे ॥ १ ।
यदि स्नेहदृष्टिरस्ति मम ब्रह्मनिरूपणम् ।
योगसारं तत्त्वपथं निर्मलं वद योगिने ॥ २ ।

आनन्दभैरवो उवाच—

श्रृणु प्राणेश वक्ष्यामि योगनाथ क्रियागुरो ।
योगाङ्गं योगिनामिष्टं तत्त्वब्रह्मनिरूपणम् ॥ ३ ।
एतत्[1] सृष्टिप्रकारञ्च प्रपालनविधिन्तथा ।
असंख्यसृष्टिसंहारं वदामि तत्त्वतः श्रृणु ॥ ४ ।

त्वमेव संहारकरो[2] वरप्रियः प्रधानमेषु त्रितयेषु शंकर ।
संहारभावं मलभूतिनाशनं[3] (सदा)प्रधानमाद्यस्य जगत्प्रपालनम् ॥ ५ ।
तत्राधनं[4] मेरुभुजङ्गमङ्गं सृष्टिप्रकारं खलु तत्र मध्यमम् ।
तत्पालनञ्चेति[5] मयैव राज्ये संहाररूपं प्रकृतेर्गुणार्थकम् ॥ ६ ।
एतत्त्रयं नाथ भयादिकारणं तन्नाशनाम्ने[6] प्रणवं गुणात्मकम् ।
त्रयं गुणातीतमनन्तमक्षरं सम्भाव्य योगी भवतीह साधकः ॥ ७ ।
अव्यक्तरूपात् प्रणवाद्धि सृष्टिस्तल्लीयते व्यक्ततनोः समासा ।
सूक्ष्माद्यकारात् प्रतिभान्ति खे सदा प्रणश्यति स्थूलकलान्निरक्षरात् ॥८।
अतीव चित्रं जगतां विचित्रं नित्यं चरित्रं कथितुं न शक्यते ।
हंसाश्रितास्ते भववासिनो जना ज्ञात्त्वा न देहस्थमुपाश्रयन्ते ॥ ९ ।

---

१. तत्र दृष्टिप्रकारञ्च–क० ।
२. कलेवरप्रियः–क० ।
३. भवभूतिनाशनात्–क० ।
४. तत्राधमम्–क० ।
५. तत्पालनं चोक्तमेव बाह्ये–क० ।
६. तन्नाशनाशे–क० ।

देहाधिकारी प्रणवादिदेव मायाश्रितो निद्रित एष[1] कालः ।
प्रलीयते दीर्घपथे च काले तदा प्रणश्यन्ति जगत् स्थिता जनाः ॥ १० ॥

कालो[2] जगद्भक्षक ईशवेशो तरीस्तीर्णगात्रो प्रतिर्हीनमीनः ।
स एव मृत्युर्विहितं चराचरं प्रभुञ्जति श्रीरहितं पलायनम् ॥ ११ ॥

पञ्चेन्दुतत्त्वेन महेन्द्रसृष्टिः प्रतिष्ठिता यज्ञविधानहेतुना ।
सदैव यज्ञं कुरुते भवार्णवे निःसृष्टिकाले वरयज्ञसाधनम् ॥ १२ ॥

हिताहितं तत्र महार्णवे भयं विलोक्य लोका भयविह्वलाः सदा ।
विशन्ति ते कुत्सितमार्गमण्डले अतो महानारकिबुद्धिहीनाः ॥ १३ ॥

मायामये धर्मकुलानले भवे लीनो हरेर्याति[3] पथानुसारी ।
म्रियेत कालानलतुल्यमृत्युना कथन्तु योगी कथमेव साधकः ॥ १४ ॥

यः साधकः प्रेम-कलासुभक्त्या स एव मूर्खो यदि याति संसृतौ ।
संसारहीनः प्रियचारुकाल्याः सिद्धो भवेत् कामदचक्रवर्ती ॥ १५ ॥

वसेन्न सिद्धो गृहीणीसमृद्ध्यां महाविपद्दुःखविशोषिकायाम् ।
यदीह काले प्रकरोति वासनां तदा भवेन्मृत्युरतीव निश्चितम् ॥ १६ ॥

कृपावलोक्यं वदनारविन्दं तदैव हे नाथ ममैव चेद्यदि ।
सदैव यः साधुगणाश्रितो नरो ध्यात्त्वा निगूढमतिभागगद्गतः[4] ॥ १७ ॥

स एव साधुः प्रकृतेर्गुणाश्रितः कृती वशी वेदपुराणवक्ता[5] ।
सत्त्वं महाकाल इतीह चाहं प्रणिश्चयं ते कथितं श्रिये मया ॥ १८ ॥

गुणेन भक्तेन्द्रगणाधिकानां साक्षात् फलं योगजपाख्यसंगतिम् ।
अष्टाङ्गभेदेन शृणुष्व कामप्रेमाय भावाय जयाय[6] वक्ष्ये ॥ १९ ॥

---

१. एव-क० ।
२. कालो जगद्भक्षक ईशरोषात् विस्तीर्णगात्रो गतिहीनमीनः-क० । अयमेव पाठो युक्तः ।
३. यवो वेदपथानुसारी-क० ।
४. अतिभावलग्नः-क० ।
५. वेदानां पुराणानां च वक्ता, षष्ठीतत्पुरुषः, तृजकाभ्यामित्यस्यानित्यत्वात् । वक्तेत्यस्य तृन्नन्तपक्षे गम्यादीनामिति द्वितीयाघटितः समासः ।
६. यमाय-क० ।

मायादिकं यः प्रथमं वशं नयेत्
स एव योगी जगतां प्रतिष्ठितः ।
रविप्रकारं यमवासनावशो
शृणुष्व तं कालवशार्थकेवलम् ।। २० ।

सर्वत्र कामादिकमाशु जित्वा
जेतुं समर्थो यमकर्मसाधकः ।
कामं तथा क्रोधमतीव लोभं
मोहं मदं मात्सरितं [1]सुदुष्कृतम् ।। २१ ।

अतो मया द्वादशशब्दघातकं
वशं समाकृत्य महेन्द्रतुल्यम् ।
सर्वत्र वायोर्वशकारणाय
करोति योगी सचलान्यथा भवेत् ।। २२ ।

अहिंसनं सत्त्यसुवाक्यसुप्रिय-
मस्तेयभावं कुरुते वसिष्ठवत् ।
सुब्रह्मचर्यं सुदृढार्ज्जवं सदा
क्षमाधृति सेवसुसूक्ष्मवायुनः ।। २३ ।

तथा मिताहारमसंशयं मनः
शौचं प्रपञ्चार्थविवर्जनं प्रभो ।
करोति यः साधकचक्रवर्ती
[2]वाद्योत्सवाज्ञानविवर्जनं सदा ।। २४ ।

वशी यमद्वादशसंख्ययेति
करोति चाष्टाङ्गफलार्थसाधनम् ।
वरानना श्रीचरणारविन्दं
[3]सत्त्वादशाच्छन्नत्रिनेत्रगोचरम् ।। २५ ।

---

१. त्वहङ्कृतम्–क० । २. बाह्योत्सवम्–क० ।
३. सत्वादशाब्दमतिनेत्रगोचरम्–क० ।

तपश्च सन्तोषमनस्थिरं सदा
आस्तिक्यमेवं द्विजदानपूजनम् ।
नितान्तदेवार्चनमेव भक्त्या
सिद्धान्तशुद्धश्रवणं च ह्रीर्मतिः ॥ २६ ।

जपोहुतं तर्पणमेव सेवनं
तद्भावनं चेष्टनमेव नित्यम् ।
इतोह शास्त्रे नियमाश्चतुर्दशा
भक्तिक्रियामङ्गलसूचनानि ॥ २७ ।

पूर्वोक्तयोन्यासनमेव सत्यं
भेकासनं बद्धमहोत्पलासनम् ।
वीरासनं भद्रसुभकासनं[1] च
पूर्वोक्तमेवासनमाशु कुर्यात् ॥ २८ ।

सर्वाणि तन्त्राणि कृतानि नाथ
सूक्ष्माणि[2] नालं वशहेतुना मया ।
तथापि मूढो यदि वायुपान-
[3]माहृत्य योनौ भ्रमतीह पातकी ॥ २९ ।

प्राणानिलानन्दवशेन मत्तो
[4]गजेन्द्रगामी पुरुषोत्तमं[5] स्मृतम् ।
[6]तस्यैव सेवानिपुणो भवेद्वशी
ब्रह्माण्डलोकं परिपाति यो बली ॥ ३० ।

---

१. भद्रसु भद्रकासनम्–क० । २. सूक्ष्मानिलानाम्–क० ।

३. नाहृत्य योनौ–क० ।

४. गजेन्द्र इव गच्छति, तच्छीलो गजेन्द्रगामी. ताच्छील्ये णिनिः ।

५. पुरुषोत्तमः स्मृतः–क० ।

६. तस्यैवमेवानिपुणो–मूले ।

वदामि देवादिसुरेश्वर प्रभो
सूक्ष्मानिलं प्राणवशेन धारयेत् ।
सिद्धो भवेत् साधकचक्रवर्ती
सर्वान्तरस्थं परिपश्यति प्रभुम् ।। ३१ ।

आनन्दभैरव उवाच—

वद कान्ते महाब्रह्मज्ञानं सर्वत्र शोभनम् ।
येन वायुवशं कृत्वा खेचरो भूभृतां पतिः ।। ३२ ।

साधको ब्रह्मरूपी स्यात् ब्रह्मज्ञानप्रसादतः ।
ब्रह्मज्ञानात् परं ज्ञानं कुत्रास्ति वद सुन्दरि ।। ३३ ।

आनन्दभैरवी उवाच—

शृणुष्व योगिनां नाथ धर्मज्ञो ब्रह्मसञ्ज्ञक[1] ।
अज्ञानध्वान्तमोहानां निर्मलं ब्रह्मसाधनम् ।। ३४ ।

ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ।
[2]यदि ब्रह्मज्ञानधर्मी स सिद्धो नात्र संशयः ।। ३५ ।

कोटिकन्याप्रदानेन कोटिजापेन किं फलम् ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ।। ३६ ।

सरोवरसहस्रेण कोटिहेमाचलेन च ।
कोटिब्राह्मणभोज्येन कोटितीर्थेन किं फलम् ।। ३७ ।

कामरूपे महापीठे साधकैर्लभ्यते यदि ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ।। ३८ ।

---

१. ब्रह्मसाधक–क० ।

२. गयायां पिण्डदानेन वाराणस्यां मृतेन किम् ।
किं कुरुक्षेत्रदानेन प्रयागे वपनं यदि ।।
अश्वमेधसहस्रेण राजसूयशतेन किम् ।
ब्रह्मज्ञानसमो धर्मो नान्यधर्मो विधीयते ।।–क० ।

ब्रह्मज्ञानन्तु द्विविधं प्राणायाममजमव्ययम् ।
भक्तिवाक्यं शब्दरसं स्वरूपं ब्रह्मणः पथम्[1] ॥ ३९ ।

प्राणायामन्तु द्विविधं सुगर्भञ्च निगर्भकम् ।
जपध्यानं सगर्भं तु तदा[2] युक्तं निगर्भकम् ॥ ४० ।

[3]अव्ययालक्षणाक्रान्तं प्राणायामं परात् परम् ।
ब्रह्मज्ञानेन जानाति साधको विजितेन्द्रियः ॥ ४१ ।

तत्प्रकारद्वयं नाथ [4]मालावृत्तिं जपक्रमम् ।
[5]मालावृत्तिद्वादशकं जपक्रमन्तु षोडश ॥ ४२ ।

नासिकायां महादेव लक्षणत्रयमनुत्तमम्[6] ।
पूरकं कुम्भकं तत्र रेचकं देवतात्रयम् ॥ ४३ ।

एतेषामप्यधिष्ठाने ब्रह्मविष्णुशिवाः प्रजाः ।
त्रिवेणीसंगमे यान्ति सर्वपापापहारकाः ॥ ४४ ।

ईडा च भारती गङ्गा पिङ्गला यमुना मता ।
ईडापिंगलयोर्मध्ये सुषुम्ना च सरस्वती ॥ ४५ ।

त्रिवेणीसंगमो यत्र तीर्थराजः स उच्यते ।
त्रिवेणीसङ्गमे वीरश्चालयेत्तान् पुनः पुनः ॥ ४६ ।

सर्वपापाद्विनिर्मुक्तः सिद्धो भवति नान्यथा ।
पुनः पुनः [7]भ्रामयित्त्वा महातीर्थे निरञ्जने ॥ ४७ ।

---

१. पदम्–क० ।
२. तदयुक्तम्–क० ।
३. अव्ययलक्षणाक्लान्तम्–क० ।
४. मालावर्ति–क० ।
५. मात्रावर्ति–क० ।
६. लक्षणत्रयमुत्तमम्–क० ।
७. भावयित्वा–क० ।

वायुरूपं महादेवं सिद्धो भवति नान्यथा ।
चन्द्रसूर्यात्मिकामध्ये वह्निरूपे महोज्ज्वले ॥ ४८ ।

ध्यात्वा कोटिवीरकरं कुण्डलीकिरणं वशी ।
त्रिबारभ्रमणं वायोरुत्तमाधममध्यमाः ॥ ४९ ।

यत्र यत्र गतो वायुस्तत्र तत्र त्रयं त्रयम् ।
इडादेवी च चन्द्राख्या सूर्याख्या पिङ्गला तथा ॥ ५० ।

सुषुम्ना जननी मुख्या सूक्ष्मा पङ्कजतन्तुवत् ।
सुषुम्ना मध्यदेशे च वज्राख्या नाडिका शुभा ॥ ५१ ।

तत्र सूक्ष्मा चित्रिणी च तत्र श्रीकुण्डलीगतिः ।
तया संग्राह्य तं नाड्या षट्पद्मं सुमनोहरम् ॥ ५२ ।

ध्यानगम्यापरं ज्ञानं षट्शरं शक्तिसंयुतम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ५३ ।

ततः परशिवो नाथ षट्शिवाः परिकीर्तिताः ।
डाकिनी राकिणी शक्तिर्लाकिनी काकिनी तथा ॥ ५४ ।

[1]साकिनी तत्र षट्पद्मे शक्तयः षट्शिवान्विताः ।
मूलाधारं स्वाधिष्ठानं मणिपूरं सुपङ्कजम् ॥ ५५ ।

अनाहतं [2]विशुद्धाख्यमाज्ञाचक्रं महोत्पलम् ।
आज्ञाचक्रादिमध्ये तु चन्द्रं शीतलतेजसम् ॥ ५६ ।

प्रपतन्तं मूलपद्मे तं ध्यात्वा[3] पूरकानिलम् ।
यावत्कालं स्थैर्यगुणं तत्कालं कुम्भकं स्मृतम् ॥ ५७ ।

पिङ्गलायां प्रगच्छन्तं रेचकं तं वशं नयेत् ।
[4]अङ्गुष्ठैकपर्वणा च दक्षनासापुटं वशी ॥ ५८ ।

---

१. शाकिनी हाकिनी तत्र षट्पद्मे षट्शिवात्मिका—क० ।

२. आनाख्यं षणमनोहरम्—क० । ३. ध्यायेत्—क० ।

४. अङ्गुष्ठस्य एकं पर्व इति षष्ठीतत्पुरुषगर्भः कर्मधारयसमासः ।

[1]धृत्वा षोडशबारेण प्रणवेन जपं चरेत् ।
एतत्पूरकमाकृत्य कुर्यात्कुम्भकमद्भुतम्[2] ॥ ५९ ।

चतुःषष्टिप्रणवेन जपं ध्यानं समाचरेत् ।
कुम्भकानन्तरं नाथ रेचकं कारयेद् बुधः ॥ ६० ।

द्वात्रिंशद्वारजापेन मूलेन प्रणवेन वा ।
द्विनासिकापुटं बद्ध्वा कुम्भकं सर्वसिद्धिदम् ॥ ६१ ।

कनिष्ठानामिकाभ्यान्तु वाममङ्गुष्ठदक्षिणम् ।
पुनर्दक्षिणनासाग्रे [3]वायुमापूरयेद् बुधः ॥ ६२ ।

[4]मनुषोडशजापेन कुम्भयेत् [5]पूर्ववत्ततः ।
ततो वामे रेचकञ्च द्वात्रिंशत्प्रणवेन तु ॥ ६३ ।

पुनर्वामेन सम्पूर्य षोडशप्रणवेन तु ।
पुनर्दक्षिणनासाग्रे द्वादशाङ्गुलमानतः ॥ ६४ ।

कुम्भयित्वा रेचयेद्यः सर्वत्र पूर्ववत् प्रभो ।
प्राणायामत्रयेणैव प्राणायामैकमुत्तमम् ॥ ६५ ।

द्विबारं मध्यमं प्रोक्तं मध्यमं चैकबारकम् ।
त्रिकालं कारयेद्यत्नात् अनन्तफलसिद्धये ॥ ६६ ।

प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः ।
जपध्यानादिभिर्मुक्तं सगर्भं यः करोति हि ॥ ६७ ।

मासात् सल्लक्षणं प्राप्य षण्मासे पवनासनः ।
तालुमूले समारोप्य जिह्वाग्रं योगसिद्धये ॥ ६८ ।

---

१. ध्यात्वा–क० ।
२. मुत्तमम्–क० ।
३. सम्पूरयेत् ततः–क० ।
४. मनोः षोडशजापेन–क० ।
५. पूरयेत्ततः–क० ।

त्रिकाले सिद्धिमाप्नोति प्राणायामेन षोडश ।
सदाभ्यासी वशीभूत्वा पवनं[1] जनयेत् पुमान् ॥ ६९ ।

षण्मासाभ्यन्तरे सिद्धिरिति योगार्थनिर्णयः ।
योगेन लभ्यते सर्वं योगाधीनमिदं जगत् ॥ ७० ।

तस्माद् योगं परं कार्यं यदा योगी तदा सुखी ।
विना योगं न सिद्धेऽपि कुण्डली परदेवता ॥ ७१ ।

अथ योगं सदा कुर्यात् ईश्वरीपाददर्शनात् ।
योगयोगाद्भवेन्मोक्ष इति योगार्थनिर्णयः ॥ ७२ ।

मन्त्रसिद्धीच्छुको यो वा सैव योगं सदाभ्यसेत् ।
मात्रावृत्तिं प्रवक्ष्यामि काकचञ्चुपुटं तथा ॥ ७३ ।

सूक्ष्मवायुभक्षणं तत् चन्द्रमण्डलचालनम् ।
[2]त्र्यावृत्तिञ्चैव विविधं तन्मध्ये उत्तमं त्रयम् ॥ ७४ ।

वर्णं सचन्दं संयुक्तं मूलं त्र्यक्षरमेव वा ।
जानुजङ्घामध्यदेशे तत्तत्सर्वासनस्थितः ॥ ७५ ।

वामहस्ततालुमूलं भ्रामयेद्द्वादशक्रमात् ।
द्वादशक्रमशः कुर्यात् प्राणायामं हि पूर्ववत् ॥ ७६ ।

मात्रावृत्तिक्रमेणैव जपमष्टसहस्रकम् ।
प्राणायामद्वादशैकैर्भवेत्तदष्टसहस्रकम् ।
कृत्वा सिद्धोश्वरो नाम निष्पापी चैकमासतः ॥ ७७ ।

त्रिसन्ध्यं कारयेद्यत्नाद्ब्रह्मज्ञानी निरञ्जनः ।
भवतीति न सन्देहः सदाभ्यासी हि योगिराट् ॥ ७८ ।

योगाभ्यासाद्भवेन्मुक्तो योगाभ्यासात् कुलेश्वरः ।
योगाभ्यासाच्च संन्यासी ब्रह्मज्ञानी निरामयः[3] ॥ ७९ ।

---

१. पवनः पाचयेत्–क० । २. मात्रावृत्तिञ्च–क० ।
३. निर्गता आमया आधिव्याध्यादयो यस्य सः, बहुव्रीहिसमासः ।

सदाभ्यासाद् भवेद्योगी सदाभ्यासात् परन्तपः ।
सदाभ्यासात् पापमुक्तो [१]विधिविद्याशकृत् शकृत् ॥ ८० ।

काकचञ्चुपुटं कृत्वा पिबेद्वायुमहर्निशम् ।
सूक्ष्मवायुक्रमेणैव सिद्धो भवति [२]योगिराट् ॥ ८१ ।

बद्धपद्मासनं कृत्वा योगिमुद्रां विभाव्य च ।
मूले सम्पूरयेद् वायुं काकचञ्चुपुटेन तु ॥ ८२ ।

मूलमाकुञ्च्य सर्वत्र प्राणायामे मनोरमे ।
प्रबोधयेत् कुण्डलिनीं[३] चैतन्यां चित्स्वरूपिणीम् ॥ ८३ ।

[४]ओष्ठाधरकाकतुलं दन्ते दन्ताः प्रगाढकम् ।
बद्ध्वा[५] वा यद् यजेद् योगी जिह्वां नैव प्रसारयेत् ॥ ८४ ।

राजदन्तयुगं नाथ न स्पृशेज्जिह्वया सुधीः ।
काकचञ्चुपुटं कृत्वा बद्ध्वा वीरासने[६] स्थितः ॥ ८५ ।

तालुजिह्वामूलदेशे चान्यजिह्वां प्रयोजयेत् ।
तदुद्भूतामृतरसं काकचञ्चुपुटे पिबेत् ॥ ८६ ।

यः काकचञ्चुपुटके सूक्ष्मवायुप्रवेशनम् ।
करोति स्तम्भनं योगी सोऽमरो भवति ध्रुवम्[७] ॥ ८७ ।

एतद्योगप्रसादेन जीवन्मुक्तस्तु साधकः ।
[८]जराव्याधिमहापीडारहितो भवति क्षणात् ॥ ८८ ।

---

१. विधिविद्यात् प्रकाशकृत्–क० । २. नान्यथा–क० ।
३. कुण्डलिनी चैतन्या चेन्न महासुखी–क० । ४. ओष्ठाधारं काकतुल्यम्–क० ।
५. बद्धराजद्विजो योगी जिह्वां नैव–क० । ६. बद्धवीरासनस्थितः–क० ।
७. सूक्ष्मवायुक्रमेणैव सिद्धो भवति योगिराट्–ग० ।
८. जरा च व्याधिश्च महापीडा च, ताभिः रहितः ।

अथवा मात्रया कुर्यात् षोडशस्वरसम्पुटम् ।
स्वमन्त्रं प्रणवं वापि जप्त्वा योगी भवेन्नरः ॥ ८९ ।

[1]अथवा वर्णमालाभिः पुटितं मूलमन्त्रकम् ।
मालासंख्याक्रमेणैव जप्त्वा कालवशं नयेत् ॥ ९० ।

वदने नोच्चरेद्वर्णं वाञ्छाफलसमृद्धये ।
केवल जिह्वया जप्यं कामनाफलसिद्धये ॥ ९१ ।

नाभौ सूर्यो वह्निरूपी ललाटे चन्द्रमास्तथा ।
अग्निशिखास्पर्शनेन गलितं चन्द्रमण्डलम् ॥ ९२ ।

तत्परामृतधाराभिः दीप्तिमाप्नोति भास्करः ।
सन्तुष्टः पाति सततं पूरकेण च योगिनाम् ॥ ९३ ।

ततः पूरकयोगेन अमृतं श्रावयेत् सुधीः ।
कुर्यात्प्रज्वलितं वह्निं रेचकेन वराग्निना ॥ ९४ ।

अथ मौनजपं कृत्वा ततः सूक्ष्मानिलं मुदा ।
सहस्रारे गुरुं ध्यात्त्वा योगी भवति भावकः ॥ ९५ ।

प्राणवायुस्थिरो यावत् तावन्मृत्युभयं कुतः ।
ऊर्ध्वरेता भवेद्यावत्तावत्कालभयं कुतः ॥ ९६ ।

यावद्बिन्दुः स्थितो देहे विधुरूपी सुनिर्मलः ।
सदागलत्सुधाव्याप्तस्तावन्मृत्युभयं कुतः ॥ ९७ ।

आनन्दभैरव उवाच—

वद कान्ते कुलानन्दरसिके ज्ञानरूपिणि ।
सर्वतेजोऽग्रदेवेन येन सिद्धो भवेन्नरः ॥ ९८ ।

महामृता खेचरी च सर्वतत्त्वस्वरूपिणी[2] ।
कीदृशी शांकरीविद्या श्रोतुमिच्छामि तत्क्रियाम् ॥ ९९ ।

---

१. अयर्व—ग० ।

२. सर्वाणि च तानि तत्त्वानि च सर्वतत्त्वानि, पूर्वकालैकसर्वजरदित्यादिना समासः, तेषां स्वरूपमस्ति यस्या।मिति नित्ययोगे इनिः ।

[1]अध्यात्मविद्यायोगेशी कीदृशी भवितव्यता ।
कीदृशी परमा देवी तत्प्रकारं वदस्व मे ।। १०० ।

आनन्दभैरवी उवाच—

यस्य नाथ मनस्थैर्यं महासत्त्वे सुनिर्मले ।
भक्त्या सम्भावनं यत्र विनावलम्बनं प्रभो ।। १०१ ।
यस्या मनश्चित्तवशं स्वमिन्द्रियं
स्थिरा स्वदृष्टिर्जगदीश्वरीपदे ।
न खेन्दुशोभे च विनावलोकनं
वायुः स्थिरो यस्य विना निरोधनम् ।। १०२ ।
त एव मुद्रा विचरन्ति खेचरी
पापाद्विमुक्ताः प्रपिबन्ति वायुम् ।
यथा हि बालस्य च तस्य वेष्टी
निद्राविहीनाः प्रतियान्ति निद्राम् ।। १०३ ।
[2]पथापथज्ञानविवर्जिता ये
धर्मार्थकामाद्धि विहीनमानसाः ।
विनावलम्बं जगतामधीश्वर
एषैव मुद्रा विचरन्ति शांकरी ।। १०४ ।
ज्ञाने साध्यात्मविद्यार्थं जानाति कुलनायकम् ।
अध्याज्ञाचक्रपद्मस्थं शिवात्मानं सुविद्यया ।। १०५ ।
अध्यात्मज्ञानमात्रेण सिद्धो योगी न संशयः ।
षट्चक्रभेदको यो हि अध्यात्मज्ञः स उच्यते ।। १०६ ।
अध्यात्मशास्त्रसंकेतमात्मना मण्डितं शिवम् ।
कोटिचन्द्राकृतिं शान्तिं यो जानाति षडम्बुधे ।। १०७ ।
स ज्ञानी सैव योगी स्यात् सैव देवो महेश्वरः ।
स मां जानाति हे कान्त विस्मयो नास्ति शंकर ।। १०८ ।

---

१. अध्याय–ग० ।
२. पथे गतौ इत्यस्मात् कर्तरि पचाद्यच्, पथम् इति सिध्यति, तच्चापथं चेति पथापथे, ताभ्यां विहीनाः ।

मम सर्वात्मकं रूपं जगत्स्थावरजङ्गमम् ।
[1]सृष्टिस्थितिप्रलयगं यो जानाति स योगिराट् ।। १०९ ।

अध्यात्मविद्यां विज्ञाप्य[2] नानाशास्त्रं प्रकाशितम् ।
तच्छास्त्रजालयुग्मा[3] ये तेऽध्यात्मज्ञाः कथं नराः ।। ११० ।

त्रिदण्डी स्यात्सदाभक्तो[4] वेदाभ्यासपरः कृती ।
वेदादुद्भवशास्त्राणि त्यक्त्वा मां भावयेद्यदि ।। १११ ।

वेदाभ्यासं समाकृत्य नानाशास्त्रार्थनिर्णयम् ।
समुत्पन्नां महाशक्तिं समालोक्य भजेद्यतिः ।। ११२ ।

सर्वत्र व्यापिकां शक्तिं कामरूपां[5] निराश्रयाम् ।
व्यक्ताव्यक्तां स्थिरपदां वायवीं मां भजेद्यतिः ।। ११३ ।

यस्या आनन्दमतुलं [6]ज्ञानं यस्य फलाफलम् ।
योगिनां निश्चयज्ञानमेकमेव न संशयः ।। ११४ ।

यस्याः प्रभावमात्रेण[7] तत्त्वचिन्तापरो नरः ।
तामेव परमां देवीं सर्पराजसु कुण्डलीम् ।। ११५ ।

तामेव वायवीं शक्तिं सूक्ष्मरूपां स्थिराशयाम् ।
आनन्दरसिकां गौरीं ध्यायेत् श्वासनिवासिनीम् ।। ११६ ।

आनन्दं ब्रह्मणो रूपं तत्त्वदेहे[8] व्यवस्थितम् ।
तस्याभिव्यञ्जकं द्रव्यं योगिभिः परिपीयते ।। ११७ ।

---

१. सृष्टिश्च स्थितिश्च प्रलयश्चेति सृष्टिस्थितिप्रलयाः, तान् गच्छति, इति गमेर्डप्रत्ययः ।

२. संगोप्य–क० । ३. मुग्धा–क० ।

४. सदा भोक्ता–क० । ५. कालरूपाम्–क० ।

६. ज्ञानात्–क० (ज्ञानाज्ञस्य)–क० । ७. प्रसाद–क० ।

८. तच्च–क० ।

तद्द्रव्यस्थां महादेवीं नीलोत्पलदलप्रभाम् ।
मानवीं परमां देवीमष्टादशभुजैर्युताम् ॥ ११८ ।

कुण्डलीं चेतनाकान्ति चैतन्यां परदेवताम् ।
आनन्दभैरवीं नित्यां घोरहासां[1] भयानकाम् ॥ ११९ ।

तामेव परमां देवीं सर्ववायुवशंकरीम् ।
मदिरासिन्धुसम्भूतां मत्तां रौद्रीं वराभयाम् ॥ १२० ।

योगिनीं योगजननीं ज्ञानिनां मोहिनीसमाम्[2] ।
[3]सर्वभूतसर्वपक्षस्थितिरूपां महोज्ज्वलाम् ॥ १२१ ।

षट्चक्रभेदिकां सिद्धिं तासां नित्यां मतिस्थिताम् ।
विमलां निर्मलां ध्यात्वा योगी मूलाम्बुजे यजेत् ॥ १२२ ।

एतत्पटलपाठे तु पापमुक्तो विभाकरः ।
यथोद्ध्वरेता धर्मज्ञो विचरेत् ज्ञानसिद्धये ॥ १२३ ।

एतत्क्रियादर्शनेन ज्ञानी भवति साधकः ।
ज्ञानादेव हि मोक्षः स्यान्मोक्षः समाधिसाधनः ॥ १२४ ।

यदुद्धरति[4] वायुश्च धारणाशक्तिरेव च ।
[5]तन्मन्त्रं वर्द्धयित्वा प्राणायामं समाचरेत् ॥ १२५ ।

प्राणायामात् परं नास्ति पापराशिक्षयाय च ।
सर्वपापक्षये याते किन्न सिद्धयति भूतले ॥ १२६ ।

प्राणवायुं महोग्रन्तु महत्तेजोमयं परम् ।
प्राणायामेन जित्वा च योगी मत्तगजं यथा[6] ॥ १२७ ।

---

१. घोरहासाम्–ग० ।
२. मोहिनीमुमाम्–क० ।
३. सर्वभूतेषु सर्वपक्षेषु च या स्थितिः, सा रूपं यस्याः सा ताम् ।
४. यद् यद्वर्धति–क० ।
५. तत्तन्मन्त्रम्–ग० ।
६. तथा–क० ।

प्राणायामं विना नाथ कुत्र सिद्धो भवेन्नरः ।
[1]सर्वसिद्धिक्रियासारं प्राणायामं परं स्मृतम् ॥ १२८ ।

प्राणायामं त्रिवेणीस्थं यः करोति मुहुर्मुहुः ।
तस्याष्टाङ्गसमृद्धिः स्याद्योगिनां योगवल्लभः ॥ १२९ ।

॥ इति श्रीरुद्रयामले महातन्त्रे उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये पाशवकल्पे षट्चक्रसारसंकेते सिद्धमन्त्र-प्रकरणे प्राणायामोल्लासे भैरवीभैरव-संवादे पञ्चविंशः पटलः ॥

१. सर्वासां सिद्धीनां क्रियाः, तासां सारं सारभूतम् ।

अथ षड्विंशः पटलः

आनन्दभैरवी उवाच—

शृणु प्राणेश सकलं प्राणायामनिरूपणम् ।
प्राणायामे जपं ध्यानं तत्त्वयुक्तं वदामि तत् ॥ १ ।

[1]प्रकारयेयमुल्लासं प्राणायामेषु शोभितम् ।
देवताविधिविष्णवीशास्ते तु मध्यममध्यमाः ॥ २ ।

रजस्तमोगुणं नाथ सत्त्वे संस्थाप्य यत्नतः ।
कामक्रोधादिकं त्यक्त्वा योगी भवति योगवित् ॥ ३ ।

रजोगुणं नृपाणान्तु तमोगुणमतीव च ।
अधिकन्तु पशूनां हि साधूनां सत्त्वमेव च ॥ ४ ।

सत्त्वं विष्णुं वेदरूपं[2] निर्मलं द्वैतवर्जितम् ।
आत्मोपलब्धिविषयं त्रिमूर्त्तिमूलमाश्रयेत् ॥ ५ ।

सत्त्वगुणाश्रयादेव निष्पापी सर्वसिद्धिभाक् ।
जितेन्द्रियो भवेत् शीघ्रं ब्रह्मचारिव्रतेन च ॥ ६ ।

प्राणवायुवशेनापि वशीभूताश्चराचराः ।
तस्यैव [3]कारणे नाथ जपं ध्यानं समाचरेत् ॥ ७ ।

वक्ष्यामि तत्प्रकारं जपध्यानं विधिद्वयम् ।
एतत्करणमात्रेण योगी स्यान्नात्र संशयः ॥ ८ ।

जपं च त्रिविधं प्रोक्तं व्यक्ताव्यक्तातिसूक्ष्मगम् ।
व्यक्तं वाचिकमुपांशुमव्यक्तं[4] सूक्ष्ममानसम् ॥ ९ ।

---

१. प्रकारत्रयमुल्लासम्–क० । २. विष्णुं वेदरूपम्–क० ।
३. करणे–क० । ४. स व्यक्तम्–ग० ।

तत्र ध्यानं प्रवक्ष्यामि प्रकारमेकविंशतिम् ।
ध्यानेन जपसिद्धिः स्यात् जपात् सिद्धिर्न संशयः ।। १० ।

आदौ विद्यामहादेवीध्यानं वक्ष्यामि शंकर ।
एषा देवी कुण्डलिनी [1]यस्या मूलाम्बुजे मनः ।। ११ ।

मनः करोति सर्वाणि धर्मकर्माणि सर्वदा ।
यत्र गच्छति स श्रीमान् तत्र वायुश्च गच्छति ।। १२ ।

अतो मूले समारोप्य मानसं वायुरूपिणम् ।
द्वादशाङ्गुलकं बाह्ये नासाग्रे चावधारयेत् ।। १३ ।

मनःस्थं रूपमाकल्प्य मनोधर्मं मुहुर्मुहुः ।
मनस्तत् [2]सदृशं याति गतिर्यत्र[3] सदा भवेत् ।। १४ ।

मनोविकाररूपन्तु एकमेव न संशयः ।
अज्ञानिनां हि देवेश ब्रह्मणो रूपकल्पना ।। १५ ।

अव्यक्तं ब्रह्मरूपं हि तच्च देहे व्यवस्थितम् ।
धर्मकर्मविनिर्मुक्तं मनोगम्यं भजेद्यतिः ।। १६ ।

पद्मं चतुर्दलं मूले स्वर्णवर्णं मनोहरम् ।
तत्कर्णिकामध्यदेशे स्वयम्भूवेष्टितां भजेत् ।। १७ ।

कोटिसूर्यप्रतीकाशां सुषुम्नारन्ध्रगामिनीम्[4] ।
ऊद्ध्र्वं गलत्सुधाधारामण्डितां कुण्डलीं भजेत् ।। १८ ।

स्वयम्भूलिङ्गं परमं ज्ञानं [5]चिरविवर्द्धनम् ।
सूक्ष्मातिसूक्ष्ममाकाशं कुण्डलीजडितं भजेत् ।। १९ ।

पूर्वोक्तयोगपटलं तत्र मूले विभावयेत् ।
कुण्डलीध्यानमात्रेण षट्चक्रभेदको भवेत् ।। २० ।

---

१. अस्या–क० । २. सहस्रम्–ग० ।
३. मतिर्यत्र–ग० । ४. वज्रगामिनीम्–ग० । सुषुम्नाया रन्ध्रे गच्छति तच्छीला, ताम् ।
५. ज्ञानाङ्कुर–क० ।

ध्यायेद्देवीं कुण्डलिनीं परापरगुरुप्रियाम् ।
[1]आनन्दां भुवि मध्यस्थां योगिनीं योगमातरम् ॥ २१ ।

कोटिविद्युल्लताभासां सूक्ष्मातिसूक्ष्मवर्त्मगाम्[2] ।
ऊद्‌र्ध्वमार्गव्याचलन्तीं प्रथमारुणविग्रहाम् ॥ २२ ।

प्रथमोद्‌गमने कौलीं[3] ज्ञानमार्गप्रकाशिकाम् ।
[4]प्रति प्रयाणे प्रत्यक्षाममृतव्याप्तविग्रहाम् ॥ २३ ।

धर्मोदयां भानुमतीं जगत्स्थावरजङ्गमाम् ।
सर्वान्तस्थां निर्विकल्पाञ्चैतन्यानन्दनिर्मलाम् ॥ २४ ।

आकाशवाहिनीं नित्यां [5]सर्ववर्णस्वरूपिणीम् ।
महाकुण्डलिनीं ध्येयां ब्रह्मविष्णुशिवादिभिः ॥ २५ ।

प्रणवान्तःस्थितां शुद्धां शुद्धज्ञानाश्रयां शिवाम् ।
कुलकुण्डलिनीं सिद्धिं चन्द्रमण्डलभेदिनीम् ॥ २६ ।

मूलाम्भोजस्थितामाद्यां जगद्योनिं जगत्प्रियाम् ।
स्वाधिष्ठानादिपद्मस्थां सर्वशक्तिमयीं पराम् ॥ २७ ।

आत्मविद्यां शिवानन्दां पीठस्थामतिसुन्दरीम् ।
सर्पाकृतिं रक्तवर्णां [6]सर्वरूपविमोहिनीम् ॥ २८ ।

कामिनीं कामरूपस्थां [7]मातृकामात्मदायिनीम् ।
कुलमार्गानन्दमयीं कालीं कुण्डलिनीं भजेत् ॥ २९ ।

इति ध्यात्वा मूलपद्मे निर्मले योगसाधने ।
धर्मोदये ज्ञानरूपीं साधयेत् परकुण्डलीम् ॥ ३० ।

---

१. आनन्दार्णव–क० ।

२. सूक्ष्मवर्णगाम्–क० ।—सूक्ष्मातिसूक्ष्मं यद् वर्त्म (मार्गः) तद् गच्छति—इति । गमेर्डप्रत्ययः ।

३. प्रथमोद्धमने कौला–ग० ।

४. प्रति प्रमाणे प्रत्यक्षाममृतव्याप्तविग्रहाम्–ग० ।

५. निर्बिवर्ण–ग० ।

६. सर्प–ग० ।

७. मातृकामयंदायिनीम्–क० ।

कुण्डलीभावनादेव खेचराद्यष्टसिद्धिभाक् ।
ईश्वरत्वमवाप्नोति साधको भूपतिर्भवेत् ॥ ३१ ।

योगाभ्यासे भावसिद्धौ स्मृतो वायुर्महोदयः ।
प्राणानामादुर्निवार्यो यत्नेन तं प्रचालयेत् ॥ ३२ ।

प्रतिक्षणं समाकृष्य मूलपद्मस्थकुण्डलीम् ।
तदा प्राणमहावायुर्वशी भवति निश्चितम् ॥ ३३ ।

ये देवाश्चैव ब्रह्माण्डे क्षेत्रे पीठे सुतीर्थके ।
शिलायां [1]शून्यगे नाथ सिद्धाः स्युः प्राणवायुना ॥ ३४ ।

ब्रह्माण्डे यानि संसन्ति तानि सन्ति कलेवरे ।
ते सर्वे प्राणसंलग्नाः प्राणातीतं निरञ्जनम् ॥ ३५ ।

यावत्प्राणः स्थितो देहे तावन्मृत्युभयं कुतः ।
गते प्राणे समायान्ति देवताश्चेतनास्थिताः ॥ ३६ ।

सर्वेषां मूलभूता सा कुण्डली भूतदेवता[2] ।
वायुरूपा पाति सर्वमानन्दचेतनामयी ॥ ३७ ।

जगतां चेतनारूपी कुण्डली योगदेवता ।
आत्ममनःसमायुक्ता ददाति मोक्षमेव सा ॥ ३८ ।

अतस्तां भावयेन्मन्त्री भावज्ञानप्रसिद्धये ।
भवानीं भोगमोक्षस्थां यदि योगमिहेच्छसि ॥ ३९ ।

वायुरोधनकाले च कुण्डली चेतनामयी[3] ।
ब्रह्मरन्ध्रावधि ध्येया योगिनं पाति कामिनी ॥ ४० ।

वायुरूपां[4] परां देवीं नित्यां योगेश्वरीं जयाम् ।
निर्विकल्पां त्रिकोणस्थां[5] सदा ध्यायेत् कुलेश्वरीम् ॥ ४१ ।

---

१. मृण्मये–क० । —'मृन्मये' इति पाठान्तरमुचितम्, न तु मृण्मये इति । णत्वस्याप्राप्तेः ।

२. परदेवता–क० । ३. चेतनमुखी–ग० । ४. जयारूपाम्–क० ।

५. त्रिलोकस्थाम्–क० । —त्र्यवयवो लोकस्त्रिलोकस्तत्र स्थिताम् । मध्यमपदलोपिसमासगर्भस्तत्पुरुषः ।

अनन्तां कोटिसूर्याभां ब्रह्मविष्णुशिवात्मिकाम् ।
अनन्तज्ञाननिलयां यां भजन्ति मुमुक्षवः ॥ ४२ ।

अज्ञानतिमिरे घोरे सा लग्ना मूढचेतसि ।
सुप्ता सर्पासना मौला पाति साधकमीश्वरी ॥ ४३ ।

ईश्वरीं सर्वभूतानां ज्ञानाज्ञानप्रकाशिनीम् ।
धर्माधर्मफलव्याप्तां करुणामयविग्रहाम् ॥ ४४ ।

नित्यां ध्यायन्ति योगीन्द्राः काञ्चनाभाः कलिस्थिताः ।
कुलकुण्डलिनीं देवीं चैतन्यानन्दनिर्भराम् ॥ ४५ ।

ककारादिमान्तवर्णां मालाविद्युल्लतावृताम्[१] ।
हेमालङ्कारभूषाङ्गीं[२] ये मां सम्भावयन्ति ते ॥ ४६ ।

ये वै[३] कुण्डलिनीं विद्यां कुलमार्गप्रकाशिनीम् ।
ध्यायन्ति [४]वर्षसंयुक्तास्ते मुक्ता नात्र संशयः ॥ ४७ ।

ये मुक्ता[५] पापराशेस्तु धर्मज्ञानसुमानसाः ।
तेऽवश्यं ध्यानमाकुर्वन् स्तुवन्ति [६]कुण्डलीं पराम् ॥ ४८ ।

कुलकुण्डलिनीध्यानं भोगमोक्षप्रदायकम् ।
यः करोति महायोगी भूतले नात्र संशयः ॥ ४९ ।

त्रिविधं कुण्डलिनीध्यानं दिव्यवीरपशुक्रमम् ।
पशुभावादियोगेन सिद्धो भवति योगिराट् ॥ ५० ।

दिव्यध्यानं प्रवक्ष्यामि सामान्यानन्तरं प्रभो ।
आदौ सामान्यमाकृत्य दिव्यादीन् कारयेत्ततः ॥ ५१ ।

---

१. च्युताम्–ग० । —मालाविद्युतां लताभिरावृताम् ।
२. मन्त्याम्–क० ।
३. ये कुलीनाः कुलाधिस्थाम्–क० ।
४. हर्ष–क० ।
५. भक्ताः–क० ।
६. कुलकुण्डलीम्–क० ।

[1]कोटिचन्द्रप्रतीकाशां तेजोबिम्बां[2] निराकुलाम् ।
[3]ज्वालामालासहस्राढ्यां कालानलशतोपमाम् ॥ ५२ ।

द्रंष्ट्राकरालदुर्धर्षां जटामण्डलमण्डिताम् ।
घोररूपां महारौद्रीं सहस्रकोटिचञ्चलाम् ॥ ५३ ।

कोटिचन्द्रसमस्निग्धां सर्वत्रस्थां भयानकाम् ।
अनन्तसृष्टिसंहारपालनोन्मत्तमानसाम् ॥ ५४ ।

सर्वव्यापकरूपाद्यामादिनीलाकलेवराम् ।
अनन्तसृष्टिनिलयां ध्यायन्ति तां मुमुक्षवः ॥ ५५ ।

वीरध्यानं प्रवक्ष्यामि यत्कृत्वा वीरवल्लभः ।
वराणां वल्लभो यो हि मुक्तो[4] भोगी स उच्यते ॥ ५६ ।

[5]वीराचारे सत्त्वगुणं निर्मलं दिव्यमुत्तमम् ।
सम्प्राप्य च महावीरो योगी भवति तत्क्षणात् ॥ ५७ ।

वीराचारं विना नाथ दिव्याचारं न लभ्यते ।
ततो वीराचारधर्मं कृत्वा दिव्यं समाचरेत् ॥ ५८ ।

वीराचारं कोटिफलं बारैकजपसाधनम् ।
कोटिकोटिजन्मपापदुःखनाशं स भक्तकः ॥ ५९ ।

कुलाचारं समाचारं वीराचारं महाफलम् ।
कृत्वा सिद्धिश्च[6] वै ध्यानं कुलध्यानं[7] मदीयकम् ॥ ६० ।

---

१. सूर्यं–क० । २. विध्याम्–ग० ।
३. प्राणायाम–ग० । ४. मुक्तिभागी–क० ।
५. यदि वीराचारभावं करोति भूभृतां पतिः ।
स योगी भोगवक्ता स्यादानन्दपूर्णभावकः ॥
मुधि दाता विधाता विघाता वेदवाचकैः ।
वेदवक्ता महारुद्रो वीराचारेण सम्भवेत् ॥ क० अधिकः ।
६, सिद्धश्च–क० । ७. यद् यद्–क० ।

कुलकुण्डलिनीं देवीं मां ध्यात्त्वा पूजयन्ति ये।
मूलपद्मे[1] महावीरो ध्यात्वा भवति योगिराट् ॥ ६१ ।

कालीं कौलां कुलेशीं कलकल-कलिजध्यानकालानलार्कां
कल्योल्कां कालकवलां किलिकिलिकलिकां केलिलावण्यलीलाम् ।
सूक्ष्माख्यां संक्षयाख्यां क्षयकुलकमले सूक्ष्मतेजोमयीन्ता-
माद्यन्तस्थां भजन्ति प्रणतगतजनाः[2] सुन्दरीं चारुवर्णाम् ॥६२।

अष्टादशभुजैर्युक्तां नीलेन्दीवरलोचनाम् ।
मदिरासागरोत्पन्नां चन्द्रसूर्याग्निरूपिणीम् ॥ ६३ ।

चन्द्रसूर्याग्निमध्यस्थां सुन्दरीं वरदायिनीम् ।
कामिनीं कोटिकन्दर्पदर्पान्तकपतिप्रियाम् ॥ ६४ ।

आनन्दभैरवाक्रान्तामानन्दभैरवीं पराम् ।
भोगिनीं कोटिशीतांशुगलद्गात्रमनोहराम् ॥ ६५ ।

कोटिविद्युल्लताकारां सदसद्व्यक्तिवर्जिताम् ।
ज्ञानचैतन्यनिरतां तां वीरा भावयन्ति हि ॥ ६६ ।

अस्या ध्यानप्रसादेन त्वं तुष्टो भैरवः स्वयम् ।
अहं च तुष्टा संसारे सर्वे तुष्टा न संशयः ॥ ६७ ।

प्राणायामान् स करोति साधकः स्थिरमानसः ।
ध्यात्त्वा देवीं मूलपद्मे वीरो योगमवाप्नुयात् ॥ ६८ ।

वीरभावं सूक्ष्मवायुधारणेन महेश्वर ।
साधको भुवि जानाति स्वमृत्युं जन्मसङ्कटम् ॥ ६९ ।

मासादाकर्षणीसिद्धिर्वाक्सिद्धिश्च द्विमासतः ।
मासत्रयेण[3] संयोगाज्जायते देववल्लभः[4] ॥ ७० ।

---

१. मूलपङ्के महावीरां भैरवीं ते वशेन्द्रियाम्—ग० । २. जलाम्—ग० ।
३. संयोगी—ग० । ४. देवानां वल्लभः प्रिय इत्यर्थः ।

एवञ्चतुष्टये मासि भवेद्दिक्पालगोचरः ।
पञ्चमे पञ्चबाणः स्यात् षष्ठे रुद्रो न संशयः ॥ ७१ ।

वीरभावस्य माहात्म्यं कोटिजन्मफलेन च ।
जानाति साधकश्रेष्ठो [1]देवीभक्तः स योगिराट् ॥ ७२ ।

वीराचारं महाधर्मं चित्तस्थैर्यस्य कारणम् ।
यस्य प्रसादमात्रेण दिव्यभावाश्रितो भवेत् ॥ ७३ ।

स्वयं रुद्रो महायोगी महाविष्णुः कृपानिधिः ।
महावीरः स एवात्मा[2] मोक्षभोगी न संशयः ॥ ७४ ।

अथ नाथ महावीर भावस्नानं कुलाश्रयम् ।
यत्कृत्वा शुचिरेव शुचिश्चेत् किं न सिद्ध्यति ॥ ७५ ।

कुलस्नानं महास्नानं योगिनामतिदुर्लभम् ।
कृत्वा जितेन्द्रियो वीरः कुलध्यानं समाचरेत् ॥ ७६ ।

स्नानन्तु त्रिविधं प्रोक्तं मज्जनं गात्रमार्जनम् ।
[3]मन्त्रज्ञानादिभिः स्नानमुत्तमं परिकीर्तितम् ॥ ७७ ।

तत्प्रकारं श्रृणु प्राणवल्लभ प्रियकारक ।
स्नानमात्रेण मुक्तः स्यात् पापशैलादनन्तगः ॥ ७८ ।

[4]स्नानञ्च विमले तीर्थे हृदयाम्भोजपुष्करे ।
बिन्दुतीर्थेऽथवा स्नायात् सर्वजन्माघमुक्तये ॥ ७९ ।

इडासुषुम्ने शिवतीर्थकेऽस्मिन्
ज्ञानाम्बुपूर्णे वहतः शरीरे ।
ब्रह्मादिभिः[5] स्नाति तयोस्तु नीरे
किं तस्य गाङ्गैरपि पुष्करैर्वा ॥ ८० ।

---

१. देव–ग० । २. स तु वात्मा–ग० ।

३. मन्त्रजलादिभिः–क० । —मन्त्रश्च ज्ञानं च मन्त्रज्ञाने, ते आदिर्येषां तैः ।

४. स्नायाच्च–क० । ५. ब्रह्माम्बुभिः–क० ।

इडामलस्थान[1]निवासिनी या
सूर्यात्मिकायां यमुना प्रवाहिका[2]।
तथा सुषुम्ना मलदेशगामिनी[3]
सरस्वती मज्जति[4] भक्षणार्थकम् ॥ ८१ ।

मनोगतस्नानपरो मनुष्यो
मन्त्रक्रियायोगविशिष्टतत्त्ववित् ।
महीस्थतीर्थे विमले जले मुदा
मूलाम्बुजे स्नाति च मुक्तिभाग् भवेत् ॥ ८२ ।

सर्वादितीर्थे सुरतीर्थपावनी
गङ्गा महासत्त्वविनिर्गता सती ।
करोति पापक्षयमेव मुक्तिं
ददाति साक्षादतुलार्थपुण्यदा ॥ ८३ ।

सर्गस्थं यावदातीर्थं स्वाधिष्ठाने सुपङ्कजे ।
मनो निधाय योगीन्द्रः स्नाति गङ्गाजले तथा[5] ॥ ८४ ।

मणिपूरे देवतीर्थे[6] पञ्चकुण्डं सरोवरम् ।
एतत् श्रीकामनातीर्थं स्नाति यो मुक्तिमिच्छति ॥ ८५ ।

अनाहते सर्वतीर्थं सूर्यमण्डलमध्यगम्[7] ।
विभवः[8] सर्वतीर्थानि स्नाति यो मुक्तिमिच्छति ॥ ८६ ।

विशुद्धाख्ये महापद्मे अष्टतीर्थं समुद्भवम्[9] ।
कैवल्यमुक्तिदं ध्यात्वा स्नाति वीरो विमुक्तये ॥ ८७ ।

---

१. इडामलस्थाम्बुनि नाथकन्या—क० ।
२. प्रकाशिका—क० ।
३. वासिनी—क० ।
४. रक्षति मज्जनात्मकम्—क० ।
५. यथा—क० ।
६. देवतीर्थम्—क० ।
७. सूर्यस्य मण्डलं सूर्यमण्डलम्, तस्य मध्यं गच्छति—इति सूर्यमण्डलमध्यगम् ।
८. विभाव्य—क० ।
९. हस्ततीर्थमधूद्भवम्—क० ।

मानसं बिन्दुतीर्थञ्च कालीकुण्डं [1]कलात्मकम् ।
[2]आज्ञाचक्रे सदा ध्यात्त्वा स्नाति निर्वाणसिद्धये ॥ ८८ ।

एतत् कुले प्रियस्नानं कुर्वन्ति योगिनो मुदा ।
अतो वीराः सत्त्वयुक्ताः सर्वसिद्धियुताः सुराः ॥ ८९ ।

नाना पापं सदा कृत्त्वा ब्रह्महत्याविनिर्गतम् ।
कृत्त्वा स्नानं महातीर्थे सिद्धाः स्युरणिमादिगाः ॥ ९० ।

स्नानमात्रेण निष्पापी शक्तः स्याद्वायुसङ्ग्रहे ।
तीर्थानां दर्शनं येषां शक्तो योगी भवेद् ध्रुवम् ॥ ९१ ।

अथ सन्ध्यां महातीर्थे कुलनिष्ठः समाचरेत् ।
कुलरूपां योगविद्यां योगयोगाद् यतीश्वरः ॥ ९२ ।

शिवशक्तौ समायोगो यस्मिन् काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते ॥ ९३ ।

शिवं सूर्यं हृदि ध्यात्वा भालशक्तीन्दुसङ्गमम् ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थे प्रजायते ॥ ९४ ।

अथवेन्दुं[3] शिवं ध्यात्वा हृत्सूर्यशक्तिसङ्गमम् ।
संयोगविद्या सा सन्ध्या समाधिस्थे प्रजायते ॥ ९५ ।

[4]इति सन्ध्या च कथिता ज्ञानरूपा जगन्मयी ।
सा नित्या वायवी शक्तिः छिन्नभिन्ना विनाशनात् ॥ ९६ ।

[5]तत्त्वतीर्थे महादेव तर्पणं यः करोति हि ।
त्रैलोक्यं तर्पितं तेन तत्प्रकारं शृणु प्रभो ॥ ९७ ।

---

१. कलाधरम्–क० । २. आज्ञाचक्रम्–क० । ३. अथ बिन्दुम्–क० ।

४. किं वा देहस्थिता शक्तिर्वायवी सुशिवान्विता ।
नासाग्रसन्धिनिलया सा सन्ध्या वायुसङ्गमा ॥
किं वा बाह्यगता शक्तिः सुन्दरि शिवसङ्गमम् ।
सा सन्ध्या तत्त्वनिष्ठानां सामाधिस्थे प्रजायते ॥ क० ।

५. तत्तु तीर्थे–क० ।

मूलाम्भोजे कुण्डलिनीं चन्द्रसूर्याग्निरूपिणीम् ।
समुत्थाप्य कुण्डलिनीं परं बिन्दुं निवेश्य च ॥ ९८ ।

तदुद्भवामृतेनेह तर्पयेद्देहदेवताम् ।
कुलेश्वरीमादिविद्यां स सिद्धो भवति ध्रुवम् ॥ ९९ ।

चन्द्रसूर्यमहावह्निसम्भूतामृतधारया ।
तर्पयेत् कौलिनीं नित्याममृताक्तां विभावयेत् ॥ १०० ।

एतत्परपदा काली [1]स्त्रीविद्यादिप्रतर्पणम् ।
कृत्वा योगी भवेदेव सत्यं सत्यं कुलेश्वर ॥ १०१ ।

मूले पात्रं चान्द्रमसं ललाटेन्द्वमृते न च ।
सम्पूर्य ज्ञानमार्गेण तर्पयेत्तेन खेचरीम् ॥ १०२ ।

सुधासिन्धोर्मध्यदेशे कुलकन्यां प्रतर्पयेत् ।
मदिरामृतधाराभिः सिद्धो भवति योगिराट् ॥ १०३ ।

तत्र तीर्थे महाज्ञानी ध्यानं कुर्यात् [2]प्रयत्नतः ।
[3]तद्गर्भमभ्यसेन्नित्यं ध्यानमेतद्धि योगिनाम् ॥ १०४ ।

स्वीयां कन्यां भोजयेद्वै परकीयामथापि वा ।
परितोषाय सर्वेषां युवतीं वा प्रतोषयेत् ॥ १०५ ।

स्तोत्रेणानेन[4] दिव्येन तोषयेत् शङ्कर प्रभो ।
सहस्रनाम्ना कौमार्याः स्तुत्वा देवीं प्रतोषयेत् ॥ १०६ ।

---

१. श्रीविद्या–क० । २. दहर्निशम्–क० ।

३. प्राणायामपरो भूत्वा एतत्सर्वं विभावयेत् ।
किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यगम् ॥
महाशून्ये त्वयं कृत्वा पूर्णः तिष्ठति योगिराट् ।
निरालम्बे पदे शून्ये यत्तेज उपपद्यते ॥ क० ।

४. पूर्वोक्तस्तोत्रसारेण कवचाङ्गेन शङ्कर–क० ।

यः करोति पूर्णयज्ञं पञ्चाङ्गं जपकर्मणि ।
पुरश्चरणकार्यं च प्राणायामेन[1] कारयेत् ॥ १०७ ।

प्राणवायुः स्थिरो गेहे पूजाग्रहणहेतुना ।
येऽन्तरस्थं न कुर्वन्ति तेषां सिद्धिः कुतःस्थिता ॥ १०८ ।

अतोऽन्तर्यजनेनैव[2] कुण्डलीतुष्टमानसा ।
यदि तुष्टा महादेवी तदैव सिद्धिभाक् पुमान् ॥ १०९ ।

अभिषिच्य जगद्धात्रीं प्रत्यक्षपरदेवताम् ।
मूलाम्भोजात्सहस्रारे पूजयेद्बिन्दुधारया ॥ ११० ।

गलच्चन्द्रामृतोल्लासिधारयासिच्य[3] पार्वतीम् ।
पूजयेत् परया भक्त्या मूलमन्त्रं स्मरन् सुधीः ॥ १११ ।

अर्च्चयन्विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत् ।
न्यासस्तन्मयताबुद्धिः सोऽहंभावेन पूजयेत् ॥ ११२ ।

मन्त्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् ।
तामेव[4] परमे व्योम्नि परमानन्दसंस्थिते[5] ॥ ११३ ।

दर्शयत्यात्मसद्भावं[6] पूजाहोमादिभिर्विना[7] ।
तदन्तर्यजनं ज्ञेयं योगिनां शङ्कर प्रभो ॥ ११४ ।

अन्तरात्मा महात्मा च परमात्मा स उच्यते ।
तस्य स्मरणमात्रेण साधुयोगी भवेन्नरः ॥ ११५ ।

अमायमनहङ्कारमरागममदं तथा ।
अमोहकमदम्भञ्च [8]अनिन्दाक्षोभकौ तथा ॥ ११६ ।

---

१. प्राणायामम्–ग० । २. जलेनापि–क० ।
३. ल्लास–ग० । ४. भासेव–ग० ।
५. दर्शयेत्यात्म–ग० । ६. ध्यानपूजादिभिर्विना–क० ।
८. अद्वेष्टा–क० । —निन्दा च क्षोभश्च (क्षोभकश्च) निन्दाक्षोभकौ, स्वार्थे कप्रत्ययः, ततो नञ्तत्पुरुषः ।

अमात्सर्यमलोभश्च दशपुष्पाणि योगिनाम् ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।। ११७ ।

दया पुष्पं क्षमा पुष्पं ज्ञानपुष्पं च पञ्चमम् ।
इत्यष्टसप्तभिः पुष्पैः पूजयेत् परदेवताम् ।। ११८ ।

अथ होमविधिं वक्ष्ये पुरश्चरणसिद्धये ।
सङ्केतभाषया नाथ कथयामि शृणुष्व तत् ।। ११९ ।

आत्मानमपरिच्छिन्नं विभाव्य सूक्ष्मवत् स्थितः ।
आत्मत्रयस्वरूपं तु चित्कुण्डं चतुरस्रकम् ।। १२० ।

आनन्दमेखलायुक्तं नाभिस्थज्ञानवह्निषु ।
अर्द्धमात्राकृतिर्योनिभूषितं जुहुयात् सुधीः ।। १२१ ।

इतिमन्त्रेण तद्वह्नौ सोऽहंभावेन होमयेत् ।
बाह्यनारीविधिं त्यक्त्वा मूलान्तेन स्वतेजसम् ।। १२२ ।

नाभिचैतन्यरूपाग्नौ हविषा मनसा स्रुचा ।
ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहम् ।। १२३ ।

इति प्रथममाहुत्या मूलान्ते संचरेत्[1] क्रियाम् ।
द्वितीयाहुतिदानेन होमं कृत्वा भवेद्वशी ।। १२४ ।

धर्माधर्मप्रदीप्ते[2] च आत्माग्नौ मनसा स्रुचा ।
सुषुम्ना वर्त्मना नित्यमक्षवृत्ति जुहोम्यहम् ।। १२५ ।

[3]स्वाहान्तं मन्त्रमुच्चार्य आद्ये[4] मूलं नियोज्य च ।
जुहुयादेकभावेन मूलाम्भोरुहमण्डले ।। १२६ ।

---

१. मन्त्रमुच्चरेत्—क० ।   २. हविर्दीप्तम्—क० ।

३. द्वितीया हुतिमेतत्तु तृतीया हुतिमाश्रृणु ।
प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्रुचा ।।
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ।। क० ।

४. मूलान्ते सञ्चरेत् क्रियाम्—क० ।

चतुर्थे पूर्णंहवने एतन्मन्त्रेण कारयेत् ।
एतन्मन्त्रचतुर्थं तु पूर्णविद्याफलप्रदम् ।। १२७ ।

अन्तर्निरन्तरनिरन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदद्भुतमरीचिविकासभूमौ
विश्वं जुहोमि वसुधादिशिवावसानम् ।। १२८ ।

इत्यन्तर्यजनं कृत्वा साक्षाद् ब्रह्ममयो भवेत् ।
न तस्य पुण्यपापानि जीवन्मुक्तो भवेद्ध्रुवम् ।। १२९ ।

ज्ञानिनां योगिनामेव अन्तर्यागो हि सिद्धिदः ।
अथान्तः पञ्चमकारयजनं शृणु शङ्कर ।। १३० ।

अन्तर्यजनकाले तु दृढभावेन भावयेत् ।
त्वां मां नाथैकतां ध्यात्वा दिवारात्र्यैकतां यथा ।। १३१ ।

सुराशक्तिः शिवो मांसं तद्भक्तो भैरवः स्वयम् ।
तयोरैक्यसमुत्पन्न आनन्दो मोक्षनिर्णयः ।। १३२ ।

आनन्दं ब्रह्मकिरणं देहमध्ये व्यवस्थितम् ।
तदभिव्यञ्जकैर्द्रव्यैः कुर्याद् ब्रह्मादितर्पणम्[1] ।। १३३ ।

आनन्दं जगतां सारं ब्रह्मरूपं तनुस्थितम् ।
तदभिव्यञ्जकं द्रव्यं योगिभिस्तैः प्रपूजयेत्[2] ।। १३४ ।

[3]लिङ्गत्रयं च षट्पद्माधारमध्येन्दुभेदकः[4] ।
पीठस्थानानि चागत्य महापद्मवनं व्रजेत् ।। १३५ ।

मूलाम्भोजो ब्रह्मरन्ध्रं चालयेदसुचालयेत्[5] ।
गत्वा पुनः पुनस्तत्र चिच्चन्द्रः परमोदयः ।। १३६ ।

---

१. ब्रह्मामृतार्पणम्—क० । २. प्रपूज्यते—क० ।

३. लिङ्गत्रयज्ञः—क० । ४. भेदनः—क० ।—षट्पद्माधारमध्येन्दुं भिनत्ति इति फलितार्थः ।

५. दनुचालयेत्—क० ।

चिच्चन्द्रः कुण्डलीशक्तिः सामरस्यमहोदयः ।
व्योमपङ्कजनिस्यन्दसुधापानरतो नरः ॥ १३७ ।

मधुपानमिदं नाथ बाह्ये चाभ्यन्तरे सताम् ।
इतरं मद्यपानन्तु योगिनां योगघातनात् ॥ १३८ ।

इतरं तु महापानं भ्रान्तिमिथ्याविवर्जितः ।
महावीरः संकरोति योगाष्टाङ्गसमृद्धये ॥ १३९ ।

पुण्यापुण्यपशुं हत्वा ज्ञानखड्गेन[1] योगवित् ।
[2]परशिवेन यश्चित्तं नियोजयति साधकः ॥ १४० ।

[3]मांसाशी स भवेदेव इतरे [4]प्राणिघातकाः ।
शरीरस्थे महावह्नौ दग्धमत्स्यानि पूजयेत् ॥ १४१ ।

शरीरस्थजलस्थानि इतराण्यशुभानि च ।
महीगतस्निग्धसौम्योद्भवमुद्रामहाबलाः ॥ १४२ ।

तत्सर्वं ब्रह्मकिरणे आरोप्य तर्पयेत्[5] सुधीः ।
तत्र मुद्राभोजनानि[6] आनन्दवर्द्धकानि च ॥ १४३ ।

इतराणि च भोगार्थे एतद्धि योगिनां परम् ।
परशक्त्यात्ममिथुनसंयोगानन्दनिर्भराः ॥ १४४ ।

मुक्तास्ते मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः ।
एतत्पञ्चमकारेण पूजयेत् परनायिकाम् ॥ १४५ ।

---

१. ज्ञानलभ्यो–क० ।

२. परे शिवे त्रयं चित्तं मांसाशी स महीतले–क० ।

३. बाह्यस्थानं पशूनान्तु मासं वीरेन्द्रभोजनम् ।
यदि तद्बुद्धिमाप्नोति तदा तत्कर्म प्राचरेत् ॥
मानसेन्द्रियगणं संयम्यात्मनि विनियोजयेत्–क० ।

४. प्राण–ग० ।

५. तर्पयेत्–क० ।

६. एतन्नमुद्रा–क० ।

पुरश्चरणगूढार्थसारमन्त्रप्रपूजनम् ।
[1]एतद्योगं सदाभ्यसेद् निद्रालस्यविवर्जितः ॥ १४६ ।

[2]प्राणवायुरयं कुर्यात् [3]कालकारणवारणात् ।
एतत्क्रियां प्राणवशे यः करोति निरन्तरम् ॥ १४७ ।

तस्य योगसमृद्धिः स्यात् कालसिद्धिमवाप्नुयात् ॥ १४८ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावनिर्णये सूक्ष्मयोगसिद्ध्यधिकरणे पाशवकल्पे षट्चक्रसारसङ्केते सिद्धिमन्त्रप्रकरणे भैरवभैरवीसंवादे षड्विंशः[4] पटलः ॥

●

१. एतद्योगसदाभ्यासात्–ग० ।

२. प्राणश्चासौ वायुश्च, तस्य रयो वेगः, तम् ।

३. वारणकारणात्–ग० ।—कालकारणस्य वारणम्, तस्मात् ।

४. अष्टाविंशः पटलः–क० ।

अथ सप्तविंशः पटलः

आनन्दभैरव उवाच—

विविधानि त्वयोक्तानि योगशास्त्राणि भैरवि ! ।
सर्वरूपत्वमेवास्या[1] मम कान्ते प्रियंवदे ॥ १ ।

योगाष्टाङ्गफलान्येव सर्वतत्त्वजलानि[2] च ।
इदानीं श्रोतुमिच्छामि शक्तितत्त्वक्रमेण[3] तु ॥ २ ।

पूर्वोक्तप्राणवायूनां हरणं वायुधारणम् ।
प्रत्याहारं धारणाख्यं ध्यानं [4]समाधिमावद ॥ ३ ।

आनन्दभैरवी उवाच—

शृणु लोकेश वक्ष्यामि प्राणायामफलाफलम् ।
न गृह्णीयाद्विस्तरन्तु [5]स्वल्पं नैव तु कुम्भयेत् ॥ ४ ।

शनैः शनैः प्रकर्त्तव्यं [6]संघातञ्च विवर्जयेत् ।
पूरकाह्लादसिद्धेश्च[7] प्राणायामशतं शतम् ॥ ५ ।

[8]वृद्धयै प्राणलक्षणन्तु यस्मिन् यस्मिन् दिने गतिः ।
कृष्णपक्षे शुक्लपक्षे तिथिस्त्रिंशत्फलोदयः ॥ ६ ।

शुक्लपक्षे इडायान्तु कृष्णपक्षेऽन्यदेव हि ।
कुर्यात् सर्वत्र गमनं सुषुम्ना बहुरूपिणी ॥ ७ ।

---

१. सर्वरूपा त्वमेवात्मा–क० ।
२. सर्वं तत्त्वोज्वलानि च–क० ।
३. शान्ति–क० ।
४. मादर–ग० ।
५. आल्पम्–क० ।
६. सहारञ्च–क० ।
७. सिद्धेश्च–ग० ।—पूरकेण जनिता याऽऽह्लादसिद्धिः, तस्या इत्यर्थः ।
८. वक्ष्ये–क० ।

तिथित्रयं सितस्यापि प्रतिपदादिसम्भवम् ।
तद्द्वयं दक्षनासायां वायोर्ज्ञेयं महाप्रभो ॥ ८ ।
चतुर्थीं पञ्चमीं षष्ठीं व्याप्योदयति देवता ।
वामनासापुटे ध्येया वायुधारणकर्मणि ॥ ९ ।
सप्तमीमष्टमीञ्चैव नवमीं व्याप्य तिष्ठति ।
वामनासापुटे ध्येया साधकैः कुलपण्डितैः ॥ १० ।
दशम्येकादशीं चैव द्वादशीं व्याप्य तिष्ठति ।
वायुर्दक्षिणनासाग्रे ध्येयो योगिभिरीश्वरः ॥ ११ ।
त्रयोदशीं व्याप्य वायुः पौर्णमासीं चतुर्दशीम् ।
वामनासापुटे ध्येयः संहारहरणाय च ॥ १२ ।
कृष्णपक्षफलं वक्ष्ये यज्ज्ञात्वा अमरो भवेत् ।
कालज्ञानी भवेत् शीघ्रं नात्र कार्या विचारणा ॥ १३ ।
प्रतिपद्द्वितीयामस्य तृतीयामपि तस्य च ।
पिङ्गलायां समावाप्य वायुर्निःसरते सदा ॥ १४ ।
चतुर्थीं पञ्चमीं षष्ठीं वामे व्याप्य प्रतिष्ठति ।
सप्तमीमष्टमीं वायुर्नवमीं दक्षिणे ततः ॥ १५ ।
दशम्येकादशीं वायुर्व्याप्य भ्रमति[1] सर्वदा ।
वामे च दक्षिणेऽन्यानि तिथ्यादीनि सदानिशम् ॥ १६ ।
यदा [2]एतद्व्यस्तभावं समाप्नोति नरोत्तमः ।
तदैव मरणं रोगं बन्धुनाशं त्रिपक्षके ॥ १७ ।
भिन्नजन्मतिथिं ज्ञात्वा तस्मिन् काले विरोधयेत् ।
आरभ्य जन्मनाशाय प्राणायामं समाचरेत् ॥ १८ ।
यदा प्रत्ययभावेन देहं त्यक्त्वा प्रयच्छति[3] ।
तदा निरुध्य श्वसनं कालाग्नौ धारयेदधः ॥ १९ ।

---

१. जप्त्वा–क० । २. दन्तभावम्–क० ।

३. प्रगच्छति–क० । —'प्रयच्छति' इति पाठे दाण्-दाने इत्यस्य रूपम्, यच्छादेशघटितम् । 'प्रगच्छति' इति पाठे तु गम्धातो रूपम् । प्रकृष्टगमनेऽर्थे प्रयोगः ।

यावत् स्वस्थानमायाति तावत्कालं[1] समभ्यसेत् ।
यावन्न चलते देहं यावन्न चलते मनः ॥ २० ।

क्रमादभ्यसतः पुंसो देहे स्वेदोद्‌गमोऽधमः ।
मध्यमं कम्पसंयुक्तो भूमित्यागः परस्य तु ॥ २१ ।

षण्मासाद्‌भूतदर्शी स्यात् दूरश्रवणमेव च ।
संवत्सराभ्यासयोगात् योगविद्याप्रकाशकृत् ॥ २२ ।

योगी जानाति सर्वाणि तन्त्राणि स्वकर्माणि च ।
यदि दर्शनदृष्टिः स्यात्तदा योगी न संशयः ॥ २३ ।

प्रत्याहारफलं वक्ष्ये यत्कृत्वा खेचरो भवेत् ।
ईश्वरे भक्तिमाप्नोति धर्मज्ञानी भवेन्नरः ॥ २४ ।

उत्तमस्य गुणप्राप्तिर्यावच्छीलनमिष्यते ।
तावज्जपेत् सूक्ष्मवायुः प्रत्याहारप्रसिद्धये ॥ २५ ।

इन्द्रियाणां विचरतां [2]विषयेषु निवर्तनम् ।
बलादाहरणं तेभ्यः प्रत्याहारो विधीयते ॥ २६ ।

नान्यकर्मसु धर्मेषु शास्त्रधर्मेषु योगिराट् ।
पतितं चित्तमानीय स्थापयेत् पादपङ्कजे ॥ २७ ।

दुर्निवार्यं दृढचित्तं दुरत्ययमसम्मतम् ।
बलादाहरणं तस्य प्रत्याहारो विधीयते ॥ २८ ।

एतत् प्रत्याहारबलात् योगी स्वस्थो भवेद्‌ध्रुवम् ।
अकस्माद्‌भावमाप्नोति भावराशिस्थिरो नरः ॥ २९ ।

भावात् परतरं नास्ति भावाधीनमिदं जगत् ।
भावेन लभ्यते योगं तस्माद्‌भावं समाश्रयेत् ॥ ३० ।

अथ धारणमावक्ष्ये यत्कृत्वा धैर्यरूपभाक् ।
त्रैलोक्यमुदरे कृत्वा पूर्णः तिष्ठति[3] योगिराट् ॥ ३१ ।

---

१. तत्त्वमस्य–ग० । २. विधाय धनिवर्गणम्–क० ।
३. स्रष्टति–ग० ।

अङ्गुष्ठगुल्फजानूरुसीमनि लिङ्गनाभिषु ।
हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां तथा नसि[1] ॥ ३२ ।

भ्रूमध्ये मस्तके मूर्ध्नि द्वादशान्ते यथाविधि ।
धारणं प्राणमरुतो धारणेति निगद्यते ॥ ३३ ।

सर्वनाडीग्रन्थिदेशे षट्चक्रे देवतालये ।
ब्रह्ममार्गे धारणं यद् धारणेति निगद्यते ॥ ३४ ।

धारणं मूलदेशे तु कुन्डली नासिकातटे ।
प्राणवायोः प्रशमनं[2] धारणेति निगद्यते ॥ ३५ ।

तत्र श्रीचरणाम्भोजमङ्गले चारुतेजसि ।
भावेन स्थापयेच्चित्तं धारणाशक्तिमाप्नुयात् ॥ ३६ ।

अथ ध्यानं प्रवक्ष्यामि यत् कृत्वा सर्वगो भवेत् ।
ध्यानयोगाद्भवेन्मोक्षो मत्कुलागमनिर्गमः ॥ ३७ ।

समाहितेन मनसा चैतन्यान्तर्वर्तिना ।
आत्मन्यभीष्टदेवानां [3]योगध्यानमिहोच्यते ॥ ३८ ।

श्रीपदाम्भोरुहद्वन्द्वे नखकिञ्जल्कचित्रिते ।
स्थापयित्वा मनःपद्मं ध्यायेदिष्टगणं[4] महत् ॥ ३९ ।

अथ समाधिमाहात्म्यं वदामि तत्त्वतः शृणु ।
यस्यैव कारणादेव पूर्णयोगी भवेन्नरः ॥ ४० ।

समत्वभावना नित्यं जीवात्मपरमात्मनोः ।
समाधिना जयी भूयादानन्दभैरवेश्वर ॥ ४१ ।

संयोगसिद्धिमात्रेण समाधिस्थं महाजनम् ।
प्रपश्यति महायोगी समाध्यष्टाङ्गलक्षणैः ॥ ४२ ।

---

१. निशि–क० । २. प्रसम्बन्धो–क० ।
३. ध्यानम्–ग० । ४. गुणम्–ग० ।

एतत्समाधिमाकृत्य योगी योगान्वितो भवेत् ।
[1]अथ चन्द्रे मनः कुर्यात् समारोप्य विभावयेत् ।। ४३ ।

एतदष्टाङ्गसारेण योगयोग्यो भवेन्नरः ।
योगयोगाद् भवेन्मोक्षो मन्त्रसिद्धिरखण्डिता ।। ४४ ।

योगशास्त्रप्रकारेण सर्वे वै भैरवाः स्मृताः ।
योगशास्त्रात् परं शास्त्रं त्रैलोक्ये नापि वर्तते ।। ४५ ।

त्रैलोक्यातीतशास्त्राणि योगाङ्गविविधानि च ।
ज्ञात्वा या [2]पश्यति क्षिप्रं नानाध्यायेन शङ्कर ।। ४६ ।

कामादिदोषनाशाय कथितं ज्ञानमुत्तमम् ।
इदानीं शृणु वक्ष्यामि मन्त्रयोगार्थनिर्णयम् ।। ४७ ।

विश्वं [3]शरीरमाक्लेशं पञ्चभूताश्रयं प्रभो ।
चन्द्रसूर्याग्नितेजोभिः जीवब्रह्मैकरूपकम् ।। ४८ ।

तिस्रः कोट्यस्तदर्धेन शरीरे[4] नाडयो[5] मताः ।
तेषु मुख्या दश प्रोक्तास्तासु तिस्रो व्यवस्थिताः ।। ४९ ।

प्रधाना मेरुदण्डेऽत्र सोमसूर्याग्निरूपिणी ।
नाडीत्रयस्वरूपेण योगमाता प्रतिष्ठिता ।। ५० ।

इडा वामे स्थिता नाडी शुक्ला तु चन्द्ररूपिणी ।
शक्तिरूपा च सा नाडी साक्षादमृतविग्रहा ।। ५१ ।

दक्षिणे पिङ्गलाख्या तु [6]पुंरूपा सूर्यविग्रहा ।
दाडिमीकुसुमप्रख्या विषाख्या परिकीर्तिता ।। ५२ ।

---

१. क० नास्ति । २. सम्प्राप्यते क्षिप्तम् इति–क० ।

३. माकाशम् इति–ग० । आक्लेशमिति पाठे आ समन्तात् क्लेशो यस्य तदिति बहुव्रीहिसमासो बोध्यः ।

४. दक्षिणत इति–ग० । ५. शरीरेण तयोः इति–ग० ।

६. स इति–ग० ।

मरुमध्ये स्थिता या तु सुषुम्ना बहुरूपिणी ।
विसर्गाद्बिन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः ।। ५३ ।

मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके ।
मध्ये स्वयंभूलिङ्गन्तं कोटिसूर्यसमप्रभम् ।। ५४ ।

तदूर्ध्वे कामबीजन्तु कलाशान्तीन्दुनायकम् ।
तदूर्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ।। ५५ ।

तद्बाह्ये हेमवर्णाभं वसुवर्णचतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ।। ५६ ।

तदूर्ध्वेऽग्निसमप्रख्यं [1]षड्दलं हीरकप्रभम् ।
[2]वादिलान्तं तु षड्वर्णसहितं [3]रसपत्रकम् ।। ५७ ।

स्वाधिष्ठानाख्यममलं[4] योगिनां हृदयङ्गमम् ।
मूलमाधारषट्कानां[5] मूलाधारं प्रकीर्तितम् ।। ५८ ।

स्वशब्देन परं लिङ्गं स्वाधिष्ठानं स्वलिङ्गकम् ।
तदूर्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ।। ५९ ।

मेघाभं विद्युताभं च बहुतेजोमयं ततः ।
मणिमद्भिन्नतत्पद्मं मणिपूरं शशिप्रभम् ।। ६० ।

कथितं [6]सकलं नाथ हृदयाब्जं शृणु प्रिय ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ।। ६१ ।

शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकम् ।
तदूर्ध्वेऽनाहतं पद्मं हृदिस्थं [7]किरणाकुलम् ।। ६२ ।

---

१. सद्ग्रन्थम् इति–ग० । २. लान्तार्णं इति–ग० ।
३. वत्स इति–ग० । ४. सदनम् इति–ग० ।
५. षड्कोणम् इति–ग० । ६. सफलम् इति–क० ।
७. विकलाकुलम् इति–ग० । —किरणाकुलमिति पाठे किरणैः आकुलमिति तृतीयासमासः ।

उद्यदादित्यसंकाशं कादिठान्ताक्षरान्वितम् ।
दलद्वादशसंयुक्तमीश्वराद्यसमन्वितम् ॥ ६३ ।
तन्मध्ये बाणलिङ्गन्तु सूर्यायुतसमप्रभम् ।
शब्दब्रह्ममयं [1]वक्ष्येऽनाहतस्तत्र दृश्यते ॥ ६४ ।
तेनानाहतपद्माख्यं योगिनां योगसाधनम् ।
आनन्दसदनं तत्तु सिद्धेनाधिष्ठितं परम् ॥ ६५ ।
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
वर्णैः षोडशभिर्युक्तं धूम्रवर्णं महाप्रभम् ॥ ६६ ।
योगिनामद्भुतस्थानं [2]सिद्धिवर्णं समभ्यसेत् ।
विशुद्धं तनुते यस्मात् जीवस्य हंसलोकनात् ॥ ६७ ।
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाप्रभम् ।
आज्ञाचक्रं तदूद्ध्वें तु अर्थिनाधिष्ठितं परम् ॥ ६८ ।
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्तितम् ।
कैलासाख्यं तदूर्ध्वे तु तदूर्ध्वे बोधनन्ततः ॥ ६९ ।
एवंविधानि चक्राणि कथितानि तव प्रभो ।
तदूर्द्ध्वस्थानममलं सहस्राराम्बुजं परम् ॥ ७० ।
बिन्दुस्थानं परं ज्ञेयं गणानां मतमाश्शृणु ।
बौद्धा वदन्ति चात्मानमात्मज्ञानी न ईश्वरः ॥ ७१ ।
सर्वं नास्तीति चार्वाका नानाकर्मविवर्जिताः ।
वेदनिन्दापराः सर्वे बौद्धाः शून्याभिवादिनः[3] ॥ ७२ ।
मम ज्ञानाश्रिताः कान्ताश्चीनभूमिनिवासिनः ।
आत्मानमपरिच्छिन्नं विभाव्य भाव्यते मया ॥ ७३ ।
श्रीपदाब्जे बिन्दुयुग्मं नखेन्दुमण्डलं शुभम् ।
शिवस्थानं प्रवदन्ति शैवाः शाक्ता महर्षयः ॥ ७४ ।

---

१. शब्दो । २. वर्गं यः इति–ग० ।
३. शून्यमभिवदन्ति तच्छीलाः शून्याभिवादिनः, शून्योपासनारता इत्यर्थः ।

परमं पुरुषं नित्यं वैष्णवाः [1]प्रीतिकारकाः ।
हरिहरात्मकं रूपं संवदन्ति परे जनाः ॥ ७५ ।

देव्याः पदं नित्यरूपाश्चरणानन्दनिर्भराः ।
वदन्ति मुनयो मुख्याः पुरुषं प्रकृतात्मकम् ॥ ७६ ।

पुंप्रकृत्याख्यभावेन मग्ना भान्ति महीतले ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ॥ ७७ ।

योगमार्गानुसारेण भावयेत् सुसमाहितः ।
आदौ [2]महापूरकेण मूले संयोजयेन्मनः ॥ ७८ ।

गुदमेढ्रान्तरे शक्तिं तामाकुञ्च्य प्रबुद्धयेत् ।
लिङ्गभेदक्रमेणैव प्रापयेद्बिन्दुचक्रकम् ॥ ७९ ।

शम्भुलाभां परां [3]शक्तिमेकीभावैर्विचिन्तयेत् ।
तत्रोत्थितामृतरसं द्रुतलाक्षारसोपमम् ॥ ८० ।

पाययित्वा परां शक्तिं कृष्णाख्यां योगसिद्धिदाम् ।
षट्चक्रभेदकस्तत्र सन्तर्प्यामृतधारया ॥ ८१ ।

आनयेत्तेन मार्गेण मूलाधारं ततः सुधीः ।
एवमभ्यस्यमानस्य अहन्यहनि मारुतम् ॥ ८२ ।

जरामरणदुःखाद्यैर्मुच्यते भवबन्धनात् ।
तन्त्रोक्तकथिता मन्त्राः[4] सर्वे सिद्ध्यन्ति नान्यथा ॥ ८३ ।

स्वयं सिद्धो भवेत् क्षिप्रं योगे हि योगवल्लभा ।
ये गुणाः सन्ति देवस्य पञ्चकृत्यविधायिनः[5] ॥ ८४ ।

ते गुणाः साधकवरे भवन्त्येव न चान्यथा ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ॥ ८५ ।

---

१. प्रतिकारकाः इति—क० । २. प्रकरणे इति—ग० ।

३. भावम् इति—क० । ४. दूषिता इति—क० ।

५. पञ्चसंख्याकानि च तानि कृत्यानि चेति पञ्चकृत्यानि, मध्यमपदलोपिसमासः । तानि विदधति तच्छीला इत्यर्थः ।

इदानीं धारणाख्यञ्च शृणुष्व परमाञ्जनम् ।
दिक्कालाद्यनवच्छिन्नं त्वयि चित्तं निधाय च ॥ ८६ ।

मयि वा साधकवरो ध्यात्वा तन्मयतामियात् ।
तन्मयो भवति क्षिप्रं जीवब्रह्मैकयोजनात् ॥ ८७ ।

इष्टपादे मतिं दत्वा नखकिञ्जल्कचित्रिते ।
अथवा मननं चित्तं यदा क्षिप्रं न सिद्ध्यति ॥ ८८ ।

तदावयवयोगेन योगी योगं समभ्यसेत् ।
पादाम्भोजे मनो दद्याद् नखकिञ्जल्कचित्रिते ॥ ८९ ।

जङ्घायुग्मे तथाराम[1]कदलीकाण्डमण्डिते ।
ऊरुद्वये मत्तहस्तिकरदण्डसमप्रभे ॥ ९० ।

गङ्गावर्त्तगभीरे तु नाभौ सिद्धिबिले ततः ।
उदरे वक्षसि तथा हस्ते श्रीवत्सकौस्तुभे ॥ ९१ ।

पूर्णचन्द्रामृतप्रख्ये ललाटे चारुकुण्डले ।
शङ्खचक्रगदाम्भोजदोर्दण्डपरिमण्डिते ॥ ९२ ।

सहस्रादित्यसंकाशे किरीटकुण्डलद्वये ।
स्थानेष्वेषु भजेन्मन्त्री विशुद्धः शुद्धचेतसा ॥ ९३ ।

मनो निवेश्य श्रीकृष्णे वैष्णवो भवति ध्रुवम् ।
इति वैष्णवमाख्यातं ध्यानं सत्त्वं सुनिर्मलम् ॥ ९४ ।

विष्णुभक्ताः प्रभजन्ति [2]स्वाधिष्ठानं मनःस्थिराः ।
यावन्मनोलयं याति कृष्णे [3]आत्मनि चिन्तयेत् ॥ ९५ ।

तावत् स्वाधिष्ठानसिद्धिरिति योगार्थनिर्णयः ।
तावज्जपेन्मनुं मन्त्री जपहोमं समभ्यसेत् ॥ ९६ ।

अतः परं न किञ्चिच्च कृत्यमस्ति मनोहरे[4] ।
विदिते परतत्त्वे तु समस्तैर्नियमैरलम् ॥ ९७ ।

---

१. सिद्धवने इति–ग० । २. चन्द्रायुत इति–ग० ।

३. स्वात्मनि चिन्ययेत् इति–ग० ।

३. हरति इति हरा, पचाद्यच् टाप् । मनसो हरा-मनोहरा, तत्सम्बोधने मनोहरे! इति रूपम् ।

[1]अत एव सदा कुर्यात् ध्यानं योगं मनुं जपेत् ।
तमःपरिवृते गेहे घटो दीपेन दृश्यते ।। ९८ ।

एवं स यो वृतो ह्यात्मा मनुना गोचरीकृतः ।
इति ते कथितं नाथ मन्त्रयोगमनुत्तमम् ।। ९९ ।

कृत्वा पापोद्भवैर्दुःखैर्मुच्यते नात्र संशयः ।
दुर्लभं विषयासक्तैः सुलभं योगिनामपि ।। १०० ।

सुलभं न त्यजेद्विद्वान् यदि सिद्धिमिहेच्छति ।
ब्रह्मज्ञानं योगध्यानं मन्त्रजाप्यं क्रियादिकम् ।। १०१ ।

यः करोति सदा भद्रो वीरभद्रो हि योगिराट् ।
भक्तिं कुर्यात् सदा शम्भोः श्रीविद्यायाः परात्पराम् ।। १०२ ।

योगसाधनकाले च केवलं भावनादिभिः ।
मननं कीर्त्तनं ध्यानं स्मरणं पादसेवनम् ।। १०३ ।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
एतद्भक्तिप्रसादेन जीवन्मुक्तस्तु साधकः ।। १०४ ।

योगिनां वल्लभो भूत्वा समाधिस्थो भवेद्यतिः ।। १०५ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने भावार्थनिर्णये पाशवकल्पे षट्चक्रसारसङ्केते सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे [2]सप्तविंशः पटलः ।।

---

१. तालवृन्तेन किं कार्यं लब्धे मलयमारुते ।
मन्त्राभ्यासेन योगेन ज्ञानं ज्ञानाय कल्प्यते ।।
न योगेन विना मन्त्रो न मन्त्रेण विना हि सः ।
द्वयोरभ्यासयोगा हि ब्रह्मत्वं सिद्धिकारणम् ।। इति—क० अधिकः पाठः ।

२ ऊनविंशः पटल इति—क० ।

अथाष्टाविंशः पटलः

आनन्दभैरव उवाच—

त्रैलोक्यपूजिते कान्ते इदानीं सिद्धिहेतवे ।
मन्त्रसिद्धेर्लक्षणन्तु योगिनामतिदुर्लभम् ॥ १ ।

त्वन्मुखाम्भोरुहोल्लासनिःसृतं परमामृतम् ।
पीत्वा चकार तन्त्राणि [1]यत्तत्र नास्ति तद् वद ॥ २ ।

आनन्दभैरवो उवाच—

निश्चयं ते प्रवक्ष्यामि आनन्दभैरवेश्वर ।
मन्त्रसिद्धेर्लक्षणन्तु योगमार्गानुकूलतः ॥ ३ ।

नित्यं चेतसि सुस्थिरे स्थितपथक्लेशादिदोषक्षयं[2]
[3]सर्वञ्चोत्तममन्त्रसिद्धिकलितं संलक्षणं शोभनम् ।
मृत्यूनां हरणं जगत्पतिमतिं सन्दर्शनञ्चोत्तमं
योगोऽक्लेशविवर्द्धनं [4]समुदयाच्छेशप्रयोगेष्टभाक् ॥ ४ ।

[5]नरेन्द्राणां काये प्रविशति हठात् [6]क्षोभयति तं
[7]पुरे तेषामूद्ध्वोत्क्रमणचरस्यावरपुरे ।
[8]अधःछिद्रं पश्येत् खचरवनितामेलनमलं
श्रृणोति प्रध्माने[9] जगति जगतां कीर्तिरतुला ॥ ५ ।

---

१. तत्र यत्र सारमावद इति–क० ।
२. समम् इति–क० ।
३. कलिता इति–क० ।
४. समुदयाक्लेशप्रयोगेष्वभाक् इति–ग० ।
५. नरेन्द्राणि इति–ग० । —नरेन्द्राणां राज्ञां काये शरीरे प्रविशति; अयमेव पाठक्रमः समीचीनः ।
६. क्षोभहरितम् इति–ग० ।
७. पूरकेणामूर्ध्वोत्क्रमणसर्वमुच्चे परपुरे इति–ग० ।
८. अधः छिन्नम् इति–ग० ।
९. प्राधान्य इति–ग० ।

इतीह सिद्ध्यादिसुलक्षणेन[1]
प्रयाति वैकुण्ठपुरीं मनोरमाम् ।
हितं यदा पश्यति सत्त्वभूभृतां
जगद्विपक्षो निजपक्षमाश्रयेत् ॥ ६ ।

[2]कीर्तिर्भूषणमादिभक्तिसफला भुक्तिक्रियासंयुता
देवानामतिभक्तियुक्तहृदयं सर्वक्रियादक्षता ।
त्रैलोक्यं निजदास्यकर्मनिपुणं जित्वा चिरं जीवति
[3]अष्टाङ्गाभ्यसनं [4]जगद्वशकरं चैतन्यतामुत्तमम् ॥ ७ ।

भोगेच्छारहितं जगज्जनचमत्कारानुकल्पान्वितं
रोगाणां दरणं विरक्तहृदयं [5]वैराग्यभक्तिप्रियम् ।
त्यागं संसरणं तथा [6]शमदयामायाब्धिजालस्य वा
ऐश्वर्यं कवितारसं धनजनं लक्ष्मीगणं जापनम् ॥ ८ ।

उल्लासं हृदयाम्बुजे सुतधनं सम्माननं सत्पथं
[7]वाञ्छासागररत्नपूर्णघटितं कान्तागणान्मोदितम्[8] ।
संकेतादिमनुप्रियं हरिहरब्रह्मैकभावान्वितं
लोकानां गुरुतानिरन्तरशिवानन्दैकमुद्राधरम्[9] ॥ ९ ।

एतदुक्तं महादेवोत्तरतन्त्रनिरूपणम् ।
मन्त्रसिद्धिलक्षणं तदुत्तमाधममध्यमम् ॥ १० ।

---

१. सुलक्षेन इति–ग० ।

२. कीर्तिभ्रंसादिभक्तिः सदसि च इति–ग० ।

३. ज्येष्टाङ्गाभ्यसनम् (ह्यष्टाङ्गाभ्यसनम्)–ग० ।

४. जगद्वशंकरम् इति–ग० ।

५. मूर्ति इति–ग० ।

६. मात्रा निजालस्वया इति–ग० ।

७. रत्नपुष्पविटितम् इति–ग० ।

८. गणामोदितम् इति–ग० ।

९. लोकानां गुरुतया गौरवेण निरन्तरो व्यवधानशून्यो यः शिवानन्दस्तस्य या एकमुद्रा तस्या धरं धारकम् । धरतीतिः धरः पचाद्यच् ।

मुनयो देवमुख्याश्च नित्यं जन्मनि जन्मनि ।
दिव्यरूपं नरकुले धृत्वा तृप्यन्ति चानिशम् ।। ११ ।

तवैवापि ममैवापि तर्पणं होमभोजनम् ।
सर्वदा कुरुते साधु [1]तन्मनो भवति ध्रुवम् ।। १२ ।

एतत्प्राणवायुपाने सूक्ष्मचन्द्रनियोजने ।
कर्त्तव्यं प्रत्यहं कार्यं दिवारात्रौ मुहुर्मुहुः ।। १३ ।

अद्यैतत् कर्म संस्कुर्यात् योगसाधनमुत्तमम् ।
यः श्रीमान् साधु सद्भक्ता [2]दुष्टमन्त्रोऽपि सिध्यति ।। १४ ।

[3]एतद्दोषसमूहं तु वदामि तत्त्वतः शृणु ।
छिन्नादिदोषदुष्टानां योगतत्त्वेन सिध्यति ।। १५ ।

देवेन्द्रपाशदुष्टा च भुवनेशी सुसिद्धिदा ।
आराधिता महाविद्या वीर्यदर्पविवर्जिता ।। १६ ।

एकाक्षरी वीर्यहीना वाग्भवेन महोज्ज्वला ।
[4]तदवद्युत्तमा देवी तारसम्पुटहंसिनी ।। १७ ।

आविद्धा कामराजेन विद्या कामेश्वरी परा ।
शरेण पीडिता पूर्वं भुवनेश्याः प्रतिष्ठिता ।। १८ ।

या कुमारी महाविद्या [5]यया सप्तारिबोधिका ।
ताराचन्द्रस्वरूपाहं शिवशक्त्या च केवलम् ।। १९ ।

भैरवीणां [6]हि विद्यानां दोषजालं शृणु प्रभो ।
एतान्दोषान्प्रणश्यन्ति योगमार्गानुसारिणः ।। २० ।

---

१. चैतन्यम् इति—क० ।
२. शास्त्रोऽपि इति—ग० ।
३. तत्तद् इति—ग० ।
४. तदवध्रुवरसा इति—क० ।
५. माया सभ्राविरोधिका इति—ग० ।
६. श्रीविद्या इति—ग० । एषा श्रीविद्या तन्त्रज्ञानां निकाये अत्यन्तं प्रसिद्धाऽस्ति ।

यतः कुण्डलिनी देवी योगेन चेतनामुखी ।
अतो योगं सदा कुर्यात् सर्वमन्त्रप्रसिद्धये ।। २१ ।

भैरवी विधिशप्ता च दग्धा च कीलिता तथा ।
सैव संहारकरी मोहिता चानुमोदिता ।। २२ ।

महामदोन्मत्तचित्ता मूर्च्छिता वीर्यवर्जिता ।
स्तम्भिता मारिताच्छिन्ना विद्धा रुद्धा च त्रासिता ।। २३ ।

निर्बीजा शक्तिहीना च सुप्ता मत्ता च घूर्णिता ।
पराङ्मुखी नेत्रहीना [1]सा भीता दुःसंस्कृता ।। २४ ।

सुषुप्ता भेदिता प्रौढा बालिका [2]मालिनी क्षमा ।
भयदा युवती क्रूरा दाम्भिका शोकसंकटा ।। २५ ।

निर्स्त्रिशका सिद्धिहीना कूटस्था मन्दबुद्धिदा ।
हीनकर्णा हीननासा [3]अतिक्रुद्धाङ्गभङ्गुरा ।। २६ ।

कलहा कलहप्र ता भ्रष्टस्थानक्षयाकुला ।
धर्मभ्रष्टा [4]चातिवृद्धातिबाला सिद्धिनाशिनी ।। २७ ।

कृतवीर्या महाभीमा क्रोधपुंजा च ध्वंसिनी ।
कालविद्या सूक्ष्मधर्मा [5]विधर्मा धर्ममोहिनी ।। २८ ।

दुर्गस्थिता क्षिप्तचित्ता प्रचण्डा चण्डगामिनी ।
[6]उल्कावच्चलती तीक्ष्णा [7]मन्दाहारा निरशका ।। २९ ।

---

१. सुप्ता भीतानुसंस्कृता इति–क० ।
२. कामिनी क्रिया इति–ग० ।
३. तथा इति०–ग० ।
४. नातिवृद्धा इति–ग० ।
५. सूक्ष्मधर्मा च मोहिनी इति–ग० ।
६. उच्चावच्चलति इति–ग० ।
७. मन्दहासा इति–ग० ।

तत्त्वहीना केकरा च [1]धूर्णितालिङ्गिता जिता ।
अतिगुप्ता क्षुधार्त्ता च धूर्त्ता [2]ध्यानस्थिरास्थिरा ।। ३० ।

[3]एता विद्याः प्रसन्नाः स्युर्योगकालनिरोधनात् ।
वीरभावेन सिद्धिः स्यात् पुरश्चरणकर्मणा ।। ३१ ।

आनन्दभैरवी उवाच—

[4]तत्र वीरो यजेत् कान्तां परकीयामथापि वा ।
[5]स्वीयामलङ्कारयुक्तां सुन्दरीं चारुहासिनीम् ।। ३२ ।

मदनानलतप्ताङ्गीमासवानन्दविग्रहाम्[6] ।
योगिनीं कौलिनीं योग्यां धर्मशीलां कुलप्रियाम् ।। ३३ ।

दीक्षितां लोलवदनां वदनाम्भोजमोहिनीम् ।
नानादेशस्थितां कन्यां युवतीं परिपूजयेत् ।। ३४ ।
जापिकां मन्दहास्यां च मन्दमन्दगतिप्रियाम् ।
कृशाङ्गीमतिसौन्दर्यामलंकृतकलेवराम् ।। ३५ ।
कोटिकन्याप्रदानेन यत्फलं लभते नरः ।
तत्फलं लभते सद्यः कामिनीपरिपूजनात् ।। ३६ ।
ततः षोडशकन्याश्च योगिन्यो योगसिद्धये ।
पूजयेत् परया भक्त्या वस्त्रालङ्कारभूषणैः ।। ३७ ।
नानाविधैः पिष्टकान्नैः पक्वान्नैः प्राणसम्भवैः ।
दधिदुग्धघृतैश्चापि नवनीतैः सशर्करैः ।। ३८ ।
उपलाखण्डमिश्रान्नैः नानारसफलान्वितैः ।
चूडादिभिर्नारिकेलैः कपिलैर्नागरङ्गकैः ।। ३९ ।

---

१. धूतिता इति–ग० ।
२. व्याला इति–ग० ।
३. तत्राविध्या इति–ग० ।
४. अत्र इति–ग० ।
५. स्त्रियालङ्कारसंयुक्ताम् इति–ग० ।
६. मासवानन्द इति–ग० । आसवेन जनित आनन्द आसवानन्दः, मध्यमपदलोपिसमासः । स एव विग्रहः शरीरं यस्याः सा ।

नानागन्धफलैश्चैव नानागन्धसमन्वितैः ।
मृगनाभिचन्दनैश्च श्रीखण्डैर्नवपल्लवैः ॥ ४० ।

पूजयेत्ताः प्रयत्नेन जलजैः स्थलजैस्तथा ।
नानासुगन्धिपुष्पैश्च रक्तचन्दनकुङ्कुमैः ॥ ४१ ।

पूजयेत् शून्यगृहे च निर्जने विपिने तथा ।
कुलदेवीं समानीय स्वागतं प्रवदेदनु ॥ ४२ ।

अर्घोदकेन संशोध्यामृतीकरणमाचरेत् ।
शक्तिञ्चाभिमुखीं नीत्त्वा वीरयोगी भवेद्ध्रुवम् ॥ ४३ ।

शक्तिं च षोडशीं देवीं कुलचक्रप्रियां शुभाम् ।
महाशक्ति शृणु प्राणवल्लभे श्रीकलावतीम् ॥ ४४ ।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा वेश्या च सुन्दरी ।
कुलभूषासमाक्रान्ता मानिनी नातिपिङ्गला ॥ ४५ ।

रजकी नटकी कौला श्यामाङ्गी स्थूलविग्रहा ।
संकेतागमना भार्या [1]विदग्धा रञ्जकी तथा ॥ ४६ ।

[2]खटकी [3]कोलकन्या च कुलमार्गप्रवर्तिका ।
सर्वाङ्गसुन्दरी भव्या चारुनेत्रा हसन्मुखी ॥ ४७ ।

यद्यद्दीक्षारतास्तास्तु देया दीक्षा तदा प्रभो ।
सूक्ष्मतन्त्रानुसारेण कथितं पूर्वसूचितम् ॥ ४८ ।

सर्वाङ्गसुन्दरी शुद्धा शुद्धलोककुलोद्भवा[4] ।
युवती योगनिरता सा देवी डाकिनी मता ॥ ४९ ।

तामानीय महामन्त्रं दापयेदिष्टसिद्धये ।
ततस्ताः पूजनीयास्तु दीक्षाहीनास्तु नाचरेत् ॥ ५० ।

श्रीकृष्णराममन्त्रन्तु दापयेत्सत्त्वसिद्धये ।
ताभ्य आदौ ततो मृत्युञ्जयमन्त्रं ततश्चरेत् ॥ ५१ ।

---

१. वञ्चकी इति–ग० ।
२. खलकी इति–ग० ।
३. लोलकन्या इति–ग० ।
४. डाकिन्या लक्षणैकदेशभूतमिदम् ।

आनन्दभैरवीबीजं देवीं शक्तिं स्वबीजकम् ।
अथवा सिद्धमन्त्रन्तु श्रीविद्यायाः प्रदापयेत् ।। ५२ ।

किं वा केवलमायान्तु क्रोधारुणकराकृतिम् ।
ज्वलन्तीं मूलपद्मे तु स्वयम्भूकुसुमाकराम् ।। ५३ ।

एतद्भूतां महामायां तस्मै दत्त्वा जयी भवेत् ।
आदौ वामकर्णपुटे अग्निवारं [1]परे त्रयम् ।। ५४ ।

अतः शिक्षां सदानन्ददीक्षान्ते कारयेद्बुधः ।
दीक्षामूलं जपं सर्वं दीक्षामूलं गुरोः कृपा ।। ५५ ।

दीक्षामाश्रित्य मायां या जपेत् सा खेचरी परा ।
तस्याः पूजनमात्रेण प्रसन्नाहं न संशयः ।। ५६ ।

जगतां जगदीशानां नारीरूपेण संस्थितिः ।
अहं नारी न सन्देहः सुन्दरी कुत्सिता परा ।। ५७ ।

सुन्दरीपालनार्थाय विनाशायाशु कुत्सिता ।
साधकस्य भ्रान्तिरूपा संहिताः परिभावयेत् ।। ५८ ।

या परा मोक्षदा विद्या सुन्दरी कामचारिणी ।
भाविनी सा भवानी च तां विद्यां परिपूजयेत् ।। ५९ ।

तस्या अङ्गे स्थिरा नित्यं देवताया अहं प्रभो ।
यश्च योगी सर्वसमः स सर्वात्मा नयेत् किल ।। ६० ।

अन्यथा सिद्धिहानिः स्याद्भावाभावविचारणात्[2] ।
विना भावं न सिद्ध्येत्तु भावानां[3] भावराशिग ।। ६१ ।

कुलपुरश्चरणं कुर्यात् कुलाकुलविमुक्तये ।
योगी स्यादव्ययो धीरो विद्वान्मुक्तो हि जीवने ।। ६२ ।

---

१. परित्रयम् इति-ग० । २. भावस्याभावस्य च विचारणात् चिन्तनात् । द्वन्द्वगर्भः षष्ठीतत्पुरुषः ।
३. वीराणाम् इति-ग० ।

[1]ब्राह्मणीं सुन्दरीं चैव संस्थाप्य क्रमतो यजेत् ।
वामहस्ते महार्घ्यन्तु दक्षिणे आसनादिकम् ॥ ६३ ।

दद्यात् पाद्यमासनानि तत्तन्नाम्ना च स्वागतम् ।
तत्तदा अर्घपात्रस्थजलेन प्रोक्षयेच्च ताः ॥ ६४ ।

धेनुमुद्रां समाकृत्य वं मन्त्रेणामृतीक्रियाम् ।
अमृतीकरणान्ते च रूपभेदं समानयेत् ॥ ६५ ।

संज्ञाभिर्नामकरणं कृत्वा चासनमर्पयेत् ।

[2]श्रीभैरवी उवाच—

अथ कान्त प्रवक्ष्यामि षट्चक्रभेदनक्रियाम् ॥ ६६ ।

यत्कृत्वा अमरा लोके विचरन्ति चराचरे ।
अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ ६७ ।

योगेन [3]जीववर्गाश्च भवन्त्यमररूपिणः ।
षट्चक्रे च महापद्मे सर्वसत्त्वगुणान्विते ॥ ६८ ।

धर्माधर्मे मनोराज्ये [4]सर्वविद्यानिधौ क्रतौ ।
कलिकल्मषमुख्यानां सर्वपापापहारकम् ॥ ६९ ।

मनो दत्त्वा महाकाले जीवाः सर्वत्र गामिनः ।
एतच्छ्रुत्वा महावीरो विवेकी परमार्थवित् ॥ ७० ।

---

१. ब्राह्मणीं सुन्दरीं सिद्धां नवयौवनशालिनीम् ।
आनीय दद्याद्दीक्षान्तु तस्यैतत्कर्म चाश्रृणु ॥
कुलमार्गानुसारेण वक्तव्यं त्रिदशेश्वर ।
अत्यद्भुतो भवेन्मन्त्री पुरश्चरणकर्मणि ।
एता अष्टमहाशक्तीः संस्थाप्य क्रमतो यजेत् ॥

२. क० पु० नास्ति० इति० क० पु० अधि० पाठः ।

३. जीवगाश्च इति–ग० ।

४. सत्त्व इति–क० ।

पुनर्जिज्ञासयामास ज्ञानज्ञेयेन शङ्कर ।

आनन्दभैरव उवाच—

षट्चक्रभेदनकथां कथयस्व वरानने ॥ ७१ ।

हिताय सर्वजन्तूनां हिरण्यवर्णमण्डितम् ।
प्रकाशयस्व वरदे योगानामुदयं वद ॥ ७२ ।

येन योगेन धीराणां हितार्थं वाञ्छितं मया ।
कालक्रमेण सिद्धिः स्यात् [1]कालजालविनाशनात् ॥ ७३ ।

कालक्षालनहेतोश्च [2]पुनरुद्यापनं कृतम् ।

आनन्दभैरवी उवाच—

आदौ कुर्यात् परानन्दं रससागरसम्भवम् ॥ ७४ ।

मान्द्यं मन्दगुणोपेतं शृणु तत्क्रममुत्तमम् ।
स्तोत्रं कुर्यात् मूलपद्मे कुण्डलिन्याः पुरष्क्रियाम् ॥ ७५ ।

पुरश्चरणकाले तु जपान्ते नित्यकर्मणि ।
काम्यकर्मणि धर्मेषु तथैव धर्मकर्मसु[3] ॥ ७६ ।

गुर्वाद्यगुरुनित्येषु भक्तिमाकृत्य सम्पठेत् ।
ॐनमो गुरवे ॐनमो गुर्वम्बपरदेवतायै ॥ ७७ ।

सर्वधर्मस्वरूपायै सर्वज्ञानस्वरूपायै ।
ॐभवविभवायै ॐदक्षयज्ञविनाशिन्यै ॥ ७८ ।

ॐभद्रकाल्यै ॐकपालिन्यै ॐउमायै ॐमाहेश्वर्यै ।
ॐसर्वसंकटतारिण्यै ॐमहादेव्यै नमो नमः ॥ ७९ ।

---

१. ज्ञान इति–ग० । २. पूर्वं नोद्यापनम् इति–ग० ।
३. धर्मिषु इति–ग० ।

ॐया माया मयदानवक्षयकरी शक्तिः क्षमा कर्त्तृका
शुम्भश्रीमहिषासुरासुरबलप्रात्रोलचण्डामहा[1] ।
[2]भद्रार्द्रा रुधिरप्रिया प्रियकरी क्रोधाङ्गरक्तोत्पला
चामुण्डा रणरक्तबीजरजनी ज्योत्स्ना मुखेन्दीवरा ।। ८० ।

या जाया जयदायिनी नृगृहिणो भीत्यापहा भैरवी
नित्या सा परिरक्षणं कुरु शिवा सारस्वतोत्पत्तये ।
सा मे पातु कलेवरस्य विषयाह्लादेन्द्रियाणां बलं
[3]वक्षः स्थायिनमुल्वणोज्ज्वलशिखाकारादिजीवाञ्चिता ।।८१।

कृत्वा योगकुलान्वितं स्वभवने नित्यं मनोरञ्जनं
नित्यं संयमतत्परं परतरे भक्तिक्रियानिर्मलम् ।
[4]शम्भो रक्षरजोऽपनीशचरणाम्भोजे सदा भावनं
विद्यार्थप्रियदर्शनं त्रिजगतां संयम्य योगी भवेत् ।। ८२ ।

आकाङ्क्षापरिवर्जितं निजगुरोः सेवापरं पावनं
प्रेमाह्लादकथाच्युतं[5] कुटिलताहिंसापमानप्रियम् ।
[6]कालक्षेपणदोषजालरहितं शाक्तं सुभक्तं पतिं
श्रीशक्तिप्रियवल्लभं सुरुचिरज्ञानान्तरं मानिनम् ।। ८३ ।

मालासूक्ष्मसुसूक्ष्मबद्धनिलयं सल्लक्षणं साक्षिणं
[7]नानाकारणकारणं ससरणं साकारब्रह्मार्पणम् ।
नित्या सा जडितं महान्तमखिले [8]योगासनज्ञानिनं
तं वन्दे पुरुषोत्तमं त्रिजगतामंशार्कहंसं परम् ।। ८४ ।

---

१. प्राणेन चण्डापहा इति–ग० । —असुरासुरबलप्राणेन चण्डमेतन्नामानमसुरमपहन्ति या सा भगवती इत्यर्थः ।

२. भक्तार्द्रा इति–ग० ।

३. रक्षः इति–ग० ।

४. रक्षरजाप्यमीश इति–क० ।

५. कथावृतम् इति–क० ।

६. कान्तिक्षेमकलाफलं कुलगतं मायाविहीनं कुलम् ।
कौलानामपि साङ्गमं तमिहे सम्पास्यहं सर्वदा ।।
मिथ्यावागरहितं स्वधार्थनिरतं नित्योक्तिभक्तिप्रियम् ।।
इति क० पु० अधि० पाठः ।

७. नानाकारविकारसारसरणम् इति–ग० ।

८. योगोपलज्जानिलम् इति–क० ।

मायांके प्रतिभाति [1]चारुनयनाह्लादैकबीजं विधिं
कल्लोलाविकुलाकुला समतुला [2]कालाग्निवाहानना ।
हालाहेलन [3]कौलकालकलिका [4]केयूरहारानना
सर्वाङ्गा मम पातु पीतवसना शीघ्रासना [5]वत्सला ॥ ८५ ।

सा बालाबलवाहना [6]सुगहना सम्मानना धारणा
खं खं खं खचराचरा कुलचरा वाचाचरा वंखरा ।
चं चं चं[7] चमरीहरीभगवती गाथागताः संगतिः
बाहौ मे परिपातु पङ्कजमुखी या चण्डमुण्डापहा ॥ ८६ ।

[8]कं कं कं कमलाकला गतिफला फूत्कारफेरूत्करा[9]
पं पं पं परमा रमा जयगमा व्यासंगमा जङ्गमा ।
तं तं तं तिमिरारुणा सकरुणा मातावला तारिणी
भं भं भं भयहारिणी प्रियकरी सा मे भवत्वन्तरा ॥ ८७ ।

झं झं झं [10]झरझर्झरीगतिपथस्थाता रमानन्दितं
[11]मं मं मं मलिनं हि [12]मां हयगतां हन्त्रीं रिपूणां हि ताम् ।
भक्तानां भयहारिणी रणमुखे शत्रोः कुलाग्निस्थिता
सा सा सा भवतु प्रभावपटला दीप्ताङ्घ्रियुग्मोज्ज्वला ॥ ८८ ।

गं गं गं गुरुरूपिणी गणपतेरानन्दपुञ्जोदया
[13]तारासारसरोरुहारुणकला [14]कोटिप्रभालोचना ।
नेत्रं पातु (सदा) [15]शिवप्रियपथा कोटचायुतार्कप्रभा
तुण्डं मुण्डविभूषणा नरशिरोमाला विलोला समा[16]॥ ८९ ।

---

१. चला इति–ग० । २. कालाग्निहालाहला इति–ग० । ३. कक्ष इति–क० ।
४. केयूरहा वामना इति–ग० । ५. वासना इति–ग० । ६. नूगहना इति–ग० ।
७. गतिः इति–ग० । ८. फङ्कार इति–ग० । ९. कला इति–ग० ।
१०. झरझरी इति–क० । ११. सं सं सं इति–क० । १२. सा इति–क० ।
१३. भावासार इति–क० । १४. रुणरुणी कोटिप्रमा इति–क० ।
१५. ह्यसौ सदा शिवपथे इति–क० । १६. मालाघिलोला मम इति–क० ।

योगेशी [1]शशिशेखरोल्वणकथालापोदया मानवी[2]
शीर्षं पातु ललाटकर्णयुगलानन्तस्ततः सर्वदा ।
[3]मूर्त्तं मेरुशिखा स्थिता व्यवतु मे गण्डस्थलं कैवली
तुष्टं चाष्टमषष्टिकाधरतलं धात्री धराधारिणी ॥ ९० ।

नासाग्रद्वयगह्वरं भृगुतरा नेत्रत्रयं तारिणी
केशान् कुन्तलकालिका सुकपिला कैलासशैलासना ।
कङ्कालामलमालिका सुवसना दन्तावलीं[4]दैत्यहा
बाह्यं मन्त्रमनन्तशास्त्रतरणी सञ्ज्ञावचःस्तम्भिनी ॥ ९१ ।

हं हं हं नरहारघोररमणी सञ्चारिणी पातु मे
शत्रूणां दलनं करोतु नियतं मे चण्डमुण्डापहा ।
भीमा सन्दहतु प्रतापतपना संवर्द्धनं वर्द्धिनी
मन्दारप्रियगन्धविभ्रममदा [5]वैदग्धमोहान्तरा ॥ ९२ ।

श्यामा[6] पातु पतङ्गकोटिनिनदा[7] हंकारफट्कारिणी
आनन्दोत्सवसर्वसारजयदा सर्वत्र सा रक्षिका ।
क्षौं क्षौं क्षौं कठिनाक्षरा क्षयकरी सर्वाङ्गदोषङ्गना
देहारेः कचहा परा[8] कचकुचाकीलालपूराशिता ॥ ९३ ।

घं घं घं घटघर्घरा विघटिता जायापतेः पातु मे
[9]कल्पे कल्पा कुलानामतिभयकलितं सर्वत्र मे विग्रहम् ।
[10]निद्रोद्रावितकालिका मम कुलं [11]लङ्कातटाच्छादिनी
[12]नं नं नं नयनानना सुकमला सा[13]लाकिनी लक्षणा ॥ ९४ ।

---

१. शेखरान्दन इति–क० ।
२. मारवि इति–क० ।
३. अस्तम् (?) इति–क० ।
४. मैथुनी इति–ग० ।
५. विदिग् दिग्दण्डमोहान्तरा इति–क० । —विदग्धस्यायं वैदग्धः, स चासौ मोहश्चेति वैदग्धमोहः, तस्यान्तं राति ददावि या सा । आतोऽनुपसर्गे क इति कप्रत्ययः ।
६. सा सा सा तु इति–ग० ।
७. निलयाबूकारटंकारिणी इति–ग० ।
८. कचाकचकटा इति–ग० ।
९. कल्पेऽल्पा कुलसर्पकल्पलतिका इति–क० ।
१०. व्यावति इति–क० ।
११. शङ्का इति–क० ।
१२. लं लं लं इति–ग० ।
१३. लालाकिनी लक्षणी इति–ग० ।

[1]कुक्षौ पृष्ठतलं सदा मम धनं सा पातु मुद्रामयी
मोक्षं पातु करालकालरजको या रञ्जकी कौतुकी ।
कृत्या नापितकन्यका शशिमुखी सूक्ष्मा मम प्राणगं
मन्दारप्रियमालया मणिमयग्रन्थ्या महन्मण्डिता ॥ ९५ ।

पूज्या योगिभिरुत्सुकी भगवती मूलस्थिता सत्क्रिया
मत्ता पातु पतिव्रता मम गृहं धर्मं यशः[2] श्रेयसम् ।
धर्माम्भोरुहमध्यदर्शनिकरे काली महायोगिनी
मत्तानामतिदर्पहा हरशिरोमाला[3] कला केवला ॥ ९६ ।

मे गुह्यं जयमेव लिङ्गमपि मे मूलाम्बुजं पातु सा
या कन्या हिमपर्वतस्य भयहा पायान्नितम्बस्थलम् ।
सर्वेषां हृदयोदयानलशिखाशक्तिर्मनोरूपिणी
मे भक्तिं परिपातु कामकुशला लक्ष्मीः प्रिया मे प्रभो ॥ ९७ ।

गौरी गौरवकारिणी भुवि महामाया महामोहहा
वं वं वं वरवारुणी सुमदिरा मे पातु नित्यं कटिम् ।
कूटा सा रविचन्द्रवह्निरहिता स्वेच्छामयी मे मुखम् ॥ ९८ ।

एतत्स्तोत्रं पठेद् यस्तु सर्वकाले च सर्वदा ।
स भवेत् [4]कालयोगेन्द्रो महाविद्यानिधिर्भवेत् ॥ ९९ ।

मूलपद्मबोधने[5] च मूलप्रकृतिसाधने ।
निजमन्त्रबोधने च [6]घोरसंकटकालके ॥ १०० ।

---

१. पृष्ठतरं मुदा समधनम् इति–ग० । २. समा इति–ग० ।

३ हरति पापानि इति हरः, हृञ्-धातोः पचाद्यच् । हरस्य शिरः, तस्य माला इवेति विग्रहः ।

४. योगेन्द्रः साध्यो विद्यानिधिर्भवेत् इति–क० । ५. राधने–क० ।

६. घोरसङ्कटकालके–क० ।

आपदस्तस्य नश्यन्ति अन्धकारं विना रविः ।
सर्वकाले सर्वदेशे महापातकघातकः[1] ।। १०१ ।

स भवेद् योगिनीपुत्रः कलिकाले न संशयः ।। १०२ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे
भैरवभैरवीसंवादे कन्दवासिनोस्तोत्रं नाम
[2]अष्टाविंशः पटलः ॥

१. महान्ति यानि पातकानि तेषां घातको विनाशकः ।

२. त्रिंशः पटलः–क० ।

अथैकोनत्रिंशः पटलः

आनन्दभैरवी उवाच—

अथ षट्चक्रयोगं च प्रवक्ष्यामीह तत्त्वतः ।
कुण्डलीयोगविविधं कृत्वा योगी भवेन्नरः ॥ १ ।

मूलादिब्रह्मरन्ध्रान्तं षट्चक्रभेदनं मतम् ।
षट्चक्रे योगशास्त्राणि विविधानि वसन्ति हि ॥ २ ।

यो जानातीह षट्चक्रं सर्वशास्त्रार्थविद्भवेत् ।
चतुर्द्दलं मूलपद्मं वादिसान्तार्णसम्भवम् ॥ ३ ।

हिरण्यवर्णममलं ध्यायेद्योगी पुनः पुनः ।
निर्जने विपिने शून्ये पशुपक्षिगणावृते[1] ॥ ४ ।

निर्भये[2] सुन्दरे देशे दुर्भिक्षादिविवर्जिते ।
कृत्वा दृढासनं मन्त्री योगमार्गपरो भवेत् ॥ ५ ।

तदा योगी भवेत् क्षिप्रं मम शास्त्रानुसारतः ।
पूर्वदले वकारं च ध्यायेद्योगी सदा सुखी ॥ ६ ।

सुवर्णवर्णं हितकारिणं नृणां
सत्त्वोद्भवं पूर्वदलस्थितं सुखम् ।
मत्तप्रियं वारणमत्तमन्दिरं
मन्त्रार्थकं शीतलरूपधारिणम् ॥ ७ ।

योगानुभावाश्रयकालमन्दिरं
तेजोमयं सिद्धिसमृद्धिदं गुरुम् ।
आद्याक्षरं वं वरभावसाधनं
नारायणं भावनपञ्चमच्युतम्[3] ॥ ८ ।

---

१. गणान्विते—ग० । २. निर्भरे—ग० ।

३. भावनानां पञ्चमस्तेन च्युतम्, त्यक्तम् ।

ध्यायेत् शकारं कनकाचलप्रभं
गौरीपतेः श्रीकरणं पुराणम् ।
[1]लक्ष्मीप्रियं सर्वसुवर्णवेष्टितं
सदा मुदा दक्षिणपत्रमुत्तमम्[2] ॥ ९ ।

शमीश्वरीषष्ठगुणावतंसं
षट्पद्मसम्भेदनकारकं परम् ।
परापरस्थाननिवासिनं गुणं
[3]हेमाचलं पत्रमहं भजामि ॥ १० ।

सकारमानन्दरसं प्रियं प्रियं[4]
ध्याये महाहाटकपर्वताग्रकम् ।
ध्याये मुदाहं घननाथमन्दिरे
मायामहामोहविनाशनं[5] जयम् ॥ ११ ।

चतुर्भुजं भुजयुगं अष्टादशभुजन्तथा ।
अष्टहस्तं सदा ध्यायेन्मन्त्री भावविशुद्धये ॥ १२ ।

ततो ध्यायेत् कर्णिकायां मध्यदेशे मनोरमम् ।
स्वयम्भूलिङ्गपरमं योगिनां योगसिद्धिदम् ॥ १३ ।

प्रातः सूर्यसमप्रख्यं तडित्कोटिसमप्रभम् ।
तं संवेष्टच महादेवी कुण्डली योगदायिनी ॥ १४ ।

सार्धत्रिवेष्टनग्रन्थियुता सा मुक्तिदायिनी ।
निद्रिता सा सदाभद्रा[6] महापातकघातिनी[7] ॥ १५ ।

---

१. लक्ष्मीमयम्–ग० । २. पद्मपावनम्–ग० ।

३. मावलच्छन्दमहम्–ग० । ४. प्रियाप्रियम्–ग० ।

५. विनाशम्–ग० । ६. सापदा भद्रा इति–ग० ।

७. महान्ति पातकानि हन्ति इति महापातकघातिनी, ताच्छील्ये णिनिः ।

निरन्तरं तस्य शीर्षे विभाति शशधारिणि ।
तच्छ्वासधारिणी नित्या जगतां प्राणधारिणी ॥ १६ ।

[1]सुप्ता सर्पसमा भ्रान्तिः यथार्कशतकोटयः ।
[2]यदा लिगं सा विहाय [3]प्राक्तिष्ठति महापथे ॥ १७ ।

तदा सिद्धो भवेद्योगी ध्यानधारणकृत् शुचिः ।
सदानन्दमयो नित्यश्चैतन्यकुण्डली यदा ॥ १८ ।

सुषुम्ना नाडिकामध्ये [4]महासूक्ष्मविले स्थितः ।
मनो निधाय यो योगी श्वासमार्गपरो भवेत् ॥ १९ ।

तदा सा द्रवति क्षिप्रं चैतन्या कुण्डली [5]परा ।
पृष्ठदेशे [6]महादण्डे मेरुमूले महाप्रभे ॥ २० ।

मूलादिब्रह्मरन्ध्राधः सदास्थिररूपधारकः ।
कनकाचलनाम्ना च प्रतिभाति [7]जगत्त्रये ॥ २१ ।

तन्मध्ये परमा सूक्ष्मा सुषुम्ना बहुरूपिणी ।
मनोमुनिस्वरूपा च मनश्चैतन्यकारिणी ॥ २२ ।

तन्मध्ये भाति वज्राख्या [8]घोरपातकनाशिनी ।
सिद्धिदाभावविज्ञानां मोक्षदा कुलरूपिणाम् ॥ २३ ।

तन्मध्ये चित्रिणी देवी देवताप्रीतिवर्द्धिनी ।
हितैषिणी महामाया [9]कालजालविनाशिनी ॥ २४ ।

---

१. सप्ता इति–ग० ।
२. यदासिद्धिदम् इति–क० ।
३. प्रगच्छति इति–क० ।
४. सूक्ष्मा विलोहिता इति–ग० ।
५. भवेत् इति–ग० ।
६. महाकुण्डे इति–ग० ।
७. गुणद्वये इति–ग० ।
८. घातिनी–ग० ।
९. विकाशिनी–क० । 'कालजालविनाशिनी' इति पाठे कालस्य जालं विनाशयति, तच्छीला । ताच्छील्ये णिनिः ।

सा पाति सकलान् चक्रान् पद्मरूपधरान् परान् ।
त्रैलोक्यमण्डलगतान् साक्षादमृतविग्रहान् ॥ २५ ।

स्वयं दधार सा देवी चित्राख्या चारुतेजसी ।
तले पृष्ठे ऊद्र्ध्वदेशे शीर्षे वक्षसि नाभिषु ॥ २६ ।

कण्ठकूपे चक्रमध्ये ब्रह्माण्डं पाति सर्वदा ।
शरीरात्मकमीशार्थं त्रैलोक्यं सचराचरम् ॥ २७ ।

[1]चित्रासुग्रथनं पद्मं [2]योऽवभाव्यति भावकः ।
भावेन लभ्यते योगं भावेन भाव्यते शिवः ॥ २८ ।

भावेन शक्तिमाप्नोति तस्माद्भावं समाश्रयेत् ।
षट्चक्रभावनां कृत्वा महायोगी भवेन्नरः ॥ २९ ।

सर्वधर्मान्वितो भूत्वा राजते [3]क्षितिमण्डले ।
सर्वत्रगामी स भवेत् यदि पद्मे मनोलयम् ॥ ३० ।

पद्मभावनमात्रेण आकाशसदृशो भवेत् ।
महापद्मे मनो दत्वा महाभक्तो भवेद्ध्रुवम् ॥ ३१ ।

यदि भक्तो भवेन्नाथ तदा मुक्तो न संशयः ।
यदि मुक्तो महीमध्ये ध्यानयोगपरायणः ॥ ३२ ।

तदा कालपरां ज्ञात्वा[4] सर्वदर्शी च सर्ववित् ।
सर्वज्ञः सर्वतोभद्रो भवतीति न संशयः ॥ ३३ ।

चित्रिणी मध्यदेशे च ब्रह्मनाडी महाप्रभा[5] ।
सर्वसिद्धिप्रदानित्या सा देवी सकला कला ॥ ३४ ।

व्योमरूपा भगवती सर्वचैतन्यरूपिणी ।
एकरूपं परं ब्रह्म ब्रह्मातीतं जगत्त्रयम् ॥ ३५ ।

---

१. चित्राख्या नयनम् इति–ग० ।
२. यो विभाव्यति भावुकः इति–ग० ।
३. स्थिति इति–ग० ।
४. कृत्वा इति–ग० ।
५. महत्प्रभा इति–ग० । —महतां प्रभेत्यर्थोऽत्र पाठे । महाप्रभेति पाठे तु महती चासौ प्रभा चेति सन्महदिति समासः ।

यदा जगत्त्रयं ब्रह्म तदा [1]सत्त्वालयं प्रभो ।
महालये मनो दत्त्वा सर्वकालजयो भवेत् ।। ३६ ।

मृत्युञ्जयो महावीरो [2]महाच्छत्रो महागतिः ।
सर्वव्यापकरूपेण ईश्वरत्वेन भाषते ।। ३७ ।

सर्वदा मन्त्रसम्भूतो विशालाक्षः प्रसन्नधीः ।
एकस्थानस्थितो याति नक्षत्रं स हि शंकर ।। ३८ ।

एकदृष्टिः क्षुधातृष्णारहितो वाक्यवर्जितः ।
निराकारे मनो दद्यात्तदा [3]महानयं प्रभो ।। ३९ ।

किन्तु [4]नाथाज्ञानिनां हि नापि नापि [5]महालयः ।
महाप्रलय एवं हि योगिनां नात्र संशयः ।। ४० ।

यदा मनोयोगविशुद्धये मनोलयं यः कुरुतेऽप्यहर्निशम् ।
स एव मोक्षो गुणसिन्धुरूपी कालाग्निरूपी निजदेवदैवतः ।।४१।

महामनोयोगविकारवर्जितः [6]कामक्रियाकाण्डविशुद्धमण्डितः ।
हितो गतीनां मतिमान्निरस्तो महालयस्थोऽमर एव भक्तः ।।४२।

मानी विचारार्थविवेकचित्तश्चातुर्यचित्तोल्बणताविवर्जितः ।
योगी भवेत्साधकचक्रवर्ती व्योमाम्बुजे चित्तविसर्जनं सदा ।।४३।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे महाप्रलयनामा एकोनत्रिंशः[7] पटलः ।।

---

१. महात्रयम् इति–ग० ।
२. क्षेत्रो महापतिः इति–ग० ।
३. महात्रयः इति–ग० ।
४. नात्र प्राणिनां हि इति–ग० ।
५. महात्ययः इति–ग० ।
६. सुकण्डुममण्डितः ? (सुकाण्डमण्डितः) इति–क० । विशुद्धं यथा स्यात्तथा मण्डित इति । कामस्य क्रियाकाण्डेन विशुद्धमण्डित इति तृतीयातत्पुरुषः, कर्तृकरणे कृतेत्यनेन ।
७. एकत्रिंशः इति–क० ।

अथ त्रिंशः पटलः

आनन्दभैरवी उवाच—

अथ वक्ष्ये महाकाल मूलपद्मविवेचनम् ।
यत् कृत्वा अमरो भूत्वा वसेत् कालचतुष्टयम् ॥ १ ।

अथ षट्चक्रभेदार्थे भेदिनीशक्तिमाश्रयेत् ।
छेदिनीं सर्वग्रन्थीनां योगिनीं समुपाश्रयेत् ॥ २ ।

तस्या मन्त्रान् प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।
आदौ शृणु महामन्त्रं भेदिन्याः [१]परं मनुम् ॥ ३ ।

[२]आदौ कालीं [३]समुत्कृत्य ब्रह्ममन्त्रं ततः परम् ।
देव्याः प्रणवमुद्धृत्य भेदिनी तदनन्तरम् ॥ ४ ।

ततो हि मम गृह्णीयात् प्रापय द्वयमेव च ।
चित्तचञ्चीशब्दान्ते मां रक्ष युग्ममेव च ॥ ५ ।

भेदिनी मम शब्दान्ते अकालमरणं हर ।
[४]हर युग्मं स्वं महापापं नमो नमोऽग्निजायया ॥ ६ ।

एतन्मन्त्रं जपेत्तत्र डाकिनीरक्षसि प्रभो ।
आदौ प्रणवमुद्धृत्य ब्रह्ममन्त्रं ततः परम् ॥ ७ ।

[५]शाम्भवीति ततश्चोक्त्वा ब्राह्मणीति पदं ततः ।
मनोनिवेशं [६]कुरुते तारयेति [७]द्विधापदम् ॥ ८ ।

छेदिनीपदमुद्धृत्य मम मानसशब्दतः ।
महान्धकारमुद्धृत्य छेदयेति द्विधापदम् ॥ ९ ।

---

१. प्रबलम् एति–ग० ।
२. आकालीम् इति–ग० ।
३. समुपाकृत्य इति–ग० ।
४. हरस्व इति–ग० ।
५. समुद्धत इति–क० ।
६. कुरु मे इति–क० ।
७. भावयेति द्विधापदम् इति–क० ।

स्वाहान्तं मनुमुद्धृत्य जपेन्मूलाम्बुजे सुधीः ।
एतन्मन्त्रप्रसादेन जीवन्मुक्तो भवेन्नरः ॥ १० ॥

तथा स्त्रीयोगिनीमन्त्रं जपेत्तत्रैव शंकर ।
ॐ घोररूपिणिपदं[1] सर्वव्यापिनि शंकर ॥ ११ ॥

महायोगिनि मे पापं शोकं रोगं हरेति च ।
विपक्षं छेदयेत्युक्त्वा योगं मय्यर्पय द्वयम् ॥ १२ ॥

स्वाहान्तं मनुमुद्धृत्य जपाद्योगी भवेन्नरः ।
खेचरत्वं समाप्नोति योगाभ्यासेन योगिराट् ॥ १३ ॥

डाकिनीं ब्रह्मणा युक्तां मूले ध्यात्वा पुनः पुनः ।
जपेन्मन्त्रं सदायोगी ब्रह्ममन्त्रेण योगवित् ॥ १४ ॥

ब्रह्ममन्त्रं प्रवक्ष्यामि तज्जापेनापि योगिराट् ।
ब्रह्ममन्त्रप्रसादेन जडो योगी न संशयः ॥ १५ ॥

प्रणवत्रयमुद्धृत्य दीर्घप्रणवयुग्मकम् ।
तदन्ते प्रणवत्रीणि ब्रह्म ब्रह्म त्रयं त्रयम् ॥ १६ ॥

सर्वसिद्धिपदस्यान्ते पालयेति च मां पदम् ।
सत्त्वं गुणो रक्ष रक्ष मायास्वाहापदं जपेत् ॥ १७ ॥

डाकिनीमन्त्रराजञ्च शृणुष्व परमेश्वर ।
यज्जप्त्वा डाकिनी वश्या त्रैलोक्यस्थितिपालकाः ॥ १८ ॥

यो जपेत् डाकिनीमन्त्रं चैतन्या कुण्डली झटित् ।
अनायासेन सिद्धिः स्यात् परमात्मप्रदर्शनम् ॥ १९ ॥

मायात्रयं समुद्धृत्य प्रणवैकं ततः परम् ।
डाकिन्यन्ते महाशब्दं डाकिन्यम्बपदं ततः ॥ २० ॥

पुनः प्रणवमुद्धृत्य मायात्रयं ततः परम् ।
मम योगसिद्धिमन्ते साधयेति द्विधापदम् ॥ २१ ॥

---

१. पदञ्चोक्त्वा सर्वव्यापिनि शाङ्करि इति–क० ।

मनुमुद्धृत्य देवेशि जपाद्योगी भवेज्जडः ।
जप्त्वा सम्पूजयेन्मन्त्री पुरश्चरणसिद्धये ।। २२ ।

सर्वत्र चित्तसाम्येन[1] द्रव्यादिविविधानि च ।
पूजयित्वा मूलपद्मे चित्तोपकरणेन च ।। २३ ।

ततो मानसजापञ्च स्तोत्रञ्च [2]कालिपावनम् ।
पठित्वा योगिराट् भूत्वा वसेत् षट्चक्रवेश्मनि ।। २४ ।

शक्तियुक्तं विधिं यस्तु स्तौति नित्यं महेश्वर ।
तस्यैव पालनार्थाय मम यन्त्रं महीतले ।। २५ ।

तत् स्तोत्रं श्रृणु योगार्थं सावधानावधारय ।
एतत्स्तोत्रप्रसादेन महालयवशो भवेत् ।। २६ ।

ब्रह्माणं हंस[3]संघायुतशरणवदावाहनं देववक्त्रं
विद्यादानैकहेतुं [4]तिमिचरनयनाग्नीन्दुफुल्लारविन्दम् ।
वागीशं वाग्गतिस्थं[5] मतिमतविमलं बालार्कं चारुवर्णं
[6]डाकिन्यालिङ्गितं तं सुरनरवरदं भावयेन्मूलपद्मे ।। २७ ।

नित्यां ब्रह्मपरायणां [7]सुखमयीं ध्यायेन्मुदा डाकिनीं
रक्तां गच्छविमोहिनीं कुलपथे ज्ञानाकुलज्ञानिनीम् ।
[8]मूलाम्भोरुहमध्यदेशनिकटे भूविम्बमध्ये प्रभां
हेतुस्थां गतिमोहिनीं श्रुतिभुजां विद्यां भवाह्लादिनीम् ।। २८ ।

विद्यावास्तवमालया गलतलप्रालम्बशोभाकरां
ध्यात्त्वा मूलनिकेतने निजकुले यः स्तौति भक्त्या सुधीः ।
नानाकारविकारसारकिरणां[9] कर्त्रीं विधो योगिनां[10]
मुख्यां मुख्यजनस्थितां स्थितिमतिं सत्त्वाश्रितामाश्रये ।। २९ ।

---

१. माल्येन इति–क० ।　२. पारणम् इति–ग० ।
३. शववरदवाहनं वेदवक्त्रम् इति–क० ।　४. तिमिरहन इति–ग० ।
५. वाग्दति संमति इति–ग० ।　६. डाकिन्यालिङ्गितं तं स्वरनवजप्तं भावयेन्मूलपद्मम् इति–ग० ।
७. त्रिनयनाम् इति–ग० ।　८. मूले योऽम्भोरुहः कमलम्, तस्य मध्यदेशस्तस्य निकटे ।
९. करुणाम् इति–ग० ।　१०. मार्गिनीम् इति–ग० ।

या देवी नवडाकिनी स्वरमणी विज्ञानिनी मोहिनी
मां पातु प्रियकामिनी भवविधेरानन्दसिन्धूद्भवा ।
मे मूलं गुणभासिनी प्रचयतु श्रीः कीर्त्तिचक्रं हि मां
नित्या सिद्धिगुणोदया सुरदया श्रीसंज्ञया मोहिता ।। ३० ।

तन्मध्ये परमाकला कुलफला [1]बाणप्रकाण्डाकरा
राका[2] राशषसादशा शशिघटा लोलामला कोमला[3] ।
सा माता नवमालिनी मम कुलं मूलाम्बुजं सर्वदा
सा देवी लवराकिणी कलिफलोल्लासैकबीजान्तरा ।। ३१ ।

धात्री धैर्यवती सती मधुमती विद्यावती भारती
कल्याणी कुलकन्यकाधरनरारूपा हि सूक्ष्मास्पदा ।
मोक्षस्था स्थितिपूजिता स्थितिगता माता [4]शुभा योगिनां
नौमि श्रीभविकाशयां शमनगां गीतोद्गतां गोपनाम् ।। ३२ ।

कल्केशीं कुलपण्डितां कुलपथग्रन्थिक्रियाच्छेदिनीं
[5]नित्यां तां गुणपण्डितां प्रचपलां मालाशतार्कारुणाम्[6] ।
विद्यां चण्डगुणोदयां समुदयां त्रैलोक्यरक्षाक्षरां
ब्रह्मज्ञाननिवासिनीं [7]सितशुभानन्दैकबीजोद्गताम्[8] ।। ३३ ।

गीतार्थानुभवप्रियां [9]सकलया सिद्धप्रभापाटलाम् ।
कामाख्यां प्रभजामि जन्मनिलयां हेतुप्रियां सत्क्रियाम् ।
सिद्धौ साधनतत्परं परतरं साकाररूपायिताम् ।। ३४ ।

ब्रह्मज्ञानं निदानं गुणनिधिनयनं कारणानन्दयानम् ।
ब्रह्माणं ब्रह्मबीजं रजनिजयजनं यागकार्यानुरागम् ।। ३५ ।

---

१. रत्नप्रकारान्तरा इति–ग० । २. शका राशषसादशा इति–ग० ।
३. कोमना इति–ग० । ४. सुता इति–ग० ।
५. नित्याशम् इति–ग० ।
६. मालायां ये शतसंख्याका अर्काः सूर्याः, तैः अरुणा, ताम् ।
७. मितसुता इति–क० । ८. बीजामताम् इति–ग० । ९. सकलसिद्धान्त इति–क० ।

शोकातीतं विनीतं नरजलवचनं सर्वविद्याविधिज्ञम् ।
सारात् सारं तरुं तं [1]सकलतिमिरहं हंसगं पूजयामि ॥ ३६ ।

एतत्सम्बन्धमार्गं [2]नवनवदलगं वेदवेदाङ्गविज्ञम् ।
मूलाम्भोजप्रकाशं तरुणरविशशिप्रोन्नताकारसारम्[3] ॥ ३७ ।

भावाख्यं[4]भावसिद्धं जयजयदविधिं ध्यानगम्यं पुराणम् ।
पाराख्यं पारणायं परजनजनितं ब्रह्मरूपं भजामि ॥ ३८ ।

डाकिनीसहितं ब्रह्मध्यानं कृत्वा पठेत् स्तवम् ।
पठनाद् धारणान्मन्त्री योगिनां संगतिर्भवेत् ॥ ३९ ।

एतत्पठनमात्रेण महापातकनाशनम् ।
एकरूपं [5]जगन्नाथं विशालनयनाम्बुजम् ॥ ४० ।

[6]एवं ध्यात्त्वा पठेत् स्तोत्रं पठित्त्वा योगिराड् भवेत् ॥ ४१ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रसिद्धिसाधने भैरवभैरवीसंवादे डाकिनीस्तोत्रं नाम [7]त्रिंशः पटलः ॥

●

---

१. तिमिहरहरम् इति–ग० । २. नवनववदनं वेदवेदान्तविज्ञम् इति–क० ।

३. प्रोल्लता इति–क० । ४. भावसिन्धुम् इति–क० ।

५. पश्यतीह स तनः परमो भवेत् इति–क० ।

६. बालरूपं सदा ध्यायेत् ब्रह्माणं तेजसा कुलम् ।
डाकिनीशक्तिसहितं परमात्मानमीश्वरम् ॥
चर्तुमुखं महाकायं वनमालाविभूषितम् ।
नवीनं नवरूपाढ्यं लोकानामभिलाषदम् ॥
चतुर्भुजं महापुंसगामिनं नित्ययोगिनम् ।
स्रष्टारं तारकं भव्यं भगमालावृतं विभुम् ॥
सोमसूर्यप्रतीकाशं कुण्डलीशक्तिसेवकम् ।
पृथ्वीशादिबीजाङ्कविशालनयनाम्बुजम् ॥ इति–क० ।

७. द्वात्रिंश इति–क० ।

अथैकत्रिंशः पटलः

आनन्दभैरवी उवाच—

अथ नाथ प्रवक्ष्यामि भेदिन्याः साधनं परम् ।
येन साधनमात्रेण योगी स्यात् कलि[1]कालहा ॥ १ ।

कलिकाले महायोगं साधय त्वं महाप्रभो ।
यदि न साधितः कालः स कालो देहभक्षकः ॥ २ ।

भेदिनीसाधनेनैव ग्रन्थीनां भेदनं भवेत् ।
डाकिनीं हृदये ध्यायेत् परमानन्दरूपिणीम् ॥ ३ ।

अष्टहस्तां विशालाक्षीं शशाङ्कावयवाङ्किताम् ।
त्रैलोक्यमोहिनीं विद्यां भयदां वरदां सताम् ॥ ४ ।

शुक्लवर्णां त्रिनयनां चारुरूपमनोहराम् ।
ध्यात्वा मूलाम्बुजे योगी पाद्याद्यैः परिपूजयेत् ॥ ५ ।

तत्र मनोलयं कृत्वा योगी भवति भूतले ।
यदा मनोलयं याति तदा तस्याः स्तवं पठेत् ॥ ६ ।

स्तोत्रं पठनमात्रेण सर्वसत्त्वाश्रितो भवेत् ।
ध्यानमाकृत्य प्रपठेत् सर्वसिद्धिमयो भवेत् ॥ ७ ।

या भेदिनी सकलग्रन्थिविनाशनानां
धर्मान्तरे सकलशत्रुविनाशनस्था ।
सा मे सदा प्रतिदिनं [2]परिपातु देहं
[3]कालात्मिका भगवती [4]शुभकार्यकर्त्री ॥ ८ ।

---

१. कलिकालजालहः इति–ग० ।
२. प्रतिदिनम् इति–ग० ।
३. कालार्थिका इति–ग० । —काल आत्मा यस्याः सा ।
४. सुत इति–ग० ।

या कान्ता करुणामयी त्रिजगतामानन्दसिद्धिस्थिता
[1]नित्या सा परिपालिका कुलकला नीला[2]मलाकोमला ।
वाणी सिद्धिकरी कृतार्थनिगडे शीघ्रोदया शांकरी
संज्ञाभेदनभेदिका [3]शुभकरी वेदान्तसिद्धान्तदा ॥ ९ ।

वाणी बाला कुलाला कलकलचरणा यामलासंख्यमाला ।
हेलाभालान्तराला कुलकमलचला चञ्चला देहकाला ॥ १० ।

भेदाख्या [4]भेद्यभेदा वरनदनिनदा नादबिन्दुप्रकाशा ।
सा मे शीर्षं ललाटं मुखहृदयकटिं मुख्यपद्मं प्रपायात् ॥ ११ ।

काञ्चीपीठप्रकाशा निजपदविलया योगिनीनेत्रवक्षा ।
[5]नातियोगप्रकाश्या चरुशतघटिता घोरसंहारकारा ॥ १२ ।

ब्रह्मानन्दस्वरूपा विगतिमतिहरा हीरका भाति नेत्रा ।
हारश्रेण्यादिभूषा शशिशतकिरणा पातु मां भेद्यदेहम् ॥ १३ ।

या भेदिनी सकलपापरिपुप्रियाणां
स्वर्गापवर्गविरला बगलामुखी सा ।
मे पातु देहघटितं [6]सकलेप्सितार्थं
भावप्रभावपटला सहदेहसंस्था ॥ १४ ।

कामाश्रिता विविधदोषविनाशलेषा
सौन्दर्यवेशकरणी क्रतुकर्मरक्षा ।
दीक्षा सतां मतिमतां निजयोगदात्री
सा मे सदा सकलदेहमिहाशु[7] भेद्या ॥ १५ ।

---

१. स्थित्या इति–ग० ।
२. कला इति–ग० ।
३. सुवरदा इति–ग० ।
४. भेदभेद्या इति–ग० ।
५. नेति इति–ग० ।
६. सकलेन्द्रियार्थम् इति–ग० ।
७. मिहाश्वमेध्या इति–ग० ।

कान्ता शान्तगुणोदया मम धनं देहस्य नित्याशया
पायात् श्रीकुलदैवतस्य जयदा सा योगसारं परम् ।
साक्षादीश्वरपूजिता समुचिता चित्तार्थिता चार्थिता
यन्मे घोरतरे जये निजकुले कालाकुले व्याकुले ॥ १६ ।

भेदाभेदविवर्जिता सुरवरश्रीहस्तपद्मार्चिते
मे मेढ्रं खलु लिङ्गमूलकमलं कालप्रिया पातु सा ।
सप्तस्वर्गतलं ममैव वपुषा मिथ्यावमानापहा
[1]हेडम्बासुरसुन्दरप्रियवती हेमावती भारती ॥ १७ ।

एतत् स्तोत्रं पठित्वा यः स्तौति मूलाम्बुजे च माम् ।
स एव योगमाप्नोति स भवेद् योगिवल्लभः ॥ १८ ।

मनः स्थिरं भवेत् क्षिप्रं राजत्वं लभते झटित् ।
अनायासेन सिद्धिः स्यात् तस्य वायुर्वशो भवेत् ॥ १९ ।

योगिनीनां दर्शनं हि अनायासेन लभ्यते ।
भावसिन्धुयुतो भूत्वा विचरेदमरो यथा ॥ २० ।

मूलपद्मे वसेद्देवी मूलाम्भोजप्रकाशिनी ।
मालती मालवी मौना मालिनी च मनोहरा ॥ २१ ।

[2]मानसी मदना मान्या मुद्रामैथुनतत्परा ।
मेरुस्था माद्यकुसुमा मण्डिता मण्डलस्थिता ॥ २२ ।

मनःस्थैर्यंकरी देवी भाव्यते यैः कुमारकैः ।
अकस्मात् सिद्धिमाप्नोति कालेन [3]परमेश्वर ॥ २३ ।

---

१. हेतुम्बाम्बुदसुन्दर इति—क० ।

२. मणिमन्त्रिमनक्षेत्रा मारणामारणापहा ।
मलहा मञ्जुला माला मीनस्था मांसमोहिनी ।
मदिराष्टादशभुजा मोध्या मेध्या मनोहरा ॥ इति क० अ० पाठः ।

३. परमाश्रव इति—ग० ।

अथ वक्ष्ये महादेव्याः छेदिन्याः [1]स्तवमुत्तमम् ।
[2]छेत्ता त्वं सर्वग्रन्थीनां मत्प्रसादाद् यतीश्वरः ॥ २४ ।

यत्प्रसादादनन्तो हि योगी संसारमण्डले ॥ २५ ।

देशानन्दा सकलगुणदा छेदिनी छेदनस्था
हव्यस्था सा विभवनिरता या निधिस्था निशायाम् ।
सा मे नित्यं कुलकमलगा गोपनीया विधिज्ञा
[3]श्रीवागेशी गगनवसना सर्वयोगं प्रपायात् ॥ २६ ।

कामानन्दा मदननिरता[4] भाविता भावसिन्धौ
[5]कामानन्दोद्भवरसवती योगियोगस्थधात्री[6]।
सा मे धौतं प्रकुरु वपुषो
धर्मपुञ्जं प्रपायात् ॥ २७ ।

कालाकालं कमलकलिकावासिनी कालिका मे
ग्रन्थिच्छेदं स्थिरगृहगता गात्रनाडीपथस्था ।
वक्त्राम्भोजे वचनमधुरं धारयन्ती जनानां
सा मे रन्ध्रं मम रुचिरतनोः पातु पञ्चानना या ॥ २८ ।

योगाङ्गस्था स्थितिलयविभवा लोमकूपाम्बुजस्था
माता गौरी गिरिपतिसुता भासुरास्त्रप्रदीप्ता ।
सम्पायान्मे हृदयविवरं छेदिनीमूलपूरे
कैलासस्था ममनुगिरिं पातु रुद्रप्रसादा[7] ॥ २९ ।

नादान्तःस्था [8]मनगुणधरणासन्नसिद्धान्तपारा
भोगानन्दा भगनगबिले काशयन्ती जनानाम् ।
विद्याविद्या विविधगगना छेदिनी छन्नरूपा
सा सर्वान्तःकरणनिलया लाकिनी प्रेमभावा ॥ ३० ।

---

१. सुरसत्तम इति–ग० ।
२. छित्ता इति–ग० ।
३. श्रीपालेशी इति–ग० ।
४. निवृत्ता इति–ग० ।
५. वसनरता इति–ग० ।
६. धात्रि इति–ग० ।
७. फेरुप्रणादा इति–ग० ।
८. धरा सत्त्व इति–क० ।

योगं स्वर्गेऽर्पयसि मनसि प्रेमभावं परेशे
या या यात्रा त्रिविधकरणा कारणा सर्वजन्तोः ।
माता ज्ञात्री गणेशे गृहिगणसदया सर्वकर्त्री मनो मे
रक्षा रक्षाक्षरगतकला[1] केवला निष्कला या ।। ३१ ।

सा योगेन्द्रा समवतु मुदा मे गुदं कुण्डलिन्यां
[2]जह्नोः कन्या [3]कमलनिलया राकिणी प्रेमभावान् ।
मोक्षप्राणान् तपनरहिता पातु मे वेदवक्त्रा
सिद्धा मूलाम्बुजदलगता पावनी पातु तुण्डम् ।। ३२ ।

हेरम्बाज्ञा प्रलयघटिता काकिनी क्रोधरूपा ।। ३३ ।

यदि भजति कुलीनः[4] कामिनीं क्रोधविद्यां
स भवति परयोगी छेदिनीस्तोत्रपाठात् ।
सकलदुरितनाशः क्षालनादिप्रसिद्धिः
सकलजनवशः स्यात् तस्य नित्यं सुराज्यम् ।। ३४ ।

एतत् स्तोत्रं पठेद्विद्वान् महासंयमतत्परः ।
मूले मनः स्थिरो याति [5]सर्वानिष्टविनाशनः ।। ३५ ।

सर्वसिद्धिः करे तस्य यो भावं समुपाश्रयेत् ।
शृणुष्व परमानन्द रससागरसम्भव ।। ३६ ।

योगिनीस्तोत्रसारं च श्रवणाद्धारणाद् यतिः ।
अप्रकाश्यमिदं [6]रत्नं नृणामिष्टफलप्रदम् ।। ३७ ।

यस्य विज्ञानमात्रेण शिवो भवति साधकः ।। ३८ ।

---

१. गणा इति–ग० । २. मूलेऽर्पय पयसि मे खेलनेकौ सुवायौ इति–क० ।

३. कमला इति–ग० । ४. भक्तः इति–ग० ।

५. सर्वावृत इति–क० । —सर्वाणि यानि अनिष्टानि, तेषां विनाशनः, विनाशक इत्यर्थः । बाहुलकात् कर्तरि ल्युट् ।

६. वर्णम् इति–क० ।

कङ्काली कुलपण्डिता कुलकला कालानला श्यामला
योगेन्द्रेन्द्रसुराज्यनाथयजिताऽन्या[1] योगिनी मोक्षदा ।
मामेकं कुजडं सुखास्तमधनं हीनं च दीनं खलं
यद्येवं परिपालनं करोषि नियतं त्वं त्राहि तामाश्रये ।। ३९ ।

यज्ञेशी शशिशेखरा स्वमपरा हेरम्बयोगास्पदा
दात्री दानपरा हराहरिहराऽघोरामराशंकरा ।
भद्रे [2]बुद्धिविहीन देहजडितं पूजाजपावर्जितं
[3]मामेकाभमकिञ्चनं यदि सरत्त्वं योगिनी रक्षसि ।। ४० ।

भाव्या भावनतत्परस्य करणा सा चारणा योगिनी[4]
चन्द्रस्था निजनाथदेहसुगता मन्दारमालावृता[5] ।
योगेशी कुलयोगिनी त्वममरा धाराधराच्छादिनी
[6]योगेन्द्रोत्सवरागयागजडिता या [7]मातृसिद्धिस्थिता ।। ४१ ।

त्वं [8]मां पाहि परेश्वरी सुरतरी [9]श्रीभास्करी योगगं
[10]मायापाशविबन्धनं तव कथालापामृतावर्जितम् ।
नानाधर्मविवर्जितं कलिकुले संव्याकुलालक्षणं
[11]मय्येके यदि दृष्टिपातकमला[12]तत् केवलं[13]मे बलम् ।। ४२ ।

मायामयी हृदि यदा मम चित्तलग्नं[14]
राज्यं तदा किमु फलं फलसाधनं वा ।
इत्याशया भगवती[15] मम शक्तिदेवी
भाति प्रिये श्रुतिदले मुखरार्पणं ते ।। ४३ ।

---

१. सा योगिनी इति–क० । २. विहन्य इति–ग० ।
३. मासैकार्थक किञ्चनम् इति–ग० । ४. भोगिनी इति–क० ।
५. च्युता इति–ग० । ६. योगेन्द्राणामुत्सवस्तस्य राग एव यागः, तेन जडिता इत्यर्थः ।
७. मोहसिद्धिस्थिता इति–ग० । ८. हं सं इति–ग० ।
९. वाराही सा भास्करी इति–ग० । १०. योगं पाशविबन्धनम् इति–ग० ।
११. यद्योके इति–ग० । १२. कमला इति–ग० । १३. सेवनम् इति–ग० ।
१४. मग्नम् इति–ग० । १५. बलवती इति–ग० ।

या योगिनी सकलयोगसुमन्त्रणाढ्या
देवी [1]महद्गुणमयी करुणानिधाना ।
सा मे भयं हरतु वारणमत्तचित्ता
संहारिणी भवतु सोदरवक्षहारा[2] ॥ ४४ ।

यदि पठति मनोज्ञो गोरसामीश्वरं यो[3]
वशयति रिपुवर्गं क्रोधपुञ्जं विहन्ति ।
भुवनपवनभक्षो भावुकः स्यात् सुसङ्गी
रतिपतिगुणतुल्यो रामचन्द्रो यथेशः ॥ ४५ ।

एतत्स्तोत्रं पठेद्यस्तु स भक्तो भवति प्रियः ।
मूलपद्मे स्थिरो भूत्वा षट्चक्रे राज्यमाप्नुयात् ॥ ४६ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे सिद्धिमन्त्रप्रकरणे भैरवभैरवीसंवादे भेदिन्याविस्तोत्रं नाम [4]एकत्रिंशः पटलः ॥

---

१. रुण्या सहद्गुणमयी (?) इति–ग० । २. रत्न इति–ग० ।

३. मनोगो गोरसानी सुरङ्गो इति–ग० ।

४. त्रयस्त्रिंशत्–क० ।

अथ द्वात्रिंशः पटलः

आनन्दभैरवी उवाच—

अथ कान्त प्रवक्ष्यामि शृणुष्व मम तत्त्वतः ।
शक्तिः कुण्डलिनी देवी सर्वभेदनभेदिनी ॥ १ ।

कलिकल्मषहन्त्री च जगतां मोक्षदायिनी ।
तस्याः स्तोत्रं तथा ध्यानं न्यासं मन्त्रं शृणु प्रभो ॥ २ ।

यस्य विज्ञानमात्रेण मूलपद्मे मनोलयः ।
चैतन्यानन्दनिरतो भवेत् कुण्डलिसंगमात् ॥ ३ ।

आकाशगामिनीं सिद्धिं ददाति कुण्डली[1] भृशम् ।
अमृतानन्दरूपाभ्यां करोषि पालनं नृणाम् ॥ ४ ।

श्वासोच्छ्वासकलाभ्यां च शरीरं त्रिगुणात्मकम् ।
पञ्चभूतावृता नित्यं [2]पञ्चानिला भवेद् ध्रुवम् ॥ ५ ।

[3]कोटिसूर्यप्रतीकाशां निरालम्बां विभावयेत् ।
सर्वस्थितां ज्ञानरूपां श्वासोच्छ्वासनिवासिनीम् ॥ ६ ।

स्वयम्भूकुसुमोत्पन्नां ध्यानज्ञानप्रकाशिनीम् ।
मोक्षदां शक्तिदां नित्यां नित्यज्ञानस्वरूपिणीम् ॥ ७ ।

लोलां लीलाधरां सर्वां शुद्धज्ञानप्रकाशिनीम् ।
कोटिकालानलसमां विद्युत्कोटिमहौजसाम् ॥ ८ ।

---

१. कुण्डलिन्यहम् इति–ग० । २. नानाशक्तिर्भवेद् ध्रुवम् इति–ग० ।

३. पाल्यतेऽखिललोकानां संसारस्थितये मया ।
कुण्डल्या धारणं तत्र ब्रह्मणो निकटे घटे ॥
कुण्डल्या धारणं कृत्वा भोगी जितेन्द्रियो भवेत् ।
परिपालनशक्तिः स्यान्नाशक्तिर्भवेद् ध्रुवम् ॥
इति–क० पु० अधि० पाठः ।

तेजसा व्याप्तकिरणां मूलादूर्ध्वप्रकाशिनीम् ।
अष्टलोकप्रकाशाढ्यां फुल्लेन्दीवरलोचनाम् ॥ ९ ।

सर्वमुखीं सर्वहस्तां सर्वपादाम्बुजस्थिताम् ।
मूलादिब्रह्मरन्ध्रान्तस्थानलोकप्रकाशिनीम् ॥ १० ।

त्रिभाषां सर्वभक्षां च श्वासनिर्गमपालिनीम् ।
ललितां सुन्दरीं [1]नीलां कुण्डलीं कुण्डलाकृतिम् ॥ ११ ।

[2]अभूमण्डलबाह्यस्थां बाह्यज्ञानप्रकाशिनीम् ।
नागिनीं नागभूषाढ्यां भयानककलेवराम् ॥ १२ ।

योगिज्ञेयां शुद्धरूपां विरलामूर्ध्वगामिनीम् ।
एवं ध्यात्वा मूलपद्मे कुण्डलीं परदेवताम् ॥ १३ ।

भावसिद्धिर्भवेत् क्षिप्रं कुण्डलीभावनादिह ।
ततो मानसजापं हि मानसं होमतर्पणम् ॥ १४ ।

अभिषेकं मुदा कृत्वा प्रातःकाले पुनः पुनः ।
प्राणायामं ततः कृत्वा स्तोत्रं च कवचं पठेत् ॥ १५ ।

एतत्स्तोत्रस्य पाठेन स्वयं सिद्धान्तविद्भवेत् ।
कुण्डली सुकृपा तस्य मासाद्भवति निश्चितम् ॥ १६ ।

निद्रादोषादिकं[3] त्यक्त्वा प्रकाश्याहं शरीरके ।
अहं दात्री सुयोगानामधिपाहं जगत्त्रये ॥ १७ ।

अहं कर्म अहं धर्मः अहं देवी च कुण्डली ।
यो जानाति महावीर कुण्डलीरूपसेवनात् ॥ १८ ।

इति तं पात्रकं कर्तुमवतीर्णास्मि[4] सर्वदा ।
अत एव परं मन्त्रं कुण्डलिन्याः स्तवं शुभम् ॥ १९ ।

---

१. नित्याम् इति–ग० ।

२. अण्डस्यानन्द बाह्यस्थाम् इति–क० । —न भूमण्डलबाह्यस्थामिति नञ्-समासः ।

३. दशा इति–ग० ।

४. इहीदं पालनं कर्तुमवतीर्णा हि सर्वदा इति–ग० ।

प्रपठेत् सर्वदा देहे यदि वश्या न कुण्डली ।
तावत् कालं जपं कुर्याद् यावत् सिद्धिर्न जायते ।। २० ।

आधारे परदेवता भवनताधोकुण्डली देवता ।
देवानामधिदेवता त्रिजगतामानन्दपुञ्जस्थिता ।। २१ ।

मूलाधारनिवासिनी त्रिरमणी या ज्ञानिनी मालिनी ।
सा मे मातृमनुस्थिता कुलपथानन्दैकबीजानना ।। २२ ।

सर्वाङ्गस्थितिकारिणी सुरगणानन्दैकचिह्ना शिवा ।
वीरेन्द्रा नवकामिनी वचनदा [1]श्रीमानदा ज्ञानदा ।। २३ ।

सानन्दा घननन्दिनी घनगणा छिन्ना भवा योगिनी ।
धीरा धैर्यंवती समाप्तविषया श्रीमङ्गली कुण्डली ।। २४ ।

सर्वाकारनिवासिनी जयधराधाराधरस्थागया ।
गीता गोधनवर्द्धिनी गुरुमयी ज्ञानप्रिया गोधना ।। २५ ।

[2]गार्हाग्निस्थितिचन्द्रिका [3]सुलतिका जाड्यापहा रागदा ।
दारा गोधनकारिणी मृगमना ब्रह्माण्डमार्गोज्ज्वला ।। २६ ।

माता मानसगोचरा हरिचरा सिंहासनकारणा ।
[4]यामा दासगणेश्वरी गुणवती [5]छायापथस्थायिनी ।। २७ ।

निद्रा क्षुब्धजनप्रिया वरतृषा भाषाविशेषस्थिता ।
स्थित्यन्तप्रलयापहा [6]नरशिरोमालाधरा कुण्डली ।। २८ ।

[7]गांगेशी यमुनेश्वरी गुरुतरी गोदावरी भास्करी ।
भक्तार्तिक्षयकारिणी [8]समशिवं यद्येकभावान्विता ।। २९ ।

१. स सवंदा इति–ग० । २. गौद्र्दग्घि इति–ग० ।
३. मुलतिका इति–ग० । ४. खाशा इति–ग० ।
५. गाथा गणस्थायिनी इति–ग० ।
६. रण इति–ग० । —नराणां शिरांसि तेषां माला तस्या धरा, धरतीति धरा-पचाद्यच् ।
७. गंगेशी इति–क० । ८. मम इति–ग० ।

त्वं शीघ्रं कुरुकौलिके [1]मम शिरोरन्ध्रं तदब्जं मुदा ।
तत्पत्रस्थितदैवतं कुलवती मातृस्थलं पाहिकम् ॥ ३० ॥

भालोद्‌र्ध्वे धवला[2] कलारसकला कालाग्निजालोज्ज्वला ।
फेरुप्राणनिकेतने गुरुतरा गुर्वी सुगुर्वी सुरा ॥ ३१ ॥

हालोल्लाससमोदया यतिनया[3] माया जगत्तारिणी ।
निद्रामैथुननाशिनो मम हरा[4] मोहापहा पातुकम् ॥ ३२ ॥

भालं नीलतनुस्थिता मतिमतामर्थप्रिया मैथिली[5] ।
भालानन्दकरा महाप्रियजना पद्मानना कोमला ॥ ३३ ॥

नानारङ्गसुपीठदेशवसना[6] सिद्धासना घोषणा ।
[7]त्राणस्थावररूपिणी [8]कलिहनी श्रीकुण्डली पातुकम् ॥ ३४ ॥

भ्रूमध्यं बगलामुखी शशिमुखी विद्यामुखी सम्मुखी ।
नागाख्या नगवाहिनी महिषहा पञ्चाननस्थायिनी ॥ ३५ ॥

पारावारविहारहेतुसफरी सेतुप्रकारा परा ।
काशीवासिनमीश्वरं प्रतिदिनं श्रीकुण्डली पातुकम् ॥ ३६ ॥

या [9]कुण्डोद्भवसारपाननिरता मोहादिदोषापहा ।
सा नेत्रत्रयमम्बिका सुवलिका श्रीकालिका कौलिका ॥ ३७ ॥

काकस्था द्विकचञ्चुपारणकरी संज्ञाकरी सुन्दरी ।
मे पातु प्रियया तया विशदया सच्छायया छादिता ॥ ३८ ॥

श्रीकुण्डे रणचण्डिका सुरतिका कङ्कालिका बालिका ।
साकाशा परिवर्जिता सुगतिका ज्ञानोर्मिका चोत्सुका ॥ ३९ ॥

---

१. समशिवे वीरेन्द्रि तदज्ञम् इति–ग० । २. मात्रोर्ध्वं धवला करालसकला व्याला इति–क० ।
३. दया इति–ग० । ४. महा इति–ग० ।
५. मैथुनी इति–ग० । ६. दशना इति–ग० ।
७. मालस्याव्यय इति–क० । ८. कलहली इति–ग० ।
९. कुण्डे उद्‌भवो यस्य सारस्य सः, तस्य पाने निरता इत्यर्थः ।

सौकासूक्ष्मसुखप्रिया गुणनिका दीक्षा च [1]सूक्ष्माख्यका ।
[2]मामन्द्यं मम कन्दवासिनि शिवे सन्त्राहि सन्त्राहिकम् ॥ ४० ।

एतत्स्तोत्रं पठित्वा त्रिभुवनपवनं पावनं लौकिकानाम् ।
राजा स्यात् किल्बिषाग्निः क्रतुपतिरिह यः क्षेमदं योगिनां वा ॥ ४१ ।

सर्वेशः सर्वकर्त्ता भवति निजगृहे योगयोगाङ्गवक्ता ।
शाक्तः शैवः स एकः परमपुरुषगो निर्मलात्मा महात्मा ॥ ४२ ।

प्रणवेन पुटितं कृत्वा यः स्तौति नियतः शुचिः ।
स भवेत् कुण्डलीपुत्रो भूतले नात्र संशयः ॥ ४३ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने मूलचक्रसारसङ्केते भैरवभैरवीसंवादे कन्दवासिनीस्तोत्रं नाम [3]द्वात्रिंशः पटलः ॥

---

१. शीक्षारव्यक्षका–क० । २. सानन्दम्–ग० ।
३. चतुस्त्रिंशः–क० ।

अथ त्रयस्त्रिंशः पटलः

आनन्दभैरवी उवाच[1]—

अथ वक्ष्ये महादेव कुण्डलीकवचं शुभम् ।
परमानन्ददं सिद्धं सिद्धवृन्दनिषेवितम् ।। १ ।

यत्कृत्त्वा योगिनः सर्वे धर्माधर्मप्रदर्शकाः ।
ज्ञानिनो मानिनो धर्मा विचरन्ति यथामराः ।। २ ।

सिद्धयोऽप्यणिमाद्याश्च करस्थाः सर्वदेवताः ।
एतत् कवचपाठेन देवेन्द्रो योगिराड् भवेत् ।। ३ ।

ऋषयो योगिनः सर्वे जटिलाः कुलभैरवाः ।
प्रातःकाले त्रिबारं च मध्याह्ने बारयुग्मकम् ।। ४ ।

सायाह्ने बारमेकन्तु पठेत् कवचमेव च ।
पठेदेवं महायोगो कुण्डलीदर्शनं भवेत् ।। ५ ।

कुलकुण्डलीकवचस्य ब्रह्मेन्द्रऋषिर्गायत्रो छन्दः ।
कुलकुण्डली देवता सर्वाभीष्टसिद्धचर्थे विनियोगः ।।
ॐ ईश्वरी जगतां धात्री ललिता सुन्दरी परा ।
कुण्डली कुलरूपा च पातु मां कुलचण्डिका ।। ६ ।

शिरो मे ललिता देवी पातूग्राख्या कपोलकम् ।
ब्रह्ममन्त्रेण[2] पुटिता भ्रूमध्यं पातु मे सदा ।। ७ ।

नेत्रत्रयं महाकाली कालाग्निभक्षिका शिखाम् ।
दन्तावलीं विशालाक्षी ओष्ठमिष्टानुवासिनी ।। ८ ।

कामबीजात्मिका विद्या अधरं पातु मे सदा ।
लृयुगस्था गण्डयुग्मं माया विश्वा रसप्रिया ।। ९ ।

---

१. पुस्तके नास्ति—क० ।   २. ब्रह्मरन्ध्रेण—क० ।

भुवनेशी कर्णयुग्मं चिबुकं क्रोधकालिका ।
कपिला मे गलं पातु सर्वबीजस्वरूपिणी ॥ १० ।
मातृकावर्णपुटिता कुण्डली कण्ठमेव च ।
हृदयं कालपृथ्वी[1] च कङ्काली पातु मे मुखम् ॥ ११ ।
भुजयुग्मं चतुर्वर्गा चण्डदोर्दण्डखण्डिनी ।
स्कन्धयुग्मं स्कन्दमाता हालाहलगता मम ॥ १२ ।
अङ्गुल्यग्रं कुलानन्दा श्रीविद्या नखमण्डलम् ।
कालिका भुवनेशानी पृष्ठदेशं सदावतु ॥ १३ ।
पार्श्वयुग्मं महावीरा वीरासनधराभया ।
पातु मां कुलदर्भस्था नाभिमुदरमम्बिका ॥ १४ ।
कटिदेशं पीठसंस्था महामहिषघातिनी ।
लिङ्गस्थानं महामुद्रा भगं मालामनुप्रिया ॥ १५ ।
भगीरथप्रिया धूम्रा मूलाधारं गणेश्वरी ।
चतुर्दलं कक्ष्यपूज्या दलाग्रं मे वसुन्धरा ॥ १६ ।
शीर्षं राधा रणाख्या च ब्रह्माणी[2] पातु मे मुखम् ।
मेदिनी पातु कमला वाग्देवी पूर्वगं[3] दलम् ॥ १७ ।
छेदिनी दक्षिणे पातु पातु चण्डा महातपा ।
चन्द्रघण्टा सदा पातु योगिनी वारुणं दलम् ॥ १८ ।
उत्तरस्थं दलं पातु पृथिवीमिन्द्रपालिता ।
चतुष्कोणं कामविद्या ब्रह्मविद्याब्जकोणकम् ॥ १९ ।
अष्टशूलं सदा पातु सर्ववाहनवाहना ।
चतुर्भुजा सदा पातु डाकिनी कुलचञ्चला ॥ २० ।
मेढ्रस्था मदनाधारा पातु मे चारुपंकजम् ।
स्वयम्भूलिङ्गं चार्वाका कोटराक्षी[4] ममासनम् ॥ २१ ।

---

१. कौल–क० । २. ब्राह्मणं पातु मे सदा–ग० ।
३. सर्वगम्–क० । ४. कोटरे इवाक्षिणी यस्याः सा ।

कदम्बवनमापातु कदम्बवनवासिनी ।
वैष्णवी परमा माया पातु मे वैष्णवं पदम् ॥ २२ ।

षड्दलं[1] राकिणी पातु राकिणी कामवासिनी ।
कामेश्वरी कामरूपा श्रीकृष्णं पीतवाससम् ॥ २३ ।

वनमालां वनदुर्गा शंखं मे [2]शङ्खिनी शिवा ।
चक्रं चक्रेश्वरी पातु कमलाक्षी गदां मम ॥ २४ ।

पद्मं मे पद्मगन्धा च पद्ममाला मनोहरा ।
[3]रादिलान्ताक्षरं पातु लाकिनी लोकपालिनी ॥ २५ ।

[4]षड्दले स्थितदेवांश्च पातु कैलासवासिनी ।
अग्निवर्णा सदा पातु [5]गणं मे परमेश्वरी ॥ २६ ।

मणिपूरं सदा पातु मणिमालाविभूषणा ।
दशपत्रं दशवर्णं डादिफान्तं त्रिविक्रमा ॥ २७ ।

पातु नीला महाकालो भद्रा भीमा सरस्वती ।
अयोध्यावासिनी देवी महापीठनिवासिनी ॥ २८ ।

वाग्भवाद्या महाविद्या कुण्डली कालकुण्डली ।
[6]दशच्छदगतं पातु रुद्रं रुद्रात्मकं मम ॥ २९ ।

सूक्ष्मात् सूक्ष्मतरा पातु सूक्ष्मस्थाननिवासिनी ।
राकिणी लोकजननी पातु कूटाक्षरस्थिता ॥ ३० ।

तैजसं पातु नियतं रजकी राजपूजिता ।
विजया कुलबीजस्था तवर्गं तिमिरापहा ॥ ३१ ।

---

१. षड्वर्गम्–ग० । २. शक्तिक्षणी–ग० ।
३. वादि–क० । ४. षड्वर्गस्थितदेवीश्च–ग० ।
५. जलम्–ग० । ६. शतम्–क० ।

मन्त्रात्मिका मणिग्रन्थि भेदिनी पातु सर्वदा ।
गर्भदाता भृगुसुता पातु मां नाभिवासिनी ॥ ३२ ।

नन्दिनी पातु सकलं कुण्डली कालकम्पिता ।
हृत्पद्मं पातु कालाख्या धूम्रवर्णा मनोहरा ॥ ३३ ।

दलद्वादशवर्णं च भास्करी भावसिद्धिदा ।
पातु मे परमा विद्या कवर्गं कामचारिणी ॥ ३४ ।

चवर्गं चारुवसना व्याघ्रास्या टंकधारिणी ।
चकारं पातु कृष्णाख्या काकिनीं[1] पातु कालिका ॥ ३५ ।

टकुराङ्गी टकारं मे जीवभावा महोदया ।
ईश्वरी पातु विमला मम हृत्पद्मवासिनी ॥ ३६ ।

कर्णिकां कालसन्दर्भा योगिनी योगमातरम् ।
इन्द्राणी वारुणी पातु कुलमाला कुलान्तरम् ॥ ३७ ।

तारिणी शक्तिमाता च कण्ठवाक्यं सदावतु ।
विप्रचित्ता महोग्रोग्रा प्रभा दीप्ता घनासना ॥ ३८ ।

वाक्स्तम्भिनी वज्रदेहा वैदेही वृषवाहिनी ।
उन्मत्तानन्दचित्ता च क्षणोशीशा भगान्तरा ॥ ३९ ।

मम षोडशपत्राणि पातु [2]मातृतनुस्थिता ।
सुरान् रक्षतु वेदज्ञा सर्वभाषा च कर्णिकाम् ॥ ४० ।

ईश्वरार्द्धासनगता प्रपायान्मे सदाशिवम् ।
शाकम्भरी महामाया साकिनी पातु सर्वदा ॥ ४१ ।

भवानी भवमाता च पायाद् भ्रूमध्यपङ्कजम् ।
द्विदलं व्रतकामाख्या अष्टाङ्गसिद्धिदायिनी ॥ ४२ ।

---

१. काकानी–क० । २. मातुलसंस्थिता–ग० ।

पातु नासामखिलानन्दा[1] मनोरूपा जगत्प्रिया ।
लकारं लक्षणाक्रान्ता सर्वलक्षणलक्षणा ।। ४३ ।

क्षुष्णाजिनधरा देवी क्षकारं पातु सर्वदा ।
द्विदलस्थं सर्वदेवं सदा पातु वरानना ।। ४४ ।

बहुरूपा विश्वरूपा हाकिनी पातु संस्थिता ।
हरापरशिवं पातु मानसं पातु पञ्चमी ।। ४५ ।

षट्चक्रस्था सदा पातु षट्चक्रकुलवासिनी ।
अकारादिक्षकारान्ता बिन्दुसर्गसमन्विता ।। ४६ ।

मातृकार्णा सदा पातु कुण्डली ज्ञानकुण्डली ।
देवकाली गतिप्रेमा पूर्णा गिरितटं शिवा ।। ४७ ।

उड्डीयानेश्वरी देवी सकलं पातु सर्वदा ।
कैलासपर्वतं पातु कैलासगिरिवासिनी ।। ४८ ।

पातु मे डाकिनीशक्तिर्लाकिनी राकिणी कला ।
साकिनी हाकिनी देवी षट्चक्रादीन् प्रपातु मे ।। ४९ ।

कैलासाख्यं सदा पातु पञ्चानन[2]तनूद्भवा ।
हिरण्यवर्णा रजनी चन्द्रसूर्याग्निभक्षिणी ।। ५० ।

सहस्रदलपद्मं मे सदा पातु कुलाकुला ।
सहस्रदलपद्मस्था दैवतं पातु खेचरी ।। ५१ ।

काली तारा षोडशाख्या मातंगी पद्मवासिनी ।
शशिकोटिगलद्रूपा पातु मे सकलं तमः ।। ५२ ।

वने[3] घोरे जले देशे युद्धे वादे[4] श्मशानके ।
सर्वत्र गमने ज्ञाने सदा मां पातु शैलजा ।। ५३ ।

---

१. नासा सुनानन्दा–क० । २. मानं मन–ग० ।
३. रणे–क० । ४. युद्धे वा देश शानेके–ग० ।

पर्वते विविधायासे विनाशे पातु कुण्डली ।
पादादिब्रह्मरन्ध्रान्तं सर्वाकाशं सुरेश्वरी ॥ ५४ ।

सदा पातु सर्वविद्या सर्वज्ञानं सदा मम ।
नवलक्षमहाविद्या दशदिक्षु प्रपातु माम् ॥ ५५ ।

इत्येतत् कवचं देवि कुण्डलिन्याः प्रसिद्धिदम् ।
ये पठन्ति ध्यानयोगे योगमार्गव्यवस्थिताः ॥ ५६ ।

ते यान्ति मुक्तिपदवीमैहिके नात्र संशयः ।
मूलपद्मे मनोयोगं कृत्वा हृदासनस्थितः ॥ ५७ ।

मन्त्रं ध्यायेत् कुण्डलिनीं मूलपद्मप्रकाशिनीम् ।
धर्योदयां दयारुढामाकाशस्थानवासिनीम्[1] ॥ ५८ ।

अमृतानन्दरसिकां विकलां सुकलां शिताम् ।
[2]अजितां रक्तरहितां विशक्तां रक्तविग्रहाम् ॥ ५९ ।

रक्तनेत्रां कुलक्षिप्तां ज्ञानाञ्जनजयोज्ज्वलाम् ।
विश्वाकारां मनोरूपां मूले ध्यात्वा प्रपूजयेत् ॥ ६० ।

यो योगी कुरुते एवं स सिद्धो नात्र संशयः ।
रोगी रोगात् प्रमुच्येत बद्धो मुच्येत बन्धनात् ॥ ६१ ।

राज्यं श्रियमवाप्नोति राज्यहीनः पठेद्यदि ।
पुत्रहीनो लभेत् पुत्रं योगहीनो भवेद्वशी ॥ ६२ ।

कवचं धारयेद्यस्तु [3]शिखायां दक्षिणे भुजे ।
वामा वामकरे धृत्वा सर्वाभीष्टमवाप्नुयात् ॥ ६३ ।

---

१. वाहिनीम्—ग० । —आकाशस्थाने वसति तच्छीला ताम् ।

२. असिताम्—ग० । —कृष्णामित्यर्थः ।

३. शिखाकाराम्—ग० ।

स्वर्णे रौप्ये तथा ताम्रे स्थापयित्वा प्रपूजयेत् ।
सर्वदेशे सर्वकाले पठित्वा सिद्धिमाप्नुयात् ।। ६४ ।
स भूयात् कुण्डलोपुत्रो नात्र कार्या विचारणा ।। ६५ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिविद्याप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे कन्दवासिनीकवचं नाम त्रयस्त्रिंशः[1] पटलः ।।

१. पञ्चत्रिंशत्—क० ।

अथ चतुस्त्रिंशः पटलः

[1]आनन्दभैरवी उवाच—

अथ भेदान् प्रवक्ष्यामि हिताय जगतां प्रभो ।
निर्मलात्मा शुचिः श्रीमान् ध्यानात्मा[2] च सदाशिवः ॥ १ ॥

स मोक्षगो ज्ञानरूपी स षट्चक्रार्थभेदकः[3] ।
[4]त्रिगुणज्ञानविकलो न पश्यति दिवानिशम् ॥ २ ॥

दिवारात्र्यज्ञानहेतोर्न पश्यति कलेवरम् ।
इति कृत्वा हि मरणं नृणां जन्मनि जन्मनि ॥ ३ ॥

[5]तज्जन्मक्षयहेतोश्च मम योगं समभ्यसेत् ।
पञ्चस्वरं[6] महायोगं कृत्वा स्यादमरो नरः ॥ ४ ॥

तत्प्रकारं शृणुष्वाथ[7] वल्लभ प्रियदर्शन ।
तव भावेन[8] कथये न कुत्र वद शङ्कर ॥ ५ ॥

यदि लोकस्य निकटे कथ्यते योगसाधनम्[9] ।
विघ्ना घोरा वसन्त्येव गात्रे योगादिकं कथम् ॥ ६ ॥

[10]योगयोगाद्भवेन्मोक्षः तत्प्रकाशाद्विनाशनम् ।
अतो न दर्शयेद् योगं यदीच्छेदात्मनः शुभम् ॥ ७ ॥

---

१. श्रीभैरवी उवाच—क० । २. ध्यानाचार—ग० । ३. विभेदकः—ग० ।
४. त्रिगुणो विकुको देवोऽनुपश्यति दिवानिशम्—ग० ।
५. तज्जन्य—ग० । —तज्जन्मनः क्षयस्य हेतुः, तस्येत्यर्थः ।
६. पञ्चामरा—क० । ७. प्राण—ग० ।
८. तदभावेन कायेन कुत्रापि वद शङ्कर—ग० ।
९. योगधारणम्—ग० ।
१०. योगानां योगस्तस्मादित्यर्थः ।

कृत्वा पञ्चामरा[1] योगं प्रत्यहं भक्तिसंयुतः ।
पठेत् श्रीकुण्डलीदेवीसहस्रनाम चाष्टकम् ॥ ८ ॥

महायोगी भवेन्नाथ षण्मासे नात्र संशयः ।
पञ्चमे वा[2] योगविद्या सर्वविद्याप्रकाशिनी ॥ ९ ॥

कृत्वा पञ्चस्वरा सिद्धिं ततोऽष्टाङ्गादिधारणा ।
आदौ पञ्चस्वरा सिद्धिस्ततोऽन्या योगधारणा ॥ १० ॥

तत्प्रकारं प्रवक्ष्यामि सावधानावधारय ।
अहं जानामि संसारे केवलं योगपण्डितान् ॥ ११ ॥

तत् साक्षिणी ह्यहं नाथ भक्तानामुदयाय च ।
इदानीं कथये तेऽहं मम वा योगसाधनम् ॥ १२ ॥

एवं कृत्वा नित्यरूपी योगानामष्टधा यतः ।
ततः कालेन पुरुषः सिद्धिमाप्नोति निश्चितम् ॥ १३ ॥

पञ्चामरा विधानानि क्रमेण शृणु शंकर ।
नेतीयोगं हि सिद्धानां महाकफविनाशनम् ॥ १४ ॥

[3]दन्तियोगं [4]प्रवक्ष्यामि पश्चाद् हृदयभेदनात् ।
धौतीयोगं ततः पश्चात् सर्वमलविनाशनात्[5] ॥ १५ ॥

नेउलीयोगमपरं सर्वाङ्गोदरचालनात् ।
क्षालनं परमं योगं नाडीनां क्षालनात्[6] स्मृतम् ॥ १६ ॥

एतत् पञ्चामरायोगं [7]यमिनामतिगोचरम् ।
[8]यमनियमकाले तु पञ्चामराक्रियां यजेत् ॥ १७ ॥

---

१. स्वरा—ग० । २. स्वरा—ग० । ३. दन्तीं—क० ।
४. ततः पश्चात् हृदयग्रन्थिभेदनात्—ग० । ५. विनाशनम्—ग० ।
६. क्षालनम्—ग० । ७. स्वरा—ग० ।
८. यमाश्च नियमाश्च यमनियमाः, तेषां काले इति भावः ।

अमरा[1]साधनादेव अमरत्त्वं लभेद् ध्रुवम् ।
एतत्करणकाले च तथा [2]पञ्चामरासनम् ॥ १८ ।

[3]पञ्चामराभक्षणेन अमरो योगसिद्धिभाक् ।
तानि द्रव्याणि वक्ष्यामि तवाग्रे परमेश्वर ॥ १९ ।

येन हीना न सिद्ध्यन्ति कल्पकोटिशतेन च ।
एका तु अमरा दूर्वा तस्या ग्रन्थि समानयेत् ॥ २० ।

अन्या तु विजया देवी सिद्धिरूपा सरस्वती ।
अन्या तु विल्वपत्रस्था शिवसन्तोषकारिणी ॥ २१ ।

अन्या तु योगसिद्ध्यर्थे निर्गुण्डी[4] चामरा मता ।
अन्या तु कालितुलसी श्रीविष्णोः परितोषिणी ॥ २२ ।

एताः पञ्चस्वराः ज्ञेया योगसाधनकर्मणि ।
एतासां द्विगुणं ग्राह्यं विजयापत्रमुत्तमम्[5] ॥ २३ ।

ब्राह्मणी क्षत्रिया वैश्या शूद्राः सर्वत्र पूजिताः ।
एतद्द्रव्याणि संग्राह्य भक्षयेच्चूर्णमुत्तमम् ॥ २४ ।

तच्चूर्णभक्षसमये एतन्मन्त्रादिपञ्चमम् ।
पठित्त्वा भक्षणं कृत्त्वा नरो मुच्येत संकटात् ॥ २५ ।

ॐ त्वं दूर्वेऽमरपूज्ये त्वं अमृतोद्भवसम्भवे ।
अमरं मां सदा भद्रे कुरुष्व नृहरिप्रिये ॥ २६ ।

ॐ दूर्वायै नमः स्वाहा इति दूर्वायाः ।
पुनर्विजयामन्त्रेण शोधयेत् सर्वकन्यकाः ।
ॐ संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदाऽनघे ॥ २७ ।

---

१. स्वरक्रियाश्चरेत्—ग० । २. पञ्चाखर—ग० ।
३. पञ्चमद्या—ग० । ४. नृत्यन्ती—ग० ।
५. विजयाया भङ्गायाः पत्रम् । भङ्गा इति तु "भाँग" इति लोके प्रसिद्धम् ।

भैरवाणां च तृप्त्यर्थे पवित्रा भव सर्वदा ।
ॐ ब्राह्मण्यै नमः स्वाहा ।
ॐ सिद्धिमूलकरे देवि हीनबोधप्रबोधिनि ॥ २८ ।

राजपुत्रीवशंकरि शूलकण्ठत्रिशूलिनि ।
ॐ क्षत्रियायै नमः स्वाहा ।
ॐ अज्ञानेन्धनदीप्ताग्नि ज्ञानाग्निज्ज्वाल[1]रूपिणि ॥ २९ ।

आनन्दाद्याहुतिं कृत्वा[2] सम्यक्ज्ञानं प्रयच्छ मे ।
ह्रीं ह्रीं वैश्यायै नमः स्वाहा ।
ॐ नमस्यामि नमस्यामि योगमार्गप्रदर्शिनि ॥ ३० ।

त्रैलोक्यविजये मातः समाधिफलदा भव ।
श्रीं शूद्रायै नमः स्वाहा ।
ॐ [3]काव्यसिद्धिकरी देवी विल्वपत्रनिवासिनि ॥ ३१ ।

अमरत्वं सदा देहि शिवतुल्यं कुरुष्व माम् ।
ॐ शिवदायै नमः स्वाहा ।
निर्गुण्डि परमानन्दे योगानामधिदेवते ॥ ३२ ।

सा मां रक्षतु अमरे भावसिद्धिप्रदे नमः ।
ॐ शोकापहायै नमः स्वाहा ।
ॐ विष्णोः प्रिये महामाये [4]महाकालनिवारिणी ॥ ३३ ।

तुलसी मां सदा रक्ष मामेकममरं कुरु ।
ॐ ह्रीं श्रीं ऐं क्लीं अमरायै नमः स्वाहा ।
पुनरेव समाकृत्य सर्वासां शोधनञ्चरेत् ॥ ३४ ।

---

१. ज्ञानाग्निज्वल—ग० । २. दत्वा—ग० ।

३. काम—ग० ।

४. कालजालविधारिणी—ग० । —महाकालं निवारयति, तच्छीला ।

ॐ अमृते अमृतोद्भवेऽमृतवर्षिणि अमृतमाकर्षय
आकर्षय सिद्धिं देहि स्वाहा ।
धेनुमुद्रां योनिमुद्रां मत्स्यमुद्रां प्रदर्शयेत् ।
तत्त्वमुद्राक्रमेणैव तर्पणं कारयेद् बुधः ॥ ३५ ।

अमन्त्रकं [1]सप्तबारं गुरोर्नाम्ना शिवेऽर्पयेत् ।
सप्तकञ्च स्वेष्टदेव्या नाम्ना शुद्धिं[2] प्रदापयेत् ॥ ३६ ।

ततस्तर्पणमाकुर्यात्तर्पयामि नमो नमः ।
एतद्वाक्यस्य पूर्वे च इष्टमन्त्रं समुच्चरेत् ॥ ३७ ।

परदेवतां समुद्धृत्य सर्वाद्यप्रणवं स्मृतम् ।
ततो मुखे प्रजुहुयात् कुण्डलीनामपूर्वकम् ॥ ३८ ।

ॐ ऐं वद वद वाग्वादिनि मम जिह्वाग्रे स्थिरीभव
सर्वसत्त्ववशंकरि[3] शत्रुकण्ठत्रिशूलिनि स्वाहा ।
एतज्जप्त्वा [4]साश्रमी च वशी साधकसत्तमः ।
पञ्चामरा[5] शासनज्ञः कुलाचारविधिप्रियः ॥ ३९ ।

स्थिरचेता भवेद्योगी यदि [6]पञ्चामरागतः ।
नेतीयोगविधानानि श्रृणु कैलासपूजिते ॥ ४० ।

येन सर्वमस्तकस्थकफानां दहनं भवेत् ।
सूक्ष्मसूत्रं दृढतरं प्रदद्यात् नासिकाबिले[7] ॥ ४१ ।

मुखरन्ध्रे समानीय सन्धानेन समानयेत् ।
पुनः पुनः सदा योगी [8]यातायातेन घर्षयेत् ॥ ४२ ।

---

१. सप्तबारमिष्ट—ग० । २. सिद्धिम्—ग० । ३. स्वर—ग० ।
४. यशस्वी—ग० । ५: पञ्चस्वरा साधकज्ञः—ग० । ६. पञ्चमद्यागतः—ग० ।
७. नासिकाया बिलं छिद्रम् ।
८. यातं चायातं चानयोः समाहारस्तेनेत्यर्थः ।

क्रमेण वर्द्धनं कुर्यात् सूत्रस्य परमेश्वर ।
नेतीयोगेन नासाया रन्ध्रं निर्मलकं भवेत् ॥ ४३ ।

वायोर्गमनकाले तु महासुखमिति प्रभो ।
दन्तीयोगं ततः पश्चात्कुर्यात् साधकसत्तमः ॥ ४४ ।

दन्तधावनकाले तु योगमेतत् प्रकाशयेत् ।
दन्तधावनकाष्ठञ्च सार्धंहस्तैकसम्भवम् ॥ ४५ ।

नातिस्थूलं नातिसूक्ष्मं नवीनं नम्रमुत्तमम् ।
अपक्वं यत्नतो ग्राह्यं मृणालसदृशं तरुम् ॥ ४६ ।

गृहीत्वा दन्तकाष्ठं वै [१]योगी नित्यं प्रभक्षयेत् ।
दन्तकाष्ठाग्रभागञ्च कनिष्ठाङ्गुलिपर्वतः ॥ ४७ ।

एवं दन्तावलिभ्याञ्च चर्वणं सुन्दरं चरेत् ।
ततः प्रक्षाल्य तोयेन शनैर्गिलनमाचरेत् ॥ ४८ ।

शनैः शनैः प्रकर्त्तव्यं कायावाक्चित्तशोधनम् ।
[२]यावदभिन्नकाष्ठाग्रं नाभिमूले त्वनाक्षतम् ॥ ४९ ।

तावत् सूक्ष्मतरं ग्राह्यमवश्यं प्रत्यहञ्चरेत् ।
हृदये जलचक्रञ्च यावत् खण्डं न जायते ॥ ५० ।

तावत्कालं सर्वदिने प्रभाते [३]दन्तधावनम् ।
हृदये कफभाण्डस्य खण्डनं जायते ध्रुवम् ॥ ५१ ।

पवनागमने सौख्यं प्रयाति योगनिर्भरम् ।
[४]खेचरत्वं स लभताम् अम्लानञ्च कटूद्भवम् ॥ ५२ ।

---

१. तत् क्रमेण तु—ग० ।

२. यावन्नायाति काष्ठाग्रं नाभिमूले त्वनाकुलम्—क० । —न भिन्नं छिन्नं यत् काष्ठं तस्य अग्रमित्यर्थः ।

३. वद् धारणम्—ग० ।

४. खेचरान्नं लवणजं अम्लान्नं कटूद्भवम्—क० ।

मिष्टान्नं शाकदध्यन्नं द्विबारं रात्रिभोजनम् ।
अवश्यं सन्त्यजेद्योगी यदि योगमिहेच्छति ।। ५३ ।

एकभागं मुद्‌गबीजं द्विभागं तण्डुलं मतम् ।
उत्तमं पाकमाकृत्य घृतदुग्धेन भक्षयेत् ।। ५४ ।

अथवा केवलं दुग्धं तर्पणं कारयेद् बुधः ।
कुण्डलीं कुलरूपाञ्च दुग्धेन परितर्पयेत् ।। ५५ ।

कुण्डलीतर्पणं योगी यदि जानाति शङ्कर ।
अनायासेन योगी स्यात् स ज्ञानीन्द्रो भवेद्ध्रुवम् ।। ५६ ।

यमनियमपरो यः कुण्डलीसेवनस्थो
विभवविरहितो वा [1]भूरिभाराश्रितो वा ।
स भवति परयोगी सर्वविद्यार्थवेद्यो
गुणगणगगनस्थो मुक्तरूपी गणेशः ।। ५७ ।

**।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्‌चक्रप्रकाशे
भैरवभैरवीसंवादे [2]पञ्चामरासाधनं नाम
[3]चतुस्त्रिंशः पटलः ।।**

●

---

१. भूति–ग० । —भूरिभारमाश्रित इत्यर्थः । २. पञ्चस्वरायोग–ग० ।
३. षट्त्रिंशः–क० ।

अथ पञ्चत्रिंशः पटलः

आनन्दभैरवी उवाच—

अथ वक्ष्ये महाकाल रहस्यं चातिदुर्लभम् ।
यस्य विज्ञानमात्रेण नरो ब्रह्मपदं लभेत् ॥ १ ।

आकाशे तस्य राज्यञ्च खेचरेशो भवेद् ध्रुवम् ।
धनेशो भवति क्षिप्रं ब्रह्मज्ञानी भवेन्नरः ॥ २ ।

योगानामधिपो राजा वीरभद्रो यथाकविः ।
[1]विरिञ्चिगणनाथस्य कृपा भवति सर्वदा ॥ ३ ।

यः करोति पञ्चयोगं स स्यादमरविग्रहः ।
धौतीयोगं प्रवक्ष्यामि यत्कृत्वा निर्मलो भवेत् ॥ ४ ।

अत्यन्तगुह्यं योगं च समाधिकरणं नृणाम् ।
यदि न कुरुते योगं तदा मरणमाप्नुयात् ॥ ५ ।

धौतीयोगं विना नाथ कः सिद्धयति महीतले ।
सूक्ष्मात्सूक्ष्मतरं वस्त्रं द्वात्रिंशद्धस्तमानतः[2] ॥ ६ ।

एकहस्तक्रमेणैव यः करोति शनैः शनैः ।
यावद् [3]द्वात्रिंशद्धस्तञ्च तावत्कालं क्रियाञ्चरेत् ॥ ७ ।

[4]एतत्क्रियाप्रयोगेण योगी भवति तत्क्षणात् ।
क्रमेण मन्त्रसिद्धिः स्यात् कालजालवशं नयेत् ॥ ८ ।

एतन्मध्ये चासनानि शरीरस्थानि चाचरेत् ।
दृढासने योगसिद्धिरिति [5]तन्त्रार्थनिर्णयः ॥ ९ ।

---

१. गोविन्द–क० । २. कुम्भमानकम्–ग० । ३. घात्रि कुम्भकञ्च–ग० ।

४. एषा चासौ क्रिया च, तस्याः प्रयोगः, तेनेत्यर्थः ।

५. मन्त्रार्थ–ग० ।

सिद्धे मनौ परावाप्तिः पञ्चयोगासनेन च ।
पार्श्वे चाष्टाङ्गुलं वस्त्रं दीर्घे द्वात्रिंशदीश्वर ॥ १० ॥

एतत् सूक्ष्मं सुवसनं गृहीत्त्वा कारयेद् यतिः ।
जितेन्द्रियः सदा कुर्याद् ज्ञानध्याननिषेवणः ॥ ११ ॥

कुलीनः पण्डितो मानी विवेकी सुस्थिराशयः ।
धौतीयोगं सदा कुर्यात्तदैव शुचिगो भवेत् ॥ १२ ॥

अनाचारेण हानिः स्यादिन्द्रियाणां बलेन च ।
महापातकमुख्यानां संगदोषेण हानयः ॥ १३ ॥

सम्भवन्ति महादेव कालयोगं सुकर्म च ।
वृद्धो वा यौवनस्थो वा बालो वा जड एव च ॥ १४ ॥

करणाद्दीर्घजीवी स्यादमरो लोकवल्लभः ।
मन्त्रसिद्धिरष्टसिद्धिः स सिद्धीनामधीश्वरः ॥ १५ ॥

शनैः शनैः सदा कुर्यात् कालदोषविनाशनात् ।
[1]हृदयग्रन्थिभेदेन सर्वावयववर्धनम्[2] ॥ १६ ॥

तदा महाबलो ज्ञानी चारुवर्णो महाशयः ।
धौतीयोगोद्भवं कामं महामरणकारणम् ॥ १७ ॥

तस्य त्यागं यः करोति स नरो देवविक्रमः ।
श्वासं त्यक्त्वा स्तम्भनञ्च मनो दद्यान्महानिले ॥ १८ ॥

श्वासादीनाञ्च गणनमवश्यं भावयेद् गृहे ।
प्राणायामविधानेन सर्वकालं सुखी भवेत् ॥ १९ ॥

वायुपानं सदा कुर्यात् ध्यानं कुर्यात्सदैव हि ।
प्रत्याहारं सदा कुर्यात् मनोनिवेशनं सदा ॥ २० ॥

मानसादिप्रजाप्यञ्च सदा कुर्यान्मनोलयम् ।
धौतीयोगान्तरं हि नेउलीकर्म चाचरेत् ॥ २१ ॥

---

१. हृदयस्य ग्रन्थिस्तस्य भेदेनेत्यर्थः । २. सर्वे च ते अवयवास्तेषां वर्धनम् ।

नेउलीयोगमात्रेण[1] आसने नेउलोपमः ।
नेउलीसाधनादेव चिरजीवी निरामयः ।। २२ ।

अन्तरात्मा सदा मौनी निर्मलात्मा सदा सुखी ।
सर्वदा समयानन्दः कारणानन्दविग्रहः ।। २३ ।

योगाभ्यासं सदा कुर्यात् कुण्डली साधनादिकम् ।
कृत्वा मन्त्री खेचरत्वं प्राप्नोति नात्र संशयः ।। २४ ।

तत्प्रकारं प्रवक्ष्यामि सावधानावधारय ।
भुक्त्वा मुद्गान्नपक्वञ्च बारैकं प्रतिपालयेत् ।। २५ ।

प्रपालयेत्सोदरञ्च [2]करिनासाविवर्जितः ।
पुनः पुनश्चालनञ्च[3] कुर्यात् स्वोदरमध्यकम् ।। २६ ।

कुलालचक्रवत् कुर्यात् भ्रामणञ्चोदरस्य च ।
सर्वाङ्गचालनादेव कुण्डलोचालनं भवेत् ।। २७ ।

चालनात् कुण्डलीदेव्याश्चैतन्या सा भवेत् प्रभो ।
एतस्यानन्तरं नाथ क्षालनं परिकीर्तितम् ।। २८ ।

नाडीनां क्षालनादेव सर्वविद्यानिधिर्भवेत् ।
सर्वत्र जयमाप्नोति कालिकादर्शनं भवेत् ।। २९ ।

वायुसिद्धिर्भवेत्तस्य पञ्चभूतस्य सिद्धिभाक् ।
तस्य कीर्तिस्त्रिभुवने कामदेवबलोपमः ।। ३० ।

सर्वत्रगामी स भवेदिन्द्रियाणां पतिर्भवेत् ।
[4]मुण्डासनं हि सर्वत्र सर्वदा कारयेद्बुधः ।। ३१ ।

ऊर्द्ध्वे [5]मुण्डासनं कृत्वा अधोहस्ते जपं चरेत् ।
यदि त्रिदिनमाकर्तुं समर्थो मुण्डिकासनम् ।। ३२ ।

---

१. कर्मयोगेन इति–ग० । —कर्मणां योगेनेति षष्ठीतत्पुरुषः । अत्र कुमति चेति सूत्रेण नित्यं णत्वं भवितुमर्हति । किन्तु युवादेर्नेति वार्तिकेन निषेधः ।

२. कटि इति–ग० ।
३. शीलनञ्च इति–क० ।
४. मुद्रासनम् इति–क० ।
५. पद्मासनम् इति–ग० ।

तदा हि सर्वनाड्यश्च वशीभूता न संशयः ।
नाडीक्षालनयोगेन मोक्षदाता स्वयं भवेत् ।। ३३ ।

नाडीयोगेन सर्वार्थसिद्धिः स्यान्मुण्डिकासनात् ।
मुण्डासनं यः करोति नेऊलि–सिद्धिगो यदि ।। ३४ ।

नेऊलीसाधनगतो नेऊलीसाधनोत्तमः ।
तदा क्षालनयोगेन सिद्धिमाप्नोति साधकः ।। ३५ ।

नेऊलीं यो न जानाति स कथं कर्त्तुमुत्तमः ।
स धीरो मानसचरो मतिमान् [1]स जितेन्द्रियः ।। ३६ ।

यो नेऊली योगसारं कर्त्तुमुत्तमपारगः ।
स चावश्यं क्षालनञ्च कुर्यात् नाड्यादिशोधनात्[2] ।। ३७ ।

नेऊलीयोगमार्गेण नाडीक्षालनपारगः ।
भवत्येव महाकाल राजराजेश्वरो यथा ।। ३८ ।

पृथिवीपालनरतो विग्रहस्ते प्रपालनम् ।
केवलं प्राणवायोश्च [3]धारणात् क्षालनं भवेत् ।। ३९ ।

विना क्षालनयोगेन देहशुद्धिर्न जायते ।
क्षालनं नाडिकादीनां कफपित्तमलादिकम् ।। ४० ।

करोति यत्नतो योगी मुण्डासन–[4]निषेवणात् ।
वायुग्रहणमेवं हि नेऊलीवशकालके ।। ४१ ।

न कुर्यात् केवलं नाथ अन्यकाले सदा चरेत् ।
यावन्नेऊलीं न जानाति तावत् वायुं न संपिवेत् ।। ४२ ।

बहुतरं न संग्राह्यं वायोरागमनादि[5]कम् ।
केवलं श्वासगणनं यावन्नेऊली न सिद्ध्यति ।। ४३ ।

---

१. त्रिदिनमाकर्णय (?) इति–ग० । २. धारणम् इति–ग० ।
३. हार्थे इति–ग० । ४. नादिमासनम् इति–ग० ।
५. आगमनमादिर्यस्य तदिति बहुव्रीहिसमासः ।

[1]पञ्चस्वरा[2] प्रकथिता योगिनो सिद्धिदायिका ।
[3]पञ्चस्वरसाधनादेव पञ्चवायुर्वशो भवेत् ॥ ४४ ।

प्रतापे सूर्यतुल्यः स्यात् शोकदोषापहारकः ।
सर्वयोगस्थिरतरं संप्राप्य योगिराड् भवेत् ॥ ४५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे
भैरवभैरवीसंवादे साधनं नाम
पञ्चत्रिंशः[4] पटलः ॥

१. श्वासोच्छ्वासं प्रगणयेत यावन्नेऊली न सिध्यति इति-क अधिकः पाठः ।
२. पञ्चामरा इति-क० ।
३. पञ्चमे साधनादेव इति-ग० ।
४. सप्तत्रिंशः इति-क० ।

अथ षट्त्रिंशः पटलः

श्रीआनन्दभैरवी उवाच—

अथ कान्त प्रवक्ष्यामि कुण्डलीचेतनादिकम् ।
सहस्रनामसकलं[1] कुण्डलिन्याः प्रियं सुखम् ।। १ ।

अष्टोत्तरं महापुण्यं साक्षात्[2] सिद्धिप्रदायकम् ।
[3]तव प्रेमवशेनैव कथयामि शृणुष्व तत् ।। २ ।

विना यजनयोगेन विना ध्यानेन यत्फलम् ।
तत्फलं लभते सद्यो विद्यायाः सुकृपा भवेत् ।। ३ ।

या विद्या भुवनेशानी त्रैलोक्यपरिपूजिता ।
सा देवी कुण्डली माता त्रैलोक्यं पाति सर्वदा ।। ४ ।

तस्या नाम सहस्राणि अष्टोत्तरशतानि च ।
श्रवणात्पठनान्मन्त्री महाभक्तो भवेदिह ।। ५ ।

ऐहिके स भवेन्नाथ जीवन्मुक्तो महाबली ।। ६ ।

अस्य श्रीमन्महाकुण्डलीसाष्टोत्तरसहस्रनाम-
स्तोत्रस्य ब्रह्मर्षिर्जगतीच्छन्दो भगवती श्रीमन्महा-
कुण्डलीदेवता सर्वयोगसमृद्धिसिद्ध्यर्थे विनियोगः ।।

कुलेश्वरी कुलानन्दा कुलीना कुलकुण्डली ।
श्रीमन्महाकुण्डली च कुलकन्या कुलप्रिया ।। ७ ।

कुलक्षेत्रस्थिता कौली [4]कुलीनार्थप्रकाशिनी ।
कुलाख्या कुलमार्गस्था कुलशास्त्रार्थपातिनी ।। ८ ।

---

१. सकलम् इति–ग० । २. विधानात् सिद्धिक्षयकम् इति–ग० ।
३. तावप्रेम रसेणैव इति-क० । ४. कुलीनार्थं प्रकाशयति, तच्छीला ।

कुलज्ञा कुलयोग्या च कुलपुष्पप्रकाशिनी ।
[1]कुलीना च कुलाध्यक्षा कुलचन्दनलेपिता ॥ ९ ।

कुलरूपा[2] कुलोद्भूता कुलकुण्डलिवासिनी ।
कुलाभिन्ना कुलोत्पन्ना कुलाचारविनोदिनी ॥ १० ।

कुलवृक्षसमूद्भूता कुलमाला कुलप्रभा ।
कुलज्ञा कुलमध्यस्था कुलकङ्कणशोभिता ॥ ११ ।

कुलोत्तरा कौलपूजा कुलालापा कुलक्रिया ।
कुलभेदा कुलप्राणा कुलदेवी कुलस्तुतिः ॥ १२ ।

कौलिका कालिका काल्या कलिभिन्ना[3]कलाकला ।
कलिकल्मषहन्त्री च कलिदोषविनाशिनी ॥ १३ ।

कङ्काली केवलानन्दा कालज्ञा कालधारिणी ।
कौतुकी कौमुदी केका काका काकलयान्तरा ॥ १४ ।

कोमलाङ्गी करालास्या कन्दपूज्या[5] च कोमला ।
कैशोरी काकपुच्छस्था कम्बलासनवासिनी ॥ १५ ।

कैकेयीपूजिता कोला कोलपुत्री कपिध्वजा ।
कमला कमलाक्षी च कम्बलाश्वतरप्रिया ॥ १६ ।

कलिकाभङ्गदोषस्था कालज्ञा कालकुण्डली ।
काव्यदा कविता वाणी कालसन्दर्भभेदिनी[6] ॥ १७ ।

---

१. सुकुलीना इति–ग० ।

२. कुलगर्भासना कुल्ला कुलच्छात्रा कुलात्मजा ।
कुलीना नागललिता कुण्डली कुलपण्डिता ॥
कुलद्रव्यप्रिया कौला कलिकन्या कुलान्तरा ।
कुलकाली कुलामोदा कुलशब्दोत्सवाकुला ॥ इति क० पु० अधि० पाठः ।

३. कावला इति–ग० ।

४. कालाकाललयान्तिका इति–ग० ।

५. कञ्जपूज्या (?) इति–क० ।

६. कालस्य सन्दर्भः, तं भिनत्ति तच्छोला, सुप्यजाताविति णिनिप्रत्ययः कर्तरि ।

कुमारी करुणाकारा कुरुसैन्यविनाशिनी ।
कान्ता कुलगता कामा कामिनो कामनाशिनी ॥ १८ ।

कामोद्भवा कामकन्या[1] केवला कालघातिनी ।
कैलासशिखरारूढा कैलासपतिसेविता ॥ १९ ।

कैलासनाथनमिता केयूरहारमण्डिता ।
कन्दर्पा कठिनानन्दा [2]कुलगा कीचकृत्यहा ॥ २० ।

कमलास्या कठोरा च कीटरूपा कटिस्थिता ।
कन्देश्वरी कन्दरूपा कोलिका कन्दवासिनी ॥ २१ ।

कूटस्था[3] कूटभक्षा च कालकूटविनाशिनी ।
कामाख्या कमला काम्या कामराजतनूद्भवा ॥ २२ ।

कामरूपधरा कम्रा कमनीया [4]कविप्रिया ।
कञ्जानना कञ्जहस्ता कञ्जपत्रायतेक्षणा ॥ २३ ।

काकिनी कामरूपस्था कामरूपप्रकाशिनी ।
कोलाविध्वंसिनी कङ्का कलङ्कार्ककलङ्किनी ॥ २४ ।

महाकुलनदी कर्णा कर्णकाण्डविमोहिनी ।
काण्डस्था काण्डकरुणा कर्मकस्था कुटुम्बिनो ॥ २५ ।

कमलाभा भवा[5] कल्ला करुणा करुणामयी ।
करुणेशी[6] कराकर्त्री कर्तृहस्ता कलोदया[7] ॥ २६ ।

---

१. कुल्या इति–ग० ।   २. कुचगापहा इति–ग० ।

३. कटकस्था कामबीजा कृच्छ्राकृच्छ्रगुणोदया ।
कृच्छ्रानन्दा कृच्छ्रापूज्या कृच्छ्ररक्षिका ॥
कारणाङ्गी कृच्छ्रवर्णा कीलिता कोकिलस्वरा ।
काञ्चीपीठस्थिता काञ्ची कामरूपनिवासिनी ॥ इति क० पु० अ: पाठः ।

४. काल इति–ग० ।   ५. कल्मा इति–ग० ।   ६. करणेशी इति–ग० ।

७. कलोदरा इति–ग० । कल उदरे यस्या इति व्यधिकरणबहुव्रीहिः । पद्मनाभ इतिवत् । कालोदया इति पाठे कलेनोदयो यस्या इति विग्रहः कार्यः ।

कारुण्यसागरोद्भूता कारुण्यसिन्धुवासिनी ।
कार्त्तिकेशी कार्त्तिकस्था कार्त्तिकप्राणपालनी ॥ २७ ।

करुणानिधिपूज्या च करणीया क्रिया कला ।
कल्पस्था कल्पनिलया कल्पातीता च कल्पिता ॥ २८ ।

कुलपा कुलविज्ञाना कर्षिणी कालरात्रिका ।
कैवल्यदा कोकरस्था कलमञ्जीररञ्जिनी ॥ २९ ।

कलयन्ती कालजिह्वा किंकरासनकारिणी ।
कुमुदा कुशलानन्दा कौशल्याकाशवासिनी ॥ ३० ।

कसापहासहन्त्री च कैवल्यगुणसंभवा ।
एकाकिनी अर्करूपा कुवला [1]कर्कटस्थिता ॥ ३१ ।

कर्कोटका कोष्ठरूपा कूटवह्निकरस्थिता ।
कूजन्ती मधुरध्वानं कामयन्ती सुलक्षणम् ॥ ३२ ।

केतकी कुसुमानन्दा केतकी पुण्यमण्डिता ।
कर्पूरपूररुचिरा कर्पूरभक्षणप्रिया ॥ ३३ ।

कपालपात्रहस्ता च कपालचन्द्रधारिणी ।
कामधेनुस्वरूपा च कामधेनुः क्रियान्विता ॥ ३४ ।

कश्यपी काश्यपा कुन्ती केशान्ता केशमोहिनी ।
कालकर्त्री कूपकर्त्री कुलपा कामचारिणी ॥ ३५ ।

[1]कुङ्कुमाभा कज्जलस्था कमिता कोपघातिनी ।
केलिस्था केलिकलिता कोपना [2]कर्पटस्थिता ॥ ३६ ।

कलातीता कालविद्या कालात्मपुरुषोद्भवा ।
[3]कष्टस्था [4]कष्टकुष्ठस्था कुष्ठहा [5]कष्टहा कुशा ॥ ३७ ।

---

१. कज्जत्रामा इति—ग०। २. कर्कट इति—ग० ।

३. कष्टहा इति—ग० । कष्टं जिहीते हापयति इति विजन्तोऽयम् । ४. कष्टिकुष्ठस्था इति—ग० ।

५. कुष्ठहा इति—ग० । कुष्ठ जिहीते इति पूर्ववदेव विजन्तः । कष्टहा इति पाठेऽपि तादृशो विग्रहः कार्यः ।

कलिका स्फुटकर्त्री च काम्बोजा कामला कुला ।
कुशलाख्या [1]काककुष्ठा कर्मस्था [2]कूर्म्ममध्यगा ।। ३८ ।

कुण्डलाकारचक्रस्था कुण्डगोलोद्भवा कफा ।
कपित्थाग्रवसाकाशा कपित्थरोधकारिणी ।। ३९ ।

काहोड़ी काहड़ा काड़ा कङ्कला भाषकारिणी ।
कनका कनकाभा च कनकाद्रिनिवासिनी ।। ४० ।

[3]कार्पासयज्ञसूत्रस्था कूटब्रह्मार्थसाधिनी ।
कलञ्जभक्षिणी क्रूरा क्रोधपुञ्जा कपिस्थिता ।। ४१ ।

कपाली साधनरता कनिष्ठाकाशवासिनी ।
कुञ्जरेशी कुञ्जरस्था कुञ्जरा [4]कुञ्जरागतिः ।। ४२ ।

कुञ्जस्था कुञ्जरमणी कुञ्जमन्दिरवासिनी ।
कुपिता कोपशून्या च कोपाकोपविवर्जिता ।। ४३ ।

कपिञ्जलस्था कापिञ्जा कपिञ्जलतरूद्भवा ।
कुन्तीप्रेमकथाविष्टा[5] कुन्तीमानसपूजिता ।। ४४ ।

कुन्तला कुन्तहस्ता च कुलकुन्तललोहिनी ।
कान्ताङ्घ्रिसेविका[6] कान्तकुशला कोशलावती ।। ४५ ।

[7]केशिहन्त्री ककुत्स्था च ककुत्स्थवनवासिनी ।
[8]कैलासशिखरानन्दा कैलासगिरिपूजिता[9] ।। ४६ ।

---

१. काककम्भा इति–ग० । २. कुम्भ इति–ग० ।

३. कषज्ञा कपंटी कार्पासवासिनी इति क० पु० अ० पत्रः ।

४. कुञ्जरागतिकामिनी इति–ग० । ५. सेकिका इति–ग० ।

६. केलि इति–ग० । ७. स्निग्ध इति–ग० ।

८. कैलासशिखरे आनन्दो यस्या इति विग्रहे बहुव्रीहिः ।

९. कैलासगिरिणा पूजिता इति तृतीयातत्पुरुषः ।

कीलालनिर्मलामारा कीलालमुग्धकारिणी[1] ।
कुतुना कुट्टही कुट्टा [2]कूटना मोदकारिणी ॥ ४७ ॥
क्रौं[3]कारी क्रौङ्करी काशी कुहुशब्दस्था किरातिनी ।
कूजन्ती सर्ववचनं कारयन्ती कृताकृतम् ॥ ४८ ॥
कृपानिधिस्वरूपा च कृपासागरवासिनी ।
केवलानन्दनिरता केवलानन्दकारिणी ॥ ४९ ॥
कृमिला कृमिदोषघ्नी कृपा कपटकुट्टिता ।
कृशाङ्गी क्रमभङ्गस्था किंकरस्था कटस्थिता ॥ ५० ॥
कामरूपा कान्तरता कामरूपस्य सिद्धिदा ।
कामरूपपीठदेवी कामरूपाङ्कुजा कुजा[4] ॥ ५१ ॥
कामरूपा कामविद्या कामरूपादिकालिका ।
कामरूपकला काम्या कामरूपकुलेश्वरी ॥ ५२ ॥
कामरूपजनानन्दा कामरूपकुशाग्रधीः ।
कामरूपकराकाशा कामरूपतरुस्थिता ॥ ५३ ॥
कामात्मजा कामकला कामरूपविहारिणी ।
कामशास्त्रार्थमध्यस्था कामरूपक्रियाकला ॥ ५४ ॥
कामरूपमहाकाली कामरूपयशोमयी ।
कामरूपपरमानन्दा कामरूपादिकामिनी ॥ ५५ ॥
कूलमूला कामरूपपद्ममध्यनिवासिनी ।
कृताञ्जलिप्रिया कृत्या कृत्यादेवीस्थिता कटा ॥ ५६ ॥
कटका काटका [5]कोटिकटिघण्टविनोदिनी ।
[6]कटिस्थूलतरा काष्ठा कात्यायनसुसिद्धिदा[7] ॥ ५७ ॥

---

१. कूट्वा इति–ग० ।
२. कौंकारी कौंकरी काशी केशवस्था इति–ग० ।
३. कूजन्ती इति–ग० ।
४. कजाकुजा इति–ग० ।
५. कौटाकोटिमुण्ड इति–ग० ।
६. स्थलकरा इति–ग० ।
७. कात्यायनप्रोक्ता सुसिद्धिः इति मध्यमपदत्वोपिसमासः । तां ददाति इति आतोऽनुपसर्गे क– इति कप्रत्ययः कर्तरि, स्त्रीत्वविषये टाप् ।

कात्यायनी काचलस्था कामचन्द्रानना [1]कथा ।
काश्मीरदेशनिरता काश्मीरी कृषिकर्मजा[2] ॥ ५८ ।

कृषिकर्मस्थिता कौर्मा कूर्मपृष्ठनिवासिनी ।
कालघण्टा नादरता कलमञ्जीरमोहिनी ॥ ५९ ।

कलयन्ती शत्रुवर्गान् क्रोधयन्ती गुणागुणम् ।
कामयन्ती सर्वकामं काशयन्ती जगत्त्रयम् ॥ ६० ।

कौलकन्या कालकन्या कौलकालकुलेश्वरी ।
कौलमन्दिरसंस्था च कुलधर्मविडम्बिनी ॥ ६१ ।

कुलधर्मरताकारा कुलधर्मविनाशिनी ।
कुलधर्मपण्डिता च कुलधर्मसमृद्धिदा ॥ ६२ ।

कौलभोगमोक्षदा च कौलभोगेन्द्रयोगिनी ।
कौलकर्मा नवकुला श्वेतचम्पकमालिनी[3] ॥ ६३ ।

कुलपुष्पमाल्यकान्ता[4] कुलपुष्पभवोद्भवा ।
कौलकोलाहलकरा कौलकर्मप्रिया परा[5] ॥ ६४ ।

काशीस्थिता काशकन्या काशी चक्षुःप्रिया कुथा ।
काष्ठासनप्रिया काका काकपक्षकपालिका ॥ ६५ ।

कपालरसभोज्या च कपालनवमालिनी ।
कपालस्था च कापाली कपालसिद्धिदायिनी ॥ ६६ ।

कपाला कुलकर्त्री च कपालशिखरस्थिता[6] ।
कथना कृपणश्रीदा[7] कृपी कृपणसेविता[8] ॥ ६७ ।

---

१. तथा इति–ग० । २. ममंजा इति–ग० ।

३. कौलकुद्दालवदना श्वेतचम्पकवासिनी इति–क० ।

४. कान्तकुन्तला कुलभवोद्भवा इति–ग० । ५. क्रिया इति–ग० ।

६. कपालस्था इति–ग० ।—युक्तं न त्रतिभाति ।

७. लिखन इति–ग० । लिखने या श्रीः, तां ददाति इति विग्रहः ।

८. कृपणैः सेविता इति तृतीयातत्पुरुषः ।

कमहन्त्री कर्मगता कर्माकर्मविवर्जिता ।
कर्मसिद्धिरता कामी कर्मज्ञाननिवासिनी ।। ६८ ।

कर्मधर्मसुशीला च कर्मधर्मवशंकरी ।
कनकाब्जसुनिर्माणमहासिंहासनस्थिता ।। ६९ ।

कनकग्रन्थिमाल्याढ्या[1] कनकग्रन्थिभेदिनी ।
कनकोद्भवकन्या च कनकाम्भोजवासिनी ।। ७० ।

कालकूटादिकूटस्था किटिशब्दान्तरस्थिता ।
कङ्कपक्षिनादमुखा[2] कामधेनूद्भवा कला ।। ७१ ।

कङ्कणाभा धरा कर्द्दा कर्द्दमा कर्द्दमस्थिता ।
कर्द्दमस्थजलाच्छन्ना[3] कर्द्दमस्थजनप्रिया ।। ७२ ।

कमठस्था कार्मुकस्था[4] कम्रस्था कंसनाशिनी[5] ।
कंसप्रिया कंसहन्त्री कंसाज्ञानकरालिनी ।। ७३ ।

काञ्चनाभा[6] काञ्चनदा [7]कामदा क्रमदा कदा ।
कान्तभिन्ना कान्तचिन्ता कमलासननिवासिनी ।। ७४ ।

कमलासनसिद्धिस्था कमलासनदेवता ।
कुत्सिता कुत्सितरता[8] कुत्सा शापविवर्जिता[9] ।। ७५ ।

कुपुत्ररक्षिका कुल्ला[10] कुपुत्रमानसापहा ।
कुजरक्षकरी कौजी कुब्जाख्या[11] कुब्जविग्रहा ।। ७६ ।

---

१. मालाढ्या इति–ग० ।
२. पक्ष इति–ग० ।
३. जल इति–ग० ।
४. कामठस्था ।
५. वाशिनी ।
६. कंचिलाभा कंचिनदा इति–ग० ।
७. मदा इति–ग० ।
८. तरा इति–ग० ।
९. शाप इति–ग० ।
१०. कुल्वा इति–ग० ।
११. कुब्जा इति आख्या अभिधानं यस्या इत्यर्थः ।

कुनखी कूपदीक्षुस्था कुकरी कुधनी कुदा ।
कुप्रिया कोकिलानन्दा कोकिला कामदायिनी ॥ ७७ ।

कुकामिनी कुबुद्धिस्था कूर्पवाहन[1] मोहिनी ।
कुलका[2] कुललोकस्था कुशासनसुसिद्धिदा ॥ ७८ ।

कौशिकी देवता कस्या[3] कन्नादनादसुप्रिया ।
कुसौष्ठवा कुमित्रस्था कुमित्रशत्रुघातिनी ॥ ७९ ।

कुज्ञाननिकरा कुस्था कुजिस्था कर्जदायिनी ।
[4]ककर्जा कर्ज्जकरिणी कर्जवद्धविमोहिनी ॥ ८० ।

कर्जशोधनकर्त्री च कालास्त्रधारिणी सदा ।
कुगतिः कालसुगतिः कलिबुद्धिविनाशिनी ॥ ८१ ।

कलिकालफलोत्पन्ना कलिपावनकारिणी ।
कलिपापहरा काली कलिसिद्धिसुसूक्ष्मदा[5] ॥ ८२ ।

कालिदासवाक्यगता कालिदाससुसिद्धिदा ।
कलिशिक्षा कालशिक्षा कन्दशिक्षापरायणा ॥ ८३ ।

कमनीयभावरता कमनीयसुभक्तिदा ।
करकाजनरूपा च कक्षावादकराकरा ॥ ८४ ।

कञ्चुवर्णा काकवर्णा क्रोष्टुरूपा कषामला[6] ।
कोष्ट्रनादरता कीता कातरा कातरप्रिया ॥ ८५ ।

कातरस्था [7]कातराज्ञा कातरानन्दकारिणी[8] ।
काशमर्द्दतरूद्भूता काशमर्द्दविभक्षिणी ॥ ८६ ।

---

१. वासन इति–ग० ।
२. कुश्लोका इति–ग० ।
३. कन्याकनादवद्भा सुप्रिया इति–ग० ।
४. सुकज्जा इति–ग० ।
५. सुमोक्षदा इति–ग० ।
६. कषायणा इति–ग० ।
७. कारतज्ञा इति–ग० ।
८. कातराणामानन्दः, तं करोति तच्छीला, णिनिप्रत्ययः कर्त्तरि बोध्यः । ततः स्त्रीत्वविषये ङीप् ।

कष्टहानिः कष्टदात्री कष्टलोकविरक्तिदा ।
कायागता[1] कायसिद्धिः कायानन्दप्रकाशिनी ॥ ८७ ।

कायगन्धहरा कुम्भा कायकुम्भा[2] कठोरिणी ।
कठोरतरुसंस्था च कठोरलोकनाशिनी ॥ ८८ ।

कुमार्गस्थापिता कुप्रा कार्पासतरुसम्भवा ।
कार्पासवृक्षसूत्रस्था कुवर्गस्था करोत्तरा[3] ॥ ८९ ।

[4]कर्णाटकर्णसम्भूता [5]कार्णाटी कर्णपूजिता ।
कर्णास्त्ररक्षिका कर्णा कर्णहा कर्णकुण्डला ॥ ९० ।

[6]कुन्तलादेशनमिता कुटुम्बा कुम्भकारिका ।
कर्णासरासना[7] कृष्टा[8] कृष्णहस्ताम्बुजार्जिता ॥ ९१ ।

कृष्णाङ्गी कृष्णदेहस्था कुदेशस्था कुमङ्गला ।
क्रूरकर्मस्थिता कोरा किरात[9]कुलकामिनी ॥ ९२ ।

[10]कालवारिप्रिया कामा [11]काव्यवाक्यप्रिया क्रुधा ।
[12]कज्जलता कौमुदी च कुज्योत्स्ना कलनप्रिया ॥ ९३ ।

कलना सर्वभूतानां कपित्थवनवासिनी[13] ।
कटुनिम्बस्थिता काख्या कवर्गाख्या कवर्गिका ॥ ९४ ।

---

१. कायणीता इति—ग० ।
२. कारकुम्भा इति—ग० ।
३. करोत्सवा इति—ग० ।
४. कर्णाटी इति—ग० ।
५. काण्डाटी इति—ग० ।
६. कर्णाट इति—ग० ।
७. कर्णासवसना इति—ग० ।
८. कृष्णा इति—ग० ।
९. कनकामिनी इति—ग० ।
१०. शत्रि इति—ग० ।
११. कारवाक्कपिवाक्प्रिया इति—क० ।
१२. कज्जला वर्ण-कौमुदी कुज्योत्स्नाया कलाप्रिया इति—ग० ।
१३. कपित्थानां वने वसति, तच्छीला, णिनिः कर्तरि ।

किरातच्छेदिनी कार्या कार्याकार्यविवर्जिता ।
कात्यायनादिकल्पस्था कात्यायनसुखोदया ॥ ९५ ।

कुक्षेत्रस्था कुलाविघ्ना करणादिप्रवेशिनी ।
काङ्काली किङ्कला काला[1] किलिता सर्वकामिनी ॥ ९६ ।

कीलितापेक्षिता कूटा कूटकुङ्कुमचर्चिता[2] ।
कुङ्कुमागन्धनिलया [3]कुटुम्बभवनस्थिता ॥ ९७ ।

[4]कुक्रूपा करणानन्दा कवितारसमोहिनी ।
काव्यशास्त्रानन्दरता [5]काव्यपूज्या कवीश्वरी ॥ ९८ ।

[6]कटकादिहस्तिरथहयदुन्दुभिशब्दिनी ।
कितवा क्रूरधूर्तस्था केकाशब्दनिवासिनी ॥ ९९ ।

कें केवलाम्बिता केता केतकीपुष्पमोहिनी ।
कैं कैवल्यगुणोद्वास्या कैवल्यधनदायिनी ॥ १०० ।

करी धनीन्द्रजननी[7] [8]काक्षताक्षकलङ्किनी ।
[9]कुडुवान्ता कान्तिशान्ता कांक्षा पारमहंस्यगा ॥ १०१ ।

कर्त्री चित्ता कान्तवित्ता कृषणा कृषिभोजिनी[10] ।
कुङ्कुमाशक्तहृदया केयूरहारमालिनी[11] ॥ १०२ ।

---

१. कला काला इति–ग० ।
२. चर्चिता इति–ग० ।
३. भरणस्थिता इति–ग० ।
४. कुं कृपा कारणानन्दा इति–ग० ।
५. करीन्वी (?) इति–ग० ।
६. यूयहयदुर्लभ इति–ग० ।
७. षनि इति–क० ।
८. कसराख्या इति–ग० ।
९. कुडुवान्ता कादि इति–ग० ।
१०. कर्षणं कृषिः, तां भुनक्ति पालयति या सा कृषिभोजिनी, ताच्छील्ये णिनिः कर्तरि ।
११. केयूरहारेण मलते शोभते तच्छीला इत्यर्थः ।

कीश्वरी केशवा कुम्भा[1] कैशोरजनपूजिता[2] ।
कलिकामध्यनिरता कोकिलस्वरगामिनी ।। १०३ ।

कुरदेहहरा कुम्बा कुडुम्बा कुरभेदिनी ।
कुण्डलीश्वरसंवादा कुण्डलीश्वरमध्यगा ।। १०४ ।

कालसूक्ष्मा कालयज्ञा[3] [4]कालहारकरी कहा ।
कहलस्था कलहस्था[5] कलहा कलहाङ्करी ।। १०५ ।

[6]कुरङ्गी श्रीकुरङ्गस्था कोरङ्गी कुण्डलापहा ।
कुकलङ्की[7] कृष्णबुद्धिः कृष्णा ध्याननिवासिनी ।। १०६ ।

[8]कुतवा काष्ठवलता कृतार्थकरणी कुसी ।
[9]कलनकस्था कस्वरस्था कलिका दोषभङ्गजा ।। १०७ ।

कुसुमाकारकमला कुसुमस्रग्विभूषणा ।
किञ्जल्का कैतवार्कशा कमनीयजलोदया ।। १०८ ।

ककारकूटसर्वाङ्गी ककाराम्बरमालिनी ।
कालभेदकरा काटा कर्पवासा ककुत्स्थला ।। १०९ ।

कुवासा कबरी कर्वा कूसवी कुरुपालिनी ।
कुरुपृष्ठा कुरुश्रेष्ठा कुरूणां ज्ञाननाशिनी ।। ११० ।

कुतूहलरता कान्ता कुव्याप्ता कष्टबन्धना ।
कषायणतरुस्था[10] च कषायणरसोद्भवा[11] ।। १११ ।

---

१. वान्धस्था इवि–ग० ।
२. गण्डिता इति–ग० ।
३. काश इति–ग० ।
४. कल इति–ग० ।
५. कलहहा कमहा कविकोकिला इति–ग० ।
५. कुरङ्गेशी इति–ग० ।
७. कुल-लक्ष्मीः–ग० ।
८ कुतरा कातरमता इति–ग० ।
९. कलाकस्था कासुरस्था कलिकाभङ्गदोषजा इति–ग० ।
१०. कषायणतरौ तिष्ठति इत्यर्थः ।
११. कषायणरसे उद्भवो यस्या इत्यर्थः ।

[1]कतिविद्या कुष्ठदात्री [2]कुष्ठिशोकविसर्जनी ।
[3]काष्ठासनगता कार्याश्रया का[4]श्रयकौलिका ॥ ११२ ।

[5]कालिका कालिसन्त्रस्ता कौलिकध्यानवासिनी ।
क्लृप्तस्था क्लृप्तजननी [6]क्लृप्तच्छन्ना कलिध्वजा ॥ ११३ ।

केशवा केशवानन्दा केश्यादिदानवापहा ।
केशवाङ्गजकन्या च [7]केशवाङ्गजमोहिनी ॥ ११४ ।

[8]किशोरार्चनयोग्या च किशोरदेवदेवता ।
कान्तश्रीकरणी [9]कुत्या [10]कपटा प्रियघातिनी ॥ ११५ ।

कुकामजनिता कौञ्चा [11]कौञ्चस्था कौञ्चवासिनी ।
[12]कूपस्था कूपबुद्धिस्था कूपमाला मनोरमा ॥ ११६ ।

[13]कूपपुष्पाश्रया कान्तिः क्रमदाक्रमदाक्रमा ।
कुविक्रमा कुक्रमस्था कुण्डलीकुण्डदेवता ॥ ११७ ।

कौण्डिल्यनगरोद्भूता कौण्डिल्यगोत्रपूजिता ।
[14]कपिराजस्थिता कापी [15]कपिबुद्धिबलोदया ॥ ११८ ।

[16]कपिध्यानपरा मुख्या कुव्यवस्था कुसाक्षिदा ।
कुमध्यस्था कुकल्पा च कुलपङ्क्तिप्रकाशिनी ॥ ११९ ।

---

१. कवि–ग० । २. कुष्ठशोकविमर्जिनी–ग० ।
३. काष्ठा–ग० । ४. श्रयाका–ग० ।
५. कलसाकलसमसना–ग० । ६. क्लृप्तच्छिन्ना–ग० ।
७. केशवाङ्ग–ग० । ८. केशवार्च्चन-योग्याच्च केशवाच्च न देवता–ग० ।
९. कुल्या–ग० । १०. रूपाट–ग० ।
११. कोचा कोचस्था कोचवासिनी–ग० । १२. कुपयस्था कुबुद्धिस्था कुचुमाला–ग० ।
१३. कुल–ग० । १४. कापि–ग० ।—कपीनां राजा, कपिराजः, तत्र स्थिता ।
१५. विनोदिनी–ग० ।—कपिबुद्धिबलाभ्यामुदयो यस्याः । अथवा कपिबुद्धिबलयोरुदयो यया सा इत्यर्थः ।
१६. कापिध्यान पारमाख्या–ग० ।

कुलभ्रमरदेहस्था कुलभ्रमरनादिनी ।
कुलासङ्गा [1]कुलाक्षी च कुलमत्ता कुलानिला ॥ १२० ।

कलिचिह्ना कालचिह्ना [2]कण्ठचिह्ना कवीन्द्रजा ।
करीन्द्रा कमलेशश्रीः[3] कोटिकन्दर्पदर्पहा ॥ १२१ ।

कोटितेजोमयी कोट्या कोटीरपद्ममालिनी ।
कोटीरमोहिनी कोटिः कोटिकोटिविधूद्भवा ॥ १२२ ।

कोटिसूर्यसमानास्या कोटिकालानलोपमा ।
कोटीरहारललिता[4] कोटिपर्वतधारिणी ॥ १२३ ।

कुचयुग्मधरा देवी कुचकामप्रकाशिनी ।
कुचानन्दा कुचाच्छन्ना कुचकाठिन्यकारिणी ॥ १२४ ।

कुचयुग्ममोहनस्था कुचमायातुरा कुचा ।
कुचयौवनसम्मोहा कुचमर्दनसौख्यदा ॥ १२५ ।

काचस्था काचदेहा च काचपूरनिवासिनी ।
काचग्रस्था काचवर्णा कीचकप्राणनाशिनी ॥ १२६ ।

कमलालोचनप्रेमा कोमलाक्षी[5] मनुप्रिया ।
कमलाक्षी कमलजा कमलास्या करालजा ॥ १२७ ।

कमलाङ्घ्रिद्वया काम्या कराख्या करमालिनी ।
करपद्मधरा कन्दा कन्दबुद्धिप्रदायिनी ॥ १२८ ।

कमलोद्भवपुत्री च कमला पुत्रकामिनी ।
किरन्ती किरणाच्छन्ना किरणप्राणवासिनी[6] ॥ १२९ ।

---

१. कौलासंगा च कुलमत्ता कुलासिला—ग० ।
२. कण्ठचिह्ना—ग० ।
३. कमलाकश्रीः—क० ।
४. नमिता—ग० ।
५. कामलाक्षी—ग० ।
६. किरणप्राणेषु वसति तच्छीला इति विग्रहः ।

[1]काव्यप्रदा काव्यचित्ता [1]काव्यसारप्रकाशिनी ।
कलाम्बा[2] कल्पजननी कल्पभेदासनस्थिता ॥ १३० ॥

कालेच्छा कालसारस्था कालमारणघातिनी ।
किरणक्रमदीपस्था कर्मस्था क्रमदीपिका ॥ १३१ ॥

काललक्ष्मीः कालचण्डा कुलचण्डेश्वरप्रिया ।
काकिनीशक्तिदेहस्था कितवा किन्तकारिणी ॥ १३२ ॥

करञ्चा कञ्चुका क्रौञ्चा काकचञ्चुपुटस्थिता ।
काकाख्या काकशब्दस्था कालाग्निदहनार्थिका ॥ १३३ ॥

कुचक्षनिलया कुत्रा कुपुत्रा क्रतुरक्षिका ।
कनकप्रतिभाकारा करबन्धाकृतिस्थिता ॥ १३४ ॥

कृतिरूपा कृतिप्राणा कृतिक्रोध[3]निवारिणी ।
[4]कुक्षिरक्षाकरा कुक्षा कुक्षिब्रह्माण्डधारिणी ॥ १३५ ॥

कुक्षिदेवस्थिता कुक्षिः क्रियादक्षा क्रियातुरा ।
क्रियानिष्ठा क्रियानन्दा क्रतुकर्मा क्रियाप्रिया ॥ १३६ ॥

कुशलासवसंशक्ता कुशारिप्राणवल्लभा ।
कुशारिवृक्षमदिरा काशीराजवशोद्यमा[5] ॥ १३७ ॥

काशीराजगृहस्था च [6]कर्णभ्रातृगृहस्थिता ।
कर्णाभरणभूषाढ्या कण्ठभूषा[7] च कण्ठिका ॥ १३८ ॥

कण्ठस्थानगता कण्ठा कण्ठपद्मनिवासिनी ।
कण्ठप्रकाशकरिणी कण्ठमाणिक्यमालिनी[8] ॥ १३९ ॥

---

१. भाव–ग० । २. कल्पा–ग० । ३. चक्र–ग० ।
४. कृति–क० । ५. वशोद्यमा–ग० । ६. कर्तृं–ग० ।
७. भूया–ग० । ८. कण्ठमाणिक्येन मलते मालयति तच्छीला इति विग्रहे णिनिः ।

कण्ठपद्मसिद्धिकरी कण्ठाकाशनिवासिनी ।
कण्ठपद्मसाकिनीस्था कण्ठषोडशपत्रिका ॥ १४० ॥

कृष्णाजिनधरा विद्या कृष्णाजिनसुवाससी ।
कुतकस्था कुखेलस्था [१]कुण्डवालङ्कृताकृता ॥ १४१ ॥

कलगीता कालघजा कलभङ्गपरायणा ।
कालीचन्द्रा कला काव्या [२]कुचस्था कुचलप्रदा ॥ १४२ ॥

कुचौरघातिनी कच्छा [३]कच्छादस्था कजातना ।
कञ्जाछदमुखी[४] कञ्जा कञ्जतुण्डा कजीवली[५] ॥ १४३ ॥

[६]कामराभार्सुरवाद्यस्था [७]कियद्हुंकारनादिनी ।
[८]कणादयज्ञसूत्रस्था [९]कीलालयज्ञसञ्ज्ञका ॥ १४४ ॥

[१०]कटुहासा कपाटस्था कटधूमनिवासिनी ।
कटिनादघोरतरा कुट्टला पाटलिप्रिया ॥ १४५ ॥

[११]कामचाराब्जनेत्रा च कामचोद्गारसंक्रमा ।
काष्ठपर्वतसंदाहा कुष्ठाकुष्ठ[१२]निवारिणी ॥ १४६ ॥

कहोडमन्त्रसिद्धस्था[१३] काहला डिण्डिमप्रिया ।
कुलडिण्डिमवाद्यस्था कामडामरसिद्धिदा[१४] ॥ १४७ ॥

---

१. कु गुण–ग० ।
२. कुचेलस्था कुचेलता–ग० ।
३. कषूदस्था–ग० ।
४. कञ्जावृत–ग० ।
५. कजीवनी–ग० ।
६. कामराजीव–ग० ।
७. प्रिय–ग० ।
८. कणायज्ञ–ग० ।
९. कीलालान्दसञ्ज्ञका इति–ग० ।
१०. कटिहासा–ग० ।
११. कमठा कजनेत्राय कामठद्वार–ग० ।
१२. कष्ट इति–ग० ।
१३. सिद्धिस्था कहनाडी स्त्रियः प्रियाः–ग० ।
१४. कामडामरेषु सिद्धिं ददाति या सा इति विग्रहे कर्तरि कप्रत्ययः ।

[1]कुलामरवध्यस्था कुलकेकानिनादिनी ।
कोजागरढोलनादा कास्यवीररणस्थिता ॥ १४८ ।

कालादिकरणच्छिद्रा करुणानिधिवत्सला ।
क्रतुश्रीदा कृतार्थश्रीः कालतारा कुलोत्तरा ॥ १४९ ।

कथापूज्या कथानन्दा कथना कथनप्रिया ।
कार्थचिन्ता कार्थविद्या काममिथ्यापवादिनी ॥ १५० ।

कदम्बपुष्पसंकाशा कदम्बपुष्पमालिनी ।
कादम्बरी पानतुष्टा कायदम्भा कदोद्यमा ॥ १५१ ।

[2]कुंकुलेपत्रमध्यस्था कुलाधारा धरप्रिया ।
कुलदेवशरीरार्धा कुलधामा कलाधरा ॥ १५२ ।

[3]कामरागा भूषणाढ्या कामिनीरगुणप्रिया ।
कुलीना नागहस्ता च कुलीननागवाहिनी ॥ १५३ ।

कामपूरस्थिता कोपा कपाली [4]बकुलोद्भवा ।
[5]कारागारजनापाल्या कारागारप्रपालिनी ॥ १५४ ।

[6]क्रियाशक्तिः कालपङ्क्तिः कार्णपङ्क्तिः कफोदया ।
कामफुल्लारविन्दस्था कामरूपफलाफला ॥ १५५ ।

कायफला कायफेणा कान्ता नाडीफलीश्वरा ।
कमफेरुगता गौरी [7]कायवाणी कुवीरगा[8] ॥ १५६ ।

---

१. कुलतामरमध्यस्था कुलढक्का–ग० । २. कुज्ञान–ग० । ३. नाग–ग० ।
४. बन्दनोद्भवा–ग० । ५. कोरगा कजलापान–ग० ।
६. क्रियापङ्क्तिः कर्णपङ्क्ति''''कफोदयः–ग० ।
७. कामवाणी–ग० ।
८. कुत्सिता वीराः, तान् गच्छति इति विग्रहे कुवीरगा ।

[1]कबरीमणिबन्धस्था कावेरीतीर्थसंगमा ।
कामभीतिहरा [2]कान्ता [3]कामवाकुभ्रमातुरा ।। १५७ ।

कविभावहरा भामा [4]कमनीयभयापहा ।
कामगर्भदेवमाता कामकल्पलतामरा ।। १५८ ।

कमठप्रियमांसादा कमठा [5]मर्कटप्रिया ।
किमाकारा किमाधारा कुम्भकारमनस्थिता ।। १५९ ।

काम्ययज्ञस्थिता चण्डा काम्ययज्ञोपवीतिका ।
कामयागसिद्धिकरी काममैथुनयामिनो ।। १६० ।

कामाख्या यमलाशस्था[6] कालयामा कुयोगिनी ।
कुरुयागहतायोग्या कुरुमांसविभक्षिणी ।। १६१ ।

कुरुरक्तप्रियाकारी किंकरप्रियकारिणी ।
कर्त्रीश्वरी कारणात्मा कविभक्षा कविप्रिया ।। १६२ ।

कविशत्रुप्रष्ठलग्ना कैलासोपवनस्थिता ।
कलित्रिधा त्रिसिद्धिस्था कलित्रिदिनसिद्धिदा ।। १६३ ।

कलङ्करहिता काली कलिकल्मष[7]कामदा ।
कुलपुष्परङ्ग[8]सूत्रमणिग्रन्थिसुशोभना ।। १६४ ।

कम्बोजवङ्गदेशस्था कुलवासुकिरक्षका ।
कुलशास्त्रक्रिया शान्तिः कुलशान्तिः कुलेश्वरी ।। १६५ ।

कुशलप्रतिभा काशी कुलषट्चक्रभेदिनी ।
कुलषट्पद्ममध्यस्था[9] कुलषट्पद्मदीपनी[10] ।। १६६ ।

---

१. करवी–ग० । २. कान्दा–ग० । ३. कावाच–ग० ।
४. कामनीय–ग० । ५. कामठ–ग० । ६. यमना–ग० ।
७. काबदा–ग० । ८. कावङ्गस्तुक–ग० । ९. कुलषट्पद्मेषु मध्यस्था इत्यर्थः ।
१०. कुलषट्पद्मानि दीपयति तच्छीला इत्यर्थः ।

कृष्णमार्जारकोलस्था कृष्णमार्जारषष्ठिका ।
कुलमार्जारकुपिता कुलमार्जारषोडशी ॥ १६७ ।

कालान्तकवलोत्पन्ना कपिलान्तकघातिनी ।
कलहासा[1] कालहश्री कहलार्था कलामला ॥ १६८ ।

[2]कक्षपपक्षरक्षा च कुक्षेत्रपक्षसंक्षया ।
[3]काक्षरक्षासाक्षिणो च महामोक्षप्रतिष्ठिता ॥ १६९ ।

अर्कंकोटिशतच्छाया आन्वीक्षिकिकरार्चिता ।
कावेरीतीरभूमिस्था [4]आग्नेयार्कास्त्रधारिणी ॥ १७० ।

इं किं श्रीं कामकमला पातु कैलासरक्षिणी ।
मम श्रो ईं बीजरूपा पातु काली शिरस्थलम् ॥ १७१ ।

उरुस्थलाब्जं सकलं तमोल्का पातु [5]कालिका ।
[6]ऊडुम्बन्यर्करमणी उष्ट्रोग्रा कुलमातृका ॥ १७२ ।

कृतापेक्षा कृतिमती[7] कुंकारी किलिपिस्थिता ।
कुंदीर्घस्वरा क्लृक्षा कें कैलासकरार्चिका ॥ १७३ ।

कैशोरी कैं करो कैं कें बीजाख्या नेत्रयुग्मकम् ।
कोमा मतङ्गयजिता कौशल्यादि[8]कुमारिका ॥ १७४ ।
पातु मे कर्णयुग्मन्तु क्रौं क्रौं जीवकरालिनी ।
गण्डयुग्मं सदा पातु कुण्डली [9]अङ्कवासिनी ॥ १७५ ।
[10]अर्ककोटिशताभासा अक्षराक्षरमालिनी[11] ।
आशुतोषकरी हस्ता कुलदेवी निरञ्जना ॥ १७६ ।

---

१. कलहंसा कलहश्रीः कलहार्या—ग० ।
२. कक्षा—ग० ।
३. कोक्षराक्षा—ग० ।
४. स्तोक—ग० ।
५. बालिका—ग० ।
६. ऊडूमूलार्कमणी उद्धार्ग्रा कुलमातृका—ग० ।
७. सति—ग० ।
८. क्षयाविका—ग० ।
९. स्वङ्क—क ।
१०. अर्ककोटिशतेनाभासते इति विग्रहः ।
११. अक्षराक्षरैर्मालयति इति विग्रहः ।

पातु मे कुलपुष्पाढ्या पृष्ठदेशं [1]सुकृत्तमा ।
कुमारी कामनापूर्णा पार्श्वदेशं सदावतु ।। १७७ ।

देवी कामाख्यका देवी पातु प्रत्यङ्गिरा कटिम् ।
कटिस्थदेवता पातु लिङ्गमूलं सदा मम ।। १७८ ।

गुह्यदेशं काकिनी मे लिङ्गाधः कुलसिंहिका ।
कुलनागेश्वरी पातु नितम्बदेशमुत्तमम् ।। १७९ ।

कङ्कालमालिनी देवी मे पातु [2]चारुमूलकम् ।
जंघायुग्मं सदा पातु कीर्तिः चक्रापहारिणी ।। १८० ।

पादयुग्मं पाकसंस्था पाकशासनरक्षिका ।
कुलालचक्रभ्रमरा पातु पादाङ्गुलीर्मम ।। १८१ ।

नखाग्राणि दशविधा तथा हस्तद्वयस्य च ।
विंशरूपा कालनाक्षा सर्वदा परिरक्षतु ।। १८२ ।

कुलच्छत्राधाररूपा कुलमण्डलगोपिता ।
कुलकुण्डलिनी माता कुलपण्डितमण्डिता ।। १८३ ।

काकाननी[3] काकतुण्डी काकायुः प्रखरार्कजा ।
काकज्वरा काकजिह्वा काकाजिह्वा[4]सनस्थिता ।। १८४ ।

कपिध्वजा कपिक्रोशा कपिवाला[5] [6]हिकस्वरा ।
कालकाञ्ची विंशतिस्था सदाविंशनखाग्रहम् ।। १८५ ।

पातु देवी कालरूपा कलिकालफलालया ।
वाते वा पर्वते वापि शून्यागारे चतुष्पथे ।। १८६ ।

कुलेन्द्रसमयाचारा [7]कुलाचारजनप्रिया ।
कुलपर्वतसंस्था च [8]कुलकैलासवासिनी ।। १८७ ।

---

१. मृकत्तमा (?) । २. युग्मकम्–क० । ३. काकानना–क० ।
४. कपिक्रोधा–ग० । ५. वाना–ग । ६. कपि–ग० ।
७. कुलाचारजनाः प्रिया यस्याः सा इत्यर्थः । ८. कुले कैलासे च वसति तच्छीला ।

महादावानले पातु कुमार्गे कुत्सितग्रहे ।
राज्ञोऽप्रिये राजवश्ये महाशत्रुविनाशने ।। १८८ ।

कलिकाकालमहालक्ष्मीः[1] क्रियालक्ष्मीः कुलाम्बरा ।
कलीन्द्रकीलिता कीला कीलालस्वर्गवासिनी ।। १८९ ।

दशदिक्षु सदा पातु इन्द्रादिदशलोकपा ।
नवच्छिन्ने सदा पातु सूर्यादिकनवग्रहा ।। १९० ।

पातु मां कुलमांसाढ्या कुलपद्मनिवासिनी ।
कुलद्रव्यप्रिया मध्या षोडशी भुवनेश्वरी ।। १९१ ।

विद्यावादे विवादे च मत्तकाले महाभये ।
दुर्भिक्षादिभये चैव व्याधिसंकरपीडिते ।। १९२ ।

कालीकुल्ला कपाली च कामाख्या कामचारिणी ।
सदा मां कुलसंसर्गे पातु कौले सुसङ्गता ।। १९३ ।

सर्वत्र सर्वदेशे च कुलरूपा सदावतु ।
इत्येतत् कथितं नाथ मातुः प्रसादहेतुना ।। १९४ ।

अष्टोतरशतं नाम सहस्रं कुण्डलीप्रियम् ।
कुलकुण्डलिनीदेव्याः सर्वमन्त्रसुसिद्धये ।। १९५ ।

सर्वदेवमनूनाञ्च चैतन्याय सुसिद्धये ।
अणिमाद्यष्टसिद्ध्यर्थं साधकानां हिताय च ।। १९६ ।

ब्राह्मणाय प्रदातव्यं कुलद्रव्यपराय[2] च ।
अकुलीनेऽब्राह्मणे च न देयः कुण्डलीस्तवः ।
प्रवृत्ते कुण्डलीचक्रे सर्वे वर्णा द्विजातयः ।। १९७ ।

निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक्-पृथक् ।
कुलीनाय प्रदातव्यं साधकाय विशेषतः ।। १९८ ।

दानादेव हि सिद्धिः स्यान्ममाज्ञाबलहेतुना ।
मम क्रियायां यस्तिष्ठेत्स मे पुत्रो न संशयः । १९९ ।

---

१. कलेः कालः कलिकालस्तत्र लक्ष्मीः ।

२. कुलद्रव्यं कुलरूपं धनम्, तत् परं प्रधानं यस्य तस्मै इत्यर्थः ।

स आयाति[1] मम पदं जीवनमुक्तः [2]स वासवः ।
आसवेन समांसेन कुलवह्नौ महानिशि ॥ २०० ।

नाम प्रत्येकमुच्चार्य[3] जुहुयात् कायसिद्धये ।
पञ्चाचाररतो भूत्वा ऊर्द्ध्वरेता भवेद्यतिः[4] ॥ २०१ ।

संवत्सरान्मम स्थाने आयाति नात्र संशयः ।
ऐहिके कायसिद्धिः स्यात् दैहिके सर्वसिद्धिदः ॥ २०२ ।

वशी भूत्वा त्रिमार्गस्थाः स्वर्गभूतलवासिनः ।
अस्य भृत्याः प्रभवन्ति इन्द्रादिलोकपालकाः ॥ २०३ ।

स एव योगी परमो [5]यस्यार्थेऽयं सुनिश्चलः ।
स एव खेचरो भक्तो नारदादिशुकोपमः ॥ २०४ ।

यो लोकः प्रजपत्येवं[6] स शिवो न च मानुषः ।
स समाधिगतो नित्यो ध्यानस्थो योगिवल्लभः ॥ २०५ ।

चतुर्व्यूहगतो देवः सहसा नात्र संशयः ।
यः प्रधारयते भक्त्या कण्ठे वा मस्तके भुजे ॥ २०६ ।

स भवेत् कालिकापुत्रो विद्यानाथः स्वयंभुवि ।
धनेशः पुत्रवान् योगी यतीशः सर्वगो भवेत् ॥ २०७ ।

वामा वामकरे धृत्वा सर्वसिद्धीश्वरो[7] भवेत् ॥ २०८ ।

यदि पठति मनुष्यो मानुषी वा महत्या
सकलधनजनेशी पुत्रिणी जीववत्सा ।
कुलपतिरिह लोके स्वर्गमोक्षैकहेतुः
स भवति भवनाथो योगिनीवल्लभेशः[8] ॥ २०९ ।

---

१. समामाति–ग० । २. स मानवः–ग० । ३. प्रत्यक्–क० ।
४. यदि–ग० । ५. यस्यार्थेऽहं सुनिश्चला–क० । ६. प्रजिहोत्येवम्–ग० ।
७. सर्वासां सिद्धीनामीश्वरः इति तात्पर्यम् ।
८. योगिनीनां वल्लभः, स चासौ ईशश्चेति विग्रहः ।

पठति य इह नित्यं भक्तिभावेन[1] मर्त्यो
हरणमपि करोति प्राणविप्राणयोगः ।
स्तवनपठनपुण्यं कोटिजन्माघनाशं
[2]कथितुमपि न शक्तोऽहं महामांसभक्षा । २१० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
षट्चक्रप्रकाशे भैरवीभैरवसंवादे महाकुलकुण्डलिनी
अष्टोत्तरसहस्रनामस्तवकवचं नाम
षट्त्रिंशत्तमः पटलः[3] ॥

१. योगः–ग० ।

२. सर्वे चौरादिका विकल्पितणिजन्ता इति पक्षे इदं रूपम् ।

३. अत्रेदं धेयम् । ग० पुस्तके पञ्चत्रिंशत् पटलानन्तरं पर्टात्रिशदिति भ्रान्त्या लिखितम् । एतेन ग० पुस्तके षट्त्रिंशदिति सप्तत्रिंशदिति पटलद्वयस्याभावो लक्ष्यते ।

अथ सप्तत्रिंशः पटलः

आनन्दभैरव उवाच—

श्रुतञ्च परमं ज्ञानं धर्माधर्मविवेचनम् ।
सर्ववेदान्तसारं च सारात्सारं परात्परम् ।। १ ।

कुण्डलीस्तवनं श्रुत्वा पूर्णोऽहं जगदीश्वरि ।
इदानीं श्रोतुमिच्छामि स्वाधिष्ठानं प्रकाशकम् ।। २ ।

यदि मे सुकृपादृष्टिरानन्दघनसञ्चये ।
वद श्रीकुण्डलीयोगं स्वाधिष्ठानविभेदनम् ।। ३ ।

येन क्रमेण भेदं स्यात्तत्प्रकारं विनिर्णय ।

आनन्दभैरवी उवाच—

महाकाल महावीर आनन्दसागरप्रिय[1] ।। ४ ।

योग्योऽसि योगमार्गाणामत[2] एव प्रकथ्यते ।
येन क्रमेण चक्रस्य भेदः स्यादमरो भवेत् ।। ५ ।

अमरो जितचित्तारिः क्रोधजित् प्रबलो बली[3] ।
धर्माधर्मज्ञानवांश्च[4] योगी भवति सज्जनः ।। ६ ।

[5]परकालदर्शी विज्ञः स्यात् क्रतुश्रद्धापरायणः ।
[6]अहंकारविहीनो यः स योगी भवति ध्रुवम् ।। ७ ।

---

१. आश्रय–ग० ।
२. वर्गाणाम्–क० ।
३. पावनो वशी–क० ।
४. ज्ञानरतो–क० ।
५. परं कालं पश्यति तच्छीलः परकालदर्शी ।
६. अहंकारेण विहीन इति तृतीयातत्पुरुषः ।

महावीरसुसङ्गिनी च सङ्गदोषविवर्जितः ।
महात्मापरमं ब्रह्मज्ञानी भवति योगिराट् ॥ ८ ।

विख्यातः सर्वदेशे च किन्तु स्वाश्रयवर्जितः ।
बालको विक्रमी धन्वी धनुर्बाणधरोऽव्ययः ॥ ९ ।

स भवेत् योगमार्गेशो विवेकी [1]पापवर्जितः ।
अविद्याग्रन्थिनिश्चेष्टो विवेकधर्मचातकः ॥ १० ।

चतुरो विषमज्ञानवर्जितो यज्ञकृत् शुचिः ।
स भवेद् योगिनीपुत्रो योगानामधिपो भवेत् ॥ ११ ।

यदि योगस्थितो मन्त्री वायवोशक्तिनिर्भरः ।
स एव योगी षण्मासादिति मे तन्त्रनिर्णयः ॥ १२ ।

यो मे तन्त्राणि जानाति सदर्थज्ञानजानि च ।
स एव चतुरो योगी मम भक्तो न संशयः ॥ १३ ।

यदि वायुपानरतो मन्त्री भवति साधकः ॥ १४ ।

अथ स्वाधिष्ठानं कुलवरगतं षड्दलगतं
प्रभाकारं विष्णोरतिशयपदं कामनिलयम् ।
महायोगेन्द्राणां मनसि [2]निलयं चारुकिरणं
शरच्चन्द्रज्योत्स्नायुतमतिधनं भव्यविषयम् ॥ १५ ।

[3]सदाभावक्षेत्रे सकलसुधियो वेद…
यदामापक्षेमे सकलसुधियो वेदपथगाः ।
[4]विचारं कुर्वन्ति [5]क्षितिगतरताः श्रीप्रभृतयः
महाविष्णोः पीताम्बर [6]नरपते श्यामलतनोः ।
(प्रकाशस्यान्तःपटस्थ नटवरस्यातिनिलयम्)
[7]विटच्छायामध्ये निवसति यथा गोकुलकुले[8] ॥ १६ ।

---

१. पाक–ग० । २. निचयम्–ग० । ३. सदा भावक्षेत्रे–ग० ।
४. ये कुवक्ति–ग० । ५. व्रता–ग० । ६. नवगतः–ग० ।
७. विटपच्छायामध्ये इति युक्तः पाठो मन्तव्यः । ८. गवां कुलं गोकुलम्, पुनश्च तस्य कुलम् ।

हरिध्यानं कुर्यान्निरवधिमहानन्दरसिकः
स एवात्मा साक्षादिह नव[1]वरः षोडशयुवा ।
महासर्पारिस्थं[2] स्थितिकरणगं[3] नागगमनं
मुखं [4]वंशीनादध्वनिगुणधरं भावयति कः ।। १७ ।

स एवात्मा नित्यो यतिरिह [5]दले कोमलकुले[6]
कुलागारे सारे सरसिजयुते षड्दलवरे ।
सुरानन्दश्रीदं दिवि [7]दमनकर्त्तारममदं
सुधाकान्तं कृष्णं परमपुरुषं भावयति कः ।। १८ ।

महाविद्यासिद्धं कुल[8]पतिमनोमान्ययजितं
मुकुन्दं श्रीकृष्णं रसदलगतं स्वागम[9]गतं ।
मुरारिं पापारिं नवयुवतिहृत्पद्मसुगतं
हृषीकेशं विष्णुं विषयकरणं भावयति कः ।। १९ ।

स [10]योगेन्द्रो ज्ञानी जयति सुकृतौ कौतुकवतां
रमेशं श्रीकृष्णं रसविषहरं मानसचरम् ।
सरस्वत्या युक्तं कुलरसमयं मुक्तिजडितं
भजेच्चैतन्यान्तं [11]सुरगुरुवरं मोक्षमयते[12] ।। २० ।

यतीन्द्रः सश्रीकः प्रचयति निजं भाव्यविषयं
पुराणं योगीन्द्रं हरिमखिलपं कामनिलयम् ।
महासूक्ष्मं[13] द्वारं कुलवधुरतं वामकिरणं
विशालाक्षं कृष्णं निजरसकुले कान्तममरम्[14]।। २१ ।

---

१. नयः—ग० । २. सर्पाविस्थम्—ग० । ३. करणगण—ग० ।
४. ....शीलादध्वनि गुणधरं भावयति कः इति—ग० । ५. क्षणे—ग० ।
६. दले—ग० । ७. दवन—ग० । ८. ....रति मनो—ग० ।
९. दल—ग० । १०. योगेभ्यो—क० । ११. तरुकरम् ।
१२. मोक्षमतये—ग० । —मोक्षे या मतिस्तस्यै इत्यर्थः । मोक्षमयते इति पाठे तु मोक्षम् अयते इति पदच्छेदः ।
१३. महासूक्ष्मोदारम्—ग० । १४. कान्तमरतम्—ग० ।

कृपासाक्षीज्ञानं गुणगदितदेहं दाहरहितं
महाशौलं[1] सत्यं कुवलयकरिं हन्ति मरणम् ।
अघावीशं श्रीशं शशिमुखिकराम्भोजयजितं
तमात्मानं कृष्णं निजकुलदले योऽपि [2]भजति ॥ २२ ।

महाशब्दोत्पन्नं प्रकृतिविकृतिं कारणकृतिं
कृपासिन्धुं कृष्णं कुलवधूशतामोदमिलितम् ।
जगन्नाथं स्तौति क्षितिपतिवशायोपकरणं[3]
विराटं ब्रह्माण्डं [4]करणगमहाविष्णुमरणम् ॥ २३ ।

विनोदं [5]व्याकर्तुं त्रिभुवनपतिः श्रीपतिरहो
प्रचण्डे संसारे [6]उदयति सदाभावसदने ।
महामेघश्यामस्त्रिफल[7]करुणासागरकुले
अमूल्ये [8]सञ्चारे विषयरसनासञ्चयविषम् ॥ २४ ।

स कृष्णः श्रीविष्णुः प्रकृतिगदया हन्ति [9]सततं
[10]अतः कृष्णो ध्येयः सुरनरगणैः पञ्चसुमुखैः[11] ।
कुलाम्भोजे षट्के मनरसदले ध्यानफलितः
किराती राकिण्या नयनकमलापानमधुरम् ॥ २५ ।

धराधारं पूर्णं गगननिलयं कालपुरुषं
मनोगम्यं रम्यं नवनयनलावण्यरसिकम् ।
सदा ध्यायेत् कृष्णं कुरुगणरिपुं यः कुलपतिः
निरालम्बः श्यामः प्रकृतियमुनातीरतरुगः[12] ॥ २६ ।

---

१. कैतम्—ग० । २. भवति—ग० ।
३. करणात्-ग० । ४. करणप—ग० ।
५. व्यावर्त्यं—ग० । ६. तदयति—ग० ।
७. पथ—ग० । ८. संसारे—ग० ।
९. मरण—ग० । १०. अथो—ग० ।
११. समुखैः—ग० । —पञ्चसुमुखैरिति पाठे तु पञ्च सुमुखानि येषां तैरिति विग्रहः कार्यः ।
१२. तरुपः—ग० ।

कुलीना गोपीभिः परिमिलितपार्श्वस्थलसुखः
प्रधानः क्षेत्रज्ञः [1]क्षितिपतिकराम्भोजयजितः ।
प्रकाशात्मा नाथः प्रचयकरुणो ध्येय इरया[2]
मनोधर्मं च्छत्रं त्रिविधगुणगानाश्रितकरम् ॥ २७ ।

त्रिकाण्डस्थं[3] खण्डोद्भववनरसं प्राणरसिकं
यदा स्तौति प्रातः समयमफले चारुवरदम् ।
महामोक्षक्षेत्रं कुलवधुयुतं कृष्णपरमं
गुणेशं राधेशं[4] रजनिव्रिधुनितं[5] वेदनिलयम् ॥ २८ ।

क्रियादक्षं सूक्ष्मं समयगुणयो[6]गाङ्कजडितं
त्रिकोणस्थं गङ्गाजलगलितसारं तारकतनुम् ।
[7]महाकालानन्दं गगनघनवर्णं सजलकं
प्रभावारं [8]भावं तरुणनववपुः श्रीधरमलम्[9] ॥ २९ ।

[10]वनोत्फुलाम्भोजा मनविरचना भालकलया
महाशोभारूपं कुलपुरुषगं व्याश्रयति[11] यः ।
स योगी संसारे भवति रसनायोगनिरतः
मनो यो व्याधाय प्रचुरफलदं कृष्णमखिलम् ॥ ३० ।

महाज्ञानोत्साहं गतिगुणवहिः प्राणनिचयं
जगत्तारं ब्रह्म [12]निरवधिमहायोगकिरणम् ।
यदालोकस्तौति प्रतिदिनमिहानन्दघटितं
विकारं सर्वेषां ग्रहणनिलनं भास्करविधोः ॥ ३१ ।

---

१. जनितः—ग० । २. हरयः—ग० ।

३. त्रिकामस्यं स्वर्णोद्भव—ग० । ४. व्याधेशम्—ग० ।

५. ब्रजनिघियुगम्—ग० । —व्रजन्ति गावो यस्मिन् स व्रजः, तस्य निधिः, तत्र युगम्, युगलम् ।

६. योगयाग—ग० । ७. तारम्—ग० । ८. कहाकालेनानन्दो यस्य तम् ।

९. श्रीघरमणम्—ग० । १०. वलोत्फुल्लाम्भोजमल विवचनाभान—ग० ।

११. व्याग्रयतिजे—ग० । १२. घोर—ग० ।

महाराहुग्रासं [1]शतशतमहापुण्यनिकरं
कुलानन्दं विष्णुं शशिशत[2]घटारामकिरणम् ।
मनोगम्यं सूक्ष्मं त्रिगुणजडितं भावयति कः ।। ३२ ।

कृष्णभक्ति मुदा कृष्णं ध्यात्त्वा कृत्त्वा यतिर्भवेत् ।
श्रीकृष्णचरणाम्भोजे तस्य भक्तिर्न संशयः ।। ३३ ।

कृष्णब्रह्म कृष्णब्रह्मा च त्रिध्यानपरायणः ।
स कृष्णस्तं जनं नीत्त्वा ददाति अपि शंकर ।। ३४ ।

विना कृष्णपदाम्भोजं स्वाधिष्ठानं [3]कुतो जयम् ।
कृष्णध्यानान्महापद्मभेदं प्राप्नोति शंकर ।। ३५ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्वाधिष्ठान-श्रीकृष्णराकिणीसाधनं नाम सप्तत्रिंशत्तमः पटलः ।।

●

---

१. शतस्य शतं तत्संख्याकानि महापुण्यानि तेषां निकरम् ।

२. धाम–ग० ।   ३. यजेत्–ग० ।

अथाष्टात्रिंशः पटलः

आनन्दभैरवी उवाच—

श्रृणु नाथ प्रवक्ष्यामि श्रीकृष्णसाधनोत्तमम् ।
येन क्रमेण भक्तिः स्यात्कालजालवशो भवेत् ॥ १ ॥

मम पादाम्बुजे भक्तिर्भवत्येव न संशयः ।
भक्तिमान् यः साधकेन्द्रो महाविष्णुं भजेद्यदि ॥ २ ॥

शिवतुल्यो भवेन्नाथ मम भक्तो महीतले ॥ ३ ॥

श्रीकृष्णं जगदीश्वरं त्रिजगतामानन्दमोक्षात्मकं
सम्पूर्णं त्रिगुणावृतं गुणधरं सत्त्वाधिदैवं परम् ।
लिङ्गाधःस्थितिराज्यपालपुरुषं पञ्चाननस्थायिनं
श्रीविष्णुं शुभदं जनो यदि भजेल्लोकः सशक्ति [1]सुखी ॥ ४ ॥

आदौ कामं त्रिसर्गं कुलवधनियुतं कामबीजं त्रिसर्गं
श्रीकृष्णं वारयुग्मं प्रणययुगलकं चन्द्रिकाकाशयुक्तम् ।
ब्रह्मद्वन्द्वं भजामि प्रकृतिपुरुषिकां काकिनीं तत्परे च
भूयो भूयो भजामि श्रवणगलयनं वह्निजायाविलग्नम् ॥ ५ ॥

एतन्मन्त्रं जपित्वा प्रणवमिति नमोऽन्तं तथाद्ये मिलित्त्वा
भूयो भूयो [2]नमोऽन्तं त्रिभुवनसहितं क्षोभयेत्तत् क्षणेन ।
राजश्रीस्तस्य शीर्षे निरवधि वसुधा मन्दिरे [3]संस्थिरा स्यात्
कालच्छेदं प्रकृत्य प्रवसति सुमुखी ब्रह्मदण्डे च काले ॥ ६ ॥

ततः प्राणे दैवनाथ मम सन्तोषवर्द्धनं[4] ।
इदानीं नरसिंहस्य मन्त्रं श्रृणु महाप्रभो ॥ ७ ॥

---

१. सुधीः—ग० । २. मनस्थ—ग० ।

३. संशिवा-ग० । —सम्यक् शिवं कल्याणं यस्याः सा इति बहुव्रीहिः ।

४. सन्तोषं वर्धयति इति, ण्यन्ताद् वृधुधातोः बाहुलकात् कर्तरि ल्युट्प्रत्ययः ।

कान्तबीजं समुद्धृत्य युगलं युगलं स्मृतम् ।
महानृसिंहमन्त्रे पूजयामि नमो नमः ॥ ८ ॥

स्वाधिष्ठाने महापद्मे मनोनिष्पापहेतुना ।
मनो विधाय यो योगी जपेन्मन्त्रं पुनः पुनः ॥ ९ ॥

एतन्मन्त्रजपेनापि सिद्धो भवति साधकः ।
एतन्मन्त्रप्रभावेण भावसिद्धिं क्षणाल्लभेत् ॥ १० ॥

साधको यदि भूमिस्थः साधयेत्तु हरेर्मनुम् ।
[1]रेणुसंख्या क्रमेणैव सिद्धिं प्राप्नोति [2]वीर्यतः ॥ ११ ॥

अथ वक्ष्ये महादेव सर्ववर्णसुसारकम् ।
वर्णमालास्वसंशक्तो जप्त्वा सिद्धिमवाप्नुयात् ॥ १२ ॥

सिद्धिमन्त्रं प्रार्थयते यदि मर्त्यो निराश्रयः ।
निर्जने [3]संस्थिरो भूत्वा एकाकी [4]दीपवर्जितः ॥ १३ ॥

निःशङ्कं प्रजपेन्मन्त्रं स्वाधिष्ठानाब्ज[5]सङ्गते ।
वशीकृतं जगत्सर्वं येन तत्क्रममाशृणु ॥ १४ ॥

प्रणवं पूर्वमुच्चार्य नान्तबीजं तथोद्गरेत् ।
वह्निबीजसमालग्नमधोदन्तस्वरान्वितम् ॥ १५ ॥

[6]नादबिन्दुसमायुक्तं पुनर्वारद्वयं वदेत् ।
[7]नरसिंहाय शब्दान्ते पुनर्वारत्रयं वदेत् ॥ १६ ॥

देवीबीजं शक्तिबीजं स्वाहान्तं मनुमुद्गरेत् ।
एतन्मन्त्रप्रयोगेण कुण्डलीवशमानयेत् ॥ १७ ॥

स्वाधिष्ठाने स्थिरीभावं प्राप्नोति साधकाग्रणीः ।
सर्वेषां प्राणगो भूत्वा प्रबलोऽसौ महीतले ॥ १८ ॥

---

१. एवमेब—ग० । २. धैर्यतः—ग० । ३. सुस्थिरो—ग० ।
४. दिग इति—ग० । ५. सद्भशात्—ग० ।
६. नादश्च बिन्दुश्च नादबिन्दू, ताभ्यां समायुक्तम् । द्वन्द्वगर्भस्तृतीयातत्पुरुषः ।
७. नरसिंह—ग० ।

शीतं रौद्रं समं तस्य पापापापं जयाजयम् ।
धर्माधर्मः सदाज्ञानं नित्यज्ञानं समाप्नुयात् ॥ १९ ।

पुनः श्रीकृष्णमन्त्राश्च सर्वदेवनिषेवकाः ।
यज्ज्ञात्वा देवताः सर्वा सर्वदिङ्मुखपालकाः ॥ २० ।

तत्प्रयोगं महादेव शृणु सिद्धेश्च लक्षणम् ।
विना कृष्णाश्रयेणापि ब्रह्मा तुष्टो न कुत्रचित् ॥ २१ ।

न तुष्टा कुण्डली देवी पशुभावं विना प्रभो ।
पशुभावे ज्ञानसिद्धिर्वीरभावे हि मोक्षभाक् ॥ २२ ।

दिव्यभावे समाधिस्थो जीवन्मुक्तः स उच्यते ।
कान्तबीजं समुद्धृत्य शक्रवामस्वरान्वितम् ॥ २३ ।

नादबिन्दुसमाक्रान्तं कृष्णसम्बोधनं पदम् ।
पुनः पूर्वमनुं युक्ता त्र्यक्षरात्मा महामनुः ॥ २४ ।

एतन्मन्त्रजपं कृत्वा योगी भवति योगिराट् ।
योगोऽयं परमाह्लादकारकोऽनन्तरूपकः ॥ २५ ।

बहुभिः किं कथनीयं यः करोति फलं लभेत् ।
ध्यायेत् श्रीगोपिकानाथं राकिणीमण्डलेश्वरम् ॥ २६ ।

जगतां सत्त्वनिलयं श्रीकृष्णं गोकुलेश्वरम् ।
स्वाधिष्ठानस्थितं श्यामं यजेद्भुजचतुष्टयम् ॥ २७ ।

शङ्खचक्रगदापद्म–महाशोभामनोरमम् ।
सर्वविद्यागतं काम्यं श्रीगोविन्दं सुशीतलम् ॥ २८ ।

महामोहहरं नाथं वनमालाविभूषितम् ।
कोटिकन्याकराम्भोजजयितं[1] सर्वसङ्गतम् ॥ २९ ।

किरीटिनं महावीरं बालेन्दुं चूडयान्वितम् ।
गुञ्जामाला शोभिताङ्गं श्रीनाथं परमेश्वरम् ॥ ३० ।

---

१. जितं सर्वज्ञ–ग० ।—कोटिसंख्याकाः कन्याः, तासां करा हस्ता अम्भोजमिव, तेन जयितम् । जयः सञ्जातो यस्य तत् । इतच्प्रत्ययः ।

पीताम्बरं मन्दहास्यं षट्पद्मदलमध्यगम् ।
कामिनीप्राणनिलयं वसुदेवसुतं हरिम् ।। ३१ ।

एवं ध्यात्त्वा षड्दले च सदा वक्षःस्थकौस्तुभम् ।
राजराजेश्वरं शौरिं भाव्यं श्रीवत्सलाञ्छनम् ।। ३२ ।

स्वाधिष्ठानगतं ध्यायेन्मुरारिसिद्धिगो नरः ।
एवं ध्यात्त्वा पुरा ब्रह्मा नारायणगुणोदयः ।। ३३ ।

मनःकल्पितद्रव्यैश्च पूजयेत्परमेश्वरम् ।
षड्दले च महापद्मे संध्यायेत् हरिमायजेत् ।। ३४ ।

षोडशोपचारयुक्तैर्मानसक्षेत्रसम्भवैः ।
मनःकल्पितपीठे च स्थापयित्त्वा हरिं गुरुम् ।। ३५ ।

योगेश्वरं कृष्णमीशं राधिकाराकिणीश्वरम् ।
एकान्तचित्ते चारोप्य कृष्णं पीठे प्रपूजयेत् ।। ३६ ।

तत्र दलाष्टकं पद्मं तत्र षट्कोणकर्णिकम् ।
वेदद्वारोपशोभञ्च संनिर्म्माय मनोहरम् ।। ३७ ।

पुनः पुनर्यदा[1] ध्यायेत् षड्दलेषु दलेऽष्टकम् ।
पञ्चोपचारैर्दशकैः श्रीविष्णुं परिपूजयेत् ।। ३८ ।

गन्धादयो नैवेद्यान्ता पूजापञ्चोपचारिका ।
आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् ।। ३९ ।

[2]मधुपर्काचमनस्नानवसनाभरणानि च ।
सुगन्धिसुमनो धूपदीपनैवेद्यवन्दनम् ।। ४० ।

प्रयोजयेदर्चनायामुपचारांस्तु षोडश ।
विष्णोराराधने[3] कुर्यात् सर्वत्र विधिरेष यः ।। ४१ ।

विधिः स्यात् कृष्णविश्वेश समुद्भूतस्य सत्पतेः ।
दशोपचारकथनं श्रूयतां वल्लभ प्रभो ।। ४२ ।

---

१. मुदा—ग० । २. मधुपर्कश्च आचमनं च स्नानं च वसनं च आभरणं चेति इतरेतरयोगद्वन्द्वः ।
३. सर्वाज्ञया—ग० ।

पाद्यमर्घ्यं तथाचामं मधुपर्काचमनं तथा ।
गन्धादयो नैवेद्यान्ता उपचारा दशक्रमात् ।। ४३ ।

विष्णुं सम्पूज्य [1]धीमान् हविष्याशोर्जितेन्द्रियः ।
सर्वदा परमानन्दः कालिकावशसेवकः ।। ४४ ।

सर्वज्ञानधरो वीरो विवेकी सर्वदर्शकः ।
संभावयेत् स्वाधिष्ठाने निरन्तरं महाशुचिः ।। ४५ ।

बालकक्रियया व्याप्तो भावज्ञानी निरामयः ।
स भवेत् कालिकापुत्रो यः कृष्णभावतत्परः ।। ४६ ।

कृष्णं सञ्चिन्तयेन्मूलकमलोद्ध्वें कुलात्मकम् ।
स भवेत्कालिकापुत्रोऽष्टाङ्गसिद्धिगुणान्वितः ।। ४७ ।

मानसैः पूजनं कृत्वा शंखस्थापनमाचरेत् ।
यत्कृत्वा मानसं योगं न कुर्याद्वहिरर्चनम् ।। ४८ ।

मूलमन्त्रदेवतायाः साधने दैवतं यजेत् ।
देवस्य दक्षिणस्थांश्च पूर्वोपास्यसुसंस्थितान् ।। ४९ ।

पूजयेद्गन्ध[2]पुष्पाद्यैस्तुल्यमन्त्रेण मन्त्रवित् ।
ततः श्रीकृष्णपादाब्जं ध्यानं कुर्यान्मनोलयम् ।। ५० ।

एवंक्रमेण तत्पद्मे स्थिरो भवति योगिराट् ।
यः करोति शुद्धभावं महामोहहरं हरिम् ।। ५१ ।

स्थापयित्त्वा च षट्पद्मे महामोक्षमवाप्नुयात् ।
यः प्रधानगुणज्ञश्च स मे शास्त्रार्थमाश्रयेत् ।। ५२ ।

इहकाले शत्रुलोके निवसत्येव योगिराट् ।
पादाम्भोजे मनो दद्यान्मखकिञ्जल्कचित्रिते ।। ५३ ।

जङ्घायुगे [3]चारुरामकदलीकाण्डमण्डिते ।
उरुद्वये मत्तगजकरदण्डसमप्रभे[4] ।। ५४ ।

---

१. शुद्धः स्यात्–ग० । २. गन्धश्च पुष्पं च गन्धपुष्पे, ते आद्ये येषां तैः ।

३. चारुरामं च तत्कदलीकाण्डं च तेन मण्डिते ।

४. मत्तश्चासौ गजश्च मत्तगजस्तस्य करदण्डस्तेन समा प्रभा यस्य तस्मिन्, इति बहुव्रीहिः ।

गङ्गावर्तंगभीरे तु नाभौ शुद्धविलेऽमले ।
उदरे वक्षसि तथा हरौ श्रीवत्सकौस्तुभे ।। ५५ ।

पूर्णचन्द्रायुतपक्षे ललाटे चारुकुण्डले ।
शङ्खचक्रगदाम्भोजे दोर्दण्डपरिमण्डिते[1] ।। ५६ ।

[2]सहस्रादित्यसंकाशे सकिरीटकुलद्वयम् ।
स्थानेष्वेषु यजेन्मन्त्री विशुद्धः शुद्धचेतसा ।। ५७ ।

मनो निवेश्य कृष्णे वै तन्मयो भवति ध्रुवम् ।
यावन्मनोलयं याति कृष्णे स्वात्मनि चिन्मये[3] ।। ५८ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे श्रीकृष्णस्वाधिष्ठानप्रवेशो नाम अष्टात्रिंशत्तमः पटलः ।।

---

१. दोषः बाहोः दण्डस्तेन परिमण्डिते । २. सहस्रमादित्यास्तैः संकाशे सदृशे ।

३. चिदेव चिन्मयं तस्मिन् ।

अथैकोनचत्त्वारिंशः पटलः

आनन्दभैरवी उवाच—

अथ नाथ प्रवक्ष्येऽहं संसारसाधनोत्तमम् ।
येन साधनमात्रेण योगी भवति तत्क्षणात् ॥ १ ।
अनायासेन सिद्धिः स्याद्यद्यन्मनसि वर्त्तते ।
त्रैलोक्यं मोहयेत्क्षिप्रं त्रैलोक्यं वशमानयेत् ॥ २ ।
[1]रामेण सहितं नित्यं जगतां साक्षिणं वरम् ।
जामदग्न्यकराम्भोजसेवितं सर्वसेवितम् ॥ ३ ।
अनन्तसत्त्वनिलयं वासुकी[2]सङ्गमाकुलम् ।
[3]अष्टहस्ताग्रसुश्रीदं नानालङ्कारशोभितम् ॥ ४ ।
स्वाधिष्ठानगतं ध्यात्त्वा शीतलो जायते वशी ।
तत्स्तोत्रं शृणु मे नाथ यत्पाठात् सिद्धिमाप्नुयात् ॥ ५ ।
ब्रह्मादयः सुराधीशा मुनयः क्रतुरक्षकाः ।
एतत् स्तोत्रं पुरा कृत्वा जीवन्मुक्तो महीतले ॥ ६ ।
अतः श्रीकालिकानाथ स्तोत्रं शृणु महत्फलम् ॥ ७ ।
श्रीविष्णोरद्भुतकर्मणो ब्रह्मर्षिस्त्रृष्टुप्छन्दः
श्रीविष्णुः श्रीकृष्णः श्रीनारायणो देवता सर्व-
स्तोत्रसारकवचमन्त्रसिद्ध्यर्थे विनियोगः ॥
श्रीकृष्णं जगतामधीशमनघं[4] ध्यानात्सिद्धिप्रदं
गोविन्दं [5]भवसिन्धुपारकरणं सन्तारणं कारणम् ।
श्रीविष्णुं वनमालिनं नरहरिं नारायणं गोकुलं
योगेन्द्रं नरनाथमादिपुरुषं वृन्दावने भावयेत् ॥ ८ ।

---

१. स्वाधिष्ठानगतं विष्णुं संसारसारप्रदं हरिम् ।
यः स्तौति प्रत्यहं भक्त्या स्वाधिष्ठानाक्षरस्थिरम् ॥
वादिलानावर्णयुतं हिमांशु परिशोभितम् ॥ क० ।

२. संकुलेक्षणम्—ग० ।

३. अष्टहस्तो ग्रहम्—ग० ।

४. अविद्यमाना अघा यस्मिन्, तम् ।

५. भव एव सिन्धुः, तस्य पारकरणम् ।

मोक्षश्रीसहितं कृतान्तविकृतं[1] धर्मार्णवं सुन्दरं
श्रीरामं[2] बलरामभावविमलं नित्याकुलं सत्कुलम् ।
श्रीश्यामं [3]कनकादिहार[4]विलसत्लम्बोदरं श्रीधरं
तं वन्दे हरिमीश्वरं [5]गुणवतीमायाश्रयं स्वाश्रयम् ।। ९ ।

वैकुण्ठेशमशेषदोषरहितं सायुज्यमोक्षात्मकं
नानारत्नविनिर्मिता मम पूजा राजेन्द्रचूडामणिम् ।
शोभामण्डलमण्डितं सुरतरुच्छायाकरं योगिनं
विद्यागोपसुतावृतं[6] गुणमयं वाक्सिद्धये भावयेत् ।। १० ।

स्वाधिष्ठाननिकेतनं परजनं विद्याधनं मायिनं
श्रीनाथं कुलयोगिनं त्रिभुवनोल्लासैकबीजं प्रभुम् ।
संसारोत्सवभावलाभनिरतं[7] सर्वादिदेशं सुखं
वन्देऽहं वरसर्पशत्रुसफले[8] पृष्ठे स्थिरानन्ददम्[9] ।। ११ ।

[10]भावाढ्यं भवभावयोगजडितं जाड्यापहं[11]भास्वरं
नित्यं शुद्धगुणं [12]गभीरधिषणामोदैकहेतुं [13]पतिम् ।
कीर्त्तिक्षेमकरं महाभयहरं[14] कामाधिदैवं शिवं
तत्तत्षड्दलमध्यगेहरुचिरानन्दैकदेशास्पदम् ।। १२ ।

---

१. विकृतिम्–ग० । २. श्रीबालम्–ग० । ३. ककुरादि–ग० ।
४. विगलत्–ग० । ५. गुणवताम्–क० । ६. रतम्–क० ।
७. नाम–क० । ८. सकले–ग० । ९. नन्दनम्–ग० ।
१०. भावान्तम्–ग० । ११. भासुरम्–ग० ।
१२. गभीराया धिषणाया य आमोदः स एवैको हेतुर्यस्य तम् । १३. परम्–ग० ।
१४. भवहरम्–ग० ।

वन्दे श्रीपतिमच्युतं नरहरिं दैत्यारिशिक्ष्याकुलं[1]
गन्धर्वप्रभृतेः सुगायनरतं वंशीधरं भावदम् ।
रत्नानामधिपं गतिस्थमचलं गोवर्धनाधारणं
विश्वामित्रतपोधनादिमुनिभिः संसेवितं [2]तैजसम् ॥ १३ ।

वन्दे गोविन्दपादाम्बुजमजमजितं[3] राजितं भक्तिमार्गे
[4]सत्त्वोत्पन्नं प्रभुत्वं परगणनमितं चारुमञ्जीरहारम् ।
हंसाकारं [5]धवलगरुडानन्दपृष्ठे [6]निमग्नं
वन्धूकारक्तसारान्वितचरणतलं [7]सर्वदाशान्तरालम् ॥ १४ ।

राकिण्याः प्रेमसिद्धं नववयसिगतं [8]गीतवाद्यादिरागं
रागोत्पन्नं [9]सुफलगुणदं गोकुलानन्दचन्द्रम् ।
वाणी-लक्ष्मी-प्रियं तं त्रिभुवनसुजनाह्लादकर्त्तारमाद्यं
वन्दे सिद्धान्तसारं गतिनतिरहितं [10]सारसङ्केतिताख्यम् ॥ १५ ।

कामं कामात्मकं तं विधुगतशिरसं कृष्णसम्बोधनान्तं
बीजं कामं पुनस्तत् [11]पुरुषसुरतरुं भावयित्वा भजेऽहम् ।
श्रीकृष्णं कृष्णकृष्णं निरवधिसुखदं [12]सुप्रकाशं प्रसन्नं
स्वाधिष्ठानाख्यपद्मे [13]मनसि गतो भवे सिद्धिस्थलस्थम् ॥ १६ ।

---

१. मिक्ष्वाकुगम्–ग० । २. तेजसम्–ग० ।
३. मजयमजितम् –ग० । ४. मल्लोत्पन्नम्–ग० । ५. बलधर–ग० ।
६. निलग्नम्–क० । ७. ज्ञानवालम्–ग० । ८. वाणम्–ग० ।
९. सुसकल–ग० । १०. स्तम् इति–ग० ।
११. पुरुषः सुरतरुरिव कल्पवृक्ष इव । उपमितमिति समासः ।
१२. निरवधि यत्सुखं तद् ददाति इति कप्रत्ययान्तः ।
१३. मनसि गतभवेसिद्धि सिद्धस्थलस्थम्–ग० ।

आकाशे चारुपद्मे [१]रसभयवलगं रक्तवर्णं प्रकाण्डं
आत्मारामं नरेन्द्रं सकलरतिकरं कंसहन्तारमादिम् ।
आद्यन्तस्थानहीनं [२]विधिहरगमनं सेन्द्रनीलामलाभं
[३]भावोत्साहं त्रिसर्गस्थितिपरममरं भावये भावसिद्धयै ॥ १७ ।

सर्वेषां ज्ञानदानं रसदलकमले सर्वदा त्वं करोषि
आत्मानन्दं[४] [५]सुधादिप्रियधनगुणिनामेकयोगप्रधानम् ।
मायापूर्णः प्रचयनवरसः प्रीतिदेशः[६] प्रभेकः
[७]श्रीराजाख्यः प्रपूर्णः मयि धनरहिते दृष्टिपातं भवादौ ॥ १८ ।

काली श्री[८]कुण्डलिन्याः परगृहनिरतं[९] [१०]भावकब्रह्मरूपं
मुक्तिच्छत्रं [११]पुरेशं निजधनसुखं भार्यया क्रीडयन्तम् ।
[१२]सभाक्षेत्रं नेत्रं नयमानमयमत्पुरसंस्थाभिषेकम् ॥ १९ ।

ध्यात्वाऽहं प्रणमामि सूक्ष्मकमले[१३]लोकाधिपं व्याधिपं
वैकुण्ठं कृष्णमीडे कुरुभवविभवक्षेमहन्तारमन्तम् ।
शान्तानां ज्ञानगम्यं स्वनयनकमले पालयन्तं त्रिमार्गं
वज्रारिं पूतनारिं [१४]द्वयवकनरकध्वान्तसंहारसूरम् ॥ २० ।

---

१. वममममरुणसम्—क० ।
२. वहगहनम्—ग० ।
३. वर्गं—ग० ।
४. प्रेमानन्दम्—ग० ।
५. गुणघनिनाम्—क० ।
६. प्रातिदेशः प्रभेगः—ग० ।
७. श्रीवधक्षेमहीने मयि धनरहिते दृष्टिपात्रं तवादौ—ग० ।
८. श्रीकण्ठनिल्याः—ग० ।
९. परगृहनिगतम्—ग० ।
१०. तारक—ग० ।
११. पुरवशनिधनम्—ग० ।
१२. सभाक्षेत्रे त्रिनेत्रं वरमणि मयशतपूरसंज्ञात्रियेकम्—क० ।
१३. हरण········न्सारमन्तम् ।
१४. द्वयवकनरकयोः वकासुरनरकासुरयोर्यद् ध्वान्तमज्ञानं तस्य संहारे सूरम् ।

मान्यं लोकेषु सर्वेष्वतिशयमनसं केवलं निर्मलञ्च
ओंकारं कारणाख्यं सुगतिमतिमतां मातृकामन्त्रसिद्धम् ।
सिद्धानामादिसिद्धं सुररिपुममलं कालरूपं रिपूणां
मूलोर्ध्वे षड्दलान्ते मनसि सुविमले पूरयित्वा मुकुन्दम् ॥ २१ ।

नित्यं [1]सम्भावयेऽहं निजतनुसमता सिद्धये पूजयामि
त्वं साक्षादखिलेश्वरः प्रियकरः श्रीलोकहस्तार्चितः ।
क्षोणीशः प्रलयात्मकः प्रतिगुणी ज्ञानी त्वमेको महान् ॥ २२ ।

यद्येवं मम पामरस्य कलुषं श्रीधर्महोनान्दितं
कृत्वा पादतले यदीह नियतं [2]व्यारक्ष रक्षात्मगम् ।
[3]राधाकृष्णपदामलाम्बुजतलं [4]चैतन्यमुक्त्याकुलं
सर्वत्रादिगमागमं त्रिगमनं निर्वाणमोक्षाश्रयम् ॥ २३ ।

बालं वैरिविनाशनं सुखमयं कैवल्यमोक्षास्पदं
दैवं देवगणार्चितं रसदले चारोपयामि प्रभो ।
निर्द्दिष्टं भुवनाश्रयं [5]यतिपतिं निर्वाणमोक्षस्थितं
निर्वाणादिकमोदने प्रचपलं श्रीचञ्चलासंकुलम् ॥ २४ ।

वन्देऽहं परमेश्वरं सकलदैत्यानां बलप्राणहं
हंसारूढनिरक्षणं क्षणगतं वाणीपतिं भूपतिम् ।
वाञ्छाकल्पलतापतिं कुलपतिं विद्यापतिं गोपतिम् ॥ २५ ।

---

१. रम्भावयेऽहं निजतनुसमसिद्धये–ग० ।
२. व्यावक्ष रक्षात्मक–ग० ।
२. पदासन–ग० ।
३. सूक्त्या–ग० ।
५. यदुपति–ग० ।

[1]श्रीविद्यापतिमादिदेवपुरुषं[2] विश्वेश्वरप्रेमगं[3]
[4]श्रीकुम्भोद्भवकालसत्त्वनिकरं [5]त्वां भास्करं भावये ।
सिद्धानाम[6]भिचिह्नयोगनिरतं रक्ष त्वमादौ हि माम् ॥ २६ ।

प्रभो निःसंकेतं गुणमणिमतं श्रेयसि मतं
[7]मतामन्तः सुस्थं विगलितमहाप्रेमसुरसम् ।
मुदा वन्दे[8] कृष्णं हरकरतलाम्भोजयजितम् ॥ २७ ।

प्रभापुञ्जं [9]रामाश्रयपदमदं कामकुशलं
महामन्त्रच्छायां रजनिमिलितं ध्वान्तजडितम् ।
त्रिकोणस्थं कुस्थं कुगतिसुगतिं कारणगतिं
[10]प्रलीनं संस्थानं जगति जगतां धर्ममुदयम् ॥ २८ ।

रमेशं वाणीशं विधिगतपदं शम्भुनिगतं
त्रिकालं योगानां नयनकमलं शब्दनिरतम् ।
कुलानन्दं गोपीजनहृदयगं[11] गोपियजितं
विधानं त्वामिन्द्रं [12]गुरुतरमुपेन्द्रं हरिरिपुम् ॥ २९ ।

मुदा त्वां वन्देऽहं [13]चपलं तां मे नवहवे
[14]कुलालापश्रद्धामयमखिलसिद्धिप्रदमनम् ।
[15]मलातीतं नीतं सुरनरसतां[16] शास्त्रभवनम् ॥ ३० ।

---

१. श्रीविद्या सम्प्रदायसिद्धा एव फलदा भवति तस्याः पतिम् ।
२. वपुषम्–ग० । ३. विश्वेश्वरस्य प्रेमाणं गच्छति । गमेर्डः ।
४. गङ्गोद्भव–ग० । ५. तम्–ग० । ६. मति–ग० ।
७, मतास्तस्थम्–ग० । ८. मुदानन्दे–ग० । ९. सारा इति–ग० ।
१०. प्राणिनां संस्थम्–ग० । ११. हृदयरागं गोपभाजेतम्–ग० । १२. सुरेन्द्रं सुररिपुम्–ग० ।
१३. त्वमपि चपलम्–ग० ।
१४. कुलाना–ग० । —कुलालस्यापश्रद्धा तन्मयम्, अथवा कुलस्यालापे या श्रद्धा, तन्मयम् ।
१५. मनातीतम्–ग० । १६. सुराश्च नराश्च सन्तश्चेति इतरेतरयोगद्वन्द्वः ।

विनोदं नारीणां हृदयरसिकं शोकरहितम् ।
विराजं यज्ञानां [1]हितमतिगुणं यामि शरणम् ।। ३१ ।

एतत्सम्बन्धमात्री[2] [3]मम कुलशिरसि स्थायिनं[4] पातु नित्यं
गोपीनां प्राणनाथः प्रतिदिनमनिशं भालदेशं प्रपायात् ।
भालाधोदेशसंस्थं समवतु सहसा राजराजेश्वरेशः
गोपान्वन्वो सुरेशः स्थित्यन्तशास्त्रनेत्रं[5]
सुखमखिलमयः [6]कण्ठच्छत्राभिसंस्थम् ।। ३२ ।

प्रष्ठस्थं पातु शौरिः प्रतिदिनममरो लिङ्गवाह्यं कटिस्थं
शम्भुप्रेमाभिलाषी मम तु कुलपदं गुह्यदेशं प्रपायात् ।
आनन्दोद्रेककारी सकलतनुगतं पातु नित्यं मुरारिः[7]
[8]दैत्यारिश्चोरुमूलं नरहरिवताजङ्घया पादपद्मम् ।। ३३ ।

एतत्स्तोत्रं पठेद्विद्वान् नियतो भक्तिमान् शुचिः ।
स्थिरो भवति मासेन षड्दले सर्वसिद्धिभाक् ।। ३४ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे श्रीकृष्णस्तवनकवचं नामैकोनचत्वारिंशत्तमः पटलः ।।

१. सति–ग० । २. मानी–ग० । ३. मय–ग० ।
४. स्यायिनपते (?)–ग० । ५. स्थित्यन्ते शस्त्रिनेत्रम्–ग० । —अत्र पाठस्त्रुटितः ।
६. भवः कण्ठकृत्वाभिसंस्यम्–ग० ।
७. सुरारिः–क० । —मुरारिरिति पाठे मुरस्य मुरनामकस्य दैत्यस्यारिरित्यर्थः ।
८. दैत्यानामरिः श्रीकृष्णः परमात्मा इत्यर्थः ।

अथ चत्वारिंशः पटलः

आनन्दभैरवी उवाच—

अथ नाथ प्रवक्ष्यामि शृणुष्वावहितो मम ।
येन क्रमेण लोकानां योगकार्यं दृढं भवेत् ॥ १ ।

सर्वत्र भावग्रस्तः सः सिद्धो भवति भैरव ।
यो भवेद्भैरवो देवो भुवने सर्वगो हि सः ॥ २ ।

क्रियादक्षो महावीरो वीरवल्लभभावकः ।
भावयित्वा वर्णमालां मध्ये जप्त्वा दिवानिशम् ॥ ३ ।

हविष्याशी प्राणवायुरतो वेदान्तपारगः ।
सिद्धान्तवेत्ता सर्वेषां शास्त्राणां निर्णयप्रियः ॥ ४ ।

गाथाज्ञानी परानन्दो विवेकी [1]भावतत्परः ।
भाववेत्ता रहस्यार्थज्ञानी कोविदवेदवित् ॥ ५ ।

वाक्यसिद्धिज्ञानपरः सत्यवादी दृढासनः ।
भावयेत् षड्गतं वर्णं ध्यानं कुर्यात् पृथक् पृथक् ॥ ६ ।

षट्पद्मस्थो भावयेद्वै षड्वर्णध्यानपूर्वकम् ।
[2]वादिलान्ताक्षरं ध्यायेन्महाविद्यानिषेवकः ॥ ७ ।

[3]वकारं सौन्दर्यं स्वकिरणमयं भाव्यमतुलं
मुकुन्दश्रीभक्तिप्रियमणज्ञकं[4] पूर्वदलगम् ।
विशिष्टज्ञानान्तं [5]सुखरनतं कोटिकिरणं
विभाव्य श्रीलक्ष्मीं गमयति झटित् कालपुरुषम् ॥ ८ ।

---

१. सभवेत्परः—ग० ।
२. वादिनान्त—ग० ।
३. विकारम्—ग० ।
४. मणयकम्—ग० ।
५. सुष्ठु खरः धेनुकासुरः नतो येन तम् । अथवा सुखं रान्ति ददति ये ते सुखराः, ते नताः प्रणता यस्मिन् ।

[1]द्विवर्णं श्रीनाथं सुखयति भकारं रसदले
त्रिकोणापार्श्वस्थां[2] चपलशकलं शम्भुनिलयम् ।
महारक्ताकारं तरुणविगतं [3]भीममकुलं
कुलागारस्थानं [4]कुलरमणोरक्तायुतमिति ॥ ९ ।

यदा ध्यायेत् ज्ञानी निरवधि मुदा शोकविषहं
त्रिलोकानां स्थानं भुवनशरणं [5]प्रातविसुखी ।
महामोक्षद्वारे भवति स महान् सर्वंजडितो
विलासी सर्वेषां नवनववधूनां प्रियपतिः ॥ १० ।

महाकालस्थानं स जयति सकारं यदि [6]भजे-
दरीणां व्याहस्ता रुधिरकिरणं कोटचरुणकम् ।
महाकालस्थानं······शरणं प्रागपि सुखी
[7]त्रिकोणां दक्षाङ्के निगमनयनो योगयजितः ॥ ११ ।

विनोदी सौख्यानां सुरतरुसमानो भुवि दिवि
यकारं यो ध्यायेदमरपदवीव्याधिरहितः ।
महावाणोनाथं प्रणयजडितं त्वक् सुरतरुं
मुकुन्दानन्दान्तः[8] पवनमिलितं कामकरणम् ॥ १२ ।

तदा लोकोऽकामी भवति नितरां काकपवनी
महाग्नेः संस्थानं परजलधरं[9] सूर्यंशतकम् ।

---

१. द्विरण्ड–ग० । २. त्रिकोणं पार्श्वं स्यात् चपलशतकम्–ग० ।
३. भीमकुतम्–ग० । ४. रमणि वज्रायुतमिति–ग० ।
५. प्राभवि–ग० । ६. मकारं यदि भजेदरीणां व्याहन्ता रुधिरधिकरणं कोटचकरुणम्–ग० ।
७. त्रिकोणादकांके निगमनोयोग–ग० ।
८. नन्दान्तम्–ग० ।—मुकुन्दानन्दान्तः इति पाठो युक्तः । तत्र आनन्दस्यान्तो यस्मिन्नसौ आनन्दान्तः । मुकुन्देन सह कर्मधारयः ।
९. जननिधनम्–ग० ।—पर उत्कृष्टो यो जलधरस्तम् ।

[1]यदानन्दैर्ध्यायेत् परमधनदं यज्ञसुधया
सुधापानज्ञानी हवनकरणं काम्यफलदम् ।
प्रियं [2]तद्वेरत्याः कमलगभुजंगेश्वरनुतं[3]
त्रिकोणा[4]पृष्ठस्थं विधिहरिहरस्य [5]प्रियमिति ॥ १३ ।

विधानं वह्नीनां कुल[6]विमलबीजं सकरुणं
असृङ् [7]मायाखण्डं खगगणमनोरञ्जनवरम् ।
यदि ध्यायेदेको विभवविविधं याति सहसा
महेन्द्रः स्थानाङ्गं कमलसुखदं कृष्णनिलयम् ॥ १४ ।

प्रियं सिद्धक्षेत्रं यदि सुखमयं भावयति यः
[8]लकारं चन्द्रस्थं विधुशतकरं बिन्दुनिलयम् ।
विशालाक्षी राधा मधुरवचनालापकलितं
[9]रमामोदे पत्रे तरणकरणं सापहरणम् ॥ १५ ।

सुवामे[10] राकिण्या नवरसमयं मोहहरणं
विभाव्य श्रीनाथं भजति स नरो ध्याननिपुणो ।
महामोक्षं प्राप्य प्रथम[11]रजसं संगमयति ॥ १६ ।

ततो ध्येया महाविद्या राकिणीशक्तिरुत्तमा ।
श्रीविष्णुसहिता नित्यं योगैर्भोगविवर्जितः[12] ॥ १७ ।

---

१. यदानन्दे–ग० । २. तं द्रावत्थाः–क० । ३. नूतम्–ग० ।
४. भ्रष्टस्थम्–ग० । ५. श्रेयमिति–ग० । ६. क्रमल–ग० ।
७. रवाया–ग० । ८. नकारम्–ग० । ९. मोदे तपनकरणम्–ग० ।
१०. रामे–ग० । ११. वयसि–ग० ।
१२. भोगैर्विवर्जितः, सर्वभोगरहित इत्यर्थः ।

अकलङ्की कुलानन्दो मन्दहास्यावृतो महान् ।
स योगी परमं राज्यं प्राप्नोति नात्र संशयः ।। १८ ।

यावन्मूलाधारयोगं तावद् यमादिकं प्रभो ।
यमनियमासने काले [1]योगं पञ्चामरान्वितम् ।। १९ ।

तावत्कुर्यान्महादेव यावत्तत् सिद्धिमाप्नुयात् ।
यदि पञ्चामरा सिद्धिस्तदा [2]मायादिसिद्धिभाक् ।। २० ।

पञ्चासवा सिद्धिकाले प्राणादिवायुपञ्चमम् ।
धृत्वा धृत्वा पुनर्धृत्वा कुम्भयेदनिशं शनैः ।। २१ ।

शरीरे निर्मले याते वायुनिर्मलता भवेत् ।
सर्वरूपी महावायुर्निर्मलात्मानमात्मनि ।। २२ ।

सिद्धिं ददाति योगेश यदि स्वकार्यमाश्रयेत् ।। २३ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे आनन्दभैरवीभैरवसंवादे षड्दलवर्णप्रकाशो नाम चत्वारिंशत्तमः पटलः ।।

---

१. जप पञ्चासवान्वितम्—ग० ।

२. यमा—क० । माया आदिर्यस्याः, तां सिद्धिं भजतीति, मायादिसिद्धिभाक् । भजधातुरत्र क्विबन्तः ।

अथैकचत्त्वारिंशः पटलः

आनन्दभैरवी उवाच[1]—

कृतान्तसंहारविहारभोगं
रसाप्लुतश्रीकर शङ्कर प्रभो ।
तवाज्ञयाऽहं कथयामि सिद्धये
मयागमानन्दवशाद्धि तन्त्रम् ।। १ ।

प्रेमाभिलाषी [2]सुजनो मुनीन्द्रो
जानाति तन्त्रार्थमनन्तसाधनम् ।
महाप्रभाते चराणाब्जभक्तो
गोविन्द[3]शम्भोर्यदि भक्तिभाजनः ।। २ ।

षड्चक्रभेदार्थविशेषसाधनं
जानाति यो वा स जनोऽतिदुर्लभः ।
स एव संसारनिषेधसाधनं
सदा विहायाचलभक्तिमाप्नुयात् ।। ३ ।

आनन्दभैरव उवाच—

यदि वा कथिता कान्ते षड्दलप्रक्रिया शुभा ।
राकिण्या मिलनं देव्याः कुण्डलिन्याः पराक्रमम् ।। ४ ।

सार्द्धं श्रीविष्णुना कालरूपिणा बहुरूपिणा ।
शुद्धनिर्मलतत्त्वेन परिवारगणैः सह ।। ५ ।

न तद्धि कथितं सर्वं श्रीकृष्णस्य [4]पराक्रमम् ।
स्तवनं देवराकिण्या सहितं कृष्णसाधनम्[5] ।। ६ ।

---

१. ॐ नमो भगवत्यानन्दभैरव्युवाच–ग० । ३. सुनिन्दो–ग० ।

३. भावो–क० ।—गोविन्दो भगवान् श्रीकृष्णस्तेन सहितस्य शम्भोः । ४. प्रकाशम्–ग० ।

५. कृष्णस्य साधनं यस्मिन् तन्त्रादौ ।

मङ्गलं परमं ब्रह्मसाधनं [1]कुलवर्द्धनम् ।
कृष्णप्रकाशस्तवनं राकिणीशक्तिसंयुतम् ॥ ७ ।

कथयस्व महाकालि यदि स्नेहोऽस्ति मां प्रति ।
अत्यन्तगुह्यं कथनं सहस्र[2]नाममङ्गलम् ॥ ८ ।

अष्टोत्तरं महाविष्णो राकिण्या सहितं प्रिये ।
इदानीं राकिणीस्तोत्रं वद भामिनि कामदे ॥ ९ ।

आनन्दभैरव्युवाच—

योगेन्द्र परमानन्दसिन्धो चन्द्रशेखर ।
श्रृणुष्व श्रीराकिणीस्तोत्रं परमानन्दवर्धनम् ॥ १० ।

सर्वत्र सुखदं प्रोक्तं सिद्धानामपि साधनम् ।
एतत् स्तवनपाठेन योगी योगेन्द्रदृढो[4] भवेत् ॥ ११ ।

वैष्णवीसाधने यस्तु पञ्चाचारं करोति वा ।
सर्वेषां साधनोत्कृष्टं[5] जातिभ्रष्टोऽपि नो भवेत् ॥ १२ ।

समता शत्रुमित्रेषु कर्माकर्मसु तत्त्ववित् ।
यदि वा [6]वैष्णवे नाथ समभावः प्रजायते ॥ १३ ।

पञ्चाचारक्रमेणैव सिद्धो भवति नान्यथा ।
राधादिगोपिकाभिश्च गोपवृन्दैः समन्ततः ॥ १४ ।

पञ्चाचारं मुदा कृत्वा सर्वेषां परिपालनम् ।
चकार कमलानाथोऽतः पञ्चाचारमाश्रयेत् ॥ १५ ।

[7]पञ्चाचारक्रमेणैव चैतन्या कुण्डली भवेत् ।
कृष्णचैतन्यहेतोश्च राकिण्याश्च तथा प्रभो ॥ १६ ।

---

१. ज्ञान–ग० । २. साम–ग० । ३. सिद्धश्री–ग० ।
४. योगेन्द्रभाक्–ग० । ५. कृष्णम्–ग० ।—साधनेषु उत्कृष्टं साधनोत्कृष्टम् ।
६. वैष्णवं नाथा–ग० ।
७. पञ्चसंख्याका आचारा इति पञ्चाचाराः, तत्क्रमेणैव । पञ्चाचारशब्दस्यार्थः साम्प्रदायिकः ।

चैतन्याय षड्दलस्थदेवचैतन्यहेतुना ।
कुण्डलीवधुराकिण्याः स्तोत्रं शृणु कुलार्णव ॥ १७ ।

आन्दोलिता रसनिधौ कुलचञ्चला या
माया[1]मयो सकलदुःखविनाशवीरा[2] ।
[3]वीरासना स्थितिगता सुलभा मुनीनां
भव्या प्रपातु भविका कुलराकिणी माम् ॥ १८ ।

आनन्दसिन्धुजडिताखिलसारपाना[4]
बाला कुलीननमिता दलषट्कुलस्था ।
[5]कालीकलामलगुणा धनिनां धनस्था
कृष्णेश्वरी समुदयं कुरु राकिणी मे ॥ १९ ।

या राकिणी त्रिजगतामुदयाय चेष्टा
संज्ञामयी कुलवती [6]कुलवल्लभस्था ।
विश्वेश्वरी स्मरहरप्रियकर्मनिष्ठा
कृष्णप्रिया मम सुखं परिपातु देवी ॥ २० ।

षड्वर्गनाथकरपद्मनिषेविता या
राधेश्वरी प्रियकरी सुरसुन्दरी सा ।
माता कुलेशजननी जगतां मनुस्था
विद्या परा रिपुहरावत मे शरीरम् ॥ २१ ।

गोविन्दरामरमणी नवमालिनी या
[7]राज्येश्वरी स्मरहरा[8] नवकामिनी [9]वा ।
मे षड्दलाश्रितसुरं[10]परिपातु नित्यं
श्रीकुण्डली सुविमला कुलराकिणी सा ॥ २२ ।

---

१. मही–ग० । २. बीघा–ग० । ३. विलासनस्थितिगता–ग० ।
४. पारा–ग० । ५. कमलामलगुणाधनस्था–ग० । ६. कुलवली–ग० ।
७. वाक्येश्वरी–ग० ।—राज्यस्येश्वरी शासिका ।
८. हरति या सा हरा पचाद्यचि स्त्रियां टाप्, स्मरस्य कामदेवस्य हरा, स्मरहरा ।
९. या–ग० । १०. पतिपातु–ग० ।

श्रीसुन्दरी कुलपरा कुलवृन्दवन्द्या
[1]सन्ध्याविधिप्रभवतामतिकामतीर्था ।
[2]श्रीदायिनी कुलगणामलभावदात्री
नित्यं प्रपातु विषयं कुलषड्दलानाम् ।। २३ ।

चैतन्यदाननिरतां[3] त्रिगुणाभिरामां
श्यामां नितम्बधृतसुन्दररत्नघण्टाम् ।
नीलाचलस्थितकरां वरदानहस्तां
श्रीकृष्णवाम[4]कमलोपरि पूजयामि ।। २४ ।

ताम्राकिणीं त्रिरमणीं [5]समलापहन्त्रीं
[6]सर्वंस्थितां गगनमातरमम्बुजस्थाम् ।
पद्मासनां श्रुतिभुजां गुरुजामनन्तां
शान्तां षडम्बुजदलोपरि पूजयामि ।। २५ ।

शान्तिं कृपाकपटकोपरि नाशमुक्तिं
शिवां परमवैष्णवपूजिताङ्घ्रिम् ।
[7]राधां सुधां वरमयीं जगतां गुणस्थां
धर्मार्णवां रसदले परिपूजयामि ।। २६ ।

[8]कर्त्तीकरां सकरुणां रमणीं त्रिसर्गां
ताम्राकिणीमतिदयामलार्थंचिन्ताम् ।
भ्रान्तिं भ्रमागमवरां स्मृतिमादिपूज्यां
भार्यां हरेरतिसुखां परिपूजयामि ।। २७ ।

---

१. न·······ग० ।   २. श्रीदामिनी–ग० ।

३. दाम–ग० । —चैतन्यस्य प्रकाशस्य (ज्ञानस्य) दाने निरताम् । ४. रामकमलोपरि–ग० ।

५. रमना–ग० । ६ सर्वाश्रितां त्रिजगतां जनमम्बुजस्थाम्–ग० । ७. राधासुताम्–ग० ।

८. कर्त्रीकरामिति पाठो युक्तः । कर्त्रीं मायाशक्तिमपि या करोति सम्पादयति सा । अच्प्रत्ययान्तः करशब्दः ।

या कातरं निरवधिप्रणय[1]स्ववस्था
वागीश्वरी भगवती [2]यतिकोटिनम्रा ।
ताम्राकृति[3]प्रकृति[4]चेतसि रक्तवर्णा
मायामयी सुरकलावति पातु मेऽङ्गम् ॥ २८ ।

कल्पद्रुमाशयलता फलरूपिणी या
भर्गस्थिता पुरुषकोटिमुनिस्तुवन्ती ।
सा मे कुलेश्वररसं हरिहस्तपूज्या
क्षान्तिः सदा मम धनं परिपातु राधा ॥ २९ ।

क्षेमंकरी वरकरी सुकरी हरिस्था
या सौकरी भवकरी त्रिपुरा महेशी ।
वायुस्थिता लयमयी स्थितिमार्गसङ्गा
भङ्गप्रिया सकलका परिपातु राधा ॥ ३० ।

गङ्गा निर्मलभावदाममशिरोदेशं सदा रक्षतु
श्रीराधा कुलराकिणी मम कपालोर्ध्वं महावाक्प्रिया ।
मन्त्रस्था जयदा मुदा कुमुदिनी भालं भ्रुवोरन्तरं
विद्या वाग्भवकुण्डलीफलवलावाला[5] च नेत्रत्रयम् ॥ ३१ ।

गण्डं[6] चण्डसरस्वती श्रुतिकुलं [7]कैलासशैलस्थिता
मेघाटं घटवासिनी शशीमुखी[8] सूक्ष्मातिसूक्ष्माशया[9]।
जिह्वाग्रं चिबुकं [10]रदावधिवहा कण्ठं गलं स्कन्धगं
स्कन्देशी दशनप्रभामलमति-वैकुण्ठधामेश्वरी[11] ॥ ३२ ।

---

१. प्रत्रयासुवस्था-ग० । २. नति-ग० । ३. ताम्राकिणी-ग० ।
४. तेजसि-ग० । ५. नीला-क० । ६. चण्डम्-ग० ।
७. कौल-ग० ।—कैलासशैले स्थिता । ८. शशिनश्चन्द्रस्य मुखमिव मुखं यस्याः ।
९. सूक्ष्मातिसूक्ष्म आशयो यस्याः सा ।
१०. वदानाधिमहा-ग० । ११. बोधेश्वरी-क० ।

नानावर्णविलासिनी [1]मृदुरसं शम्भोर्भवानी शिवा
पृष्ठं [2]कर्मसु पृष्ठगा गतिकरी [3]नित्योल्बणी भास्वती ।
[4]पार्श्वं मे कुलमालिनी मम कटिं लिङ्गं नितम्बाम्बरं
कामाख्या धनदायिनी सकरुणा पादद्वयं पातु सा[5] ॥ ३३ ।

मातृक्रोधनिवारिणी मम शिवं षट्पत्रशोभाकरं
पातु श्रीचरुवासिनी कुलतरुं गौरी परानन्ददा ।
चैतन्यस्थलवासिनी मम गता गोविन्द[6]मातृप्रिया
चैतन्यं सततं प्रपातु धरणी धात्री वरक्षेत्रगा ॥ ३४ ।

[7]धन्या पिङ्गललोचनाम्बुजमुखी चैतन्यकर्मप्रिया
सर्वत्र[8] प्रियमाकरोतु नियतं शक्तिः क्षमाकर्तृका ।
कीर्तिस्था मम कीर्तिचक्रनिलयं लाक्षारुणा बल्वरी
[9]नीचा चक्रनिवासिनी मम जया जीवं मुदा पातु माम् ॥ ३५ ।

एतत्स्तोत्रं पठेन्नित्यं प्राणवायुवराशुभे[10] ।
षट्चक्रभेदसमये सदा पाठ्यं सुयोगिभिः ॥ ३६ ।

कुलविन्यासमये कुलचक्रप्रवेशने[11] ।
अवश्यं प्रपठेद्विद्वान् राकिणीराधिकास्तवम् ॥ ३७ ।

त्रिसन्ध्यं चेदमाकुर्यात् पठित्वा च पुनः पुनः ।
ध्यात्वा भावपरो भूत्वा मुच्यते भवबन्धनात् ॥ ३८ ।

---

१. तदुरसम्–क० । २. कर्मं सुपृष्ठा–ग० ।
३. नित्यो नृणाम्–ग० । ४. सर्वम्–ग० ।
५. पातु मा–ग० । ६. सुस–ग० । ७. मध्या–ग० ।
८. माक····शक्तिः खश्रिपाठः । ९. नीला–ग० ।
१०. प्राणवायुवरेण आशुभे इति तृतीयातत्पुरुषः । ११. कुलचक्रस्य प्रवेशनं यस्मिन्, तत्रेत्यर्थः ।

अचलां भक्तिमाप्नोति विश्वामित्रो यथा वशी ।
पठनात् पामरो याति ब्रह्मलोकं कुलाधिप ।। ३९ ।

एतत्पठनमात्रेण शीतलो गुणवान् भवेत् ।
अप्रकाश्यमिदं स्तोत्रं सर्वान्तिकविनाशनम् ।। ४० ।

समभावं समाकृत्य जीवन्मुक्तो भवेद्वशी ।
पञ्चाचाररतो भूत्वा साधयेद् यदि साधनम् ।। ४१ ।

कुण्डलीयोगकाले च कुलाचारं न वर्जयेत् ।
कुलाचारवर्जनेन महाहानिः प्रजायते ।। ४२ ।

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव च ।
समभावं सदा कृत्वा कुलाचारं समाश्रयेत् ।। ४३ ।

कुण्डली पृथिवी देवी राकिणी स्वारिदेवता[1] ।
[2]तद्गेहगामिनी देवी राधिका[3] राज्यकामिनी ।। ४४ ।

अस्याः साधनकाले च [4]समयाचारमाश्रयेत् ।
समभावे महामोक्ष इति तन्त्रार्थनिर्णयः ।। ४५ ।

समभावार्थकथनं त्यक्त्वा योगी भवेत्कृती ।। ४६ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्वाधिष्ठानराकिणीस्तोत्रं नामैकचत्वारिंशत्तमः पटलः ।।

---

१. मेदया—ग० । २. तद्देह—ग० । ३. पाद्य—ग० ।
४. सयये आचारः, अथवा समयस्य संकेतस्य आचारः ।

अथ द्विचत्वारिंशः पटलः

आनन्दभैरवी उवाच—

कथयामि महाकाल[1] परमाद्भुतसाधनम् ।
कुण्डलीरूपिणी देवी राकिण्याः कुलवल्लभ ॥ १ ।

मानसं द्रव्यमानीय चाथवा बाह्यद्रव्यकम् ।
[2]अनष्टहृष्टचित्तश्च पूजयेत् सावधानतः ॥ २ ।

भक्त्या जपेन्मूलमन्त्रं मानसं सर्वमेव च ।
पूजयित्वा ततो जप्त्वा होमं कुर्यात् [3] परामृतैः ॥ ३ ।

समासैः पक्वनैवेद्यैः सुगन्धिकुसुमैस्तथा ।
स्वयम्भूकुसुमैर्नित्यमर्घ्यं कृत्वा निवेदयेत् ॥ ४ ।

सुमुखं पूजयेन्नित्यं मधुमांसेन शंकर ।
[4]हुत्वा हुत्वा पुनर्हुत्वा प्राणवाय्वग्निसंगमैः ॥ ५ ।

भ्रामयित्त्वा मनो बाह्ये[5] स्थापयित्त्वा पुनः पुनः ।
पुनरागम्यगमनं कारयित्त्वा [6]सुमङ्गलम् ॥ ६ ।

वाचयित्त्वा सुवाणीभिर्याचयित्त्वा सवापिकम् ।
तर्पणं चाभिषेकञ्च केवलासवमिश्रितैः ॥ ७ ।

मांसैर्मुद्रादिभिर्मत्स्यैः सारद्रव्यैः सपिष्टकैः ।
वृतादिसुफलैर्वापि यद् यदायाति कौलिके ॥ ८ ।

[7]अचलां भक्तिमाप्नोति विश्वामित्रो यथा वशी ।
तत्तद्द्रव्यैः साधकेन्द्रो नित्यं सन्तर्प्य संजपेत् ॥ ९ ।

---

१. महाकालि–ग० । २. अनन्त–ग० । ३. सावधारया–क० ।
४. एवं श्रुत्वा––ग० । ५. राज्ये–ग० । ६. सुमेलनम्–ग० ।
७. ग० पु० नास्ति ।—चलतीति चला, चलतेः पचाद्यजन्ताट्टाप् । न चला, अचला स्थिरेत्यर्थः ।

ॐ महाकाल कृष्णेन्द्र नीलमणिनिभ राकिणी-वल्लभ कुण्डली महावीर राकिणी कैवल्य-मोक्षदात्र्यै नमः ॥ क्रां क्रौं क्रं क्रं क्लीं श्रीं रां रीं रुं रें रैं रों रौं रं रः स्वाहा ॥ परमवैष्णवो महाभैरवो महाविष्णुः कुलदेवता परजननिष्फल पुरुषोत्तम वासुदेव हृषीकेश केशव नारायण दामोदर पञ्चचूड चतुर्भुज शङ्खचक्रगदाधर राकिणी सूक्ष्मा कुलकुण्डली राधिका बाह्यदेवता श्री श्रीविद्याचैतन्यानन्द-मयी विश्वव्यापिका जगन्मोहिनी मूलात् प्रगच्छन्ती[१] षडाधारभेदिनी[२] षड्दलाकार[३]प्रका-शिनी मनोभवा मांस[४] मांसरुधिरादिशरीरपरि-वारादिकं[५] पालय पालय गोपय गोपय स्थापय स्थापय[६] शत्रून् घातय घातय ॐ ह्रौं ह्रौं स्थौं[७] ह्सौं हसकल ह्रीं सकल ह्रीं श्रीं जुहोमि नमो नमः स्वाहा ॥

एतन्मन्त्रं पठित्वा च तर्पणञ्च समाचरेत् ।
तर्पणान्ते चाभिषेकं सदा कुर्याच्च तान्त्रिकः[८] ॥ १० ॥

मूलान्ते चाभिषिञ्चामि नमः स्वाहा पदं ततः ।
ततो हि प्रणमेद्भक्त्या अष्टाङ्गनतिभिः[९] प्रभो ॥ ११ ॥

---

१. प्रगरवृत्ति–ग० । २. मेदिनीम्–ग० ।
३. यददनाकार–ग० । ४. मां मां मांसरुधिरादि–ग० ।
५. परिघारादिकम्–क० । ६. स्थापय–क० ।
७. स्थौं स्थौं हं सकल हं–क० । ८. तान्त्रिकात्–ग० ।
९. अष्टौ अङ्गानि यासु नतिसु, ताभिरित्यर्थः ।

सहस्रनाम्ना स्तवनमष्टोत्तरसमन्वितम् ।
अर्धाङ्ग[1]राकिणीयुक्तं राकिणीकेशवस्तवम् ॥ १२ ।

शृणु तं सकलं नाथ यत्र श्रद्धा सदा तव ।
श्रवणार्थं [2]बहूक्तं तत् कृपया ते वदाम्यहम् ॥ १३ ।

एतत् श्रवणमात्रेण सर्वपापक्षयो भवेत् ।
राकिणी[3]सङ्गमं नाथ स्तवनं नाम पावनम् ॥ १४ ।

ये पठन्ति [4]श्रद्धया चाश्रद्धया वा पुनः पुनः ।
तस्य सर्वः पापराशिः क्षयं याति [5]क्षणादिह ॥ १५ ।

काले काले महावीरो भवत्येव हि योगिराट् ।
संसारोत्तारणे युक्तो महाबलपराक्रमः ॥ १६ ।

अस्य श्रीमहदानन्द[6]कुलमङ्गल[7]कालसुन्दर-कृष्णमुकुन्दनारायणराकिणीकुलकुण्डलिनीमिलन-सर्वसाधननिष्फलाय [8]परमोक्षाय नित्यसुखाय योगसिद्धयेऽष्टोत्तरसहस्रनामस्तोत्रस्य गणेश-कुलगणाधिपतिः ऋषिर्बृहती[9]च्छन्दः, श्रीमत्कृष्ण-[10]महाकालपुरुषोत्तमकुलकुण्डलिनो[11] राधाराकिणी देवता, षड्दलाधारादिप्रकाशषट्पद्मसिद्ध्यर्थे जपे विनियोगः ॥

---

१. अभाङ्गम्–ग० ।
२. यदुक्तम्–ग० ।
३. मङ्गलम्–ग० ।
४. श्रियाचार–ग० ।
५. कुत्रा—ग० ।
६. श्रीमदानन्द–ग० ।—महतामानन्दो महदानन्दः, श्रिया सहित इति मध्यमपदलोपिसमासः ।
७. काल काल —ग० ।—कालश्चासौ सुन्दरश्च । अथवा कालस्यापि कालः ।
८. परमोक्षाय—ग० ।
९. वृतीच्छन्दः इति—ग० ।
१०. महांश्चासौ कालश्च, स च पुरुषेषूत्तमः ।
११. कुलानां कुलेषु वा कुण्डलिनी ।

ॐ श्रीकृष्णो महामाया यादवो देवराकिणी ।
गोविन्दो विश्वजननी महाविष्णुर्महेश्वरी ।। १७ ।

मुकुन्दो मालती माला विमला विमलाकृतिः ।
रमानाथो महादेवी महायोगी प्रभावती ।। १८ ।

वैकुण्ठोदेवजननी दहनो दहनप्रिया ।
दैत्यारिर्दैत्यमथिनी मुनीशो मौनभाविता ।। १९ ।

नारायणो [1]जयकला करुणो करुणामयी ।
हृषीकेशः [2]कौशिकी च केशवः केशिघातिनी ।। २० ।

किशोरापि[3] कैशोरी महाकालो महाकला ।
महायज्ञो यज्ञहर्त्री दक्षेशो दक्षकन्यका ।। २१ ।

महाबली [4]महाबाला बालको देवबालिका ।
चक्रधारी चक्रकरा [5]चक्राङ्गः चक्रमर्द्दिका ।। २२ ।

अमरो युवती भीमो [6]भया देवो दिवि स्थिता ।
श्रीकरो [7]वेशदा वैद्यो गुणा योगी कुलस्थिता ।। २३ ।

समयज्ञो मानसज्ञा क्रियाविज्ञः क्रियान्विता ।
अक्षरो वनमाला च कालरूपी कुलाक्षरा ।। २४ ।

विशालाक्षो दीर्घनेत्रा जयदो जयवाहना ।
शान्तः शान्तिकरी श्यामो विमलश्यामविग्रहा ।। २५ ।

कमलेशो महालक्ष्मी सत्यः साध्वी शिशुः प्रभा ।
विद्युताकारवदनो[8] विद्युत्पुञ्जनभोदया[9] ।। २६ ।

---

१. ज्वलाच्छन्ना–ग० ।
२. कैषिकी च–क० ।
३. किशोरश्चापि–ग० ।
४. महाबालो–ग० ।
५. चक्रकृच्चक्रमर्द्दिका–ग० ।
६. भीकोऽमया–ग० ।
७. देवे सदा–ग० ।
८. विद्युदाकारं वदनं महातेजस्वि प्रकाशशीलं यस्याः सा ।
९. निभोदरा–ग० ।—विद्युतां पुञ्जेन निभ उदयो यस्याः सा ।

[1]राधेश्वरो राकिणी च कुलदेवः कुलामरा ।
दक्षिणो दक्षिणी श्रीदा क्रियादक्षो महालया ।। २७ ।
[2]वशिष्टगमनो विद्या विद्येशो वाक्सरस्वती ।
अतीन्द्रियो योगमाता रणेशो रणपण्डिता ।। २८ ।
कृतान्तको बालकृष्णा कमनीयः सुकामना ।
अनन्तोऽनन्तगुणदा वाणीनाथो विलक्षणा ।। २९ ।
गोपालो गोपवनिता गोगोपकुलात्मजा ।
मानी[3] मौनकरोल्लासा मानवो मानवात्मजा ।। ३० ।
[4]सर्वाच्छिन्नो मोहिनी च मायो माया शरीरजा ।
[5]अक्षुण्णो वज्रदेहस्था गरुडस्थो हि गारुडो ।। ३१ ।
सत्यप्रिया रुक्मिणी च सत्यप्राणोऽमृतापहा[6] ।
[7]सत्यकर्मा सत्यभामा सत्यरूपी त्रिसत्यदा ।। ३२ ।
[8]शशीशो विधुवदना कृष्णवर्णो विशालधीः ।
त्रिविक्रमो विक्रमस्था स्थितिमार्गः स्थितिप्रिया ।। ३३ ।
श्रीमाधवो माधवी च मधुहा मधुसूदनी ।
वैकुण्ठनाथो विकला विवेकस्थो विवेकिनी ।। ३४ ।
विवादस्थो विवादेशी कुम्भकः कुम्भकारिका ।
सुधापानः सुधारूपा [9]सुवेशो देवमोहिनी ।। ३५ ।
प्रक्रियाधारको धन्या धन्यार्थो धन्यविग्रहा ।
धरणीशो महानन्ता [10]सानन्तो नन्दनप्रिया[11] ।। ३६ ।

---

१. धरेश्वरो–ग० ।
२. विशिष्ट–ग० ।
३. मान–ग० ।
४. सर्ववृन्दो–ग० ।
५. रज ।
६. अमृतापहा–ग० ।
७. सत्यभ्रमो वाणसत्यो कालसत्योऽमृताऽध्यहा । क० अधि० पाठः ।
८. शीश–ग० ।—शशिन ईशः शशीशः ।
९. सुधंशो–ग० । —शोभनवेशयुत इति सुवेशः, पीताम्बरादिरूपः ।
१०. सानन्दा–ग० । —अनन्तेन सहितः, बलरामयुत इत्यर्थः, 'सानन्त' इति पाठे ।
११. नन्दनस्य आनन्ददायकस्य भगवतः श्रीकृष्णस्य प्रिया इत्यर्थः ।

[1]प्रियो विप्रियहरा विप्रपूज्यो द्विजप्रिया ।
कान्तो विधुमुखी वेद्यो विद्या वागीश्वरोऽरुणा ॥ ३७ ॥

अकामी कामरहिता कम्रो विलचरप्रिया ।
पुण्डरीको[2] विकुण्डस्था वैकुण्ठो बालभाविनी ॥ ३८ ॥

पद्मनेत्रः [3]पद्ममाला पद्महस्तोऽम्बुजानना ।
पद्मनाभिः पद्मनेत्रा पद्मस्थः पद्मवाहना ॥ ३९ ॥

वासुदेवो बृहद्गर्भा[4] महामानी महाङ्गना ।
[5]कारुण्यो बालगर्भा च आकाशस्थो विभाण्डजा ॥ ४० ॥

तेजोराशिस्तैजसी च भयाच्छन्नो भयप्रदा ।
उपेन्द्रो वर्णजालस्था स्वतन्त्रस्थो विमानगा ॥ ४१ ॥

नगेन्द्रस्थो नागिनी च नगेशो नागनन्दिनी[6] ।
सार्वभौमो महाकाली[7] नगेन्द्रः नन्दिनीसुता[8] ॥ ४२ ॥

कामदेवाश्रयो माया मित्रस्थो मित्रवासना ।
मानभङ्गकरो रावा[9] वारणारिप्रियः प्रिया ॥ ४३ ॥

रिपुहा राकिणी माता सुमित्रो मित्ररक्षिका ।
कालान्तकलहादेवा पीतवासाम्बरप्रिया[10] ॥ ४४ ॥

---

१. अप्रिये–ग० ।

२. वाहनस्थो वाहनाढ्या सिद्धेशः सिद्धिदायिनी ।
सिद्धिमात्रो विलोका च चञ्चलो विषयापहा ॥
स्मशानवासिनी नाथो यमभूमिनिवासिनी ।
यमस्थो यामलस्था च यवनो भवनाश्रया ॥
क० पु० अ० पाठः ।

३. पद्ममात्रा–ग० । ४. बृहद्भानुः–ग० ।

५. कारुण्यगर्भा करणा काशाख्यो विभार्तिजा । ६. नानान्दिनी–ग० ।

७. सार्वभौमोऽमला–ग० । ८. शुभा–ग० । ९. रारी–क० ।

१०. पीतवासस्याम्बरं पीतवासाम्बरं, तत् प्रियं यस्याः सा । करणाद्यन्तो वासशब्दः ।

पापहर्ता पापहन्त्री निष्पापः पापनाशिनी ।
[1]परानन्दप्रियो मीना मीनरूपी मलापहा ॥ ४५ ॥

इन्द्रनीलमणिश्यामो महेन्द्रनीलरूपिणी ।
नीलकण्ठप्रियो दुर्गा दुर्गा दुर्गतिनाशिनी ॥ ४६ ॥

त्रिकोणमन्दिरश्रीदो विमाया मन्दिरस्थिता ।
मकरन्दरसोल्लासो मकरन्दरसप्रिया ॥ ४७ ॥

[2]दारुणारिनिहन्ता च दारुणारिविनाशिनी ।
कलिकालकुलाचारः [3]कलिकालफलावहा ॥ ४८ ॥

कालक्षेत्रस्थितो रौद्री व्रतस्थो व्रतधारिणी ।
विशालाक्षो विशालास्या चमत्कारो करोद्यमा ॥ ४९ ॥

[4]लकारस्थो लाकिनी च लाङ्गली लोलयान्विता ।
नाकस्थो नाकपदका [5]नाकाक्षो नाकरक्षका ॥ ५० ॥

[6]कामगो नामसम्बन्धा सामवेदविशोधिका ।
सामवेदः सामसन्ध्या [7]सामगो मांसभक्षिणी ॥ ५१ ॥

सर्वभक्षो रात्रभक्षा रेतस्थो रेतपालिनी ।
रात्रिकारी महारात्रिः कालरात्रो महानिशा ॥ ५२ ॥

नानादोषहरो मात्रा मारहन्ता [8]सुरापहा ।
चन्दनाङ्गो नन्दपुत्री नन्दपालः विलोपिनी ॥ ५३ ॥

मुद्राकारी महामुद्रा मुद्रितो मुद्रितारतिः ।
शाक्तो लाक्षा वेदलाक्षो लोपामुद्रा [9]नरोत्तमा ॥ ५४ ॥

---

१. परमानन्दजा–ग० । २. दारुणाधि–ग० ।

३. कालि काल पुत्रार्थो च काली कालपुत्रावहा–ग० ।

४. नकारस्यो नाकिनी च लाङ्गकीशो कान्यान्विता–क० ।

५. नाकरक्षा भूरक्षका–क० । ६. नामगो–ग० ।

७. विशेषिका–ग० । ८. स्मरापहा–ग० । —स्मरं कामदेवमपहतवान्—स्मरापहा ।

९. नरोहरा–ग० । —नर उत्तमो यस्याः । अगस्त्यमहर्षेर्धर्मभार्या लोपामुद्रा (राजपुत्री) ।

[1]महाज्ञानधरोऽज्ञानी नीरा मानहरोऽमरा ।
सत्कीर्तिस्थो महाकीर्तिः कुलाख्यो [2]कुलकीर्तिता ॥ ५५ ।

आशावासी वासना सा कुलवेत्ता सुगोपिता ।
अश्वत्थवृक्षनिलयो वृक्षसारनिवासिनी ॥ ५६ ।

नित्यवृक्षो नित्यलता क्लृप्तः क्लृप्तपदस्थितः ।
कल्पवृक्षो कल्पलता सुकालः कालभक्षिका ॥ ५७ ।

सर्वालङ्कारभूषाढ्यो सर्वालङ्कारभूषिता ।
अकलङ्की निराहारा दुर्निरीक्ष्यो निरापदा ॥ ५८ ।

[3]कामकर्त्ता कामकान्ता कामरूपी महाजवा ।
जयन्तो याजयन्ती च जयाख्यो जयदायिनी ॥ ५९ ।

त्रिजीवनो जीवमाता [4]कुशलाख्यो विसुन्दरा ।
केशधारी केशिनी च कामजो कामजाड्यदा ॥ ६० ।

किंकरस्थो विकारस्था [5]मानसंज्ञो मनीषिणी ।
मिथ्याहरो महामिथ्या मिथ्यासर्गो निराकृति ॥ ६१ ।

[6]नागयज्ञोपवीतश्च नागमालाविभूषिता[7] ।
नागाख्यो नागकुलपा नायको नायिका वधूः ॥ ६२ ।

नायकक्षेमदो नारी नरो नारायणप्रिया ।
किरातवर्णो रासज्ञी तारको गुणतारिका ॥ ६३ ।

[8]शङ्कराख्योऽम्बुजाकारा कृपणः कृपणावती ।
देशगो देशसन्तोषा दर्शो दर्शनिवासिनी ॥ ६४ ।

---

१. महाज्ञानहरो वाणी बाण सानहरोऽमरा–क० ।   २. कीर्तिका–क० ।

३. कामकर्त्री–ग० ।   ४. कुशालाख्यो–ग० ।   ५. मनसाज्ञो–ग० ।

६. नागयज्ञोपवीती च-ग० । —नाग एव यज्ञोपवीतो यस्य सः । अथवा कर्मधारये सति मत्वर्थीय इनिप्रत्ययः ।

७. नागस्य माला, नागमाला अथवा नागानां मालासमूहस्तेन विभूषिता । आद्यसमासे मालाशब्दो माल्यार्थे बोध्यः ।

८. शङ्कराख्यो रुजाक्रूराः–ग० ।

दर्शनज्ञो दर्शनस्था दृग् दिदृक्षा सुरोऽसुराः ।
सुरपालो देवरक्षा त्रिरक्षो रक्षदेवता ॥ ६५ ॥

[1]श्रीरामसेवी सुखदा सुखदो [2]व्यासवासिनी ।
वृन्दावनस्थो वृन्दा च वृन्दावन्यो [3]महत्तनू ॥ ६६ ॥

ब्रह्मरूपी त्रितारी[4] च तारकाक्षो[5] हि तारिणी ।
[6]तन्त्रार्थज्ञः तन्त्रविद्या सुतन्त्रज्ञः सुतन्त्रिका ॥ ६७ ॥

[7]तृप्तः सुतृप्ता लोकानां तर्पणस्थो विलासिनी ।
मयूरा मन्दिररतो मथुरा मन्दिरोऽमला ॥ ६८ ॥

मन्दिरो मन्दिरा देवी निर्म्मायी मायसंहरा ।
श्रीवत्सहृदयो वत्सा वत्सलो भक्तवत्सला ॥ ६९ ॥

भक्तप्रियो भक्तगम्या भक्तो भक्तिः प्रभुः प्रभा ।
जरो जरा वरो रावा हविर्हेमा क्षमः क्षितिः ॥ ७० ॥

क्षोणीपो विजयोल्लासा विजयो जयरूपिणी ।
[8]जयदाता दातृजाया[9] बलिपो बलिपालिका ॥ ७१ ॥

कृष्णमार्जाररूपी च कृष्णमार्जाररूपिणी ।
घोटकस्थो हयस्था च गजगो गजवाहना ॥ ७२ ॥

गजेश्वरो गजाधारा गजो गर्जनतत्परा ।
गयासुरो गयादेवी [10]गजदर्पो गजार्पिता ॥ ७३ ॥

---

१. श्रीवासो वारसुखदो–क० ।

२. व्यापकवासिनी–क० । —व्यासेन विविधप्रक्षेपेण वसति, तच्छीला ।

३. बृहत्तनु–ग० । —महतां तनुर्ययोस्ते महत्तनू इति । ४. वितारी–क० ।

५. तारकाख्यो–ग० । —तारकेऽक्षिणी यस्य सः ।

६. तन्त्रज्ञस्तन्द्रविद्या–ग० । —तन्त्रस्यार्थं भावं जानाति इति विग्रहः ।

७. तृप्ता सुतृप्तः–ग० । ८. जयदात्री–ग० ।—ददातीति दाता, जयस्य दाता—षष्ठीतत्पुरुषः ।

९. दातृजयो--ग० । १०. गयदर्पो गयार्पिता--ग० । —गजस्येव दर्पो यस्य सः ।

कामनाफलसिद्ध्यर्थी कामनाफलसिद्धिदा ।
धर्मदाता धर्मविद्या [1]मोक्षदो मोक्षदायिनो ॥ ७४ ।

मोक्षाश्रयो मोक्षकर्त्री नन्दगोपाल ईश्वरी ।
श्रीपतिः श्रीमहाकाली [2]करिशावः वायुरूपिणी ॥ ७५ ।

वाय्वाहारी वायुनिष्ठा वायुबीजयशस्विनी ।
[3]जेता जयन्ती यागस्थो यागविद्या शिवः शिवा[4] ॥ ७६ ।

वासवो वासवस्थी च वासाख्यो [5]धनविग्रहा ।
आखण्डलो विखण्डा च [6]खण्डस्थो खण्डखञ्जनी ॥ ७७ ।

खड्गहस्तो बाणहस्ता बाणगो बाणवाहना[7] ।
सिद्धान्तज्ञो [8]ध्वान्तहन्त्री धनस्थो धान्यवर्द्धिनी ॥ ७८ ।

लोकानुरागो रागस्था स्थितः स्थापकभावना ।
स्थानभ्रष्टोऽपदस्था च शरच्चन्द्रनिभानना ॥ ७९ ।

चन्द्रोदयश्चन्द्रवर्णा चारुचन्द्रो रुचिस्थिता ।
रुचिकारी रुचिप्रीता रचनो रचनासना ॥ ८० ।

राजराजो राजकन्या भुवनो भुवनाश्रया ।
सर्वज्ञः सर्वतोभद्रा [9]वाचालो लयघातिनो ॥ ८१ ।

---

१. धर्मदो–ग० । २. किरणो–ग० । —करिणो हस्तिनः शाव इवेति विग्रहः ।

३. जेत्रा–ग० । —जयति इति जेता, स्त्रियां तु जेत्री इति स्यात् ।

४. शिशिराचलदेशस्थः शिशिराचलरक्षिका ।
सामवेदान्ततर्कश्च सामवेदफलोदया ॥
श्यामचन्द्रो बारमुख्या वारुणो वारुणिप्रिया ।
वरुणो वरुणानन्दा वरुणाख्यो व्रतान्तरा ॥ क० पु० अ० पाठः ।

५. वंशनिग्रहा–ग० । ६. खण्डस्योऽखण्डखञ्जनी–ग० ।

७. वाह–ग० । ८. घनदात्रो–ग० ।

९. वाचाला लयघातिनी–ग० ।—वातीति वाः वायुः, तं चालयति इति वाचालः, गन्धप्रसारकः । अन्यथा कुत्सितवाग्वान् इत्यर्थः ।

लिङ्गरूपधरो लिङ्गा कलिङ्गः कालकेसरी[1] ।
केवलानन्दरूपाख्यो निर्वाणमोक्षदायिनी ॥ ८२ ॥

महामेघगाढो महानन्दरूपा
[2]महामेघजालो महाघोररूपा ।
महामेघमालः सदाकारपाला
महामेघमालामलालोलकाली ॥ ८३ ॥

वियद्व्यापको व्यापिका सर्वदेहे
महाशूरवीरो महाधर्मवीरा ।
महाकालरूपी महाचण्डरूपा
विवेकी मदैकीकुलेशः कुलेशी ॥ ८४ ॥

सुमार्गी सुगीता शुचिस्वी [3]विनीता
[4]महार्को वितर्का सुतर्कोऽवितर्का ।
कृतीन्द्रो महेन्द्री भगो भाग्यचन्द्रा
चतुर्थो महार्था नगः कीर्तिचन्द्रा[5] ॥ ८५ ॥

विशिष्टो महेष्टिर्मनस्वी सुतुष्टि-
र्महाषड्दलस्थो महासुप्रकाशा ।
गलच्चन्द्रधारामृतस्निग्धदेहो
गलत्कोटिसूर्यप्रकाशाभिलाषा ॥ ८६ ॥

महाचण्डवेगो महाकुण्डवेगी
महारुण्डखण्डो महामुण्डखण्डा ।
कुलालभ्रच्चक्रसारः प्रकारा
कुलालो मलाका[6]रचक्रप्रकारी ॥ ८७ ॥

---

१. कालकेश्वरी—ग० । —कालाः केसरा इति कर्मधारयस्तत इनिर्मत्वर्थीयः ।

२. महामेघगाढमनानन्दरूपो महामना घोररूपा महामेघमाला''''ग० । ३. विनता—ग० ।

४. महर्को—ग० । —महाँश्चासौ अर्कश्चेति महार्कः, तत्सदृश इत्यर्थः ।

५. नगाकीर्तिचन्द्रा—ग० । —कीर्तौ चन्द्रो यस्यां सा ।

६. मलाकार—ग० । —मलाकारं चक्रं तस्य प्रकार इव प्रकारः, सोऽस्यास्तीति; मत्वर्थीय इनि-
प्रत्ययः । अथवा षष्ठीतत्पुरुषे सति पुंयोगे ङीष् गौरादेराकृतिगणाद्वा ङीष् ।

कुलालक्रियावान् महाघोरखण्डः
कुलालक्रमेण[1] भ्रमज्ञानखण्डा ।
प्रतिष्ठः प्रतिष्ठा प्रतीक्षः प्रतीक्षा
महाख्यो महाख्या सुकालोऽतिदीक्षा ॥ ८८ ।

महापञ्चमाचारतुष्टः [2]प्रचेष्टा
महापञ्चमा प्रेमहा कान्तचेष्टा ।
महामत्तवेशो महामङ्गलेशी
सुरेशः क्षपेशी[3]वरो दीर्घवेशा ॥ ८९ ।

चरो [4]बाह्यनिष्ठा चरश्चारुवर्णा
कुलाद्योऽकुलाद्या यतिर्यागवाद्या ।
कुलोकापहन्ता महामानहन्त्री
महाविष्णुयोगी महाविष्णुयोगा ॥ ९० ।

क्षितिक्षोभहन्ता क्षितिक्षुब्धबाधा[5]
महार्घो महार्घा धनी राज्यकार्या ।
महारात्रि[6]सान्द्रान्धकारप्रकाशो
महारात्रि[7]सान्द्रान्धकारप्रवेशा ॥ ९१ ।

महाभीमगम्भीरशब्दप्रशब्दो
महाभीमगम्भीरशब्दापशब्दा[8] ।
[9]कुला ज्ञानदात्री [10]यमो यामयात्रा
वशी सूक्ष्मवेशाश्वगो नाममात्रा[11] ॥ ९२ ।

---

१. क्रमान्–ग० । २. प्रवेष्टो–ग० ।
३. क्षपेशा–ग० । —क्षपाया रात्रेः ईशी क्षपेशी, तस्या वरः । ४. वाक्य–ग० ।
५. सुणहन्ता महार्यी महार्या घनी चार्यं–ग० ।
६. शास्त्र–ग० । —महारात्रिसम्बन्धी यः सान्द्रोऽन्धकारस्तत्र प्रवेशो यस्याः ।
७. शास्त्र–ग० । ८. नृशब्दा–ग० । —महाभीमौ गम्भीरौ शब्दापशब्दौ यस्यां सा ।
९. गुणी–ग० । १०. मयो–ग० ।
११. खगो नागमात्रा–ग० । —मीयन्ते आभिस्ता मात्राः, नाम्नो मात्रा यस्यां सा ।

[1]हिरण्याख्यहन्ता महाशत्रुहन्त्री
विनाशप्रियो बाणनाशप्रिया च ।
[2]महाडाकिनीशो महाराकिणीशो
महाडाकिनी सा महाराकिणो सा ॥ ९३ ।

मुकुन्दो महेन्द्रो महाभद्रचन्द्रा
क्षितित्यागकर्त्ता महायोगकर्त्री ।
हितो मारहन्त्री महेशेश इन्द्रा
गतिक्षोभभावो [3]महाभावपुञ्जा ॥ ९४ ।

शशीनां समूहो विधोः कोटिशक्तिः[4]
कदम्बाश्रितो वारमुख्या सतोनाम् ।
महोल्लासदाता महाकालमाता
स्वयं सर्वपुत्रः स्वयं लोकपुत्री ॥ ९५ ।

महापापहन्ता महाभावभर्त्री[5]
हरिः कार्तिकी कार्तिको देवसेना ।
जयाप्तो विलिप्ता कुलाप्तो गणाप्ता
[6]सुवीर्य्यो सभाषा क्षितीशोऽभियाता[7] ॥ ९६ ।

भवान् भावलक्ष्मीः प्रियः प्रेमसूक्ष्मा
जनेशो धनेशी कृपो मानभङ्गा ।
कठोरोत्कटानां महाबुद्धिदाता
कृतिस्था गुणज्ञो गुणानन्दविज्ञा ॥ ९७ ।

---

१. हिरणाख्य–क० । —हिरण्य इत्याख्या यस्य स हिरण्याख्यस्तस्य हन्ता ।

२. महाकाडि–ग० । —महाडाकिन्या ईशो महाडाकिनीशः ।

३. पहोभावप्रज्ञा–ग० । ४. राख्यः–ग० ।

५. हार्थो–ग० । —महान्तो ये भावास्तेषां भर्त्री भरणशीला ।

६. सुधीर्व्या–ग० । —शोभनं वीर्यं पराक्रमो यस्य सः ।

७. क्षितिशोऽतिया–ग० । —क्षितेरीशः, सोऽभियाताऽभिगन्ता ।

[1]महाकालपूज्यो महाकालपूज्या[2]
खगाख्यो नगाख्या खरः खड्गहस्ता ।
[3]अथर्वोऽथवान्दोलितस्थः महार्था
[4]खगक्षोभनाशा हविः कूटहाला ॥ ९८ ।

महापद्ममालाधृतो गाणपत्या
गणस्थो गभीरा [5]गुरुः ज्ञानगम्या ।
घटप्राणदाता घनाकाररूपा
भयार्थोङबीजाङवारीङकर्ता[6] ॥ ९९ ।

भवो भावमाता नरो यामध्याता
चलान्तोऽचलाख्या चयोऽञ्जालिका च ।
छलज्ञश्छलाढ्या[7] छकारश्छकारा
जयो जीवनस्था जलेशो [8]जलेशा ॥ १०० ।

जपञ्जापकारी[9] जगज्जीवनीशा
[10]जगत्प्राणनाथो जगद्ह्लादकारी ।
झरो झर्झरीशा[11] झनत्कारशब्दो[12]
झनञ्झञ्झनानादझङ्काररावा ॥ १०१ ।

---

१. काल–ग० । —महाकालेन पूज्यः, अथवा महाकालः पूज्यो यस्य ।

२. कान्त–ग० । —महाकालेन पूज्या, महाकालः पूज्यो यस्याः सा ।

३. खगोग्रखर्वा–ग० ।

४. मग–ग० । —खगस्य गरुडस्य क्षोभस्तं नाशयति या सा । कर्मणि अण्प्रत्ययः । अजादित्वाट्टाप् ।

५. पुरु–ग० । ६. कर्णा–ग० । ७. छलज्ञो छलाज्ञा–क० ।

८. जनेशो जनेशा–क० । —जलस्येशा जलेशा, क्षीरसागरे ईशित्वं भजते ।

९. जगज्जापकारी–क० । —जगतो जापः, तं करोति या सा, अथवा तं करोति तच्छीला, कर्तरि णिनिप्रत्ययः ।

१०. दुप्राणनाथो–क० ।

११. झर्झरीगा–ग० । —झर्झरीं गच्छति या सा गमेडः । अथवा झर्झर्या ईशा ।

१२. नन्द्रा–क० ।

ञ-चैतन्यकारी ञ-कैवल्यनारी
हृनोल्लासधारी [1]टनत्टंकहस्ता ।
[2]ठरेशोपविष्टष्ठकारादिकोटी[3]
डरो डाकिनीशो [4]डरेशो डमारा ॥ १०२ ।

ढमेशो हि ढक्का वरस्थानबीजो
णवर्णा तमालतनुः[5] स्थाननिष्ठा ।
थकारार्णमानस्थनिस्थोऽसंख्या
[6]दयावान् दयार्द्रा धनेशो धनाढ्या ॥ १०३ ।

नवीनो नगेभागतीर्णाङ्गहारो
नगेशी परः [7]पारणी सादिपाला ।
[8]फलात्मा फला फाल्गुनी फेणनाशः
फलाभूषणाढ्या वशी [9]वासरम्या ॥ १०४ ।

भगात्मा [10]भवस्त्री महाबीजमानो
महाबीजमालामुकुन्दः सुसूक्ष्मा ।
यतिस्था यशस्था रतानन्दकर्त्ता
रतिर्लाकिनीशो [11]लयार्थप्रचण्डा ॥ १०५ ।

---

१. टमत्–ग० । २. ठकेशो–क० । ३. कूट–क० ।
४. डामरा डाकिनी षोडसारा–ग० ।
५. तमालस्तनस्थान–ग० । —तमालस्येव तनुर्यस्य स इति ।
६. मालः स्वान्ति स्थान संस्था दयावान् दाया–ग० ।
७. पारसी–ग० ।
८. फलाम्राफलदोऽङ्गुली–क० । —फलानि आत्मा यस्य सः ।
९. व्यासवस्या–क० । —वासेन रम्या, वासो रम्यो यस्याः ।
१०. भवश्रीमहाबीजमाता–क० । —भवस्य शिवस्य स्त्री । महाबीजस्य माता इत्यर्थो द्वितीये पाठे ।
११. नयार्थ–ग० ।

[1]प्रवालाङ्गधारी प्रवालाङ्गमाला
हलोहालहेलापदः पादताला[2] ।
वशीन्द्रप्रकाशो वरस्थानवासा
शिवः [3]श्रीधराङ्गः शलाकाशिला च ॥ १०६ ।

षडाधारवासी[4] षडाधारविद्या
षडाम्भोजसंस्थः षडब्जोपविष्टा ।
सदा साधरोग्रोपविष्टाऽपरागी
सुसूक्तापयस्था पलाश्रयस्थिता ॥ १०७ ।

हरस्थोग्रकर्मा हरानन्दधारा [5]लघुस्थो
लिपिस्था क्षयीक्षुब्धक[6] संख्या ।
अनन्तो[7] निवर्णाहराकारबीजा
उरःस्थोऽप्युरुस्था उरा ऊर्द्ध्वरूपा[8] ॥ १०८ ।

ऋचस्थो हि ऋगालसो[9] दीर्घऌस्था
त्वमेको हि चैंबीजगुर्वी गुणस्था ।
सदौङ्कारवर्णाह्सौं[10]कारबीजा
[11]असंकारचन्द्रो ह्युसःकारवीरा ॥ १०९ ।

---

१. प्रवालाब्धि–ग० ।

२. पत्रपाल–ग० । —पादे तालो यस्याः सा । अथवा पादो गमनशीलः तालो ध्वनिर्यस्याः सा ।

३. शिश्रीधराड़ा–ग० । —श्रीधरस्याङ्गमिवाङ्गं यस्य सः ।

४. राशी–ग० । —षडाधारे वसति तच्छीलः ।

५. लयस्यो–ग० । ६. कु क संख्या–ग० ।

७. अनर्णो निरर्णा इरा नाथ ईशा–क० । —नास्ति अन्तो यस्य सः ।

८. ऊद्ध्वंपाशा–ग० । —ऊर्ध्वं रूपं यस्याः सा, सत्त्वरूपा इत्यर्थः ।

९. गोदीर्घ–ग० । —ऋक्षु अलसः, ऋगालसः ।

१०. लौं–ग० । ११. असंकार–ग० । —असङ्कारश्चन्द्रो यस्य स इत्यर्थः ।

हरीन्द्रो हरीशा हरिः कृष्णरूपा
शिवो वेदभाषा च शौरिः प्रसंगा[1] ।
गणाध्यक्षरूपी [2]परानन्दभक्षा
परेशो गणेशी रसो वासपूज्या ॥ ११० ।

चकोरिकुलप्राण[3]बुद्धिस्थितिस्था
स्वयं [4]कामधेनुस्वरूपी विरूपा ।
श्रीहिरण्यप्रभः श्रीहिरण्यप्रभाङ्गी
प्रभाताकंवर्णोऽरुणाकारणाङ्गी[5] ॥ १११ ।

विभाकोटिधारा धराधारकोषा
रणीशो [6]प्रत्यादिकूटोधरो... धारणाशौरिरार्या ।
महायज्ञसंस्थो महायज्ञनिष्ठा
सदाकर्मसङ्गः सदामङ्गरङ्गा ॥ ११२ ।

किरातीपती राकिणी [7]कालपुत्री
[8]शिलाकोटनिर्माणदोहा विशाला[9] ।
कलार्ककलस्थो[10] कलाकिंकिणीस्था
किशोरः किशोरी कुरुक्षेत्रकन्या ॥ ११३ ।

---

१. प्रसन्ना–ख० । —प्रकृष्टः सङ्गो यस्याः सा ।

२. परानन्दहार्या–ख० । —परानन्दो भक्षो यस्याः सा ।

३. म्लय–ग० । चकोरी गणस्थः स्वबुद्धि–ख० ।

४. कामरूपः–क० । —कामधेनुस्वरूपी—कामधेनोः स्वरूपमस्ति यस्य सः । षष्ठीतत्पुरुषे सति इनिः ।

५. कारकाङ्गी–ख० ।

६. धरासौधसंस्था धरा धारणेशः क्षमासौख्यसद्मा–ख० । प्रभाषादि कूटोधरो............धारगा गौ विरार्या–ग० ।

७. कोल–ख०, ग० । ८. देहे–ग० ।

९. शिलाकोट इत्यारम्य किङ्किणीस्थेत्यन्तं ख० पु० नास्ति । १०. कंकन–ग० ।

महालाङ्गलिश्री [1]बलोद्धामकृष्णः
कुलालादिविद्याऽभयो भावशून्या[2] ।
महालाकिनी काकिनी शाकिनीशो
महासुप्रकाशा परो हाकिनीशा ॥ ११४ ।

कुरुक्षेत्रवासी कुरुप्रेममूर्ति-[3]
र्महाभूतिभोगी महायोगिनी च ।
कुलाङ्गारकारो कुलाङ्गीशकन्या
तृतीयस्तृतीयाऽद्वितीयोऽद्वितीया ॥ ११५ ।

महाकन्दवासी महानन्दकाशी[4]
पुरग्रामवासी महापीठदेशा ।
जगन्नाथवक्षःस्थलस्थो वरेण्या
[5]च्युतानन्दकर्त्ता रसानन्दकर्त्री ॥ ११६ ।

जगद्दीपकालो[6] जगद्दीपकाली
महाकामरूपी महाकामपीठा ।
महाकामपीठस्थिरो [7]भूतशुद्धि-
र्महाभूतशुद्धिः महाभूतसिद्धिः ॥ ११७ ।

---

१. रःम–ख० । बनोद्धाम–ग० । —बलस्योद्धाम यस्मिन् स बलोद्धामा, स चासौ कृष्णश्च ।

२. मानोभावपूर्णा–ख० ग० ।

३. हर्त्री ख०, भर्ता–ग० ।—कुरुषु यः प्रेमा, तस्मिन् मूर्तिर्यस्य सः ।

४. वासी–ग० । —महानन्दं काशयति या, सा । वासा–ख० ।

५. शिवानन्दकर्त्ता शिवानन्दकर्त्री–ख० । वृलनन्द कती–ग० ।

६. काशो जगद्दीनी सा –ख०, ग० । जगद् दीपयति असौ जगद्दीपः, तेन कालः ।

७. भूति–क० ।

५३

प्रभान्तः प्रवीणा गुरुस्थो
गिरिस्था गलद्धारधारी महाभक्तवेषा ।
[1]क्षणक्षुन्निवृत्तिर्निवृत्तान्तरात्मा
[2]सदन्तर्गतस्था लयस्थानगामी ॥ ११८ ।

लयानन्दकाम्या[3] विसर्गाप्तवर्गो
विशालाक्षमार्गा[4] कुलार्णः कुलार्णा ।
[5]मनस्था मनःश्रीः भयानन्ददाता सदा
लाणगीता [6]गजज्ञानदाता महामेरुपाया[7] ॥ ११९ ।

तरोर्मूलवासी [8]तरज्ञोपदर्शा सुरेशः
समेशः[9] सुरेशा सुखी खड्गनिष्ठा[10] ।
भयत्राणकर्त्ता भयज्ञानहन्त्री[11]
जनानां मखस्थो मखानन्दभङ्गा ॥ १२० ।

महासत्पथस्थो महासत्पथज्ञा
महाबिन्दुमानो महाबिन्दुमाना ।
खगेन्द्रोपविष्टो विसर्गान्तरस्था
विसर्गप्रविष्टो महाबिन्दुनादा ॥ १२१ ।

---

१. क्षणः सुण्णवृत्तिः–क० । —क्षणेन क्षुन्निवृत्तिः क्षुधाशान्तिर्यस्याः ।

२. सदान्तंगतस्था–क० । —सतां सज्जनानामन्तर्गतस्था ।

३. काम्यो–ख० । —लयेनानन्दो लयानन्दः, सः काम्यो यस्य ।

४. सर्गा ख०, सर्गो–ग० ।—विशालोऽक्षो यस्य, तादृशो मार्गो यस्याः ।

५. नवस्थानलक्ष्मीः–ग० । —मनसि तिष्ठति या सा मनस्था । वा विसर्गलोपः ।

६. सद इति ख०, सज–ग० ।

७. गाथा–ग० ।

८. तरुस्थापदेशा तरुण्यापदेश–ग० ।

९. सुरेशः–ग० ।

१०. नीशा–ख०, नीसा–ग० । —खड्गे निष्ठा यस्याः सा ।

११. कर्त्री भयज्ञानदानी–ग० ।—भयं च ज्ञानं च, तयोर्हन्त्री । ज्ञानमत्र प्रत्यासत्त्या भयजन्यमेव ।

सुधानन्दभक्तो[1] [2]विधानन्दमुक्तिः
[3]शिवानन्दसुस्थो विनानन्दधात्री ।
[4]महावाहनाह्लादकारी सुवाहा
[5]सुरानन्दकारा गिरानन्दकारी ॥ १२२ ।

[6]हयानन्दकान्तिः मतङ्गस्थदेवो
मतङ्गाधिदेवी महामत्तरूपः ।
तदेको महाचक्रपाणिः प्रचण्डा
[7]खिलापस्थलस्थोऽविहम्नीशपत्नी[8] ॥ १२३ ।

शिखानन्दकर्त्ता शिखासारवासो[9] सुशाकम्भरी
[10]क्रोष्टरी वेदवेदीसुगन्धा ।
युगो योगकन्या दवो दीर्घकन्या शरण्यः शरण्या
मुनिज्ञानगम्या[11] सुधन्यः सुधन्या ॥ १२४ ।

शशी वेदजन्या[12] यमी यामवामा
ह्यकामो ह्यकामा सदा ग्रामकामा ।
धृतीशः[13] धृतीशा सदा हाटकस्थाऽ-
[14]यनेशोऽयनेशी भकारो[15]भगीरा ॥ १२५ ।

---

१. विधा–ग० । २. संस्थः संस्था–ग० । ३. शिवा–ग० ।
४. महावाहना–ग० । —महान्ति वाहनानि तैः आह्लादं करोति या सा । ५. सुवाहा–ग० ।
६. हृदानना–ख० । —हयेन (वाहनेन) गमनेनानन्दः, तेन कान्तिर्यस्याः ।
७. खलाप–क० । —कलापस्थले तिष्ठति यः सः । ८. हरि हन्त्री सपत्नी–क० ।
९. देशवासा काशवासी–ग० । —शिखासारे वसति योऽसौ, णिनिप्रत्ययः कर्तरि ।
१०. सुशाकम्मरी सुसाकम्मरी–ग० ।
११. मुनिज्ञानमान्या मुनिज्ञानमान्या–ग० । —मुनिज्ञानेन गम्या ज्ञेया ।
१२. शयी कान्तवासा सकामः सकामा । यसी यास कसा ओत्रासा ग्रामकामा–ग० ।
१३. प्रघीणा–ग० । १४. घनेशो–ख० । —घनानामीशो घनेशः कुबेरः ।
१५. इति तीग्मा–ख० । —भं करोति योऽसौ भकारः ।

चलत्खञ्जनस्थः खलत्खेलनस्था[१]
विवाती[२] किराती खिलाङ्गोऽखिलाङ्गी ।
बृहत्खेचरस्थो बृहत्खेचरी च
महानागराजो महानागमाला ।। १२६ ।

हकारार्द्धसञ्ज्ञा वृतो हारमाला
महाकालनेमि[३]प्रहा पार्वती च ।
[४]तमिस्रा तमिस्रावृतो दुःखहत्या
विपन्नो विपन्ना गुणानन्दकन्या ।। १२७ ।

सदा दुःखहन्ता [५]महादुःखहन्त्री
प्रभातार्कवर्णः प्रभातारुणश्रीः ।
महापर्वतप्रेमभावोपपन्नो[६]
महादेवपत्नीशभावोपपन्ना ।। १२८ ।

महामोक्षनीलप्रियाभक्तिदाता ।
नयानन्दभक्तिप्रदा देवमाता[७] ।। १२९ ।

इत्येतत्कथितं नाथ महास्तोत्रं मनोरमम् ।
सहस्रनामयोगाऽङ्ग[८]मष्टोत्तरसमन्वितम् ।। १३० ।

यः पठेत् प्रातरुत्थाय शुचिर्वाशुचिमानसः ।
भक्त्या शान्तिमवाप्नोति अनायासेन योगिराट् ।। १३१ ।

प्रत्यहं ध्यानमाकृत्य त्रिसन्ध्यं यः पठेत् शुचिः ।
षण्मासात् परमो योगी सत्यं सत्यं सुरेश्वर ।। १३२ ।

---

१. चलत रवाजनस्था–ख० ।

२. किरातः किराती शिताङ्गः शिताङ्गी–ख० । ३. महा–ख० ।

४. विपद्भङ्गकारी विपन्नाशिनी च सुखानन्ददाता महादुःखहन्त्री–ख० । ५. सदा–ख० ।

६. भारो–ग० ।–महापर्वतप्रेमभावेनोपपन्न इति कर्मधारयगर्भ-षष्ठीतत्पुरुषगर्भस्तृतीयातत्पुरुषः ।

७. सर्वदाता–क० । ८. योगाङ्गः–ग० ।

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
अपमृत्य्वादिहरणं वारमेकं पठेद्यदि ॥ १३३ ।

पठित्वा ये [1]न गच्छन्ति विपत्काले महानिशि ।
अनायासेन ते यान्ति महाघोरे भयार्णवे ॥ १३४ ।

अकाले यः पठेन्नित्यं सुकालस्तत्क्षणाद्भवेत् ।
राजस्वहरणे चैव सुवृत्तिहरणादिके ॥ १३५ ।

मासैकपठनादेव राजस्वं स [2]लभेद् ध्रुवम् ।
विचरन्ति महावीराः स्वर्गे मर्त्ये रसातले ॥ १३६ ।

गणेशतुल्यवलिनो [3]महाक्रोधशरीरिणः ।
एतत्स्तोत्रप्रसादेन जीवन्मुक्तो[4] महीतले ॥ १३७ ।

महानामस्तोत्रसारं धर्माधर्मनिरूपणम्[5] ।
अकस्मात् सिद्धिदं काम्यं काम्यं परमसिद्धिदम्[6] ॥ १३८ ।

महाकुलकुण्डलिन्याः भवान्याः साधने शुभे ।
अभेद्यभेदने चैव महापातकनाशने ॥ १३९ ।

महाघोरतरे काले[7] पठित्वा सिद्धिमाप्नुयात् ।
षत्चक्रस्तम्भनं[8] नाथ प्रत्यहं यः करोति हि ॥ १४० ।

मनोगतिस्तस्य हस्ते स शिवो न तु मानुषः ।
योगाभ्यासं यः करोति न स्तवः[9] पठ्यते यदि ॥ १४१ ।

---

१. प्रयच्छन्ति–ग० । २. भवेत्–ग० ।

३. महाक्रोधा–ख० । —महाक्रोध एव शरीरम्, तदस्ति येषां ते ।

४. जीवन्मुक्ताः–ख० । ५. धर्माधर्मयोर्निरूपणम् । षष्ठीतत्पुरुषः, करणल्युडन्तः निरूपणशब्दः ।

६. परमां सिद्धिं ददाति । कप्रत्ययान्तः । ७. तरा–ग० ।

८. भुवनम्–क० । —षट्संख्याकानि चक्राणि तेषां स्तम्भनम्, षष्ठीतत्पुरुषः ।

९. स्तवं पठते–क० ।

योगभ्रष्टो भवेत् क्षिप्रं कुलाचारविलङ्घनात् ।
कुलीनाय प्रदातव्यं [1]न खल्वकुलेश्वरम् ॥ १४२ ।

कुलाचारं समाकृत्य ब्राह्मणाः क्षत्रियादयः ।
योगिनः प्रभवन्त्येव स्तोत्रपाठात् सदामराः[2] ॥ १४३ ।

आनन्दभैरव उवाच—

वद कान्ते रहस्यं मे मया सर्वञ्च विस्मृतम् ।
महाविषं कालकूटं पीत्त्वा देवादिरक्षणात् ॥ १४४ ।

कण्ठस्थाः देवताः सर्वा भस्मीभूताः [3]सुसम्भृताः ।
महाविषज्वालया च मम देहस्थदेवताः ॥ १४५ ।

[4]कैवल्यनिरताः सर्वे प्रार्थयन्ति निरन्तरम् ।
षट्चक्रं[5] कथयित्वा तु सन्तोषं मे कुरु प्रभो ।
षट्चक्रभेदकथनममृतश्रवणादिकम् ॥ १४६ ।

कथित्वा मम सन्तोषं कुरु कल्याणि वल्लभे ।
अमृतानन्दजलधौ[6] सुधाभिः सिक्त[7]विग्रहम् ॥ १४७ ।

कृत्वा कथय शीघ्रं मे चायुषं[8] परिवर्धय ।

आनन्दभैरवी उवाच—

निगूढार्थं महाकाल कालेश जगदीश्वर ॥ १४८ ।

भैरवानन्दनिलय कालकूटनिषेवण[9] ।
इदानीं शृणु योगार्थं मयि संयोग[10] एव च ॥ १४९ ।

---

१. स्तव एष–ख० । २. सदा नरः–क० । —सन्तश्च तेऽमराश्चेति कर्मधारयः ।

३. समरस्मृताः–क० । —समरे स्मृताः, अथवा सुष्ठु सम्भृताः पोषिताः ।

४. वैकुण्ठनिरताः–क० । ५. षट्चक्रवासी सुसूक्ष्मापथस्थापना–ग० पु० अधि० पाठः ।

६. अमृतानन्दमुदधौ–ग० ।

७. सुधाभिषिक्तं–ग० । —सिक्तो विग्रहो देहो यस्य तम् । ८. चायुषमिति–ग० ।

९. कालकूटं निषेवते इति बाहुलकात् कर्तरि ल्युट्प्रत्ययः । सम्बोधने इदं रूपम् ।

१०. संयोगमिति–ख० ।

श्रुत्वा चैतत्क्रियाकार्यं नरो योगीश्वरो भवेत् ।
ममोद्भवः खेऽमले[1] च सर्वाकारविवर्जिते ॥ १५० ।

भ्रूमध्ये सर्वदेहे च स्थापयित्वा च [2]मां नरः ।
भाव्यते चापरिच्छिन्नं ब्रह्मविष्णुशिवात्मकम् ॥ १५१ ।

मम रूपं महाकाल सत्त्वरजस्तमः[3]प्रियम् ।
केवलं [4]रजोयोगेन शरीरं नापि तिष्ठति ॥ १५२ ।

तथा केवलयोगेन [5]तमसा नापि तिष्ठति ।
तथा केवलसत्त्वेन कुतो देही प्रतिष्ठति ।
अतस्त्रिगुणयोगेन धारयामि नवाङ्गकम् ॥ १५३ ।

शनैः शनैः विजेतव्याः सत्त्वरजस्तमोगुणाः ।
आदौ जित्वा रजोधर्मं[6] पश्चात्तामसमेव च ॥ १५४ ।

सर्वशेषे सत्त्वगुणं नरो योगीश्वरो भवेत् ।
गुणवान् ज्ञानवान् वाग्मी [7]सुश्रीर्धर्मी[8]जितेन्द्रियः ॥ १५५ ।

शुद्धनिर्मलसत्त्वं तु गुणमाश्रित्य मोक्षभाक् ।
सदा सत्त्वगुणच्छन्नं[9] पुरुषं काल एव च ॥ १५६ ।

पश्यतीह न कदाचिज्जरामृत्युविवर्जितम् ।
तं जनं परमं शान्तं निर्मलं द्वैतवर्जितम् ॥ १५७ ।

---

१. स्वचित्ते च–ख० ।—खे गगने इत्यर्थः । अस्यैव विशेषणद्वयम् । अमले इति, सर्वाकारविवर्जिते इति च ।
२. मानवः–क० ।

३. तमोवृतमिति–ख० ।—सत्त्वरजस्तमोभिः वृत्तम् । अथवा सत्त्वरजस्तमांसि प्रियाणि यस्य तम् ।

४. राजयोगेन–क० ।
५. तमसमिति–क० ।

६. धर्म्यमिति–ग० । —रजो धर्मो यस्य तम् ।
७. सुखी–ग० ।

८. धर्म–ग० ।—शोभना श्रीर्धर्मो यस्येति फलितार्थः । विग्रहस्तु—सुश्रीश्चासौ धर्मश्चेति कर्मधारयः । पुनः मत्वर्थीय इनिः ।

९. गुणावृतमिति–ग० ।

सर्वत्यागिनमात्मानं कालः सर्वत्र रक्षति ।
जले वा पर्वते वापि महारण्ये रणस्थले ॥ १५८ ।

[1]भूगर्त्तनिलये भीते संहारे दुष्टविग्रहे ।
सन्तिष्ठति महायोगी सत्यं सत्यं कुलेश्वर ॥ १५९ ।

महायोगं शृणु प्राणवल्लभ श्रीनिकेतन ।
योगार्थं परमं ब्रह्मयोगार्थं परन्तपः ॥ १६० ।

ये जानन्ति महायोगं म्रियन्ते न च ते नराः ।
कृत्वा कृत्वा षड्दलस्य साधनं [2]कृत्स्नसाधनम् ॥ १६१ ।

ततः [3]कुर्यान्मूलपद्मे कुण्डलीपरिचालनम् ।
मुहुर्मुहुश्चालनेन नरो योगीश्वरो भवेत् ॥ १६२ ।

एकान्तनिर्मले देशे दुर्भिक्षादिविवर्जिते ।
वर्षमेकासने योगी योगमार्गपरो भवेत् ॥ १६३ ।

पद्मासनं सदा कुर्याद् [4]बद्धपद्मासनं तथा ।
महापद्मासनं कृत्वा तथा [5]चासनमञ्जनम् ॥ १६४ ।

[6]तत्पश्चात् स्वस्तिकाख्यञ्च बद्धस्वस्तिकमेव च ।
[7]योगाभ्यासे सदा कुर्यात् मन्त्रसिद्ध्यादिकर्मणि ॥ १६५ ।

---

१. भूर्गता–क० । —भुवो गर्तं, तेन निलये 'भूगर्तनिलये' इति पाठेऽयं विग्रहः ।

२. कृष्ण–ग० ।

३. मलपद्म मूलपद्म–ख० ।

४. बद्धैकमासनमिति–ग० । —बद्धमेकमासनम् ।

५. चालनभञ्जनमिति–ग० ।

६. तत्पश्यतीति–क० ।

७. महास्वस्तिकमाकृत्य त्रिगुणं वशमानयेत् । —योगासनविधेर्निरूपणमेतत् ।
तत्रासनं बद्धभद्रासनं कुर्यात् क्रमेण तु ॥
महाभद्रासनं कृत्वा कार्मुकासनमाश्रयेत् ।
बद्धकार्मुकमेवं हि महाकार्मुकमेव च ॥ इति क० पु० अधिकः ।

चक्रासनं सदा योगी योगसाधन[1]कर्मणि ।
बद्धचक्रासनं नाम महाचक्रासनं[2] तथा ॥ १६६ ।

कृत्वा पुनः प्रकर्तव्यं बद्धयोगेश्वरासनम् ।
योगेश्वरासनं कृत्वा महायोगेश्वरासनम् ॥ १६७ ।

वीरासनं ततः कुर्यात् महावीरासनं तथा ।
बद्धवीरासनं कृत्वा नरो योगेश्वरो भवेत् ॥ १६८ ।

ततः कुर्यान्महाकाल बद्धकुक्कुटमासनम् ।
महाकुक्कुटमाकृत्य केवलं कुक्कुटासनम् ॥ १६९ ।

मयूरासनमेवं हि [3]महामयूरमेव च ।
बद्धमयूरमाकृत्य नरो योगेश्वरो भवेत् ॥ १७० ।

एतत् सर्वं प्रवक्तव्यं विचार्यं सुमनःप्रिय ।
अभिषेकप्रकरणे आसनादिप्रकाशकम् ॥ १७१ ।

कथितव्यं विशेषेण इदानीं श्रृणु षट्क्रमम् ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ १७२ ।

ततः [4]परशिवो देवः षट्शिवाः षट्प्रकाशकाः ।
एतेषां षड्गुणानन्दाः शक्तयः[5] परदेवताः ॥ १७३ ।

षट्चक्रभेदनरता महाविद्याधिदेवताः ।
[6]एतेषां स्तवनं कुर्यात् परदेवसमन्वितम् ॥ १७४ ।

एतत्प्रकारकरणे [7]यश्च प्रत्यहमादरात् ।
क्रियानिविष्टः सर्वत्र भावनाग्रहरूपधृक् ॥ १७५ ।

---

१. त्रिशूलमिति–ख० । —त्रयाणां शूलानां समाहारस्त्रिशूलम् ।

२. भद्रासनमिति–ख० । —भद्रमासनमिति परिभाषिकोऽर्थो ज्ञेयः । ३. मायारम्भेण–ग० ।

४. परशिवो शम्भो–ग० । —परशिवः शम्भो इत्युचितः पाठः ।

५. षड्गुणानन्दशक्तयः–ग० । —षट्संख्याकैर्गुणैर्युत आनन्दः, तस्य शक्तयः ।

६. एतासामिति–क० । ७. माथुगः–ग० ।

स पश्यति जगन्नाथं [1]कमलोपगतं हरिम् ।
आदौ हरेर्दर्शनञ्च [2]कारयेद्येन कुण्डली ।। १७६ ।

ततो रुद्रस्य सञ्ज्ञायां[3] लाकिन्याः शुभदर्शनम् ।
सर्वशः[4] क्रमशो नाथ दर्शनं प्राप्यते नरः ।। १७७ ।

शनैः शनैर्महाकाल कैलासदर्शनं भवेत् ।
क्रमेण सर्वसिद्धिः स्यात् अष्टाङ्गयोगसाधनात् ।। १७८ ।

अष्टाङ्गसाधने काले यद्यत् कर्म करोति हि ।
[5]तत्सर्वं परियत्नेन शृणु सादरपूर्वकम्[6] ।

तत्क्रियादिकमाकृत्य[7] शीघ्रं योगी भविष्यति[8] ।। १७९ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे [9]द्विचत्त्वारिंशत्तमः पटलः ।।

---

१. कमलोरुगत–ग० । —कमलां महालक्ष्मीमुपगत इति तात्पर्यम् । २. कारयत्येव–ग० ।
३. सञ्ज्ञाया–ग० । ४. सर्वासां क्रमतो नाथ–ग० । ५. शृणु–क० ।
६. आदरेण सहितः सादरो व्यापारः, सः पूर्वः यस्मिन् कर्मणि, तद् यथा स्यात्तथा ।
७. माश्रित्य–ग० । ८. भविष्यसि–ख० । ९. त्रिचत्त्वारिंशत्तमः पटलः–ख० ।

अथ त्रिचत्त्वारिंशः पटलः

आनन्दभैरवी उवाच—

अथ कामातुराणाञ्च कामनि[1]र्मूलहेतुना ।
कथयामि महाकाल यत् कृत्वा कामिनीवशम् ॥ १ ।

तत्प्रकारं प्रवक्ष्यामि योगसाधनहेतुना ।
[2]हस्तासनं समाकृत्य ऊर्द्ध्वे पद्मासनं चरेत् ॥ २ ।

शिरोमूले करद्वन्द्वं नियोज्य जपमाचरेत् ।
अल्पाल्पधारणं कुर्यात् श्वाससंख्यां समाचरेत् ॥ ३ ।

श्वाससंख्यां तदा कुर्याद् यदा कुम्भकसुस्थिरः ।
विना श्वाससंख्यां च कुतो योगिवरो वशी ॥ ४ ।

विना संख्याप्रयोगेण विना कुयोगवारणात् ।
कदाचिन्न प्रकर्तव्यं संख्याकुम्भकवर्जितः ॥ ५ ।

अल्पाल्पकुम्भकं कुर्यात् खेचरप्रियकर्मणि ।
सर्वकाले प्रकर्तव्यं सर्वकाले सुखी भवेत् ॥ ६ ।

आनन्दकल्पमाकृत्य विजयाद्यासवादिभिः ।
क्रमेण भेदनं कुर्यात् ततः साधकयोगिराट् ॥ ७ ।

योगिनामपरिच्छिन्नं भावं विद्युत्प्रभाकरम् ।
विद्युत्कोटिसमाभासं[3] वारिधारासमाकुलम् ॥ ८ ।

यद्येवं [4]सुतभावज्ञा विपाकेन पतन्ति ते ।
ते यान्ति परमं स्थानं ते यान्ति कोटिराज्यपाः ॥ ९ ।

---

१. निर्मणि–ग० ।   २. मुण्डासन–ग० ।   ३. समाभाषम्–ग० ।

४. यद्येव सुतभावकाः इति यद्येवं त्वं भावशून्य–क० । यद्येव सुतभावद्यो–ग० ।

ते भोगिनो योगिनश्च ते लोकपालकाः स्मृताः ।
ते महद्गुणसम्भोग्या म्रियन्ते न कदा कुतः ॥ १० ॥

ते [1]भवन्ति महाश्रेष्ठास्ते भवन्ति सुधाकराः ।
ते भेदकरणे युक्तास्ते मनुष्या न देवताः ॥ ११ ॥

ते सर्वे यान्ति सर्वत्र ते शिवास्ते च किङ्कराः ।
ते मे भक्ता महाकाल इति मे [2]स्वागमोदयम् ॥ १२ ॥

ये [3]भजन्ति तव पदाम्भोजं भावपरायणाः ।
ते [4]ज्ञानिनो भवन्त्येव तेषां कालो वशो भवेत् ॥ १३ ॥

ये प्राणवायुसंयोगा ये प्राणपरिरक्षकाः ।
आत्महत्यां परीहाय ब्रह्मलोकं मुदान्विताः ॥ १४ ॥

यान्ति नाथ ध्यानपराः संसारार्थविवर्जिताः ।
अरण्यवासिनो ये च [5]नारण्यवासिनो नराः ॥ १५ ॥

एकान्तनिर्जने देशे सर्वविघ्नविवर्जिते ।
षट्चक्रभेदमाकृत्य ते नराः फलभागिनः ॥ १६ ॥

महाकालफलं यस्तु [6]सदेच्छति सतां गतिम् ।
स एव योगी भूमध्ये स्थित्वा सर्वत्रगो भवेत् ॥ १७ ॥

सर्वदेशे सदा पूज्यः सर्वेशो निर्मलोऽद्वयः ।
[7]अनाद्यनन्तविभवः कालात्मा[8] स भवेत् क्षणात् ॥ १८ ॥

---

१. महन्ति–ग० ।

२. बुद्धिमेधागमोदयम्–ग० । —बुद्धेर्मेधायाश्चागमस्योदयो यस्मिन् कर्मणि तत् ।

३. ये भजन्ति तव पदाम्भोजभावनतत्पराः–क० ।
ये भवन्ति पदाम्भोजे तव भावपरायणाः–ख० ।–पदमम्भोजमिव, तस्मिन् पदाम्भोजे इत्यर्थः ।

४. ते भेदज्ञा प्रभवन्ति–ग० । — भेदं जानन्ति इति कप्रत्ययान्तः ।

५. ये चान्यवासिनो नराः–क० ।

६. सदैवैति सतीगतिः (विशुद्धधीः)–ग० ।

७. न विद्यते आदिर्यस्य तद्, न अन्तो यस्य तत् । एतादृशमनादि अनन्तं विभवं यस्य सः ।

८. काल आत्मा यस्य सः । अथवा कालस्यापि आत्मा ।

एतेषां साधनं शीघ्रं [1]सिद्धिविद्यासुकल्पनम् ।
एतद्रूपं निजं [2]ध्यात्वा भेदं कृत्वा निजस्थलम् ॥ १९ ।

मूलाधारं स्वाधिष्ठानं भेदज्ञानी विभेद्य[3] च ।
कुर्यात् [4]परमसन्दर्भं मणिपूरे विचक्षणः ॥ २० ।

कृत्वा च दर्शनं विद्वान् श्रीकृष्णचरणाम्बुजम् ।
स्वाधिष्ठानादिदेवेन्द्रं शक्तियुक्तं निरञ्जनम् ॥ २१ ।

राकिणीराधिकाव्याप्तं त्रिलोकरक्षणं परम् ।
परमाकाशनिलयं त्रैगुण्यं वारिरूपिणम् ॥ २२ ।

वाञ्छाकल्पतरोर्मूलवासिनं शिववैष्णवम् ।
विलोक्यानन्दहृदयोऽशङ्कः सर्वत्र दर्शकः ॥ २३ ।

कृत्वा योगी सदाभ्यासी मणिपूरं विलोकयेत् ।
मणिपूरं महाचिह्नं सिद्धिक्षेत्रं [5]सुधामयम् ॥ २४ ।

हिरण्यकोटिदानेन गोकोटिदानहेतुना ।
कोटिब्राह्मणभोज्येन यत्फलं लभते नरः ॥ २५ ।

तत्फलं लभते ध्यात्वा मणिपूरं मनोरमम् ।
मणिपूरं महास्थानं योगिनामप्यदर्शनम् ॥ २६ ।

सूक्ष्मातिसूक्ष्मं परमं ज्ञानिनां ज्ञानगोचरम् ।
अप्रकाश्यं महागुह्यं[6] योगयोगेन[7] लभ्यते ॥ २७ ।

---

१. सिद्धिसन्ध्यासुकल्पनम् क० । —सिद्धीनां विद्याः, तासु कल्पनम् ।

२. ज्ञात्वा—ग० ।

३. विभिद्य—क० । —विभेद्य इति पाठे तु विपूर्वकाद् भिदेर्ण्यन्तात् क्त्वो ल्यबादेशः ।

४. नन्दार्द्धमिति गानन्दार्थं—ख० । ५. हिरण्मय—क० । ६. स्थान—क० ।

७. योगानां योगः सम्बन्धो यस्मिन्, स योगयोगस्तेन ।

आनन्दभैरव उवाच—

योगार्थं यत्र कमले कोटिविद्युत्समप्रभे ।
कोटिकालाग्निमिलिते कोटिचन्द्रविनिर्मिते ॥ २८ ।

कोटिसूर्यादिकिरणे मनः केन विलीयते ।
सूची[1]रन्ध्रे यथा सूत्रं तदेव फलदं सुखम् ॥ २९ ।

[2]यन्न दृष्टं श्रुतं क्वापि ज्ञानं न तत्र सुन्दरि ।
तत्र केन प्रकारेण मनोनिवेशनं भवेत् ॥ ३० ।

यत्र न गमनं नृणां तस्य देवस्य यत्फलम् ।
तत्फलं किं न जानाति अदृष्टे गमनं कुतः ॥ ३१ ।

कुतो राज्ञां न[3]सम्पत्तिः कुतो वा [4]स्वार्थदर्शनम् ।
कुतो वा जायते सिद्धिर्भेदने किं फलं [5]भवेत् ॥ ३२ ।

तत्त्वं जानासि देवेशि तत्प्रकारं प्रकाशय ।

आनन्दभैरवी उवाच—

यदुक्तं तद्धि सकलं सफलं परमेश्वर ॥ ३३ ।

तत्र[6] पूर्वं योगधर्मस्वाश्रयं[7] शृणु तत्क्रमम् ।
पूर्वंस्मरणमात्रेण जीवन्मुक्तो भविष्यसि ॥ ३४ ।

जीव एव [8]महाभाग लोकानां मोक्षबन्धगः ।
स जीवो[9] वायुरूपेण महाबलपराक्रमः ॥ ३५ ।

---

१. विद्धे तथा–ग० । —सूच्या रन्ध्रे छिद्रे इत्यर्थः ।
२. मया दृष्टं श्रुतं नापि–ग० ।
३. राज्ञाञ्च–ग० । —स्वार्थस्य दर्शनम् ।
४. आत्मदर्शनमिति–क० ।
५. लभेत–ख० ।
६. तब क–ग० ।
७. तत्र पूर्वं योगधर्ममाश्रित्य–ख० ।
८. महान् भागो यस्य ।
९. जीव एव हि कालेन योगानां मोक्षबन्धनः महाकाल–ख० ।

गच्छति प्रत्यहं नित्यं सर्वदा च पुनः पुनः ।
पुनरायाति धरणौं[1] स्वभावेन निरन्तरम् ॥ ३६ ।

नानाभावप्रियः सोऽपि नानाकारनिरूपकः ।
नानाधर्मप्रियः [2]शुद्धोऽशुद्धवेशधरो महान् ॥ ३७ ।

कन्दर्पनिलयो योगी स योगी परमार्थवित् ।
स ज्ञानी निरहङ्कारी [3]सोऽहङ्कारी शरीरधृक् ॥ ३८ ।

सर्वगन्धप्रियोऽदृश्यो भावयेत्तां[4] रहस्यवित् ।
स एव निष्कलः शुद्धः सदा ध्यानपरायणः ॥ ३९ ।

[5]यदा चात्मनि ब्रह्माण्डे[6] ब्रह्मणि त्वयि शङ्करे[7] ।
तन्मनो विलयं याति [8]तदा भावो [9]महान् स्मृतः ॥ ४० ।

तद्भावः परमं ज्ञानं न कथ्यं[10] [10]विपरीतकम् ।
[11]आधारं सुसुखं नित्यं स्वल्प[12] [12]कालविवर्जितम् ॥ ४१ ।

अत्यन्तधर्मसन्धानं[13] प्राप्य योगी भवेन्नरः ।
शनैः शनैः प्रगन्तव्यं तत्र तत्र [14]सुदर्शनम् ॥ ४२ ।

---

१. अवनीमिति–क० । —अवति रक्षति सर्वं जीवजातमित्यवनिः ।

२. प्रियः शुद्धः शुद्धवेशध्वंशे महानिति–क० ।

३. नाहङ्कारी–क० । —अहंकारोऽहंभावोऽस्ति यस्य सः, इनिप्रत्ययो मत्वर्थीयः ।

४. ता–क० । —भावयेत्, मनसा चिन्तयेत् । ५. सदा–क० ।

६. ब्रह्माण्ड–ग० । ७. ब्रह्मण्यद्वय–ख० । ८. यदभाव तदभाव–ख० ।

९. महास्मृतः–ग० । १०. मकथ्यमिति–क० ।

११. स्वाधीन–ख० । —स्वस्याधीनम् ।

१२. कार्येति–ख० ।

१३. पञ्चानमिति–क० । —अत्यन्तं धर्मस्य सन्धानं योजनम् ।

१४. स्वदर्शनं–क० । —शोभनं दर्शनम्, स्वस्यात्मनो दर्शनं वा ।

तत्र तत्र महासिद्धो भूत्वा संसारपुत्रवान्[1] ।
योगिनां बहुकालस्थं मृतानामल्पकालकम् ।। ४३ ।

श्वासधारणमाकृत्य बहुकालं सुखी भवेत् ।
यथा बृहस्पतिः श्रीमान् यथा[2] सूर्यो दिवाकरः ।। ४४ ।

तथा प्रकाशमाकुर्यात् कोटिभिः [3]स्तोत्रनामभिः ।
स्तुत्वा भूत्वा महाद्रव्यैस्तर्पयित्वा यथाक्रमम् ।। ४५ ।

अभिषिक्तः[4] पुनर्ध्यात्वा पूजयित्वा यथाविधि ।
मानसोपचारद्रव्यैः स्वधायुक्तैरथापि वा ।। ४६ ।

परमानन्दितो भूत्वा भावयेत् पीठदेवताः ।
भावयित्वा ततो जप्त्वा धर्माधर्मौ विचिन्तयेत् ।। ४७ ।

देवतायां मनो योज्य स्थापयित्वा स्वपीठके ।
पुनरुत्फुल्लकमलं मुद्रितं [5]परिकारयेत् ।। ४८ ।

षड्दलं[6] मूर्च्छितं कृत्वा दलाग्रे संविशेत् सुधीः ।
सदानन्दः सर्वमयो वेदवेदान्तनामभिः ।। ४९ ।

स्तवकोटिभिरेकत्र ध्यात्वा संहारमुद्रया ।
अधोमुखे दशदलकमलाग्रे नियोजयेत् ।। ५० ।

षड्दलाग्रं महाकाल नियोज्य गमनं चरेत् ।
ततो गच्छेत् प्रज्वलिते पद्मे दशदले पुरे[7] ।। ५१ ।

प्रविश्य कर्णिकामध्ये तन्मयस्तत्क्षणाद्भवेत् ।
तत्क्षणात्तन्मयो भूत्वा कुण्डलीचक्रसंस्थितः[8] ।। ५२ ।

---

१. युक्तिमानिति–ख० । —संसार एव पुत्रो भवति इति तद्वानिति भावः । २. तथा–ग० ।
३. तत्र नामभिः–क० । ४. अभिषिच्य–क० । —अभिषिक्तः सम्पन्नाभिषेकः ।
५. परिकल्पयेत्–ख० । ६. षड्गुणम्–क० ।
७. परे–क० । ८. कुण्डलीचक्रे संस्थित इति सप्तमीघटितः समासः ।

असाध्यसाधनं सर्वं [1]मणिपूरस्थनिर्मलम् ।
मणिपूरे महापीठे ध्यानगम्ये [2]सति प्रभो ॥ ५३ ।

मनोनिवेशनं कृत्वा नरो मुच्येत संकटात् ।
मनोयोगी मनोभोगी मनोभक्तो [3]मनोयुवा ॥ ५४ ।

मन एव मनुष्याणां कारणं [4]त्राणमोक्षयोः ।
कारणं सर्वभावानां तद्भावं सन्त्यजेद् बुधः ॥ ५५ ।

सर्वभावं विहायापि महाभावं समाश्रयेत् ।
भावेन लभ्यते मोक्षो भावेन लभ्यते सुखम् ॥ ५६ ।

एतद्भावं सदा कुर्याद् भावाद्भवति[5] योगिराट् ।
भावेन भक्तिमाप्नोति विषयाद्भावमाश्रयेत् ॥ ५७ ।

विषयं विकृतिग्राह्यं सुकृतिज्ञानवर्जितम् ।
[6]त्यक्त्वा दिव्यं महापीठं मणिपूरं समाश्रयेत् ॥ ५८ ।

महायन्त्रे मनो दत्वा निर्माणं कारयेद् बुधः ।
मणिभिर्ग्रंथनं[7] कृत्वा नानामणिविभूषितम् ॥ ५९ ।

सुपीठं [8]कुलपीठे वा लिङ्गपीठमथापि वा ।
श्रीविद्यापीठमालिख्य विभाव्य च पुनः पुनः ॥ ६० ।

ततः प्रस्फुटिते पद्मे दलाग्रे षड्दलस्य च ।
स्थापयित्वा महाविष्णुं पूजयित्वा सुसंयतः ॥ ६१ ।

---

१. मणिपूरं सुनिर्मलमिति–क० । —मणिपूरस्थं निर्मलमित्यर्थः मूलस्थपाठे । मणिपूरं सुनिर्मलमिति भावो द्वितीये पाठे ।

२. सतामिति–क० । ३. मनोवरः–क० । ४. भोग–ग० ।

५. तरति–क० । ६. अत–ग० । ७. ग्रन्थन–ग० ।

८. परमं ध्यात्वा कुलपीठमथापि वा–ग० । कुलपीठे इति पाठे षष्ठीसमासः ।

जप्त्वा च तन्मयो भूत्वा निधाय मणिपूरके ।
दृढाकारमूर्ध्वगतं[1] षड्दलं[2] परिरक्षयेत्[3] ॥ ६२ ॥

ततश्चोर्द्ध्वंतरे स्थाने महोच्चोत्तरसुन्दरे[4] ।
मनोनिवेशनं कृत्वा शक्ति रुद्रं समाश्रयेत् ॥ ६३ ॥

चैतन्यरूपिणीं शक्ति चैतन्यं रुद्ररूपिणम् ।
[5]तत्र भद्रात्मकं रौद्रं रौद्रीं प्रकाशकारिणीम् ॥ ६४ ॥

भक्त्या पुनः पुनर्ध्यायेदूर्ध्वरेतास्तमीश्वरम्[6] ।
प्रगच्छन्ति चोर्द्ध्वमार्गे[7]ध्येया योगिभिरेव च ॥ ६५ ॥

[8]अहं देवी परानन्दा मणिपूरनिवासिनी ।
तथा श्रीलाकिनीशक्तिः श्रीरुद्रस्त्वं[9] न संशयः ॥ ६६ ॥

रुद्ररूपी महादेवो रुद्ररूपा सरस्वती ।
सर्वदा ऊर्द्ध्वगामी च सा शक्तिरूर्द्ध्वगामिनी ॥ ६७ ॥

ऊर्द्ध्वमार्गं काशयन्तीं योगिनीं योगमातरम् ।
महारुद्रं तथा ध्यात्वा मणिपूरे सुनिर्मले ॥ ६८ ॥

ऊर्द्ध्वमुखं समाकुर्याद् महापद्मं मनोरमम् ।
मणिपूरं महाकान्तं मणिकोटिसुनिर्मलम्[10] ॥ ६९ ॥

---

१. मृदुगत–क० । —ऊर्ध्व गतमिति तात्पर्यम् ।

२. षड्गुणमिति–ग० । —षण्णां गुणानां समाहारः षड्गुणमिति ।

३. परिचिन्तयेत्–ख० ।

४. महोध्योद्भवसुन्दरे–ग० ।

५. भद्रं भद्रात्मिकां रौद्रं रौद्रीं प्रकाशकारिणीम्–ग० ।

६. ऊर्ध्वरेतारमीश्वरम्–ग० ।

७. ध्यायियोगिवरः सदा–क० ।

८. स्वयमिति–ग० ।

९. श्रीरुद्रस्यामिति–ग० ।

१०. मणीनां कोटिसु सुनिर्मलम् ।

कोटिकोटिशरच्चन्द्र[1] पूर्णज्योतिःसमाकरम् ।
ऊर्द्ध्वमुखं समाकुर्यात् स्वयंभावेन जायते ।। ७० ।

यदि चोर्द्ध्वमुखं पद्मं [2]यन्त्रमण्डलसंयुतम् ।
अतिकोमलपत्रेषु भाति चात्यद्भुतङ्करम् ।। ७१ ।

लेपयित्वा योजयित्वा[3] स्थापयित्वा पुनः पुनः ।
प्रापयित्वा महारुद्रं त्रैलोक्यजननीं शिवाम् ।। ७२ ।

रुद्राणीं रौद्रशक्तिञ्च लाकिनीं [4]लोकसाक्षिणीम् ।
कुम्भकं प्राणवायोश्च प्राणवायोश्च योजनम् ।। ७३ ।

एकत्र मिलनं कृत्वा भावनं [5]परिकारयेत् ।
भावेन लभ्यते मोक्षो भाव एव निजप्रियः ।। ७४ ।

मनो निवेश्य तत्रस्थो रुद्राराधनमाचरेत्[6] ।
तथा श्रीलाकिनीदेव्याः परमाद्भुतसाधनम् ।। ७५ ।

शृणुष्व परमानन्द भैरव प्रियवल्लभ[7] ।
ममोपदेशं[8] सन्त्यज्य कोऽपि सिद्धो न सम्भवेत् ।। ७६ ।

ममाज्ञाबलयोगेन[9] सिद्धो भवति मानवः ।
मुक्तिमूलं महाभावं मुक्तिमूलं हि साधनम् ।। ७७ ।

मुक्तिक्रमेण कालेन सिद्धो भवति साधकः ।
मम योगक्रमेणैव मम [10]तन्त्रावलोकनात् ।। ७८ ।

---

१. चन्द्र–ग० । २. यन्त्रचन्द्रमण्डसंयुतम्–ग० । —यन्त्राणां मण्डलानि तैः संयुतम् ।

३. च तत्सर्वमिति–ग० । ४. लोकरक्षिणीम्–ग० । —लोकानां साक्षिणीम्, रक्षिणीं वा ।

५. परिकल्पयेत्–क० । ६. माश्रयेत् इति–क० । —रुद्रस्याराधनं समाचरेत् ।

७. प्राणवल्लभ इति–क० । —प्राणानां वल्लभः, प्रियः ।

८. ममोपदेशविधिना इति–क०, ग० ।

९. मम आज्ञाया बलं तस्य योगेन सम्बन्धेनेत्यर्थः ।

१०. मन्त्रविलोकनमिति–ख०, ग० । —तन्त्राणामवलोकनात्, मन्त्रस्य विलोकनमिति वा ।

कोऽपि नाथ ब्रह्मयोगी भवत्येव न चाखिले ।
सर्वे च योगिनः शीघ्रं प्रभवन्ति[1] न संशयः ॥ ७९ ।
स्फुटाकारदलं कृत्वा विन्यासं तत्र कारयेत् ।
महायोगिकुलन्यासं विद्यान्यासं समाचरेत् ॥ ८० ।
सर्वन्यासं निजन्यासं [2]ज्ञानजालं समाचरेत् ।
मानसक्रियया व्याप्तं देहं [3]मधुरसम्प्लुतम् ॥ ८१ ।
शिवरूपिणमात्मानं वैष्णवं ज्ञानचक्षुषम् ।
[4]एकाकारं मूलयन्त्रध्यानं तत्र समाचरेत् ॥ ८२ ।
ध्यात्वा चार्घ्यं समाकुर्यात् कुलचक्रक्रमेण तु ।
आत्मानमपरिच्छिन्नं विचिन्त्य पुनरेव च ॥ ८३ ।
सन्ध्यायेन्निजचैतन्यदेवतां कुलदेवताम् ।
पाद्यार्घ्यादिक्रमेणैव पूजयित्वाऽप्यहर्निशम् ॥ ८४ ।
परिवारांस्ततो ध्यात्वा तत्सर्वान् परिपूजयेत् ।
धूपदोपौ ततो दद्याद् निजपूजाविधानतः ॥ ८५ ।
प्राणायामं दीपनादौ[5] कुर्यात् साधक एव च ।
भक्त्या ध्यात्वा मनुं जप्त्वा मणिपूरस्थदैवते[6] ॥ ८६ ।
जपं [7]समर्प्य विधिना प्राणायामं पुनस्त्रयम्[8] ।
प्रणम्य स्तोत्रकवचैः स्वदेवीं हृदि चार्पयेत्[9] ॥ ८७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे भैरवभैरवीसंवादे मणिपूरचक्रभेदप्रकारो नाम [10]त्रिचत्वारिंशत्तमः पटलः ॥

---

१. भवन्ति च इति–ग० । २. न्यासजालमिति–ग० ।—न्यासानां जालं समूहम् ।
३. मधुरसंयुतमिति–क० ।—मधुरेण संयुतम् ।
४. एकाकारं मूलमन्त्रं ध्यानमिति–ग० ।—एक आकारो यस्य तम् ।
५. द्वादशादौ–ग० । ६. मणिपूरस्थं दैवतं तत्रेत्यर्थः ।
७. समाप्येति–ग० ।—समर्पणं समापनं वा कृत्वा ।
८. पुनर्द्वयमिति–ग० ।—त्रयमित्यस्य स्थाने द्वयमिति पाठो ज्ञातव्यः ।
९. चालयेत्–ग० ।—अर्पयेदिति शोभनः पाठः । १०. चतुश्चत्वारिंशदिति–ख० पु० पाठः ।

अथ चतुश्चत्त्वारिंशः पटलः

आनन्दभैरवी उवाच—

मणिपूरविभेदार्थं[1] शृणु वक्ष्यामि तत्त्वतः ।
यं ज्ञात्वा मूढलोकाश्च प्रविशन्ति महाघटे ॥ १ ।

अमूढत्त्वं प्राप्नुवन्ति[2] भवन्ति योगिनोऽमराः ।
खेचरत्त्वं प्राप्नुवन्ति[3] सांख्ययोगनिषेविणः[4] ॥ २ ।

महापातकमुख्यानां नाशं शीघ्रं महारिपुम् ।
कियत्कालेऽनले दोषे जले पर्वतकानने ॥ ३ ।

कुर्वन्ति च [5]दिदृक्षूणां देवतावशमेव च ।
मणिपूरं महापीठं ध्यायेद् यः [6]प्राणसंयमम् ॥ ४ ।

तथा [7]पञ्चामराशवासिद्धिं कृत्वा पूरं विभेदयेत् ।
[8]त्रिलोकजननीं सत्यां शिवामाद्यां त्रियोगिनीम् ॥ ५ ।

मूलाधारात् समुत्पत्त्य गच्छन्ती[9] रसषड्दले ।
प्रकाशं षड्दलं कृत्वा प्रगच्छन्ती [10]प्रभान्विता ॥ ६ ।

---

१. विभेदाय—क० ।

२. अमूढत्वमवाप्नोतीति—ख०, ग० । —मुहधातुर्वैचित्यार्थकः, ततः क्तप्रत्यये कृते सति ढत्व-घत्व-ष्टुत्व-ढलोप-दीर्घेषु कृतेषु मूढशब्दो निष्पद्यते । तदर्थश्च अस्थिरचित्तः । न मूढोऽमूढः तस्य भावोऽमूढत्वम् ।

३. मवाप्नोति—ख०, ग० ।

४. सांख्यतत्त्वनिषेविणः—ख०, ग० ।

५. दिग्विदिक्षूणामिति—क० ।

६. प्राणसंयमः—क० ।

७. पञ्चाशवासिद्धमिति—ख०, ग० । —पञ्च च ते आशवाश्च पञ्चाशवाः, तैरसिद्धम् ।

८. पुस्तके नास्ति—क० ।

९. प्रगच्छन्ति रसच्छदे ।

१०. प्रपूर्वकाद् गमेर्लटः, शत्रादेशे स्त्रीत्वविवक्षायां ङीप् ।

मणिपूरे महाचक्रे त्रैलोक्यजपसाधने ।
[1]सिद्धीनां निलये काम्ये कमनीये मनःप्रिये ।। ७ ।

[2]मनःप्रिया महादेवी [3]सर्वोल्लासनकारिणी ।
खेचरी महदानन्दमण्डिता मन्त्रयोगिनी ।। ८ ।

अनुग्रहकरी सिद्धा विभाव्या तत[4] एव हि ।
[5]आनन्दघनसन्दोहमात्मज्ञानं सुनिर्मलम् ।। ९ ।

मणिपूरं संविभाव्य किन्न सिद्धयति भूतले ।
अणिमा लघिमा व्याप्तिर्महाश्रेष्ठादिसिद्धिभाक् ।। १० ।

कौलो वा वार[6]मुख्यो वा ज्ञानी वा साधकोत्तमः ।
योगाभ्यासं यः करोति मणिपूरं समाश्रयेत् ।। ११ ।

मणिपूरस्थितं यः स्तौति नियतः शुचिः ।
स्तवराजस्य पाठेन प्रबुद्धा कुण्डली भवेत् ।। १२ ।

सा देवी परमा माया मणिपूरे [7]स्थिता शिवा ।
प्रबुद्धां कारयत्येव ततः सिद्धो भवेन्मनुः ।। १३ ।

सिद्धे मनौ पराप्राप्तिरिति मे तन्त्रनिर्णयः ।
यदि चैतन्यमिच्छन्ति कुण्डलिन्याः पराक्रमम् ।। १४ ।

जानाति निजदेहे च '[8]महोदयमनुत्तमम्[9]' ।
तेषां चैतन्यहेतोश्च देवतानां कुलेश्वर ।। १५ ।

---

१. सिद्धिशून्यालये–क० ।
२. पुनः प्रिया–ख०, ग० ।
३. सर्वोल्लङ्घनकारिणी–क० ।
४. तत एवाहि–क० ।
५. घट–ख०, ग० ।
६. नारकाख्यो वा ।
७. मणिपूरनिवासिनी–क० ।
८. महानुदयो महोदयः, सन्महदिति कर्मधारयसमासः ।
९. नास्ति उत्तमो यस्मादिति बहुव्रीहिसमासः, न तु नञ्तत्पुरुषः ।

महास्तोत्रं समाकुर्यात् प्रत्यहं सिद्धिहेतुना ।
सिद्धिकार्यं धर्मकार्यं मणिपूरे [1]समाप्नुयात् ॥ १६ ।
[2]मणिपूरनिवासिन्याः भेदनं ज्ञानसाधनम् ।
सहस्रनाममम्मलं सिद्धिद्रव्यनिरूपणम् ॥ १७ ।
नित्यसिद्धिं काम्यसिद्धिं मणिपूरे समाश्रयेत् ।
प्राणबुद्ध्या स्वेष्टदेवीं पूजयेल्लाकिनीं पराम् ॥ १८ ।
स्वदेवतां पूजयेद्वै मणिपूरे महालये ।
मणिपूरस्थितां रौद्रीं महाशक्तिं महोदयाम् ॥ १९ ।
सर्वसञ्चारिणीं योग्यां महायोगिप्रियां पराम् ।
निजदेवीपदाम्भोज[3]पूजावत् पूजनं चरेत् ॥ २० ।
पूजां समाप्य विधिना स्तोत्रं देव्याः समाचरेत् ।
तत्प्राणवायुरूपेण[4] सिद्धीनां नाशहेतवे ॥ २१ ।
कृतं स्तोत्रं कोटिनाम ब्रह्मणा गुणकात्मना ।
तत्सर्वं प्रकरोष्येतत् प्रकारं ज्ञानशङ्कर ॥ २२ ।
एतत्स्तोत्रप्रसादेन योगिनस्ते महौजसः ।
अहङ्कारघटी[5]ज्ञानं महाव्याधिनिवारणम् ॥ २३ ।
महास्तवनमेवं हि साक्षादानन्दवर्धनम् ।
नय[6] भक्तिप्रदं शुद्धं [7]शुद्धानामप्यगोचरम् ॥ २४ ।
शिवां शक्यामाद्यां दशदलगतां रुद्रमहिषीं
विशालाक्षीं[8] सूक्ष्मां [9]शशियुतजटाजूटमुकुटाम्[10] ।
महाविद्युत्कोटिप्रियजडितपीठे त्रिनयनां
महालोकिन्याख्यां दशदल[11]कलां भावयति कः ॥ २५ ।

---

१. समाश्रयेत्–क० ।
२. मणिपूरनिवासिन्या इत्यारभ्य मणिपूरे समाश्रयेदित्यन्तं कपुस्तके नास्ति ।
३. पदाम्भोजमिति–ग० ।
४. तद्वायुप्राणसदने–क० ।
५. अहङ्कारपराणाञ्च–क० ।
६. लय—क०, भक्तिप्रदमिति च–क० ।
७. शुद्धानामात्मगोचरमिति–क० ।
८. विशालाक्षीम्–ख०, ग० ।
९. शत–ख०, ग० ।
१०. शशिना युतानि जटाजूटमुकुटानि यस्याः सा, अत्यन्तं प्रकाशमयी भास्वरा इति तात्पर्यम् ।
११. गते–ग० ।

[1]मृणालान्तर्ध्वान्तः प्रकटतटसंहारसुभगां
कुलक्षेत्रोल्लासां[2] चरमपददां दीपकलिकाम् ।
सदानन्दाकारां [3]गतिगुणहरां चारुकिरणां
[4]प्रभावर्णश्यामां रुचिरवदनां भावयति[5] कः ।। २६ ।

[6]प्रतीक्षानन्दाब्धिं प्रकटचरणाम्भोजयुगलां
वियद्वर्णां कान्तां सुरवरसुपूजाविधिरताम् ।
महासूक्ष्मद्वारप्रचलनकरीं भेदनकरीं
दिवायोगाह्लादप्रियजनशिवां भावयति कः ।। २७ ।

अयोध्यापीठस्थामरुणकमनीं प्रेमगलितां
महारौद्रीं भीमां शतशतरविप्रेमनिकराम् ।
महादुःखार्तानां[7] नयनशुभगां भावविरहां
सतीं सीतामिन्द्रोत्सवनवघटां भावयति कः ।। २८ ।

---

१. सदान्तर्दंत्तध्यानविषयपरामिति–ख० ।
मूलान्तर्वा क......................इति ।

२. कुललेत्रोन्यन्ना मिति ख कुरुक्षेत्रोलासा–ग० ।

३. मतिगुणाहरामिति क तया तारकमयीमिति–क० ।

४. महारौप्यादिस्थां सकलकरुणामिति–ग० । —प्रभावर्णश्यामामिति पाठे प्रभावर्णेन श्यामा मिति विग्रहः ।

५. प्रसन्नां स्वे देहे कुलपथगतां गीतरमितां
परानन्दश्रेणीं नवरवलतां तामसहराम् ।
महारुद्राक्षिप्तां क्षितिमयहरां चारुकिरणां
महारौप्याद्रिस्थां सकलकरुणां भावयति कः ।।
—क पुस्तकपाठः; किन्तु मूले देयः ।

६. प्रतीक्षानन्दां विप्रगतचरणां कोटिविधुगां
वियद्वर्णां स्वस्थां निखिलवसुपूजा...........।

७. ....प्रचलनपराम्–ग० । —महादुःखार्तानामिति पाठे महान्ति दुःखानि महादुःखानि, तैरार्तानाम्, महादुःखार्तानाम् ।

सुधाब्धेराह्लादप्रकरणसुरां सौरभकरां
क्रियारूपां योग्यां [1]भुवमणिपूरप्रकृतिगाम् ।
गुरोः स्थानोद्योगां समनदहनां[2] शीतलवरां
त्रितत्त्वां तत्त्वज्ञां शमरहरशक्ति[3] भजति कः ॥ २९ ॥

[4]विकाराकाराङ्गीं तरुणरविकोटिश्रियमिमां
कुलाधारां सारां परमरसधारां [5]जयवराम् ।
कृपाच्छन्नाकामां[6] परमरसभाण्डेषु शुभदां
[7]भजेदिन्द्रां रुद्रां शशिमुखकराह्लादनिकराम् ॥ ३० ॥

रसाब्धौ विश्रान्तिं कुपितजनशान्तिं सकरुणां
त्रिलोकज्ञानस्थां मदननिलयां योगनिकराम् ।
मणिद्वीपच्छायां दशदलकलां केवलभवां
भवानीं [8]रुद्राणीं [9]वरदमणिपूरे भजति कः ॥ ३१ ॥

[10]कृपाब्धौ किं किं किमनुगतसुतां मौलिनमितां
शिवाङ्कां[11] मूलस्थां सकलमणिपूरस्थिरभवाम् ।
हिरण्याक्षीं तक्षां[12] क्षयकरणरश्मिच्छविशतां
विनोदीं पञ्चास्यप्रियगुणधरां[13]भावयति कः ॥ ३२ ॥

---

१. सतां शीतामिति—ग० । २. दमनां शीतलवरामिति—ग० ।

३. मुक्तिमिति—क० । —हरतीति हरः, हृधातोः पचाद्यच्-प्रत्ययः । समरस्य कामादि-संग्रामस्य हरो विजेता, तस्य शक्तिम्, भवानीम् ।

४. धाराङ्गीम्—ग० । ५. जयवरामिति—ग० ।

६. मग्नामिति—ग० । ७. भवोदभद्रामाद्यां—ग० ।

८. रौद्राणीमिति—क० । ९. वसदेति—क० ।

१०. कृपासारां दीर्घामनुगत-मौननमितमिति—ग० । —कृपाब्धौ इति पाठे षष्ठीतत्पुरुषः ।

११. शिवाख्यां चनाद्यां.........स्थल—ग० । —शिवाङ्कामिति पाठे शिवस्याङ्कः चिह्नं यस्यां सा ।

१२. सूक्ष्मां.........राश्यां स्थितिकरीम्, रश्मिमविशतीम्—ग० ।

१३. पञ्च आस्यानि मुखानि यस्य सः पञ्चास्यः, तस्य ये प्रिया गुणाः तेजस्वितादयः, तेषां धराम् । धराशब्दः पचाद्यजन्तः ।

महापद्माख्यां सकलधनदानाकुलचलां
चलानन्दोद्रेकप्रचयरससिन्धूद्भवहृदि[1] ।
हृदानन्दो ध्यायेत् सकलगुणदात्रीं[2] सुखमयीं
कलां सूक्ष्मात्यन्तां तिमिरदहनां कोटिधनदाम् ।। ३३ ।

दशकं यः पठेन्नित्यं श्रीविद्यां सुखदायिनीम्[3] ।
ध्यात्वा हृदयपद्माधो निर्मलात्मा सदा पठेत् ।। ३४ ।

मणिपूरस्थितं देवं रुद्रं पश्यति योगिराट् ।
रुद्राणीसहितं शम्भुं दृष्ट्वा मुक्तो भवेत् क्षणात् ।। ३५ ।

जीवन्मुक्तः स एवात्मा योगिनीवल्लभो भवेत् ।
योगात्मा परमात्मा च स हि साक्षादनीश्वरः ।। ३६ ।

स भित्त्वा मणि[4]पूराब्धि निर्मलं ज्योतिरुज्ज्वलम्।
शम्भोरीश्वरयोगज्ञक्रियानाथस्य[5] श्रीपतेः ।।
निकटे याति देव्याश्च स्थाने योगी न संशयः ।। ३७ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे मणिपूरभेदने भैरवीभैरवसंवादे त्रितत्त्व-लाकिनीशक्तिस्तवनं नाम चतुश्चत्वारिंशत्तमः पटलः ।।

●

---

१. सिन्धुरसहृदा मिति—क० । २. धात्रीमिति—क० ।

३. दायित्रीमिति—ग० ।

४. मणिपूरस्याधिः समुद्रः, तमिति यावत् ।

५ ईश्वरस्य योगः, तं जानातीति ईश्वरयोगज्ञः तस्य याः क्रियाः, तासां नाथः, तस्येति यावत् ।

अथ पञ्चचत्वारिंशः पटलः

आनन्दभैरवी उवाच—

अथ कालक्रमं वक्ष्ये यत्काले योगिराड् भवेत् ।
तत्कालं प्राणवायूनां निलयं सूक्ष्मसञ्चयम् ॥ १ ।

पुनः पुनः सञ्चयने दृढो भवति संवशी[1] ।
क्रियायां सञ्चरन्त्येव योगिन्यो योगमातरः ॥ २ ।

[2]यत्काले यत्प्रकर्त्तव्यं भानुरूप्यकुलार्णव ।
काले काले वशो याति परमात्मा निरामयः ॥ ३ ।

विना प्रयोगसारेण विना जाप्येन शङ्कर ।
कः सिद्धो जायते ज्ञानी योगी भवति कुत्र वा ॥ ४ ॥

अभ्यासमन्त्रयोगेन शनैर्योगी भवेन्नरः ।
प्रभाते ज्ञानशौचञ्च कुण्डलीभावनादिकम् ॥ ५ ।

तन्मध्ये चापि संस्कुर्याद् योगं [3]पञ्चामरादिकम् ।
ततो मन्त्रस्नानकार्यं मस्तके जलसेचनम् ॥ ६ ।

सन्ध्यावन्दनकार्यञ्च ततः कुर्यात् पृथक् पृथक् ।
तत उत्थाय सद्भूमौ[4] [5]शुद्धकोमलजासने ॥ ७ ।

उपविश्य सदाभ्यासी शुद्धकायासनञ्चरेत् ।
तत्कार्यसमये नाथध्यानं चैतन्यमेव च ॥ ८ ।

---

१. साधकः—ख० ।　　२. तत्काले तत्कर्तव्यमिति तन्निरूपा—ग० ।

३. पञ्चासवादिकम्—ग० । पञ्चामरादिकम्—पञ्च अमरा आदयो यस्य तत्तथा । अन्यपाठेऽपि इयमेव समासस्थितिः ।

४. सम्भूभाविति—ग० ।

५. ऊर्ध्वं—ग० । —शुद्धं कोमलजमासनं तस्मिन् इत्यर्थः ।

[1]कुण्डलिन्याः सदा कुर्यात् तन्मध्ये जपमेव च ।
आसनं सुन्दरं कुर्यात् [2]सव्यापसव्यभेदतः ॥ ९ ।

आसनादिकमाकृत्य शेषे [3]सुस्थासनं चरेत् ।
सुस्थासनं समाकृत्य चोर्ध्वंपद्मासनं चरेत् । १० ।

मस्तकाधः केशमध्ये हस्तौ दत्त्वा मनुं जपेत् ॥
चतुरशीतित्रिगुणमासनं भञ्जनं तथा ॥ ११ ।

प्रत्यासनं क्रमेणैव एतेषां द्विगुणं पुनः ।
एतेषामासनादीनां वक्तव्या [4]सङ्ख्यका पुनः ॥ १२ ।

अष्टाङ्गसाधनेनाथ वक्तव्यं सर्वमासनम् ।
प्राणायामं षोडशकमथ[5]वा द्वादशादिकम् ॥ १३ ।

स्वकर्णागोचरं कृत्वा पिबेद्वायुं सदा बुधः ।
ततः समाप्य तत्कार्यं मन्त्रयोगं समभ्यसेत् ॥ १४ ।

समाप्य मन्त्रयोगं च प्राणायामत्रयं चरेत् ।
तत उत्थाय नद्यादिं[6] विलोक्य चान्तरात्मनि ॥ १५ ।

स्नानं कृत्वा महायोगी मानसादिक्रमेण[7] तु ।
तत्रैव मानसं जापं समाप्य जपमेव च ॥ १६ ।

---

१. कुण्डलिन्यामिति–ग० ।

२. सव्यासव्यविभेदतः–ग० ।

३. चोद्र्वे पद्मासनमिति–ग० ।

४. वक्तव्याः संख्यकाः पुनः–ख० ।

आसनं यः करोत्येव वज्रकायः स एव हि ।
समाप्य चासनं सर्वं बद्धपद्मासने विशेत् ॥
चिबुकं वक्षसि श्रीमान् दत्त्वा कालीं विभावयेत् ।
ततः पद्मासनं कृत्वा प्राणायामं मुद्राचरेत् ॥

क० पुस्तके अधिकः, किन्तु मूले देयः ।

५. तथा वा–ग० ।

६. मद्यादि–ग० । —नदी आदिर्यस्य तत् ।

७. मानसमादिर्यस्य तेन क्रमेणेत्यर्थः ।

एकप्राणायामं[१] कुर्यात् कृत्वा तीरे विशेत् सुधीः ।
पिधाय पीतवसनं धर्माधर्मं विचिन्तयेत् ॥ १६ ।

ततः सन्ध्यावन्दनं च कृत्वा पूजाविधिं चरेत् ।
सर्वत्र कुम्भकं कृत्वा भावयित्वा पुनः पुनः ॥ १७ ।

मणिपूरे महापीठे ध्यात्वा देवीं कुलेश्वरीम् ।
पूजयित्वा विधानेन प्राणायामं पुनश्चरेत् ॥ १८ ।

ततः कुर्यात् साधकेन्द्रो विधिना कवचस्तवम् ।
सर्वत्र प्राणसंयोगाद् योगी भवति निश्चितम् ॥ १९ ।

अथवा कालजालानां वारणाय [२]महर्षिभिः ।
एतत् कार्यं समाकुर्याद् [३]योगनिर्णयसिद्धये ॥ २० ।

विना योगप्रसादेन (न ?) [४]कालः संवशो भवेत् ।
कालेन [५]योगमाप्नोति योगध्यानं स्वकालकम् ॥ २१ ।

योगाधीनं परं ब्रह्म योगाधीनं परन्तपः ।
योगाधीना सर्वसिद्धिस्तस्माद् योगं समाश्रयेत् ॥ २३ ।

योगेन ज्ञानमाप्नोति ज्ञानान्मोक्षमवाप्नुयात् ।
तत्क्रमं श्रृणु भूचक्रे [६]सर्वसिद्धयादिसाधनम् ॥ २४ ।

सिद्धिसाधनमन्त्रेण योगी भवति भूपतिः ।
शीघ्रं राजा भवेद् योगी शीघ्रं योगी भवेद् यतिः ॥ २५ ।

---

१. एकं प्राणायामकार्यमिति–ग० । —अयं पाठः समीचीनः प्रतीयते ।

२. महाऋषिः–ग० ।

३. योगिना योगसिद्धये–क० । —योगनिर्णयसिद्धये इत्यपि पाठः समीचीन एव, अर्थसमन्वयात् ।

४. न कालस्य वशो भवेदिति–ग० । ५. योगाधीनमिति–ग० ।

६. सर्वसिद्धादिसाधनमिति–क० । —सर्वासां सिद्धीनामादि प्रमुखं साधनमित्यर्थः । अथवा, सर्वाः सिद्धय आदिभूता यासां सिद्धीनां तासां साधनम् । अन्यपदार्थभूताः सिद्धयो दिव्या इत्यर्थः ।

शीघ्रं योगी भवेद्विप्रो यदि स्वधर्ममाश्रयेत् ।
स्वधर्मनिष्ठताज्ञानं [1]सज्ज्ञानं परमात्मनः ॥ २६ ।

तज्ज्ञानेन लभेद् योगं योगाधीनाश्च सिद्धयः ।
सिद्धयधीनं परं ब्रह्म तस्माद् योगं समाश्रयेत् ॥ २७ ।

स्वधर्मनिष्ठताज्ञानं स तज्ज्ञानं[2] समाश्रयेत् ।
योगयोगाद्भवेन्मोक्षो मम तन्त्रार्थनिर्णयः ॥ २८ ।

योगी ब्रह्मा मुरारिश्च[3] तथा योगी महेश्वरः ।
तथा योगी महाकालः[4] कौलो योगी न संशयः ॥ २९ ।

मणिपूरभेदने तु यत्नं कुर्यात् सदा बुधः ।
यदि चेन्मणिपूरस्थदेवताभेदको भवेत् ॥ ३० ।

सर्वक्षणं सुखी भूत्वा चिरं तिष्ठति निश्चितम् ।
महाप्रभं सुन्दरञ्च महामोहनिघातनम् ॥ ३१ ।

मेघाभं विद्युताभं च पूर्णतेजोमयं परम् ।
मणिभिर्ग्रथितं पद्मं मणीनां पूरमेव च ॥ ३२ ।

सूर्यकान्तै[5]श्चन्द्रकान्तैर्वह्निकान्तैर्महोज्ज्वलैः ।
इत्यादिमणिभिः सर्वं परं कान्तिगुणोदयम् ॥ ३३ ।

निविडे जलदे मेघे कोटिविद्युत्प्रभा यथा ।
तत्प्रकारं भावनीयं सिद्धानां ज्ञानगोचरम् ॥ ३४ ।

[6]अत्यन्तसूक्ष्ममार्गस्थं नित्यस्थानं हि योगिनाम् ।
मणिभिः शोभितं पद्मं मणिपूरं तथोच्यते ॥ ३५ ।

---

१. स्वज्ञानमिति–ग० । —स्वस्यात्मनो ज्ञानं स्वज्ञानम् । अथवा सतः परमात्मनो ज्ञानं सज्ज्ञानम् ।

२. सत्यज्ञानमिति–क० ।

३. ब्रह्माद्यवादी चेति–ग० । ४. भवेत्काल–ग० ।

५. सूर्यकान्तचन्द्रकान्तवह्निकान्तमहोज्ज्वलः इत्यादि मणिभिः सर्वं पूर्वं कान्तिगुणो दश–क० ।

६. अत्यन्तं सूक्ष्मो यो मार्गस्तत्र तिष्ठतीति भावः ।

दशकोमलपत्रैश्च समायुक्तं मनोहरम् ।
डादिकान्तवर्णयुक्तं स्थिरविद्युत्समाकुलम् ।। ३६ ।

शिवेनाधिष्ठितं पद्मं विश्वालोकनकारकम् ।
आदौ वर्णरूपकाणां[1] ध्यानं कुर्यात् [2]स्वधामयः ।। ३७ ।

महापद्मे मनो दत्त्वा निर्मलं परिभावयेत् ।
डादिफान्ता[3]क्षराणां च ध्यानाज्ज्ञानस्थिरो भवेत् ।। ३८ ।

[4]मनोधैर्यमुपागम्य दिव्यभक्तिं समालभेत् ।
वर्णध्यानं प्रवक्ष्यामि शृणुष्व परमेश्वर ।। ३९ ।

[5]यद्विभाव्यामरो भूत्वा चिरं तिष्ठति मानवः ।
महाधैर्यंक्रियां कुर्याद् वायुपानं शनैः शनैः ।। ४० ।

यत्र यत्र मनो याति तन्मयस्तत्क्षणाद्भवेत् ।
पूर्वादिदलमारभ्य ध्यानं कुर्यात् पृथग् पृथक् ।। ४१ ।

डां डां डां डाकिनीन्ता डमरुवररतां[6] तारिणींताररूपां ।
डिं डिं डिं डामरस्थां डमरुडमगृहे डंकडिंकिं[7] मनुस्थाम् ।
डं डं डं डामरेशीं डिमिडिमिडिमिगध्वाननिर्माणडोरां
डों डों डों डाकडं डः प्रडुम[8]डमुडां दाडिमामाश्रयामि ।। ४२ ।

ढां ढां ढां गाढढक्कां वरनिकरकरां बाढमाबाढमन्त्रां
ढिं ढिं ढिं नागरूपां भज भज विमलानन्दचित्तप्रकाशः[9] ।
श्रीं ढें ढं वज्रढूं खा खवट मटमरं स्वाहया टोंटबीजां ।
ढोंढोंढों ढक्कढक्कः प्रियढुनकरुणाकामिनीं लाकिनीं ताम् ।।४३।

---

१. वल्गुरूपकाणामिति–क० । २. सुधाशयः–क० ।

३. डादिभान्ताक्षराणां च–ख० । —ड आदिर्येषां तानि डादीनि, भ अन्तो येषां तानि भान्तानि, द्वयोरनयोरितरेतरयोगद्वन्द्वं कृत्वा अक्षरशब्देन सह पुनः कर्मधारयः ।

४. मनोऽश्चर्यमिति–ग० । ५. यदि भाव्यामर–ग० ।

६. करामिति–ख० । ७. डंकडोंमिगां मनुस्थमिति–क० ।

८. प्रडुममुडुमडुंमिति–क० ।

९. विमल आनन्दो यस्मिन्, तादृशे चित्ते प्रकाशः, परमात्मप्रकाश एव सम्भाव्यते ।

बाणस्थित्यसंस्थां रुचिनकरवणाकारणा वाणवाणिं
वीणां वेणूत्सवाढचां मणिगुणकरुणां नं खटीजप्रवीणम् ।
वेणुस्थानां सुमानां मणिमयपवमामन्त्रमालाविलोलां
सिन्दूरारक्तवर्णां तरुणघननवीनामलां भावयामि ।। ४४ ।

तारां तारकमञ्जजालविमलां तालादिसिद्धिप्रदां
[1]ताडङ्कामतितेजसा मुनिमनोयोगं वहन्तीं पराम् ।
[2]तां तारां तुलसीं तुलां तनुतटां[3] तर्कोद्भवां तान्त्रिकां
श्रीसूर्यायुततेजसीं भज मनः श्रीमातरं तापसीम् ।। ४५ ।

व्यग्रस्थां[4] स्थानसुस्थां स्थितिपथपथिकां थार्णकूटां
थमालीं गाथां योगां विपथां थमिति थमिति थं
वह्निजायां स्थिरासाम् । चन्द्रज्योत्स्नास्थलस्थां[5]
स्थिरपदमथनामुज्ज्वलामासनस्थां स्थैर्यां
स्थैर्याभिरामां प्रणवनव[6]सुधां चन्द्रवर्णां भजामि ।। ४६ ।

द्रां द्रीं द्रूं दीर्घदंष्ट्रां दशनभयकरां साट्टहासां कुलेशीं
दोषच्छत्रापहन्त्रीं दिवितरणदशा[7]दायिनीमादरस्थाम् ।
श्लिष्टाह्लादप्रदीप्तामखिलधनपदां दीपनीं भावयामि ।। ४७ ।

---

१. तातङ्क–ग० ।

२. तातङ्कानिभतेजसामिति–ख० ।

३. तातीयामिति–ख० ।

४. व्यग्रस्थं स्थानसुस्थं............धमानीं
—व्यग्रस्थामिति पाठे तु व्यग्रेषु जनेषु सन्तोषार्थं शान्त्यर्थं च तिष्ठति या सा, ताम् ।
गाथां गाथां विमोथामिति–ख० योथामिति–ग० ।

५. स्थिरास्थामिति–क० ।

६. प्रणवनवसुजामिति ग०, सृजामिति क०,

७. दोषैर्वृत्रापहन्ती दिविदरणादशा दायिनी मादस्थाम् ।
शिष्टाह्लादप्रदीप्तामखिलधनमदनमिति–ग० । –दिवि स्वर्गे तरणस्य या दशा, तां ददाति, तच्छीलाम् ।

धर्मां[1] श्रों ध्यानशिक्षां धरणिधरधरां धूमधूमावतीं तां
धूस्तूराकारवक्त्रां कुवलयधरणीं धारयन्तीं कराब्जम् ।
विद्युन्मध्यार्ककोटिज्वलनधरसुधां कोकिलाक्षीं सुसूक्ष्मां
ध्यात्वा ह्लादैकसिद्धिं धरणिधननिधिं सिद्धिविद्यां भजामि ॥४८॥

नित्यां नित्यपरायणां त्रिनयनां बन्धूकपुष्पोज्ज्वलां ।
कोटयर्कायुतसंस्थिरां नवनवां हस्तद्वयाम्भोरुहाम् ।
नानालक्षणधारणामलविधुश्रीकोटिरश्मिस्थितां
सानन्दां नगनन्दिनीं त्रिगुणगां नं नं प्रभां भावये[2] ॥ ४९ ॥

प्रीतिं प्रेममयीं [3]परात्परतरां प्रेष्ठप्रभापूरितां
पूर्णां पूर्णगुणोपरि प्रलपनां[4] मांसप्रियां पञ्चमाम् ।
व्यापारोपनिपातकापलपना[5] पानाय पीयूषपां
चित्तं प्रापय[6] पीतकान्तवसनां पौराणिकीं पार्वतीम् ॥ ५० ॥

स्फें स्फें[7] समें फणिवाहनां फणफणां[8] फुल्लारविन्दाननां
फेरूणां वरघोरनादविकटास्फालप्रफुल्लेन्मुखीम् ।
फं फं फं फणिकङ्कणां फणिति फं[9] मन्त्रैकसिद्धेः[10] फलां
भक्त्या ध्यानमहं करोमि नियतं वाञ्छाफलप्राप्तये[11] ॥ ५१ ॥

---

१. धक्षां श्रीध्यानसिद्धां ... वस्त्रां ... ध्याना ह्लादादि सिद्धि धवनवत ... इति–ग० ।

२. भावयेदिति–ग० ।

३. परां तपसियाञ्चालामिति–क० । — परात् = परापेक्षया परतराम्, उत्कृष्टतराम् ।

४. प्रपलनामिति–ग० ।

५. कापललपा पानापपीयूषपामिति–ग० ।

६. चित्तप्रापकपीव ... पौराणिकामिति–ग०,

७. स्फामिति–क० । ८. फलफलामिति–क० ।

९. फणामिति–ग० । १०. फणामिति–ग० ।

११. वाञ्छानामिच्छानां फलानि इच्छाविषयप्रयोजनानि, तेषां प्राप्तये ।

विद्युतां कारमध्ये तु विजलीरक्तवर्णकान्[1] ।
एवं ध्यात्वाखिलान् वर्णान् रक्तविद्युद्दलोद्यताम् ॥ ५२ ।

सदा ध्यायेत् कुण्डलिनीं कर्णिकामध्यगामिनीम्[2] ।
वरहस्तां[3] विशालाक्षीं चन्द्रावयवलक्षणाम् ॥ ५३ ।

चारुचन्दनदिग्धाङ्गीं[4] फणिहारविभूषणाम् ।
द्विभुजां कोटिकिरणां भालसिन्दूरशोभिताम् ॥ ५४ ।

त्रिनेत्रां कालरूपस्थां लाकिनीं लयकारिणीम् ।
सिद्धिमार्गसाधनाय ध्यायेद् वर्णान् दश क्रमात्[5] ॥ ५५ ।

चतुर्भुजां षड्भुजां च अष्टहस्तां [6]परापराम् ।
दुर्गां दशभुजां देवीं निजवाहनसुस्थिताम्[7] ॥५६ ।

सर्वास्त्रधारिणीं सर्वां [8]हस्तद्वादशशोभिताम् ।
चतुर्दशभुजां रौद्रीं तथा षोडशपालिनीम् ॥ ५७ ।

अष्टादशभुजां श्यामां हस्तविंशतिधारिणीम् ।
एवं ध्यात्त्वा पूजयित्त्वा रुद्राणीस्तोत्रमापठेत् ॥ ५८ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वर्णध्यानकथनं नाम[9] पञ्चचत्वारिंशत्तमः पटलः ॥

●

---

१. विद्युद्गणो.......ख० ।

२. काशिनीमिति–ग० । —कर्णिकामध्यगामिनीमिति पाठे कर्णिकानां मध्ये गच्छति तच्छीला ताम् ।

३. बहुहस्तामिति–ग० ।

४. दीर्घाङ्गीमिति–ग०,

५. दशाच्छदे–क० ।

६. प्रभा–ख० ।

७. सुप्रियामिति–ग० ।

८. दशहस्तास्त्र–ग० । —हस्तद्वादशशोभितामिति पाठे द्वादशहस्तैः शोभितामिति विग्रहः । तत्र द्वादशपदस्य परनिपातः; पूर्वनिपातस्यानित्यत्वात् । 'समुद्राभ्राद्घ.' इति सूत्रं तत्र प्रमाणम् ।

९. षट्चत्वारिंशत्तमः–ख० ।

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय